इन्द्रजालविद्यासंग्रहः।

तत्र

[इन्द्रजालशास्त्रम् + कामरत्नम् + दत्तात्रेयतन्त्रम् + षट्कर्म्म-
दीपिका + सिद्धनागार्जुनकक्षपुटम् ।]

पण्डितकुलपति बि, ए, उपाधिधारि-
श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्यात्मजाभ्यां
पण्डित-श्रीआशुबोध-विद्याभूषण-पण्डित-श्रीनित्यबोध-
विद्यारत्नाभ्यां प्रतिसंस्कृतः प्रकाशितश्च ।

तृतीयसंस्करणम्।

कलिकातामहानगर्य्याम्
वाचस्पत्ययन्त्रे
मुद्रितः।

इं १९१५।

इन्द्रजालविद्यासंग्रह-निघण्टुः ।

इन्द्रजालस्य ।

याः ।		पृष्ठाङ्काः ।
ावतीभवनम्	...	२
ीभवनम्	...	२
रजननम्	...	२
ाऽवस्थानम्	...	२
कत्वं, तद्गमनं, तस्मान्मुक्तिश्च		२
र्द्धानम्	...	२
ङ्करीकरणम्	...	२
ारान्तरेणान्तर्द्धानम्	...	२
णदृष्टिप्रसादनम्	...	३
नाजीवत्वप्राप्त्युपायः	...	३
अथ वश्याधिकारः ; तत्र—		
इतः प्रदर्शनीकरणम्	...	३
नतावश्यता, तद्भेदाश्च	...	४—७
तवशीकरणं, तद्भेदाश्च	...	७
य लिङ्गलेपाधिकारः, तद्भेदाश्च		७—८
य रक्षामन्त्रः	...	९
ष्टिप्रसादनम्	...	९
तवर्द्धनम्	...	९
वकरणम्	...	९
जनम्	...	९
विनदानम्	...	९
तापवर्द्धनम्	...	९
न्मादनम्	...	९
थीमारणम्	...	९

विषयाः ।		पृष्ठाङ्काः ।
अग्निप्रदर्शनम्	...	१०
कृत्रिमदुग्धम्	...	१०
राक्षसकौषम्	...	१०
भूतादिदर्शनम्	...	१०
क्लीबीकरणम्	...	१०
दूरीकरणम्	...	१०
अथ कालनियमः	...	१०
अथ पक्षादिनिर्णयः	...	११
अथ वशीकरणम्	...	११।१२
अथाकर्षणम्	...	१२
अथ जयः	...	१२
सौभाग्यम्	...	१३
अथ ईश्वरादिक्रोधशमनम्	...	१३
गजनिवारणम्	...	१३
व्याघ्रनिवारणम्	...	१३
अथ स्तम्भनम्, तत्र—		
सर्वयोगसिद्धिः	...	१४
मेघस्तम्भनम्	...	१४
नौकास्तम्भनम्	...	१४
निद्रास्तम्भनम्	...	१४
शस्त्रस्तम्भनम्	...	१४
गोमहिष्यादिस्तम्भनम्	...	१४
बुद्धिस्तम्भनम्	...	१५
चौरगतिस्तम्भनम्	...	१५
गर्भस्तम्भनम्	...	१५

विषयाः ।		पृष्ठाङ्काः ।
शुक्रस्तम्भनम्	...	१५
अथ मोहनम्	...	१५
देहरञ्जनम्	...	१६
मुखरञ्जनम्	...	१६
केशकृष्णीकरणम्	...	१६
केशशुक्लीकरणम्	..	१६
वाजीकरणम्	...	१६
जन्मबन्ध्याचिकित्सा	...	१७
काकबन्ध्याचिकित्सा	...	१७
मृतवत्साचिकित्सा	...	१७
गर्भस्रावचिकित्सा	...	१८।१९
शुष्कगर्भचिकित्सा	...	२०
सुखप्रसवयोगः	...	२०
स्तनवर्द्धनं स्तनोत्थापनञ्च	...	२०
योनिसंस्कारः	...	२१
लोमशातनम्	...	२१
मूत्रस्तम्भनम्	...	२१
पुरीषस्तम्भनम्	...	२१

कामरत्नस्य ।

वश्यादिकर्म्मणाम् ऋतुनिर्णयः		२२
तिथिनिर्णयः	...	२२
माहेन्द्रादिनियमः	...	२३
अङ्गुलिनिर्णयः	...	२३
मूलिकाग्रहणविधिः	...	२३
औषधविधिः, तद्ग्रहणादिकञ्च		२४
नतिः ...	...	२४
खननम् ...	...	२४

विषयाः ।		पृष्ठाङ्काः
अथ वशीकरणम्, तत्र—		
सर्वजनवशीकरणम्	...	२५—२
राजवशीकरणम्	...	२
स्त्रीवशीकरणम्	...	२९—३
पतिवशीकरणम्	...	३
अथाकर्षणम्	...	३३।३
अथ जयः ...	...	३४—३
सौभाग्यकरणम्	...	३
ईश्वरादीनां क्रोधोपशमनम्	...	३
अदातुः दातृशक्तिकरणम्	...	३
गजनिवारणम्	...	३
व्याघ्रनिवारणम्	...	३
अथ स्तम्भनम्, तत्र—		
शत्रूणां मुखस्तम्भनम्	...	३
नौकास्तम्भनम्	...	३
निद्रास्तम्भनम्	...	३८
शस्त्रस्तम्भनम्	...	३८
अग्निस्तम्भनम्	...	३९
गोमहिष्यादिस्तम्भनम्	...	४०
मनुष्यस्तम्भनम्	...	४०
सर्वशत्रु-बुद्धिस्तम्भनम्	...	४०
चौराणां गतिस्तम्भनम्	...	४१
गर्भस्तम्भनम्	...	४१
शुक्रस्तम्भनम्	...	४१
अथ सर्वजनमोहनम्	...	४२
राजकुलमोहनम्	...	४३
ईश्वरकुलमोहनम्	...	४३
दुष्टजनमोहनम्	...	४३
शत्रुमोहनम्	...	४३

षयाः ।	पृष्ठाङ्काः ।
हेषणम् ...	४४
अथ रञ्जनम्, तत्र—	
हरञ्जनम् ...	४४
रीरदौर्गन्ध्यहरप्रलेपः ...	४४
चादिदौर्गन्ध्यहरयोगः ...	४४
न्धिचयनाशनयोगः ...	४४
र्मदुर्गन्धनाशकयोगः ...	४५
र्मच्युतिनाशकयोगः ...	४५
नुपमाङ्गकरणयोगः ...	४५
मोहनगन्धयोगः ...	४५
खरञ्जनम् (तद्भेदाश्च) ...	४५
त्रपिड़कानाशकयोगः ...	४५
त्रस्य नीलत्वनाशकयोगः ...	४६
शस्य कृष्णीकरणम् ...	४६
शस्य यूकादि-निवारणम् ...	४६
इन्द्रलुप्तादिनिवारणम् ...	४७
शस्य शुक्लीकरणम् ...	४८
जीकरणयोगाः ...	४८।४९
मन्मदनमोदकः ...	४९
। गाढ़ीकरणम् ...	५०
द्रावणम् ...	५१
ङ्गस्य स्थूलीकरणं दृढ़ीकरणञ्च	५२
वर्द्धनं स्तनोत्थापनञ्च ...	५२
मादितैलम् ...	५३
नेसंस्कारः ...	५३
मपातनम् ...	५४
ढ़ीकरणं तत् शाम्यञ्च ...	५५
स्त्रीकृतलिङ्गपातोत्थापनम् ...	५५
बन्धनं तस्य मोचनञ्च ...	५६

विषयाः ।	पृष्ठाङ्काः ।
गृहकोट्टारकनिवारणम् ...	५७
नष्टपुष्पायाः पुष्पकरणम् ...	५७
गर्भपातनम् ...	५७
आमगर्भपातनम् ...	५८
अतिरजोनिवारणम् ...	५८—५९
बन्ध्याया गर्भधारणम् ...	५९
अथ जन्मबन्ध्याचिकित्सा ...	६०—६२
काकबन्ध्यालक्षणं तच्चिकित्सा च	६२
मृतवत्सालक्षणं तच्चिकित्सा च	६३
द्रुममूलघृतम् ...	६४
गर्भरक्षा ...	६५।६६
सामान्यौषधम् ...	६६
शुष्कगर्भचिकित्सा ...	६७
सूतिकानिरोधे सुखप्रसवयोगः	६७।६८
बालानां भूतग्रहादिनिवारणम्	६८—७०
बलिविधिः	७०
सद्योजातस्य अहितुण्डिकानिवारणम्	७०
स्त्रीणां पुष्परक्षा ...	७०
दुर्भगाकरणम् ...	७१
कलहकरणम् ...	७१
रक्षाविधिः	७१—७३
निद्रालुकरणम् ...	७३
निद्राभञ्जनम् ...	७४
बन्धनमोचनम् ...	७४
निगड़ादिभञ्जनम् ...	७४
गृहक्लेश(मूषिक-मशकादि)निवारणम्	७५
चेत्रस्य शस्यानामुपद्रवनाशनं जम्बुकादीनां तुण्डबन्धनञ्च	७६
पक्ष्यादिभयनिवारणम् ...	७७

विषयाः।	पृष्ठाङ्काः।
शस्यवृद्धिः	७७
गोमहिष्यादेर्दुग्धवर्द्धनम् ...	७७
उच्चाटनविधिः—तन्मन्त्रादिकञ्च	७७—७९
अथ विद्वेषणम् ...	८०
व्याधिकरणम् ...	८०—८२
शत्रुभ्रामणम् ...	८२
उन्मत्तीकरणम् ...	८२
अथ मारणम् ...	८३।८४
अश्वमारणम् ...	८४
शस्यनाशनम् ...	८५
रजकस्य वस्त्रनाशनम् ...	८५
धीवरस्य मत्स्यनाशनम् ...	८५
कुम्भकारस्य भाण्डनाशनम् ...	८६
तैलिकस्य तैलनाशनम् ...	८६
गोपानां दुग्धनाशनम् ...	८६
शाकनाशनम् ...	८६
वारजीविनः पर्णनाशनम् ...	८६
तन्तुवायस्य सूत्रनाशनम् ...	८७
शौण्डिकस्य मदिरानाशनम् ...	८७
कर्म्मकारस्य लौहनाशनम् ...	८७
अथ नानाकौतुकम्, तत्र—	
तैलकरणम्	८७
तत्क्षणात् सफलवृक्षकरणम्	८७
सद्यः पुष्पकरणम् ...	८८
सर्व्ववीजानां सद्योऽङ्कुरजननम्	८८
वृक्षकाण्डकरणम् ...	८८
पादुकाकरणम् ...	८८
जले मज्जननिवारणम् ...	८८
जले वर्त्तिज्वालनम् ...	८८

विषयाः।	पृष्ठाङ्काः।
अदृश्यता सञ्जननम् ...	८८
दशमुण्डकरणम् ...	८८
पञ्चमुखीभवनम् ...	८८
मयूरीभवनम् ...	८९
मार्ज्जारीभवनम् ...	८९
स्त्रीरूपधारणम् ...	८९
नानारूपधारणविधिः ...	८९
अग्निवत् निजमूर्त्तिप्रदर्शनम्	८९
मध्याह्ने तारकादर्शनम् ...	८९
शतयोजनपर्य्यन्तदर्शनम् ...	९०
अधोवायुनिःसारणम् ...	९०
अथ काम्यसिद्धिः ...	९०
वाक्यसिद्धिः	९०
गुप्तधन गुप्तप्रवेश-चौरदेवदानवप्रकाशनम्	९१
धनुर्विद्या	९१
धनधान्याक्षयकरणम् ...	९
श्रुतिधरकवित्वादिकरणे पथ्याघृतम्	९
ब्राह्मीघृतम्	९
किन्नरीकरणम् ...	९
चक्षुष्यं, चन्द्रोदया वटी च ...	९५।९
कर्णस्य बाधिर्य्य-क्रिमि-नाशनम्	९
कर्णपालीवर्द्धनम् ...	९
दन्तदृढीकरणम् ...	९
अत्याहारकरणम् ...	९
अनाहारकरणम् ...	
पादुकासाधनम् ...	१
अनावृष्टिकरणम् ...	१
निधिदर्शकाञ्जनम् ...	१००—१
अदृश्यीकरणम् ...	१०२—१

वेषयाः ।	पृष्ठाङ्काः ।
मृतसञ्जीवनी ...	१०६
वेषनामानि ...	१०७
वेषचिकित्सा ...	१०८
सर्पविषलक्षणम् ...	१०९—१११
सर्पविषौषधम् ...	१११—११७
वृश्चिकविषनिवारणम् ...	११७।११८
मूषिकविषनिवारणम् ...	११८
कुक्कुरविषनिवारणम् ...	११९
मत्स्यभेकादिविषनिवारणम् ...	११९
गृहगोधाविषनिवारणम् ...	११९
व्याघ्रादिविषनिवारणम् ...	११९
कीटविषनिवारणम् ...	१२०
सर्वजन्तुविषनिवारणम् ...	१२०
उपविषनिवारणम् ...	१२०
कृत्रिमविषनिवारणम् ...	१२१
योगजविषनिवारणम् ...	१२२
भल्लातकविषनिवारणम् ...	१२२
यक्षिणीसाधनम् ...	१२२—१२८
रसशोधनम् ...	१२८
रसमारणम् ...	१२९
हिङ्गुलशुद्धिः ...	१३०
गन्धकशुद्धिः	१३०।१३१

दत्तात्रेयतन्त्रस्य ।

साधारणोपदेशः ...	१३२
मोहनम्	१३३।१३४
अग्निस्तम्भनम् ...	१३५
आसनस्तम्भनम् ...	१३५
बुद्धिस्तम्भनम्	१३६

विषयाः ।	पृष्ठाङ्काः ।
शस्त्रस्तम्भनम् ...	१३६
शस्त्रलेपः	१३७
सेनानीस्तम्भनम् ...	१३७
सेनापलायनम् ...	१३८
गोमहिष्यादिस्तम्भनम् ...	१३८
मनुष्यस्तम्भनम् ...	१३९
मेघस्तम्भनम् ...	१३९
निद्रास्तम्भनम् ...	१३९
नौकास्तम्भनम् ...	१३९
जलस्तम्भनम् ...	१३९
गर्भस्तम्भनम् ...	१३९
विद्वेषणम्	१४०
उच्चाटनम्	१४१
सर्वजनवशीकरणम् ...	१४२।१४३
स्त्रीवशीकरणम् ...	१४४।१४५
पुरुषवशीकरणम् ...	१४६
राजवशीकरणम् ...	१४६
आकर्षणम् ...	१४७
त्वरितवज्र्यादिसिद्धियोगः ...	१४८—१५०
इन्द्रजालकौतुकम्, तत्र—	
मन्त्रः	१५१
रक्षामन्त्रः	१५१
दृष्टिबन्धनम् ...	१५१
सर्पदर्शनम्	१५१
वृश्चिकदर्शनम् ...	१५१
नकुलदर्शनम् ...	१५१
सर्पदर्शनभेदः ...	१५२
सरटदर्शनम् ...	१५२
तिमिरे दर्शनम् ...	१५२

विषयाः ।		पृष्ठाङ्काः ।
मीनजीवनम्	...	१५२
मार्ज्जारीकरणम्	...	१५२
मातङ्गीकरणम्	...	१५२
विलौहम् ...	...	१५२
तुरगीकरणम्	...	१५२
वृषभीकरणम्	...	१५२
मृगीकरणम्	...	१५३
सिंहीकरणम्	...	१५३
कुक्कुरीकरणम्	...	१५३
मयूरीकरणम्	...	१५३
ग्रहणदर्शनम्	...	१५३
अदृश्यीकरणम्	...	१५३
पद्मोत्पादनम्	...	१५३
आम्रोत्पादनम्	...	१५३
खड्गदर्शनयोगः	...	१५४
अदृश्यीकरणम्	...	१५४
प्रतापवर्द्धनम्	...	१५४
महेश्वरीकरणम्	...	१५४
ब्रह्मदर्शनयोगः	...	१५४
पद्मदर्शनयोगः	...	१५४
पिशाचीकरणम्	...	१५५
प्रमत्तीकरणम्	...	१५५
सूर्य्यदर्शनम् ...	...	१५५
दृष्टिबन्धयोगः	...	१५५
सद्योमारणम्	...	१५५
सर्वनर्त्तनयोगः	...	१५५
नटनर्त्तनम् ...	...	१५५
मूत्रस्तम्भनम्	...	१५५
अग्निप्रदर्शनम्	...	१५५

विषयाः ।		पृष्ठाङ्काः
तारकादर्शनम्	...	१५
अश्वदृष्टिरोधः	...	१५
अश्वमारणम्	...	१५६
रजतीकरणम्	...	१५
आकाशगमनम्	...	१५६
दुग्धीकरणम्	...	१५६
गुडीकरणम्	...	१५६
राक्षसीकरणम्	...	१५६
खेचरदर्शनम्	...	१५६
शस्त्रोत्तेजनम्	...	१५६
मूत्रदीपनम्	...	१५६
वशीकरणम्	...	१५७
युग्ममुद्रायोगः	...	१५७
वस्तुवर्द्धनम्	...	१५७
कलहनाशनम्	...	१५७
कलहकृद्योगः	...	१५७
क्लीवीकरणम्	...	१५७
प्रमदाकर्षणम्	...	१५८
पुंस्त्ववर्द्धनयोगः	...	१५८
शस्त्रारिकीलनम्	...	१५८
विघ्नविनाशनम्	...	१५९
यक्षिणीमन्त्रसाधनम्	...	१५९—१६२
अथ रसायनम्	...	१६२
ततः परीक्षा	...	१६३
रौप्यकरणम्	...	१६३
सुवर्णकरणम्	...	१६४
मृत्युकालज्ञानम्	...	१६४।१६५
अनाहारः ...	...	१६६
अत्यन्ताहारः	...	१६७

विषयाः ।	पृष्ठाङ्काः ।
निधिग्रहणम् ...	१६७
बन्ध्यागर्भधारणम् ...	१६८
मृतवत्सासुतजीवित्वम् ...	१६९।१७०
काकवन्ध्याप्रयोगः ...	१७१
विवादविजयम् ...	१७१
वाजीकरणम् ...	१७२
स्त्रीद्रावणम्	१७३
वीर्य्यस्तम्भनम् ...	१७४
लिङ्गवर्द्धनादियोगः, तत्र—	
मुषलीपमलिङ्गकरणम् ...	१७५
कामवर्द्धनम् ...	१७५
क्लीवत्वविनाशनम् ...	१७५
कामिनीमोहनम् ...	१७५
योनिसङ्कोचनम् ...	१७५
लोमशातनम् ...	१७६
स्तनोत्थापनम् ...	१७६
केशरञ्जनम् ...	१७६
केशपातनम् ...	१७७
भूतग्रहनिवारणम् ...	१७७
ग्रहदोषपीड़ानिवारणम् ...	१७७
सिंहादिभयनाशनम् ...	१७८
वृश्चिकभयनिवारणम् ...	१७९
अग्निभयनिवारणम् ...	१७९

षट्कर्म्मदीपिकायाः ।

विषयाः ।	पृष्ठाङ्काः ।
षट्कर्म्मणां सार्वकालिकत्वम्	१८०
षट्कर्म्माणि ...	१८०
षट्कर्म्मणां लक्षणम् ...	१८०
षट्कर्म्मणां देवता ...	१८०
षट्कर्म्मणां दिङ्नियमः ...	१८१
षट्कर्म्मणाम् ऋतुकालादिनिर्णयः	१८१
षट्कर्म्मणां तिथिवारनियमः	१८१
तेषां नक्षत्रनियमः ...	१८२
कालविशेषश्च ...	१८२
तेषां लग्ननियमः ...	१८३
भूतोदयव्यवस्था ...	१८३
दिङ्नियमः ...	१८३
वर्णभेदः	१८३
उत्थितसुप्तोपविष्टादयः ...	१८३
मन्त्राधिष्ठातृदेवता ...	१८४
मन्त्राणां वर्णादिसंज्ञा, तत्प्रयोगविधिश्च	१८४
कार्य्यविशेषे योजनपल्लवादिनिर्णयः	१८५
सम्पुटविधिः... ...	१८६
स्त्रीपुंनपुंसकमन्त्रनियमः ...	१८६
मन्त्रधर्म्माः	१८७
मुद्रादिविवेकः ...	१८७
आसनानि	१८७
विकटकुक्कुटासनलक्षणम् ...	१८७
षण्मुद्राः	१८८
देवताध्यानविधिः ...	१८८
अथ रक्षार्थम् ...	१८८
कुण्डम् (होमविधिः) ...	१८९
यथोत्तरं प्रयोगोत्कर्षः ...	१९०
कुम्भस्थापनम् ...	१९०
मालानिर्णयः ...	१९२
जपाङ्गुलिनियमः ...	१९२
जपदिङ्नियमः ...	१९३

विषयाः।		पृष्ठाङ्काः।
जपलक्षणम्	...	१९३
कुण्डदिङ्नियमः	...	१९३
शान्त्यादौ द्रव्यनियमः	...	१९३
वह्निलक्षणं तज्जिह्वालक्षणञ्च	...	१९५
अग्निनामानि	...	१९६
होमव्यवस्था	...	१९६
स्रुक्स्रुवनियमः	...	१९७
होममुद्राः	...	१९७
अथ शान्तिकर्म	...	१९८
अच्युतादौ पूजादि	...	१९८
हरिध्यानम्	...	१९९
अथ आथर्वणोक्तज्वरशान्तिः		२०१
तन्त्रोक्तज्वरशान्तिः	...	२०२
तुम्बुरुभैरवमन्त्रः	...	२०२
अथ सञ्जीवनीविद्या	...	२०३
मृत्तिकाशिवलिङ्गपूजाविधिः		२०३
तत्र लिङ्गप्रमाणम्	...	२०४
शिवपूजाविधानम्	...	२०५
लिङ्गमुद्राः	...	२०६
मुखवाद्यफलम्	...	२०६
लिङ्गस्तवः	...	२०७
शैववर्जनीयानि	...	२०८
शिवनिर्माल्यभोजनम्	...	२०९
हारीतोक्तनवदोषाज्ज्वरशान्तिः		२०९
हारीतोक्तज्वरहरणबलिमन्त्रः		२१३
पुत्तलकादिसर्जनम्	...	२१३
गर्गोक्तज्वरहरणबलिः	...	२१४
वाराही मायातन्त्रोक्त चण्डीपाठफलम्		२१५
दाक्षिणात्यमतेन चण्डीपाठक्रमः		२१७

विषयाः।		पृष्ठाङ्काः।
चण्डीध्यानम्	...	२१८
चण्डीपाठक्रमः	...	२१९
त्र्यम्बकविधानम्	...	२१९
त्र्यम्बकप्रयोगः	...	२१९
मृतसञ्जीवनी	...	२२२
शुक्रोपासित मृतसञ्जीवनीविद्या		२२३
मृत्युञ्जयप्रयोगः	...	२२३
शूलरोगप्रतीकारः	...	२२४
गर्भजननोपायः	...	२२५
निगड़भञ्जनम्	...	२२५
अथ वृष्टिकरणम्	...	२२५
शीर्षादिरोगनाशार्थम् आथर्वणमन्त्राः		२२६
अथ वशीकरणम्	...	२२७—२३१
अथ स्तम्भनम्	...	२३२—२३८
वगलाप्रयोगः	...	२३८—२४१
प्रकारान्तरेण स्तम्भनम्	...	२४१—२४८
अथ आकर्षणम्	...	२४९।२५०
अथ विद्वेषणम्	...	२५१—२५३
अथ उच्चाटनम्	...	२५३ २५४
अथ मारणम्	...	२५५—२६४

सिद्धनागार्जुनकक्षपुटम्।

तन्त्राणां नामानि	...	२६५
साध्यप्रयोगाः	...	२६५
कूर्मचक्रम्	...	२६६
जपमालाभेदाः	...	२६८
जपसमयनियमः	...	२६९
जपासनस्थानानि	...	२६९

विषयाः ।	पृष्ठाङ्काः ।
सनास्थानध्यानादयः ...	२७०
रहीमादिभेदाः ...	२७१
वीक्षोपायान्तराणि ...	२७२
वशीकरणप्रकरणम् ...	२७४
जनवश्यप्रकरणम् ...	२८१
वादिजयः ...	२८३
दमनप्रयोगः ...	२८३
वश्यप्रकरणम् ...	२८४
द्रावणम् ...	२९०
वशीकरणम् ...	२९३
कर्षणप्रकरणम् ...	२९६
भनप्रकरणम् ...	२९८
स्तम्भनम् ...	३०५
स्तम्भनम ...	३०७
पालपूजा ...	३१३
हनप्रकरणम् ...	३१४
ाटनम् ...	३१६
रणम् ...	३२१
यणम् ...	३२५
धिजननम् ...	३२६
दौर्भाग्यकरणादि ...	३२९—३३१
ीकरणम् ...	३३२
बन्धनम् ...	३३३
क्रोगनिवारणम् ...	३३४
तुकप्रकरणम् ...	३३५—३३८
जालविद्यासाधनम् ...	३३८—३४७
गुणीसाधनम् ...	३४८—३५५
नम् ...	३५६
राञ्जनम् ...	३६०

विषयाः ।	पृष्ठाङ्काः ।
अथ पादाञ्जनम् ...	३६१
अथ लेपाञ्जनम् ...	३६१
अथ मालाञ्जनम् ...	३६२
यक्षिणीसाधनव्यवस्था ...	३६३
अज्ञातनिधानस्य ग्रहणम् ...	३६४—३६७
अथ खड्गप्रकरणम् ...	३६८—३७५
पादुकासाधनम ...	३७५—३७८
गुटिकासाधनम् ...	३७८
मृतसञ्जीवनीविद्या ...	३७९।३८०
कालवञ्चनम् ...	३८१
मृत्युलक्षणज्ञानम् ...	३८२—३८४
अथ कौतककलापाः ...	३८४
भीमवड्डीजनम ...	३८४
क्षुत्पिपासानिरोधादि ...	३८५।३८६
जगद्वशीकरणम ...	३८७
पतिवशीकरणम् ...	३८७
प्रसूतिकृद्योगः ...	३८७
जयकरणम् ...	३८७
चौरबाधाशमनम् ...	३८७
परसैन्यदर्पनाशः ...	३८७
वीरसैन्यपलायनम् ...	३८७
जले स्थले गमनम् ...	३८७
शवजयकरणम ...	३८८
व्याघ्रादिबाधानाशनम् ...	३८८
अतिमोहकृदञ्जनम् ...	३८८
वन्ध्यादिकरणम् ...	३८८
ज्वरभूतादिशमनम् ...	३८९
चतुर्विधविघ्ननाशनम् ...	३८९
पुत्रसञ्जननम् ...	३८९

विषयाः ।	पृष्ठाङ्काः ।
उच्चाटनम् ...	३८९
विवादजयः ...	३८९
निधिदर्शनम् ...	३८९
विषादिनाशनम् ...	३८९
पश्वादिवशीकरणम् ...	३८९
पलितत्वनाशनयोगः ...	३८९
वीर्य्यधारणम् ...	३
शतयोजनगामित्वम् ...	३
पुरुषस्यापि नारीत्वम् ...	३
यक्ष्मापस्मारनाशनयोगः ...	३
अदृश्यता ...	३
खेचरत्वसिद्धिः ...	३

इन्द्रजालविद्यासंग्रहः ।

इन्द्रजालम् ।

(सिद्धखण्डम् ।)

अथातः संप्रवक्ष्यामि चेन्द्रजालमनुत्तमम् ।
व्याधिदारिद्र्यहरणं जरामृत्युविनाशनम् ॥ १ ॥
इन्द्रस्य यो न जानाति जालेशं रुद्रभाषितम् ।
निग्रहानुग्रहे तस्य का शक्तिः परमेश्वरि ! ॥ २ ॥
न तेषां जायते सिद्धिर्गोत्रे चेत्रे गृहेऽपि वा ।
इन्द्रजालं न जानाति स क्रुद्धः किं करिष्यति ? ॥ ३ ॥
न जीवति वरारोहे ! संसारे दुःखसागरे ।
इन्द्रजालं न जानाति कुतः सौख्यं भवेत् ततः ॥ ४ ॥
कौतूहलं कुतस्तेषां कुतः कामा वरानने ! ।
संसारसागरे घोरे कामलुब्धाश्च मानवाः ।
रुद्रकर्म न हि तेषां कुतः सौख्यं विधीयते ? ॥ ५ ॥
यथा नदीनदाः सर्वे सागरे समुपागताः ।
तथा सर्वाणि शास्त्राणि इन्द्रजालस्थितानि च ॥ ६ ॥
तप्तानाञ्च यथा भानुः शीतलानां यथा शशी ।
गम्भीराणां यथा सिन्धुर्जालेन्द्रश्च तथा प्रिये ! ॥ ७ ॥
तथा किं बहुनोक्तेन वर्णनेन पुनः पुनः ? ।
जालेन्द्रस्य समं शास्त्रं न भूतं न भविष्यति ॥ ८ ॥
अथातः संप्रवक्ष्यामि ओषधीनां विधिं वरे ! ।
येन विज्ञानमात्रेण सर्वसिद्धिर्भविष्यति ॥ ९ ॥

महाकालस्य वीजानि प्रस्थमेकं समाहरेत् ।
धात्रीरसेन देवेशि ! सप्त वारान् विभावयेत् ॥

गुटिका कर्त्तव्या, तां गुटिकां मुखे निक्षिप्य पारावतो भवति ॥ १० ॥

अथातः संप्रवक्ष्यामि शृणु त्वं मम वल्लभे ! ।

छागस्य शीर्षं संगृह्य कृष्णमृत्तिकां पूरयित्वा पुनः धुस्तूरवीजानि वापयेत्, काले तानि पुष्पितानि भवन्ति, तदा यस्योपरि निक्षिपेत् स छागो भवति ॥ ११ ॥

मयूरशीर्षमादाय कृष्णचतुर्दश्यां मृत्तिकां पूरयेत्, शण-वीजानि वापयेत्, यदा फलितानि पुष्पितानि भवन्ति, तदा शणवीजानि ग्रीवायां बन्धयेत् । मयूरो भवति ॥ १२ ॥

कृष्णचतुर्दश्यां मयूरशीर्षमादाय कृष्णमृत्तिकायां पूरयेत्, कार्पासवीजानि वापयेत्; यदा फलितानि पुष्पितानि भवन्ति, तदा पुष्पफले संगृह्य समस्तं पेषयित्वा अङ्गं विलिप्य पानीय-मध्ये प्रविश्य तथा जले तिष्ठति यथा स्थले ॥ १३ ॥

कृष्णकाकशीर्षमादाय काकमाचीवीजानि वापयेत्, यदा फलितानि पुष्पितानि भवन्ति, तदा तत् फलं संगृह्य मुखे प्रक्षिप्य-काको भवति, काक इव गच्छति मह्याम् उद्गीर्णे मोक्षः ॥ १४ ॥

पारावतशीर्षमादाय कृष्णमृत्तिकां पूरयित्वा तिलवीजानि वापयेत्, क्षीरोदकेन सिञ्चनीयं, यदा पुष्पितानि भवन्ति, तदा मुखे संस्थाप्य अन्तर्हितो भवति ॥ १५ ॥

तेषां फलानां चूर्णं कृत्वा तेन चूर्णेन यं स्पृशति, स किङ्करो भवति, सर्वस्वं ददाति ॥ १६ ॥

तानि तिलानि संगृह्य नेत्राञ्जनेन सह पिष्ट्वा कपिला-दुग्धेन गुटिकां कारयेत् । सप्तरात्रं पाचयेत्, तां गुटिकां मुखे निक्षिप्य अन्तर्हितो भवति, देवैरपि न दृश्यते मनुष्याणां

का कथा। उड्डीर्णेन पुरुषो भवति। जीवेद्वर्षशतं स्त्रियः सर्वे जनाश्च वश्या भवन्ति॥ १७॥

गृध्रशिरः समादाय कृष्णचतुर्दश्यां कृष्णमृत्तिकायां निक्षिपेत्, लशुनवीजानि वापयेत्; यदा फलं पुष्पं भवति, तदा पुष्यानक्षत्रे पुष्पं गृहीत्वा अञ्जनेन सह कपिलाघृतेन कज्जलं पातयेत्, चक्षुरञ्जनीयं, तावत् योजनशतं पश्यति मेदिनीं, दिवा नक्षत्राण्यपि पश्यंति। लाभस्तस्य—यत् किञ्चित् कर्त्तुमिच्छति तत् करोति न संशयः॥ १८॥

अन्ये च सर्वे जीवाः एवम् उष्ट्रगर्दभमहिष्यादि-लघुवृहज्जीवाः। यत् यत् वीजं यस्य शिरसि वापयेत्; यदा पुष्पितं फलितं भवति, तदा यस्य वीजानि मुखे निक्षिप्यन्ते स जीवो भवति नात्र सन्देहः॥ १९॥

सर्वेषां साधारणमन्त्रः।

ओं क्रीं क्रीं क्रें ऐं लं लं ओं भौ स्वाहा। एकादशाक्षरो मनुरस्य, पुरश्चरणं लक्षजपः। दशांशहोमः घृतेन, तर्पणं मार्जनं ब्राह्मणभोजनादिकं कारयित्वा सिद्धिर्भवति॥ २०॥

अथ वश्याधिकारः।

मातुलुङ्गस्य मूलन्तु धुस्तूरवीजकेन च।
पलाण्डुपुष्पमादाय सूक्ष्मचूर्णन्तु कारयेत्॥
योऽस्य गन्धं समाघ्राति स च स्नेहेन पश्यति।
दुन्दुभिं पटहांश्चैव शङ्खांश्चैव तु लेपयेत्॥
एष भूतोपसृष्टानां कुमारीणां गृहेषु च।
भूपतेः सेव्यमानानां तथापत्यापजीविनाम्।
न चाग्निर्दह्यते वेश्म यत्रैष सोऽगदो भवेत्॥ २१॥

अत्र मन्त्रः।—ओं रक्तचामुण्डे अमुकं मे वशमानय क्रीं क्रीं हूं फट्। अयुतं जप्तव्यम्॥ २२॥

ओं नमोऽस्तु आदित्याय किलि किलि चिलि चिलि धूमं लिहि यक्षिणि मोदते हि शाकिनि अनिदुद्रु शूलपाणि स्वाहा। वर्णाः ४०। शिलाकृतिके मन्त्रे।—ओं नमो गुहावासिन्यै गुहपति गुहिले मनोजवो ओं एं ओं विज्वे नमः। शिलायाः कृतिः करलिखिता खदिरानलसन्तप्तलिङ्गा यतो नवयोषितोऽपि आकर्षणम्। वर्णाः २६। ओं नमः कपालरुद्राय सर्वलोकवशङ्कराय अनाथायाप्रतिहतबलवीर्य्यपराक्रमप्रभवाय हा हा हे हे पच पच मारय मारय कपट कपट काट सर्प कर्मकरि अमुकं मे वशमानय स्वाहा! अयुतजपाद्वशीकरोति॥ २३॥

अन्यप्रकारः। पारावतस्य हृदयं चक्षुर्जिह्वा च शोणितम्।
अञ्जनं रोचनायुक्तं वनितावशकृत्परम्॥

तत्र मन्त्रः।—ओं नय नय मञ्जारिणि नमो देव्यै स्वाहा। एकविंशतिवारान् परिजप्य सिद्धिर्भवति॥ २४॥

अन्यप्रकारः। कपालं मानुषं गृह्य कनकस्य फलानि च।
कर्पूरं मधुसंयुक्तं निष्पिष्य तिलकेन च॥
नारी वा पुरुषोऽनेन वश्यो भवति नित्यशः।
एष कापालिको योगो वशिष्ठस्य शुभो मतः॥ २५॥

पुरुषवशीकरणम्।

कर्पूरं बालुकं लाक्षा रजसा सप्तभावितम्।
रतिकाले भगं लिप्य पतिर्दासो भविष्यति॥ २६॥

अन्यप्रकारः। नरजिह्वां समुद्धृत्य सूक्ष्मचूर्णन्तु कारयेत्।
जलेन च सुशीतेन दापयेत् तद्विचक्षणः॥
पाने फले च पुष्पे च भक्ष्ये भोज्ये च दापयेत्।
प्रजापतिकुलोद्भूता यदि साक्षादरुन्धती।
साऽभिषक्तं प्रियं याति नान्यं पुरुषमिच्छति॥ २७॥

अन्यप्रकारः। कनकञ्चाप्यपामार्गं सुरसा गौरसर्षपाः।
तिलतैलेन पिष्टाऽपि योनिलेपः प्रशस्यते॥

अत्र मन्त्रः।—ओं नमः शय्यायै दरि विदरि यामिनि अमुकं मे वशमानय स्वाहा॥ २८॥

अन्यप्रकारः। हरितालं श्मशाने कृष्णचतुर्दश्यां चिप्त्वा कुष्ठ-विमिश्र ग्राह्यम्, अवश्यं वशी भवेत् स नरः॥ २९॥

अन्यप्रकारः। ऋतुनवलोचनतालाललाटास्थित्राणसाधितं तैलम्।
सकलमनुजेन्द्रललनावशङ्करं भैकरालये पुष्ये॥

नरतैलं प्रेताम्बरवर्त्तिकं कृत्वा रात्रौ प्रज्वाल्यार्कवृक्षस्कन्धे कज्जलं कृत्वा चक्षुषी अभ्यञ्जयेत्; यं पश्यति स वश्यो भवति॥ ३०॥

अन्यप्रकारः। कर्णदन्तमलं लाला स्वदेहाच्चि मलत्रयम्।
नासिकोद्भवरक्तञ्च चूर्णमेतद्दलायुतम्॥
एतत् सर्वं समुद्धृत्य गुटिकां कारयेद्बुधः।
पानभोजनके देया वशीकरणमुत्तमम् ३१॥

अन्यप्रकारः। काकजिह्वा वचा कुष्ठम् आत्मनो रुधिरं स्त्रियाः।
तद्भाविताश्च मञ्जिष्ठा तगरं गौरसर्षपाः॥
शिवनिर्माल्यसंयुक्तं समभागानि कारयेत्।
भोज्ये पानेऽथवा देयाः स्त्रीणान्तु वशकारकाः॥
नित्यं पुरुषमिच्छन्ती मृतमप्यनुगच्छति॥ ३२॥

अन्यप्रकारः। कृष्णसर्पमप्यङ्गुलप्रमाणं शिरश्छित्त्वास्यास्यं सर्षपादिभिः पूरयित्वा छायाशुष्कं शोषयेत्। परतः सर्षपान् ग्राहयित्वा तानि यस्मै दीयन्ते स वश्यो भवति॥ ३३॥

अन्यप्रकारः। पूगीफलं निर्गिलित्वा अपानमार्गे निर्गतं गृह्य धुस्तूररसान्तरितं कृत्वा सप्त दिनानि पूजयेत्। पुनः कुङ्कुम-चन्दनैरधिभाव्य यस्मै दीयते स वश्यो भवति॥ ३४॥

अन्यप्रकारः। दर्दुरयुग्मं गृहीत्वा तद्धूमेन हि दाहयेत्।
तद्भस्म-सहपानेन वश्यकृत् परमो मतः ॥ ३५ ॥

अन्यप्रकारः। अजगन्धस्य पत्राणि वचाकुष्ठेन भावयेत्।
श्मशानभस्मसंयुक्तं चूर्णञ्चेत्त्रिषु दुर्लभम्।
अनेनैव तु चूर्णेन जोटयेत् विश्व पादपम् ॥
पुष्पितं फलितं दृष्ट्वा चूर्णं वृक्षाद्विलग्नयेत्।
तत्क्षणात् फलते वृक्षो नरनारीषु,का कथा ॥ ३६ ॥

अन्यप्रकारः। जिह्वामूले सप्तरात्रं सैन्धवेनापि मिश्रितम्।
ददाति यस्य पानेषु सोऽपि वश्यो भवेत् क्षणात् ॥३७॥

अन्यप्रकारः। गोपित्तं सैन्धवञ्चैव बृहतीफलमेव च।
लेपमेतत् प्रयोक्तव्यं नरनारीवशङ्करम् ॥ ३८ ॥

अन्यप्रकारः। बलामूलं चूर्णयित्वा रक्तरेतःसमन्वितम्।
दद्यात् पानेन प्रमदां क्षिप्रमेव वशं नयेत् ॥
पुत्रादिञ्च धनं त्यक्त्वा दासीवत् वर्त्तते सदा।
यत्र वा नीयते तत्र पश्चात् भ्रमति विह्वला ॥ ३९ ॥

अन्यप्रकारः। वल्मीकमृत्तिकया प्रतिकृतिं कृत्वा क्षीरेण स्नाप्याऽऽज्येन विभाज्य तस्य लवणाहुतिमेकविंशतिवारं जुहुयात्, त्रिरात्रेण वश्यो भवति, सप्तरात्रेणाथवा। देवीञ्च गान्धारीं यक्षिणीं शुक्रस्यापि पत्नीं वशमानयति ॥ ४० ॥

अन्यप्रकारः। उद्गातुः पक्षिणो मलमात्मनो रुधिरान्वितम्।
स्त्रीपुंसयोः प्रदातव्यं वशीकरणमुत्तमम् ॥

अत मन्त्रः।—त्रिशूलिने त्रिनेत्राय हिलि हिलि स्वाहा। वर्णाः १४। सप्तजप्तेन सिद्धिः ॥ ४१ ॥

अन्यप्रकारः। कृष्णपक्षचतुर्दश्यां मृतभस्म तु ग्राहयेत्।
स्त्रीणाञ्च मूर्ध्नि दातव्यं विद्यया परिजप्तया ॥

दह्यते मुह्यते नारी पच्यते शुष्यतेऽपि च।
अङ्गानि चैव भज्यन्ते यदि तं न समाविशेत्॥

अत्र मन्त्रः।—ओं नमश्चामुण्डे श्मशानवासिनि स्वाहा।
वर्णाः १४। सप्तरात्रेण प्रेरकः॥ ४२॥

अन्यप्रकारः। श्वेतार्कं रोचनायुक्तम् आत्ममूत्रेण पेषयेत्।
ललाटे तिलकं कृत्वा त्रैलोक्यं क्षोभयेत् क्षणात्।
दृष्टिमात्रेण तेनैव सर्वो भवति किङ्करः॥ ४३॥

अन्यप्रकारः। श्वेतार्कं चन्दनेनैव रमयेत् संह लेपयेत्।
दीयते कस्यचिद्दापि पश्चाद्दासो भविष्यति॥ ४४॥

अथ पतिवशीकरणम्।

मधुकं सह तैलेन सार्षपेण तु पेषयेत्।
तेनैव पाणिमभ्यज्य भर्त्रा सा सहिता स्वपेत्।
संवृत्ते मैथुनीभावे पतिर्दासो भविष्यति॥ ४५॥

अन्यच्च।

मनःशिला कुङ्कुमसर्षपाश्च तथाच कुष्ठं सहदेवदारु।
रक्तञ्च रक्तं पलितेन सार्द्धं प्रपेषयेत् सूक्ष्मतरं महान्तम्॥४६॥
प्रस्नातपूर्वाभिमुखोऽपि भूत्वा संस्मृत्य लक्ष्मीश्वरकेण पूज्य।
ततः प्रकुर्य्यात् तिलकं ललाटे वामाच्च हस्ताच्चतुरङ्गुलीभिः॥
पुंदृष्टमात्रेण भवेत् सकान्तादासातिदासश्च किमत्र चित्रम्॥४७॥

अथ लिङ्गलेपाधिकारः।

बृहतीफलमूलानि पिप्पली मरिचानि च।
तया रोचनया सार्द्धं लिङ्गलेपोत्तमो मतः॥ ४८॥
निःशेषस्त्रीजगत्कर्षं नाम्ना स्त्रीहृदयाङ्कुशम्।
मोहनं शस्त्रमेतद्धि मदनस्य स्मृतं बुधैः॥ ४९॥

अन्यच्च। कुष्ठञ्च धातकीपुष्पं मरिचानि वचा तथा।
अनेन लिङ्गमालिप्य कृत्स्नां श्यामां वशं नयेत् ॥
तासां चित्तहरोऽप्येषा मृतमप्यनुगच्छति।
विवशा भक्तिभावेन पश्चात् सर्वं प्रयच्छति ॥ ५० ॥

अन्यच्च। पञ्चरत्नानि संगृह्य शुभानि च यथेच्छया।
सर्वाणि समभागानि प्रियङ्गुश्चापि तत्समम्।
नागरं दशभागेन लेपः कान्तावशङ्करम् ॥ ५१ ॥

अन्यच्च। देवदारुवचाकुष्ठं चतुर्थं विश्वभेषजम्।
अम्लवीजरसैर्युक्तं गौरी श्यामावशङ्करम् ॥ ५२ ॥

अन्यप्रकारः। हरिद्रा वृहतीमूलं भद्रमुस्तं तथोत्पलम्।
कृष्णं विड़ङ्गं वैरञ्च समभागानि कारयेत्।
लिङ्गलेपोत्तमो ह्येष रक्तवल्लीवशङ्करः ॥ ५३ ॥

अन्यप्रकारः। हरिद्रा पिप्पलीमूलं पद्मं मधुकमेव च।
एतानि समभागानि नवनीतेन पेषयेत्।
लिङ्गलेपोत्तमो ह्येष गौरीप्रीताय शाङ्करः ॥
कौशिकशोणितलेपात् सेचनाद्वा पुष्टं भवेल्लिङ्गम्।
तद्वशं तेजस्तम्भमयःकीलकसदृशं भवेच्च ॥ ५४ ॥

वीर्य्यस्तम्भनम्। कौशिकं रुधिरं गृह्य गोमूत्रेण च पेषयेत्।
वीर्य्यं हि स्तम्भयेन्नित्यं प्रहरार्द्धं न संशयः ॥ ५५ ॥

सर्वसाधारणमन्त्रः।—ओं एं क्लीं क्लीं श्रीं फट् स्वाहा। अनेन मन्त्रेण
सर्वयोगानभिमन्त्र्य सिद्धिः ॥५६॥

इति श्रीसिद्धखण्डे तन्त्रसारे इन्द्रजालतन्त्रम्।

ईश्वर उवाच। इन्द्रजालं विना रक्षां न करोतीति निश्चितम्।
रक्षामन्त्रं महामन्त्रं सर्वसिद्धिप्रदायकम् ॥

अथ मन्त्रः।—ओं नमो नारायणाय विश्वम्भराय इन्द्रजालकौतुकानि दर्शय दर्शय सिद्धिं कुरु कुरु स्वाहा। अष्टोत्तरशतजप्तेन सिद्धिः।

अथ रक्षामन्त्रः।

ओं नमः परब्रह्मपरमात्मने मम शरीरे पाहि पाहि कुरु कुरु॥

दृष्टिप्रसादनम्। उलूकस्य कपालेन घृतेनाहृतकज्जलम्।
तेन नेत्राञ्जनं कृत्वा रात्रौ पठति पुस्तकम्॥ १॥

बलवर्द्धनम्। अङ्कोलबीजनिक्षिप्ते गुरुवारे मुखे गजे।
मन्त्रेण सिञ्चयेन्नित्यं यावद्बीजफलं ह वै॥
त्रिलोहैर्वेष्टितं कृत्वा एकबीजं मुखे स्थितम्।
मत्तमातङ्गवीर्य्यस्तु वायुतुल्यपराक्रमः॥
दश हेम द्विषट् ताम्रं षोड़शं रुप्यभागकम्।
एवं संख्या त्रिलोही च ज्ञातव्या सर्वकर्मणि॥ २॥

वृक्षकरणम्। यानि कानि च बीजानि जङ्गमं स्थलमेव च।
अङ्कोलबीजनिक्षिप्ते मुखे भूमितले ध्रुवम्॥
तद्बीजं मुखमध्यस्थं त्रिलोहैर्वेष्टितं कुरु।
तद्रूपो हि भवेन्मर्त्त्यो नान्यथा शङ्करोदितम्॥ ३॥

फलनम्। यानि कानि च बीजानि अङ्कोलतैलमेलनात्।
सफलो जायते वृक्षः सिद्धियोगमुदाहृतम्॥ ४॥

जीवनदानम्। शवमुखे बिन्दुमात्रं तत्तैलं निक्षिपेद् यदि।
एकयामं भवेज्जीवो नान्यथा शङ्करोदितम्॥ ५॥

प्रतापवर्द्धनम्। शिग्रुबीजस्थितं तैलं पारावतपुरीषकम्।
वराहस्य वसायुक्तं गृहीत्वा च समं समम्॥
गर्दभस्य वसायुक्तं हरितालं मनःशिला।
एभिस्तु तिलकं कृत्वा यथा लङ्केश्वरो नृपः॥ ६॥

उन्मादनम्। उलूविष्ठां गृहीत्वा तु एरण्डतैलपेषणात्।
यस्याङ्गे निक्षिपेद्बिन्दुं स क्षिप्तो जायते ध्रुवम्॥ ७॥

सद्यो मारणम्। सर्पदन्तं गृहीत्वा तु कृष्णवृश्चिककण्टकम्।
कृकलासरक्तसंयुक्तं सूक्ष्मचूर्णन्तु कारयेत्।

यस्याङ्गे निक्षिपेच्चूर्णं सद्यो याति यमालयम्॥ ८॥

अग्निप्रदर्शनम्। सिन्दूरं गन्धकं तालं समं पिष्ट्वा मनःशिलाम्।
तल्लिप्तवस्त्रं शिरसि अग्निवद्दृश्यते ध्रुवम्॥ ९॥

कृत्रिमदुग्धम्। अर्कक्षीरं वटक्षीरं क्षीरं डुम्बरसम्भवम्।
गृहीत्वा पात्रके लिप्ते जलपूर्णं करोति च।
दुग्धं सञ्जायते तत्र महाकौतुककौतुकम्॥ १०॥

राक्षसकरणम्। अङ्कोलतैललिप्ताङ्गो दृश्यते राक्षसाकृतिः।
पलायन्ते नराः सर्वे पशुपक्षिगजा हयाः॥ ११॥

भूतादिदर्शनम्। अङ्कोलस्य तु तैलेन दीपं प्रज्वालयेन्नरः।
रात्रौ पश्यति भूतानि खेचराणि महीतले॥ १२॥

क्लीवीकरणम्। बुधे वा शनिवारे वा कृकलां परिगृह्य च।
शत्रुर्मूत्रयते यत्र कृकलां तत्र निक्षिपेत्॥
नपुंसकं भवेत् सत्यं नान्यथा शङ्करोदितम्।
निखनेद्भूमिमध्येषु उद्धृते च पुनः सुखी॥ १३॥

दूरीकरणम्। गन्धकं हरितालञ्च गोमूत्रञ्च विषं तथा।
सूक्ष्मचूर्णमयं कृत्वा किञ्चिदङ्गिं विनिक्षिपेत्।
विघ्नाः सर्वे पलायन्ते यथा युद्धेषु कातराः॥ १४॥

इति दत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे इन्द्रजालकौतुकदर्शनं नाम एकादशः पटलः।

अथ कालः।

वश्याकर्षणकर्म्माणि वसन्ते योजयेत् प्रिये!।
ग्रीष्मे विद्वेषणं कुर्य्यात् प्रावृषि स्तम्भनं तथा॥
शिशिरे मारणञ्चैव शान्तिकं शरदि स्मृतम्।
हेमन्ते पौर्णमास्याञ्च ऋतुकर्म्मविशारदः॥ १॥
वसन्तश्चैव पूर्वाह्णे ग्रीष्मो मध्याह्न उच्यते।
वर्षा ज्ञेया पराह्णे तु प्रदोषे शिशिरः स्मृतः।
अर्द्धरात्रे च हेमन्तः शरदं तत्परं स्मृतम्॥ २॥

अथ पक्षादिनिर्णयः।

कृष्णपक्षे मारणादि शुक्लपक्षे च वर्द्धनम्।
द्वादश्यां मारणं कर्म्म एकादश्यां तथैव च॥
तृतीयां नवमीञ्चैव वश्याकर्षञ्च कारयेत्।
स्तम्भनञ्च चतुर्दश्यां चतुर्थ्यां प्रतिपद्यपि॥
द्वितीयां षष्ठीमष्टम्यां कारयेत् शान्तिकर्म्म च॥ ३॥
अश्विनीमृगमूलाद्य पुष्या पुनर्वसुस्तथा।
वश्याकर्षञ्च कर्त्तव्यं कारयेच्च सदा बुधः॥
ज्येष्ठा च उत्तराषाढ़ा अनुराधा च रोहिणी।
कारयेन्मारणं शान्तिं स्तम्भनं विजयं तथा।
विधिमन्त्रसमायुक्तमौषधं सफलं भवेत्॥ ४॥

अथ वशीकरणम्।

सिन्दूरमाक्षिककपोतमलानि पिष्ट्वा
लिङ्गं विलिप्य रमते तरुणीं नवोढ़ाम्।
शान्तिं न याति पुरुषो मनसाऽपि नूनं
दासीभवेदिति मनोहरदिव्यमूर्त्तिः॥ ५॥

पुष्ये रुद्रजटामूलं मुखस्थं कारयेद्बुधः।
ताम्बूलादौ प्रदातव्यं वश्या भवति निश्चितम्।
तथैव पाटलीमूलं ताम्बूलेन तु वश्यकृत्॥ ६॥
नागपुष्पं प्रियङ्गुञ्च तगरं पद्मकेशरम्।
जटामांसी समं नीत्वा चूर्णयेत् मन्त्रवित्तमः।
स्वाङ्गं धूपयते तेन भजते कामवत् स्त्रियः॥

ओं मूलो मूलो महामूलो सर्वं संक्षोभय भयेभ्य उपद्रवेभ्यः स्वाहा। धूपमन्त्रः॥ ७॥

पानीयस्याञ्जलीन् सप्त दत्त्वा विद्यामिमां जपेत्।
सालङ्कारां नवां कन्यां लभते मासमात्रतः॥

अत्र मन्त्रः।—ओं विश्वावसुर्नामगन्धर्वः कन्यानामधिपतिः। सुरूपां सालङ्कारां देहि मे नमस्तस्मै विश्वावसवे स्वाहा।

कन्यागृहे शालकाष्ठं क्षिपेदेकादशाङ्गुलम्।
ऋक्षे च पूर्वफल्गुण्यां यस्तां कन्यां प्रयच्छति॥ ८॥

अथ सर्वजनवशीकरणम्।

शिला च रोचनामूलं वारिणा तिलके कृते।
दृष्टिमात्रे वशं याति नारी वा पुरुषोऽपि वा॥
स्वर्णेन वेष्टनं कृत्वा तेनैव तिलके कृते।
सम्भाषणेन सर्वेषां त्रैलोक्यं वशमानयेत्॥ ९॥

ओं क्रीं क्लीं ऐं ह्रौं भोगप्रदा भैरवी मातङ्गी त्रैलोक्यं वशमानय स्वाहा। औषधोपरि सहस्रजपं कुर्य्यात्; पुनः सप्तवारजपेन तिलकं कारयेत्, शत्रुसमोऽपि वश्यो भवति।

इति कालनाथविरचिते इन्द्रजाले प्रथमोऽध्यायः।

अथाकर्षणम्।

ओं क्रीं चामुण्डे ज्वल ज्वल प्रज्वल प्रज्वल स्वाहा। अनेन मन्त्रेण स्त्रियं दृष्ट्वा जपं कुर्य्यात्, तत्क्षणात् पृष्ठतः समागच्छति। पूर्वमेवायुतजपेन सिद्धिः॥ १०॥

अश्लेषायां समादाय अर्ज्जुनस्य च व्रध्नकम्।
अजामूत्रेण सम्पिष्य स्त्रीणां शिरसि दापयेत्।
पुरुषस्य पशूनां वा क्षिपेदाकर्षणं भवेत्॥ ११॥

अथ जयः।

गोजिह्वा शिखिमूलं वा मुखे शिरसि संस्थिता।
कुरुते सर्ववादेषु जयं पुष्ये समुद्धृते॥ १२॥
मार्गशीर्षपौर्णमास्यां शिखिमूलं समुद्धरेत्।
बाहौ शिरसि वा धार्य्यं विवादे विजयो भवेत्॥ १३॥

गिरिकर्णीं शमीं गुञ्जां श्वेतवर्णां समाहरेत्।
चन्दनेनान्वितञ्चैव तिलकेन जयी नरः॥ १४॥
कनकार्कवटा वह्निर्विद्रुमः पञ्चमस्तथा।
तिलकं कुरुते यस्तु पश्येत् तं पञ्चधा रिपुः॥ १५॥
आर्द्रायां वटवन्दाकं गृहीत्वा धारयेत् करे।
संग्रामे जयमाप्नोति जयां स्मृत्वा जयी भवेत्॥

अस्य मन्त्रः।—ओं नमो महाबलपराक्रम-समस्तविद्याविशारद अमुकस्य भुजबलं बन्धय बन्धय, दृष्टिं स्तम्भय स्तम्भय, अङ्गानि धूनय धूनय, पातय पातय महीतले ह्रीं॥ १६॥

सौभाग्यम्। पुष्योद्धृतं सितार्कस्य मूलं वामेतरे भुजे।
बद्ध्वा सौभाग्यमाप्नोति दुर्भगापि न संशयः॥ १७॥
रक्तं चितार्कमूलन्तु सोमग्रस्ते समुद्धृतम्।
क्षौद्रैः पिष्ट्वा वटीं कुर्य्यात् तिलकं शुभमङ्गना॥ १८॥

अथ ईश्वरादिक्रोधशमनम्।

ओं शान्ते प्रशान्ते सर्वक्रोधोपशमनि स्वाहा। अनेन मन्त्रेण त्रिःसप्तधा जपेन मुखं मार्जयेत्। ततः क्रोधोपशमनं भवति॥ १९॥

गजनिवारणम्। श्वेतापराजितामूलं हस्तस्थं वारयेद्गजम्।
मूलं त्रिशूल्या वक्त्रस्थं गजबन्धकरं भवेत्॥ २०॥

व्याघ्रनिवारणम्। मुखस्थं बृहतीमूलं हस्तस्थं व्याघ्रभीतिजित्।

ह्रीं ह्रीं ह्रीं श्रीं श्रो श्रो स्वाहा। इत्यष्टाचरमन्त्रेण लोष्ट्रं पठित्वा क्षिपेत्; तदा मुखं न चालयति गन्तुमशक्यः।

मूलं कृष्णचतुर्दश्यां ग्राहयेल्लाङ्गलीभवम्।
हस्तस्थं व्याघ्रभीतादिभयहृत् परिकीर्त्तितम्॥ २१॥

इति इन्द्रजालतन्त्रे तृतीय उपदेशः।

अथ स्तम्भनम्।

श्वेतगुञ्जोत्थितं मूलं मुखस्थं दुष्टतुण्डजित्।

ओं ह्रीं रक्ष रक्ष चामुण्डे तुरु तुरु अमुकं मे वशमानय वशमानय स्वाहा अयं चामुण्डामन्त्रः।

सर्वयोगसिद्धिः। पुष्यार्के मधुवन्दाकं गृहीत्वा प्रक्षिपेद्बुधः।

सभामध्ये च सर्वेषां मुखस्तम्भः प्रजायते ॥ १ ॥

मेघस्तम्भनम्। इष्टकद्वयसम्पुटमध्ये मेघसंख्यक्तचतुरस्रं विलिख्य उद्याने स्थापयेत्, तदा मेघान् स्तम्भयति। मन्त्रः।—ओं मेघान् स्तम्भय स्तम्भय स्वाहा ॥ २ ॥

नौकास्तम्भनम्। भरण्यां क्षीरकाष्ठस्य कीलं पञ्चाङ्गुलं क्षिपेत्।

नौकामध्ये तदा नौका-स्तम्भनं जायते ध्रुवम् ॥ ३ ॥

निद्रास्तम्भनम्। मूलं बृहत्या मधुकं पिष्ट्वा नस्यं समाचरेत्।

निद्रास्तम्भनमेतद्धि मूलदेवेन भाषितम् ॥ ४ ॥

शस्त्रस्तम्भनम्। कपित्थस्य च वन्दाकं कृत्तिकायां समाहरेत्।

वक्त्रसंस्थन्तु देवस्य शस्त्रस्तम्भनकं परम् ॥ ५ ॥

करे सुदर्शनामूल-बन्धनात् स्तम्भनं तथा ॥

अत्र मन्त्रः।—ओं अहो कुम्भकर्ण महाराक्षस निकषागर्भसम्भूत परसैन्यस्तम्भन महाभय रणरुद्र आज्ञापय स्वाहा। अष्टोत्तर-सहस्रजपात् सिद्धिः ॥ ६ ॥

गृहीत्वा शुभनक्षत्रे अपामार्गस्य मूलकम्।

लेपमात्रे शरीराणां सर्वशस्त्रनिवारणम् ॥ ७ ॥

पुष्यार्के श्वेतगुञ्जाया मूलमुद्धृत्य धारयेत्।

हस्ते काण्डभयं नास्ति संग्रामे च कदाचन ॥ ८ ॥

अथ गोमहिष्यादिस्तम्भनम्।

उष्ट्रस्यास्थि चतुर्दिक्षु निखनेद्भूतले ध्रुवम्।

गां मेषीं महिषीं वाजीं स्तम्भयेत् कारिणीमपि ॥ ९ ॥

बुद्धिस्तम्भनम्। भृङ्गराजमपामार्गं सिद्धार्थं सहदेविकाम्।
श्वेतं वचाञ्च श्वेतार्कं ध्रुवमेतान् समाहरेत्॥
लौहपात्रे विनिक्षिप्य द्विदिनान्ते समुद्धरेत्।
तिलकैः सर्व्वभूतानां बुद्धिस्तम्भनकृत् परम्॥
ओँ नमो भगवते विश्वामित्राय नमः, सर्व्वमुखीभ्यां विश्वामित्र आगच्छ आगच्छ स्वाहा। उक्तयोगस्यायं मन्त्रः॥ १०॥

अथ चौरगतिस्तम्भनम्।

अत्र मन्त्रः।—ओँ ब्रह्मवेशिनि शिवे रक्ष रक्ष स्वाहा। अनेन मन्त्रेण सप्त पाशान् गृहीत्वा त्रीणि कट्यां बद्धा अपरान् मुष्टिभ्यां धारयेत्॥ ११॥

अथ गर्भस्तम्भनम्।

ग्राह्यं कृष्णचतुर्द्दश्यां धुस्तूरस्य तु मूलकम्।
कट्यां बद्धा रमेत् कान्तां न गर्भं धारयेत् क्वचित्॥
मुक्तेन लभते गर्भं पुरा नागार्ज्जुनोदितम्।
तन्मूलचूर्णं योनिस्थं न गर्भं सम्भवेत् क्वचित्॥ १२॥
सिद्धार्थमूलं शिरसि बद्धा कान्तां रमेत् तु याम्।
न गर्भं धारयेत् सा स्त्री मुक्तेन लभते पुनः॥ १३॥

अथ शुक्रस्तम्भनम्।

नीलीमूलं श्मशानस्थं कट्यां बद्धा तु वीर्य्यधृक्॥
रक्तापामार्गमूलन्तु सोमवारे निमन्त्रयेत्।
भौमे प्रातः समुद्धृत्य कट्यां बद्धा तु वीर्य्यधृक्॥ १४॥

अथ मोहनम्।

शृङ्गीवचानलदसर्जरसं समानं
कृत्वा त्रुटिं मलयजञ्च षडेकमिश्रम्।
यो धूपयेत्त्रिजगृहं वसनं शरीरं
तस्यापि दास इव मोहमुपैति लोकः॥ १५॥

भृङ्गराजः केशराजो लज्जा च सहदेविका।
एभिस्तु तिलकं कृत्वा त्रैलोक्यं मोहयेन्नरः॥
"श्रीं श्रं श्रां इं ईं उं ऊं ऋं ॠं फट्।"
अनेनैव तु मन्त्रेण कृत्वा ताम्बूलभावनम्।
साध्यस्य मुखनिक्षिप्ते मोहमायाति तत्क्षणात्॥

"श्रीं भीं क्षीं भीं मोहय" इमं मन्त्रं वारत्रयं जपेत्। मोहमाप्नोति मानवः॥ १६॥

देहरञ्जनम्। कदम्बपत्रं लोध्रञ्च अर्ज्जुनस्य च पुष्पकम्।
पिष्ट्वा गात्रोद्वर्त्तनाच्च कायदुर्गन्धनाशनम्॥ १७॥

एलाशटीपत्रकचन्दनानि तोयाऽभया शिग्रुघनामयानि।
ससौरभोऽयं सुरराजयोग्यः ख्यातः सुगन्धो नरमोहयोग्यः॥१८॥

अथ मुखरञ्जनम्।

रसालजम्बूफलगर्भसारः सकर्कटो माक्षिकसंयुतश्च।
स्थितो मुखान्ते पुरुषस्य रात्रौ करोति पुंसां मुखवासमिष्टम्॥
चूर्णं मुराकेशरकुष्ठकानां प्रातर्दिनान्ते परिलेढ़ि या स्त्री।
अप्यर्द्धमासेन मुखस्य वासः कर्पूरतुल्यो भवति प्रकाशः॥ १९॥

अथ केशकृष्णीकरणम्।

लौहकिट्टं जवापुष्पं पिष्ट्वा धात्रीफलं समम्।
त्रिदिनं लेपयेत् शीर्षं त्रिमासं केशरञ्जनम्॥ २०॥

अथ केशशुक्लीकरणम्।

अजाक्षीरेण सप्ताहमन्वहं भावयेत् तिलान्।
तत्तैललिप्ताः केशाः स्युः शुक्लाश्च नात्र संशयः॥ २१॥

अथ वाजीकरणम्।

अश्विन्यां वटवन्दाकं क्षीरैः पिष्ट्वा महाबलः।
पुष्योद्धृतं पिबेन्मूलं श्वेतार्कस्य प्रयत्नतः।
सप्तरात्रन्तु गोक्षीरैर्वृद्धोऽपि तरुणायते॥ २२॥

चूर्णं विदार्य्याः स्वरसेन तस्या विभावितं भास्कररश्मिजाले।
मध्वाज्यसंमिश्रितमेव लीढ़ेद्दश स्त्रियो गच्छति निर्विशङ्कः॥२३॥

अथ जन्मवन्ध्याचिकित्सा।

सम्मूलपत्रां सर्पाक्षीं रविवारे समुद्धरेत्।
एकवर्णगवां क्षीरैः कन्याहस्तेन पेषयेत्॥
ऋतुकाले पिवेद्वन्ध्या पलार्द्धं तद्दिने दिने।
क्षीरशाल्यन्नमुद्गञ्च लघ्वाहारं प्रदापयेत्।
एवं सप्तदिनं कुर्य्यात् वन्ध्या भवति गर्भिणी॥ १॥
उद्वेगं भयशोकञ्च दिवानिद्रां विवर्जयेत्।
न कर्म कारयेत् किञ्चिद्वर्जयेत् सावगाहनम्।
पतिसङ्गं चरेत् सा च नात्र कार्य्या विचारणा॥ २॥
कृष्णाऽपराजितामूलं छागीक्षीरेण संपिवेत्।
ऋतुकाले समायाते भुक्त्वा गर्भधरा भवेत्॥ ३॥
गोक्षुरस्य तु वीजन्तु पिवेन्निर्गुण्डिकारसैः।
त्रिरात्रं सप्तरात्रं वा वन्ध्या भवति गर्भिणी॥ ४॥

अथ काकवन्ध्याचिकित्सा।

अश्वगन्धीयमूलन्तु ग्राहयेत् पुष्यभास्करे।
पेषयेन्महिषीक्षीरैः पलार्द्धं भक्षयेत् सदा।
सप्ताहाल्लभते गर्भं काकवन्ध्या चिरायुषम्॥

अथ मृतवत्साचिकित्सा।

प्राङ्मुखी कृत्तिका-ऋक्षे वन्ध्या कर्कोटकीं हरेत्।
तत्कन्दं पेषयेत् तोयैः कर्षमात्रं सदा पिबेत्॥ १॥
या वीजपूरद्रुममूलमेकं क्षीरेण पक्वं प्रपिवेद् विमिश्रम्।
ऋतौ निजं या तु पतिं प्रयाति दीर्घायुषं सा तनयं प्रसूते॥२॥
मञ्जिष्ठा मधुकं कुष्ठं त्रिफला शर्करा बला।
मेदा पयस्या काकोली मूलञ्चैवाश्वगन्धजम्॥

अजमोदा हरिद्रे द्वे हिङ्गुः कटुकरोहिणी।
उत्पलं कुमुदं द्राक्षा काकोल्यौ चन्दनद्वयम्॥
एतेषां कार्षिकैर्भागैर्घृतप्रस्थं विपाचयेत्।
शतावरीरसं क्षीरं घृतस्येदं चतुर्गुणम्॥
संपिबेन्नियतं नारी नित्यं स्त्रीषु च शस्यते।
पुत्रान् जनयते नारी मेधाढ्यान् प्रियदर्शनान्॥
या चैवास्थिरगर्भा स्यात् या नारी जनयेन्मृतम्।
अल्पायुषञ्च जनयेत् या च कन्याः प्रसूयते॥
योनिदोषे रजोदोषे गर्भस्रावे च शस्यते।
प्रजावर्द्धनमायुष्यं सर्वग्रहनिवारणम्॥
नाम्ना फलघृत ह्येतदायुष्यं परिकीर्त्तितम्।
नोक्तञ्च लक्षणामूलं वदन्त्यत्र चिकित्सकाः॥
जीववत्सा-शुक्लवर्णाघृतमत्र तु दीयते।
अरण्यगोमयेनात्र वह्नेर्ज्वाला प्रदीयते॥

अत्र पयस्या—क्षीरयुक्तं भूमिकुष्माण्डम्, उत्पलं—नीलम्।

अथ गर्भस्रावचिकित्सा।

प्रथमे मासि। गोक्षीरैः पेषयेत् तुल्यं पद्मकेशरचन्दनम्।
पतने तत् पिबेन्नारी महागर्भः स्थिरो भवेत्॥
अथवा मधुकं दारु शरवृक्षस्य वीजकम्।
संपिष्य क्षीरकाकोलीं पिबेत् क्षीरैश्च गोभवैः॥ १॥

२ये " नीलोत्पलं मृणालञ्च यष्टिः कर्कटशृङ्गिका।
गोक्षीरैश्च द्वितीये च पिबेत् शाम्यति वेदना॥ २॥

३ये " श्रीखण्डं तगरं कुष्ठं मृणालं पद्मकेशरम्।
पिबेत् शीतोदकैः पिष्ट्वा तृतीये वेदनावती॥
अथवा क्षीरकाकोली बलाऽनन्तापयः पिबेत्॥ ३॥

४र्थे मासि। शीतोत्पलं मृणालानि गोक्षीरककशेरुकम्।
तुर्य्यमासे गवां क्षीरं पिवेत् सा वेदनापरा ॥
अथवा मधुकं रास्नां श्यामां ब्राह्मणयष्टिकाम्।
अनन्तां पेषयित्वा तु गवां क्षीरैः समं पिवेत् ॥ ४ ॥

५मे " पुनर्नवा च काकोली तगरं नीलमुत्पलम्।
गोक्षीरं पञ्चमे मासि गर्भक्लेशहरं भवेत् ॥
अथवा बृहतीयुग्मं यज्ञाङ्गं कट्फलं त्वचः।
गोघृतं क्षीरसंयुक्तं पिवेत् पिष्ट्वा च पञ्चमे ॥ ५ ॥

६ष्ठे " सिता काशाऽऽखुमज्जा च शीततोयेन पेषयेत्।
षष्ठे मासि गवां क्षीरैः पिबेत् क्लेशं निवर्त्तयेत् ॥
अथवा गोक्षुरं शिग्रुं मधुकं पृश्निपर्णिकाम्।
बलायुक्तं पिवेत् पिष्ट्वा गोदुग्धं षष्ठमासके ॥ ६ ॥

७मे " काष्ठकं पौष्करं मूलं शृङ्गाटं नीलमुत्पलम्।
पिष्ट्वा च सप्तमे मासि क्षीरैः पीत्वा प्रशाम्यति ॥
अथवा मकरद्राक्षां शृङ्गाटञ्च सकेशरम्।
मृणालं शर्करायुक्तं क्षीरैः पेयन्तु सप्तमे ॥ ७ ॥

८मे " यष्टी पद्माक्षार्कमुस्तं केशरं गजपिप्पली।
नीलोत्पलं गवां क्षीरैः पिबेदष्टममासके ॥
अथवा विल्वमूलञ्च कपित्थं बृहती शमी।
इक्षुपाटलयोर्मूलं एभिः क्षीरं प्रसाधयेत्।
तत्पिवेदष्टमे मासि गर्भे शाम्यति वेदना ॥ ८ ॥

९मे " विशालावीज-कक्कोलं मधुना सह लेपयेत्।
वेदना नवमे मासि शान्तिमाप्नोति नान्यथा ॥
अथवा मधुकं श्यामा ह्यनन्ता क्षीरकाकली।
एभिः सिद्धं पिवेत् क्षीरं नवमे वेदनावती ॥ ९ ॥

१०मे "　शर्करा गोस्तनी द्राक्षा सक्षौद्रं नीलमुत्पलम्।
पाययेद्दशमे मासि गवां क्षीरैः प्रशान्तये॥
अथवा शुद्धसंसिद्धं गोक्षीरं दशमे पिबेत्।
अथवा मधुकं दारु शुद्धक्षीरेण संपिबेत्॥ १०॥

क्षौद्रं वृषं चन्दनसिन्धुजातं महेन्द्रराजं पयसा सुपिष्टम्।
गर्भं क्षरन्तं प्रतिहन्ति शीघ्रं योगो विभुञ्जन् किल मूलदेवैः॥११

शुष्कगर्भचिकित्सा। गोक्षीरं शर्करायुक्तं गर्भशुष्कप्रशान्तये।
पिबेद्वा मधुकं चूर्णं गाम्भारीफलचूर्णकम्।
समांशं गव्यदुग्धेन गर्भिणी रोगशान्तये॥

अथ सुखप्रसवयोगः।

श्वेतं पुनर्नवामूलं चूर्णं योनौ प्रवेशयेत्।
प्रसूते तत्क्षणान्नारी गर्भे सति प्रपीड़िते॥ १॥
वासकस्य तु मूलन्तु चोत्तरस्थं समुद्धरेत्।
कट्यां बद्धा सप्तसूत्रैः सुखं नारी प्रसूयते॥ २॥
सहदेव्याश्च मूलं वा कटिस्थं प्रसवे सुखम्॥ ३॥
अपामार्गस्य मूलन्तु ग्राहयेच्चतुरङ्गुलम्।
द्वारि प्रवेशयेद् योनौ तत्क्षणात् सा प्रसूयते॥ ४॥

अथ स्तनवर्द्धनं स्तनीत्थापनञ्च।

तैलं वचादाड़िमकल्कसिद्धं सिद्धार्थजं लेपनतो नितान्तम्।
नारीकुचौ चारुतरौ सुपीनौ कुर्य्यादसौ योगवरः प्रदिष्टः॥ १॥
श्रीपर्णिकाया रसकल्कसिद्धं तिलोद्भवं तैलवरं प्रदिष्टम्।
तूलेन वक्षोजयुगे प्रदेयं प्रयाति वृद्धिं पतितोऽपि नार्य्याः॥ २॥

प्रथमकुसुमकाले नस्ययोगेन पीतं
सनियममसरास्यं तण्डुलाम्भो युवत्या।
कुचयुगलसुपीनं क्वापि नो याति पातं
कथित इति पुरैवं चक्रदत्तेन योगः॥ ३॥

अथ योनिसंस्कारः।

प्रक्षालयेन्निम्बकषायनीरैः स्विन्नाज्यकृष्णागुरुगुग्गुलूनाम्।
धूपेन योनिं निशि धूपयित्वा नारी प्रमोदं विदधातु भर्त्तुः॥

अथ लोमशातनम्।

पलाशभस्मान्विततालचूर्णं रम्भाम्बुमिश्रैः परिलिप्य भूयः।
कन्दर्पगेहे मृगलोचनानां रोमाणि रोहन्ति कदापि नैव॥

अथ मूत्रस्तम्भनम्।

अथ मूत्रप्रणाशार्थं वक्ष्यामि योगमुत्तमम्।
अश्वगन्धां समानीय अस्त्रमन्त्रेण मन्त्रयेत्।
तोलकं सर्पिषो देयं मिश्रयित्वा पिबेत् सुधीः।
लिङ्गमूले कामबीजं जप्त्वा च स्तम्भयेद्धिया।
द्वात्रिंशत् तोलकं दुग्धं मरिचं तोलकद्वयम्।
संमिश्र्य प्रपचेद् यत्नाद् यावत् शुष्कं समानयेत्।
ततो वै वाग्भवं जप्त्वा भक्षयेत् साधकोत्तमः।
अनेनैव विधानेन मूत्रनाशोऽभिजायते॥ ७॥

पुरीषस्तम्भनम्।

पुरीषनाशनार्थाय विड़ङ्गं तोलकद्वयम्।
पिप्पलीतोलकं गृह्य शुण्ठीञ्च तोलकत्रयम्॥
तेजपत्रस्य क्षीरेण मिश्रयित्वा जपेन्मनुम्।
शतमष्टोत्तरं जप्त्वा मिश्रयेद्बहुयत्नतः॥
मन्त्रं तस्य प्रवक्ष्यामि शृणुष्वानन्दभैरव।
श्रीर्माया वाग्भवञ्चैव शक्तिबीजत्रयं तथा॥
शिववायुजलं पृथ्वी वह्निजाया ततः परम्।
मन्त्रयित्वा पिबेद् द्रव्यं पुरीषं नाशयेद् ध्रुवम्॥

इति शिवोक्तमिन्द्रजालम्।

कामरत्नम् ।

यस्येश्वरस्य विमलं चरणारविन्दम्
संसेव्यते विबुधसिद्धमधुव्रतेन ।
निर्माणशातकगुणाष्टकवर्गपूर्णम्
तं शङ्करं सकलदुःखहरं नमामि ॥ १ ॥

कामतन्त्रमिदं चित्रं नाम सुश्रावितं मया ।
वश्यादि-यच्चिणीमन्त्रसाधनान्तं समुद्धृतम् ॥
शान्तिवश्यस्तम्भनानि द्वेषणोच्चाटनं तथा ।
मारणान्तानि शंसन्ति षट् कर्म्माणि मनीषिणः ॥१॥

अथ वश्यादिकर्म्मणां ऋतुनिर्णयः ।

वश्याऽऽकर्षणकर्म्माणि वसन्ते साधयेत् प्रिये ! ।
ग्रीष्मे विद्वेषणं कुर्य्यात् प्रावृषि स्तम्भनं तथा ॥ २ ॥
शिशिरे मारणञ्चैव शान्तिकं शरदि स्मृतम् ।
हेमन्ते पौष्टिकं कुर्य्यात् चतुःकर्म्मविशारदः ॥ ३ ॥
वसन्तश्चैव पूर्वाह्ने ग्रीष्मो मध्याह्न उच्यते ।
वर्षा ज्ञेयाऽपराह्ने तु प्रदोषे शिशिरः स्मृतः ॥ ४ ॥
अर्द्धरात्रौ शरत्काल ऊषा हेमन्त उच्यते ।
ऋतवः कथिता ह्येते सर्वे येन क्रमेण तु ॥ ५ ॥
तद्विहीना न सिध्यन्ति प्रयत्नेनापि कुर्वतः ।
अनन्यकरणात् ते हि ध्रुवं सिध्यन्ति नान्यथा ॥ ६ ॥

अथ तिथिनिर्णयः ।

वशीकरणकर्म्माणि सप्तम्यां साधयेद्बुधः ।
तृतीयायां त्रयोदश्यां तथाऽऽकर्षणकर्म्म वै ॥ ७ ॥
उच्चाटनं द्वितीयायां षष्ठ्याञ्चैव प्रकारयेत् ।
स्तम्भनञ्च चतुर्दश्यां चतुर्थ्यां प्रतिपद्यपि ॥ ८ ॥

मोहनन्तु नवम्याञ्च तथाऽष्टम्यां प्रयोजयेत् ।
द्वादश्यां मारणं शस्तमेकादश्यां तथैव च ॥ ९ ॥
पञ्चम्यां पौर्णमास्याञ्च योजयेच्छान्तिकादिकम् ।
सर्वविद्याप्रसिद्धार्थं तिथयः कथिताः क्रमात् ॥ १० ॥

अथ माहेन्द्रादिनिर्णयः ।

स्तम्भनं मोहनञ्चैव वशीकरणमुत्तमम् ।
माहेन्द्रे वारुणे चैव कर्त्तव्यमिह सिद्धिदम् ॥ ११ ॥
विद्वेषोच्चाटनं वह्नि-वायुयोगेन कारयेत् ।
ज्येष्ठा चैवोत्तराषाढ़ा अनुराधा च रोहिणी ।
माहेन्द्रमण्डलस्था च प्रोक्तकर्म्मप्रसिद्धिदाः ॥ १२ ॥
स्यादुत्तरपदा मूला-ऋचे शतभिषा तथा ।
पूर्वभाद्रपदाऽश्लेषा ज्ञेया वारुणमध्यगाः ।
पूर्वाषाढ़ा ततः कर्म्म-सिद्धिदा शम्भुना स्मृताः ॥ १३ ॥
स्वाती हस्ता मृगशिरा आर्द्रा चोत्तरफल्गुनी ।
पुष्या पुनर्वसुर्वह्नि-मण्डलस्था प्रकीर्त्तिताः ॥ १४ ॥
अश्विनी भरणी चित्रा धनिष्ठा श्रवणा मघा ।
विशाखा कृत्तिका पूर्व-फल्गुनी रेवती तथा ।
वायुमण्डलमध्यस्था तत्तत्कर्म्मप्रसिद्धिदाः ॥ १५ ॥

अथाङ्गुलिनिर्णयः ।

शान्तिके पौष्टिके चैव आभिचारिककर्म्मणि ।
तर्जन्यादिसमारूढ़ं कुर्य्याद् यत्नात् क्रमं सुधीः ।
तत्राङ्गुष्ठसमारूढ़ः सर्वकर्म्मशुभे रतः ॥ १६ ॥

अथ मूलिकाग्रहणविधिः ।

विधिमन्त्रसमायुक्तमौषधं सफलं भवेत् ।
विधिमन्त्रविहीनन्तु काष्ठवद् भेषजं भवेत् ॥ १७ ॥

एकान्ते तु शुभारण्ये तिष्ठत्येव यदौषधम्।
कार्य्यसिद्धिर्भवेत् तेन वीर्य्यमस्ति च तत्र वै ॥ १८ ॥
वल्मीककूपरथ्यातरुतलदेवायतनश्मशानेषु।
जाता विधिना विहिताप्यौषधयः सिद्धिदा न स्युः ॥१९॥
जलजीर्णमग्निकवलित-
मकालक्रमिभक्ष्य भूतलशरीरम्।
न्यूनं तथाऽधिकतया द्रव्यमद्रव्यं जगुर्भिषजः ॥ २० ॥
भूतादियुक्तमभ्यर्च्य गिरीशं प्रातरुत्थितैः।
श्राद्धैरुपासितैर्वापि संग्राह्यं सर्वमौषधम् ॥ २१ ॥
इत्येवं सर्वमूलानां विधिमन्त्रश्च कथ्यते।
आदौ गत्वा वृक्षमूलं ततो वै अभिमन्त्रयेत् ॥ २२ ॥
"ओं वेतालाश्च पिशाचाश्च राक्षसाश्च सरीसृपाः।
अपसर्पन्तु ते सर्वे वृक्षादस्माच्छिवाज्ञया" ॥ २३ ॥
ततो नतिः। ओं नमस्तेऽमृतसम्भूते बलवीर्य्यविवर्द्धिनि।
बलमायुश्च मे देहि पापान्मे त्राहि दूरतः ॥ २४ ॥
ततः खननम्। येन त्वां खनते ब्रह्मा येन त्वां खनते भृगुः।
येन इन्द्रोऽथ वरुणो येन त्वामुपचक्रमे।
तेनाहं खनयिष्यामि मन्त्रपूतेन पाणिना ॥
मा ते पाते मा निपाति मा ते तेजोऽन्यथा भवेत्।
अत्रैव तिष्ठ कल्याणि ! मम कार्य्यकरी भव ॥
ओं ह्रीं च्रौं फट् स्वाहा। अनेन मूलिकां छेदयेत् ॥ २५ ॥
इत्येवं सर्वविद्यानां सिद्धये ऋतुनिर्णयः।
कथितश्चात्र यत्नेन मूलिकाग्रहणादिकः ॥ २६ ॥

इति मूलिकाग्रहणविधिः।

अथ वशीकरणम्।

तत्र सर्वजनवशीकरणम्।

वर्णानामुत्तमं वर्णं मठान्तस्थं तथैव च।
ओंकारशिरसा चापि ओंकारशिरसं तथा॥
अधोभागे च रेफञ्च दत्त्वा मन्त्रं समुद्धरेत्।
निरामिषान्नभोक्ता च जप्तव्यो मन्त्र एव च॥
"ओं स्त्रीं ड्रीं" अनेन मन्त्रेण—
असाध्यमपि राजानं पुत्रमित्रांश्च बान्धवान्।
ये ये गोत्रे समुत्पन्नाः पशवो ये च सर्वतः।
ते सर्वे वशतां यान्ति सहस्रार्द्धस्य जापनात्॥
स्पृष्ट्वा दृष्ट्वा च येऽसाध्या गृहीत्वा नाम तस्य वै॥
इत्यादिकञ्च सर्वञ्च मन्त्रं भक्त्या गुरोस्तदा।
सिध्यन्ति सर्वकार्य्याणि चान्यथाऽसिद्धिभाग् भवेत्॥ १॥

"ओं नमः कटविकटघोररूपिणि स्वाहा"। अनेन मन्त्रेण सप्ताभिमन्त्रितं भक्तपिण्डं यस्य नाम्ना सप्ताहं खाद्यते, स ध्रुवमेव वश्यो भवति। "ओं वश्यमुखि राजमुखि स्वाहा"। अनेन मन्त्रेण सप्तधा मुखप्रक्षालनात् सर्वे वश्या भवन्ति। "ओं राजमुखि वश्यमुखि स्वाहा"। वामहस्ते तैलं संस्थाप्य अनामिकया त्रिधामन्त्र्य पुनर्मूलमन्त्रं त्रिधा पठित्वा प्रातःकाले शय्यायां स्थित्वा मुखकेशादौ विलेपयेत्। तदा सर्वे जना वश्या भवन्ति ; व्याघ्रोऽपि न खादति। "ओं चामुण्डे जय जय स्तम्भय स्तम्भय मोहय मोहय सर्वसत्त्वान्नमः स्वाहा"। अनेन पुष्पम् अभिमन्त्र्य यस्मै दीयते स वश्यो भवति॥ २॥

एकचित्तस्थितो मन्त्री मन्त्रं जप्त्वाऽयुतद्वयम्।
ततः क्षोभयते लोकान् दर्शनादेव साधकः॥ ३॥

रुद्राक्षवटमूलञ्च जलेन सह घर्षयेत् ।
विभूत्या संयुतं मन्त्रतिलकं लोकवश्यकृत् ॥ ४ ॥
पुष्ये पुनर्नवामूलं करे सप्ताभिमन्त्रितम् ।
बद्ध्वा सर्वत्र पूज्यः स्यान्मन्त्रमत्रैव कथ्यते ॥

"एं वतु ओं क्षोभय क्षोभय भगवति त्वं स्वाहा" । इमं मन्त्रं पूर्वोक्तमयुतद्वयजपे सिद्धिः ॥ ५ ॥

अपामार्गस्य मूलन्तु पेषयेत् रोचनेन तु ।
ललाटे तिलकं कृत्वा वशीकुर्य्याज्जगत्त्रयम् ॥

"ओं नमः कोदण्डशरविजालिनि मालिनि सर्वलोकवशङ्करि स्वाहा" । इमं मन्त्रम् उक्तयोगः स्यादष्टोत्तरसहस्रजपे सिद्धिः ॥ ६ ॥

कृष्णपक्षे चतुर्द्दश्यामष्टम्यां वा उपोषितः ।
बलिं दत्त्वा समुद्धृत्य सहदेवीं सुचूर्णयेत् ॥
ताम्बूलेन तु तच्चूर्णं दत्तं वश्यकरं ध्रुवम् ।
स्नाने लेपे च तच्चूर्णं योज्यं वश्यकरं भवेत् ॥
रोचना-सहदेवीभ्यां तिलकं लोकवश्यकृत् ॥
मुखे क्षिप्ता च ताम्बूलं कथ्यां बद्ध्वा च कामयेत् ।
या नारी सा भवेत् तस्या मन्त्रयोगेण कथ्यते ॥

"ओं नमो भगवति मातङ्गेश्वरि सर्वमुखरञ्जनि सर्वेषां महामाये मातङ्गे कुमारिके लहलहजिह्वे सर्वलोकवशङ्करि स्वाहा" । सहस्रं जप्त्वा उक्तयोगानां सिद्धिः ॥ ७ ॥

श्वेतापराजितामूलं चन्द्रग्रस्ते समुद्धृतम् ।
अञ्जिताक्षो नरस्तेन वशीकुर्य्याज्जगत्त्रयम् ॥
तन्मूलं रोचनायुक्तं तिलकेन जगद्वशम् ।
तन्मूलेन प्रदातव्यं ताम्बूलं विश्ववश्यकृत् ॥
शिलापिष्टञ्च तन्मूलं वारिणा तिलके कृते ।
सम्भाषणेन सर्वेषां वशीकरणमुत्तमम् ॥

स्वर्णेन वेष्टितं कृत्वा तेनैव तिलके कृते।
दृष्टिमात्रे वशं याति नारी वा पुरुषोऽपि वा॥
ग्राह्यं शुक्लचतुर्द्दश्यां श्वेतगुञ्जा-सुमूलकम्।
ताम्बूलेन प्रदातव्यं सर्वलोकवशङ्करम्॥
"ओं वक्रकिरणे शिवे रक्त भये मया ह्यामृतं कुरु कुरु स्वाहा"। उक्तयोगानां सहस्रजपे सिद्धिः॥ ८॥
हृत्पादचक्षुर्नासानां मलं पूगे प्रदापयेत्।
तत् पूगं खाद्यते येन यावज्जीवं वशो भवेत्॥
अनेन मन्त्रितं कृत्वा रक्तेन्दीवरमूलकम्।
रोचनाभिस्ताम्रपात्रे घृष्ट्वा नेत्रद्वयाञ्जनात्।
प्रियो भवति सर्वेषां दृष्टिमात्रान्नसंशयः॥
तन्मूलं मधुसंमिश्रं ललाटे तिलके कृते।
ताम्बूले वा प्रदातव्यं वशीकरणमुत्तमम्॥
तन्मूलं रञ्जनाख्यञ्च पिष्ट्वा मूलं प्रयोजयेत्।
ताम्बूलेन तु तद्भुक्ते ध्रुवञ्च वशमानयेत्॥
"पिङ्गलायै नमः"। अनेन मन्त्रेणाभिमन्त्र्य उक्तयोगान् साधयेत्॥ ९॥
रक्तगृध्रुभयं नेत्रं कृष्णपेचकयोरथ।
निष्काश्य मधुना लिप्ता वर्त्तिकज्जलपातनम्।
तेन नेत्राञ्जनं कृत्वा त्रैलोक्यं वशमानयेत्॥
देवदानवसिद्धार्थं गुटिकां कारयेद् बुधः।
मुखे निक्षिप्य सर्वेषां प्रियो भवति नान्यथा॥
भृङ्गमूलं मुखे क्षिप्वा सर्वत्र पूजितो भवेत्॥
रोहिण्यां वटवन्दाकं संगृह्य धारयेत् करे।
वश्यं करोति सकलं विश्वामित्रेण भाषितम्॥ १०॥
कुङ्कुमं तगरं कुष्ठं हरितालं समं समम्।
अनामिकाया रक्तेन तिलकं सर्ववश्यकृत्॥ ११॥

विष्णुक्रान्ता शुभा भृङ्गी सुदण्डी मूलरोचनाम्।
पिष्ट्वा तु वटिकां कृत्वा तिलकं वश्यकृत् परम्॥ १२॥
पुष्योद्धृतं श्वेतभानु-मूलमाजास्नमूत्रकैः।
वटिकां कारयेत् प्राज्ञस्तिलकेन जगद्वशम्॥ १३॥
अजारक्तेन तन्मूलं पुष्यायां पेषयेद् बुधः।
कज्जलं पातयित्वा तु चक्षुषी रञ्जयेन्नरः।
त्रैलोक्यं वशतां याति दृष्टमात्रं न संशयः॥ १४॥
मूलन्तु श्रवणा-ऋक्षे पिण्डीतगरसम्भवम्।
संगृह्य धारयेद्वश्यं कुरुते सकलं जगत्॥ १५॥
कृष्णापराजितामूलं पुष्येणोद्धृत्य चूर्णयेत्।
गोमूत्रेण समालोड्य कज्जलं कारयेद् बुधः।
ध्रुवमेतेनाञ्जनेन वशीकुर्य्याज्जगत्त्रयम्॥ १६॥
पुत्रजीवकबीजञ्च तिलकं रोचनायुतम्।
प्रियो भवति सर्वेषां नरः कृत्वा ललाटके॥ १७॥
श्वेतापराजितामूलं तथा श्वेतजयाश्वयोः।
नासाग्रे तिलकं कृत्वा वशीकुर्य्याज्जगत्त्रयम्॥ १८॥
मञ्जिष्ठाकुष्ठकैः कृत्वा ललाटफलके कृती।
लोकालोकं वशयति क्षणमात्रेण साधकः॥ १९॥

नीरं घृतञ्च मधुकञ्च कृताञ्जलिश्च *
द्रव्यं समं निजशरीरमलेन मिश्रम्।
आलेपभक्षणविधौ तिलके कृते वा
योगात्तु सर्वभुवनानि वशीकरोति॥ २०॥
मूलं जटीतगरमेषविषाणिकानाम्
पञ्चाङ्गजं निजशरीरमलं तथैव।

---

* कृताञ्जलिः,—लज्जावतीलता।

एकीकृतानि मधुना दिवसे कुजस्य
कुर्वन्ति वक्रतिलकेन वशं जगन्ति ॥ २१ ॥
भृङ्गस्य पक्षयुगलं शुकमांसयुक्तम्
पिंष्यादथात्ममलं च मलं स्वदेहम्।
एतानि लेपविधिनाप्यथ भक्षणाद् वा
कुर्वन्ति वश्यमखिलं जगदप्यकस्मात् ॥ २२ ॥
तालीशकुष्ठतगरैः परिलिप्य,वर्त्तिं
सिद्धार्थतैलसहितां दृढ़पट्टवस्त्राम्।
पुंसः कपालफलके विनिपातितञ्च
तेनाञ्जनेन वशतां किल याति लोकः ॥ २३ ॥
गोरोचनं पद्मपत्रं प्रियङ्गुं रक्तचन्दनम्।
एकीकृत्याऽञ्जयेन्नेत्रं यं पश्यति वशो भवेत् ॥ २४ ॥

अथ राजवशीकरणम्।

कुङ्कुमं चन्दनञ्चैव रोचनं शशिमिश्रितम्।
गवां क्षीरेण तिलकं राजवश्यकरं परम् ॥ १ ॥
"ओं ह्रीं सः अमुकं मे वशमानय स्वाहा"। पूर्वमेव सहस्रं जप्त्वा ततोऽनेन मन्त्रेण सप्ताभिमन्त्रितं तिलकं कार्य्यम् ॥ १ ॥
चम्पकस्य तु वृन्दाकं करे बद्ध्वा प्रयत्नतः।
सम्पूज्य भरणी-ऋक्षे पुष्यायां वा विधानतः।
राजानं तत्क्षणादेव मनुष्यो वश्यतां नयेत् ॥ २ ॥

अथ स्त्रीवशीकरणम्।

पुष्ये पुष्पन्तु संगृह्य भरण्यां फलकं तथा।
शाखाञ्चैव विशाखायां हस्ते पत्रं तथैव च ॥
मूले मूलं समुद्धृत्य कृष्णोन्मत्तस्य तत्क्रमात्।
पिष्ट्वा कर्पूरसंयुक्तं कुङ्कुमं रोचनं समम्।
तिलकात् स्त्री वशं याति यदि साक्षादरुन्धती ॥ १ ॥

काकजङ्घा वचा कुष्ठं शुक्रशोणितमिश्रितम्।
तद्धस्ते भोजने नार्य्या श्मशाने रुद्यते सदा॥

"ओं नमो भगवते रुद्राय ओं चामुण्डे अमुकीं मे वशमानय स्वाहा"। उक्तयोगानामयमेव मन्त्रः॥ २॥

प्रातर्मुखन्तु प्रक्षाल्य सप्तवाराभिमन्त्रितम्।
यस्य नाम्ना पिबेत् तोयं सा स्त्री वश्या भवेद् ध्रुवम्॥

"ओं नमः क्षिप्रकर्म्मणि अमुकीं मे वशमानय स्वाहा"॥३॥

कृष्णापराजितामूलं ताम्बूलेन समायुतम्।
अवश्यायै स्त्रियै दद्याद् वश्या भवति नान्यथा॥

"अं क्रूं स्वाहा"। अनेनाभिमन्त्र्य दद्यात्॥ ४॥

साध्यसाधकनाम्ना तु कृत्वा सप्ताभिमन्त्रितम्।
दीयते कुसुमं यस्यै सा वश्या भवति ध्रुवम्॥
सुसाधितो ह्ययं मन्त्रः अवश्यं फलदायकः।
तस्मादेतत् प्रयत्नेन साधयेन्मन्त्रमुत्तमम्॥

अत्र मन्त्रः।—"ओं क्रूं स्वाहा"॥ ५॥

विशाखायान्तु वन्दाकं मङ्गल्यस्य समाहरेत्।
हस्ते बद्ध्वा तु कुरुते वशतां वरयोषिताम्॥

"ओं पातिं वज्राय स्वाहा"। अनेनाभिमन्त्र्य बध्नीयात्॥ ६॥

कृष्णोत्पलञ्च शिखिनश्च सुपक्षयुग्मम्
मूलं तथा भगवतः शितकाकजङ्घा।
यस्याः शिरोगतमिदं विहितं विचूर्णम्
दासीभवेज् झटिति सा तरुणी सुरूपा॥ ७॥

सव्येन पाणिकमलेन रतावसाने
यो रेतसं निजभवञ्च विलासिकायाः।
वामं विलिम्पति पदं सहसैव यस्याः
तस्यैव सा भवति नात्र विकल्पभावः॥ ८॥

सिन्धूत्थमाक्षिककपोतमलानि पिष्ट्वा
लिङ्गं विलिप्य तरुणीं रमते नवोढ़ाम्।
साऽन्यं न याति पुरुषं मनसाऽपि नूनम्
दासीभवेदिति मनोहरदिव्यमूर्त्तिः॥ ९॥
गोरोचनाशिशिरदीधितिशम्भुवीजैः
काश्मीरचन्दनयुतैः कनकद्रवैश्च।
पिष्ट्वा ध्वजोपरि रमत्यबलां नवोढ़ाम्
तस्याः स एव हृदये मुकुटत्वमेति॥ १०॥

पुष्ये रुद्रजटामूलं मुखस्थं कारयेद् बुधः।
सताम्बूलं प्रदातव्यं वश्या भवति निश्चितम्॥ ११॥
तथैव पाटलं मूलं ताम्बूलेन तु वश्यकृत्॥
त्रिपत्रभण्टिकामूलं पिष्ट्वा गात्रे तु संक्षिपेत्।
यस्याः सा वशमायाति बिन्दुमात्रेण तत्क्षणात्॥ १२॥
स्वकीयं काममादाय कामदेवं स्मरेत् पुनः।
तरुण्या हृदये दत्तं तत्क्षणात् स्त्री वशीभवेत्॥

अत्र मन्त्रः।—"ऐं पीं स्त्रीं क्लीं कामपिशाचिनि अमुकीं कामेन ग्राहय, कामेन कामरूपेण नखैर्विदारय विदारय दारय दारय, स्नेहेन बन्धय बन्धय श्रीं फट्"॥ १३॥

प्रकारान्तरम्। नागपुष्पं प्रियङ्गुञ्च तगरं पद्मकेशरम्।
जटामांसीं समं कृत्वा चूर्णयेत् मन्त्रवित् ततः।
स्वाङ्गं धूपयते तेन भजन्ते कामवत् स्त्रियः॥

"श्रीं मूली मूली महामूली सर्वं संक्षोभय एभ्य उपद्रवेभ्यः स्वाहा"। इति धूपमन्त्रः॥ १॥

पानीयस्याञ्जलीन् सप्त दत्त्वा विद्यामिमां जपेत्।
सालङ्कारां नरः कन्यां लभते नात्र संशयः॥

अत्र मन्त्रः।—"ओं विश्वावसुर्नाम गन्धर्वः कन्यानामधिपतिः, सुरूपां सालङ्कारां देहि मे, नमस्तस्मै विश्वावसवे स्वाहा" ॥२॥

कन्यागृहे शालकाष्ठं क्षिपेदेकादशाङ्गुलम्।
ऋक्षे च पूर्वफल्गुन्यां तस्मै कन्यां प्रयच्छति॥

गोरोचनाकुङ्कुमाभ्यां भूर्जे यस्याः नामाऽभिलिख्य घृतमधु-मध्ये स्थापयेत् सा वश्या भवति॥ ७॥

अथ पतिवशीकरणम्।

खञ्जरीटस्य मांसानि मधुना सह पेषयेत्।
अनेन योनिलेपेन पतिर्दासो भवेद् ध्रुवम्॥ १॥
पञ्चाङ्गदाड़िमं पिष्ट्वा श्वेतसर्षपसंयुतम्।
योनिलेपे पतिं दासं करोत्यपि च दुर्भगा॥
कर्पूरं देवदारुञ्च सक्षौद्रं पूर्ववत् फलम्॥

"ओं काममालिनि पतिं मे वशमानय ठठ"। उक्तयोगानां सप्ताभिमन्त्रितेन सिद्धिः॥ २॥

गोरोचनामत्स्यपित्तं पिष्ट्वाऽपि तिलके कृते।
वामहस्तकनिष्ठायां पतिर्दासो भवत्यलम्॥ ३॥
स्वशोणितं रोचनया तिलकं पतिवश्यकृत्॥
चित्रकस्य तु पुष्पाणि मधुयुक्तानि कारयेत्।
अन्ने पाने प्रदातव्यं पतिवश्यकरं भवेत्॥ ४॥
सर्जपत्रञ्च मधुना योनिलेपे पतिर्वशः॥
जलौकसां मुखे देयं शम्बूशङ्खादिचूर्णकम्।
तच्चूर्णन्तु समागृह्य ताम्बूलेन समायुतम्।
दातव्यं स्वामिने भोक्तुं वश्यो भवति नाऽन्यथा॥ ५॥
गोरोचनानलदकुङ्कुमभाविताया:
तस्याः सदैव कुरुते तिलकं वशित्वम्।

वात्स्यायनेन बहुधा प्रमदाजनानां
सौभाग्यकृत्यसमये प्रकटीकृतोऽसौ ॥ ६ ॥
सम्भोगशेषसमये निजकाममेढ्रम्
या कामिनी स्पृशति वामपदाम्बुजेन।
तस्याः पतिः सपदि विन्दति दासभावं
गोणीसुतेन कथितः किल योगराजः ॥ ७ ॥

इति श्रीनागभट्टविरचिते कामरत्ने वशीकरणं नाम प्रथमोपदेशः।

अथ आकर्षणम्।

चतुर्थवर्णमाकृष्य द्वितीयवर्गसंस्थितम्।
कृत्वा त्रिविधह्राह्रान्तं तदन्ते हेद्वितीयकम्॥
अंकारं शिरसं कृत्वा प्रत्यक्षरप्रजापनम्।
सहस्रार्द्धस्य जापेन फलं भवति शाश्वतम्॥

मन्त्रः।—"झां झां झां ह्रां ह्रां ह्रां हें हें"।

मानुषासुरदेवाश्च सयक्षोरगराक्षसाः।
स्थावरा जङ्गमाश्चैव आकृष्टास्ते वराङ्गने ! ॥ १ ॥
हान्ते रेफं समादाय यकारन्तु विशेषतः।
अक्षरं त्रितयं तच्च द्विधा कृत्वा प्रजापयेत्॥
भक्ष्यं कृत्वा स्वहस्तेन कृत्वा मन्त्रविभावनम्।
दीयते यस्य भक्ष्यं तत् सर्वेषां प्राणिनां शुभे !।
ते सर्वे यत्र नीयन्ते तत्र गच्छत तत्क्षणात्॥

मन्त्रः।—"हरय हरय"।

क्रींकारेण मन्त्रयेत् पाशं हूंकारेणाङ्कुशं तथा।
त्रिफलं वामगं पाशं दक्षिणे ज्वलिताङ्कुशम्।
सन्ध्यायां स्वकरे मन्त्री ततो मन्त्रमिमं जपेत्॥

"ओं क्रीं रक्ष रक्ष चामुण्डे तुरु तुरु अमुकीमाकर्षय

आकर्षय क्लीं"। अस्य मन्त्रस्य पूर्वमेवायुतजपे सिद्धिः। **ओं चामुण्डे ज्व ज्वल प्रज्वल प्रज्वल स्वाहा"।** अनेन मन्त्रेण स्त्रियं दृष्ट्वा जपं कारयेत् तत्क्षणात् पृष्ठतः समागच्छति। पूर्वमेवायुतजपे सिद्धिः।

अश्लेषायां समाहृत्य अर्जुनस्य तु व्रध्नकम्।
अजामूत्रेण संपेष्य स्त्रीणां शिरसि दापयेत्।
पुरुषस्य पशूनां वा क्षिपेदाकर्षणं भवेत्॥ ३॥
साध्यानामपदस्थान्तान्मृत्तिकामाहरेत् ततः।
कृकलासस्य रक्तेन प्रतिमां कारयेद् बुधः॥
साध्यानामाक्षरं तस्यास्तद्रक्तैर्विलिखेद्भवि।
मूत्रस्थाने च निखनेत् सदा तत्रैव मूत्रयेत्।
आकर्षयेत्तु तां नारीं शतयोजनसंस्थिताम्॥ ४॥
सूर्य्यावर्त्तस्य मूलन्तु पञ्चम्यां ग्राहयेद् बुधः।
ताम्बूलेन समं दद्यात् स्वयमायाति भक्षणात्॥ ५॥
रतिकर्मकरौ ग्राह्यौ भ्रमरौ यत्नतो बुधैः।
भिन्नौ कृत्वा दहेत् तौ तु चित्रकाष्ठैस्तयोः पुनः॥
वस्त्रेण बन्धयेद्भस्म पृथक्कृत्पुट्टलीद्वयम्।
तयोरेकामजाशृङ्गे दृढं बद्ध्वा परीक्षयेत्॥
यां यां याति च सा मेषी पृथक् तु रक्षयेद् बुधः।
तत् भस्म शिरसि न्यस्तं क्षणादाकर्षयेत् स्त्रियम्।
अपरं रक्षयेद्धस्ते नो चेन्नायाति कामिनी॥

"ओं कृष्णवर्णाय स्वाहा"। इमं मन्त्रं पूर्वमेवायुतं जप्त्वा उक्तयोगेनाभिमन्त्र्य सिद्धिः॥ ६॥

इति श्रीनागभट्टविरचिते कामरत्ने आकर्षणं नाम द्वितीयोपदेशः।

अथ जयः।

हकारं स्वरसंयुक्तं उकारेण सुपूजितम्।
ओंकारेण च सम्पूज्य अन्ते फट् च नियोजयेत्॥

"श्रीं हुं फट्" ।

जेयाग्रे शतजापेन जितो भवति नान्यथा ।
जेयनाम हृदि न्यस्य चक्षुषा तन्निमील्य च ।
स्पृष्ट्वा च मन्त्रजापेन तत्क्षणाज्जितवानसौ ॥ १ ॥
गोजिह्वा शिखिमूलौ वा मुखे शिरसि संस्थिता ।
कुरुते सर्ववादेषु जयं पुष्ये समुद्धृता ॥ २ ॥
मार्गशीर्षस्य पूर्णायां शिखिमूलं समुद्धरेत् ।
बाहौ शिरसि वा धार्य्यं विवादे विजयी भवेत् ॥ ३ ॥
गिरिकर्णीं शमीं गुञ्जां श्वेतवर्णां समाहरेत् ।
चन्दनेनान्वितं सर्वं तिलकेन जयी नरः ॥ ४ ॥
कनकार्कवटौ वह्निर्विद्रुमः पञ्चमस्तथा ।
तिलकं क्रियते येन पश्येत् तं पञ्चधा रिपुः ॥ ५ ॥
कृष्णसर्पकपाले तु वसामृत्तिकयान्विते ।
सितगुञ्जां वपेत् तत्र तस्या मूलं समाहरेत् ॥
कृत्वा च तिलकं धीरः यं पश्येत् सम्भृतं रिपुम् ।
खगणैर्भक्ष्यमाणञ्च पतितञ्च ततो भुवि ॥ ६ ॥
ओषधिः सिंहिका नाम तया मृष्टा महारसैः ।
सिंही कपर्दिकामध्ये क्षेप्या तन्मूलसंयुता ॥
पिधाय वदनं तस्याः सिक्थकेन समन्विता ।
तस्यां वक्त्रस्थितायान्तु सिंहवत् ज्ञायते नरः ॥
रणे राजकुले द्यूते विवादे चाऽपराजितः ।
मदोन्मत्तो गजस्तस्य दर्शनेन पराङ्मुखः ॥ ७ ॥
व्याघ्रीरसेन संमृष्टः पारदो मूलसंयुतः ।
पूर्ववत् साधयेद्व्याघ्रीं फलञ्चैव तथाविधम् ॥ ८ ॥
करे सुदर्शनामूलं बद्ध्वा राजकुले जयी ।
जयामूलं राजकुले मुखस्थञ्च जयप्रदम् ॥ ९ ॥

आर्द्रायां वटवन्दाकं हस्ते बद्धाऽपराजितः।
तद्दृत्ते चूतवन्दाकं गृहीत्वा धारयेत् करे।
संग्रामे जयमाप्नोति जयां स्मृत्वा जयी तथा ॥ १० ॥
केकाया नयनं वामं गुड़लोहेन वेष्टयेत्।
प्रतिक्षिप्य मुखे धीरः सर्ववादे जयी भवेत् ॥ ११ ॥
कृत्तिका च विशाखा च भौमवारेण संयुता।
तद्दिने ग्रथितं वस्त्रं संग्रामे जयदायकम् ॥ १२ ॥
अपामार्गरसेनैव यानि, शस्त्राणि लिप्यते।
जयन्ति तानि संग्रामे, मूलमन्त्राभिमन्त्रितात्।
तच्चूर्णोद्वर्त्तनान्मन्दः शत्रून् मोहयते बहून् ॥ १३ ॥

अस्य मन्त्रः।—"ओं नमो महाबलपराक्रम शस्त्रविद्याविशार अमुकस्य भुजबलं बन्धय बन्धय, दृष्टिं स्तम्भय स्तम्भय, अङ्गा धूनय धूनय, पातय पातय महीतले क्रूं"।

अथ सौभाग्यकरणम्।

पुष्योद्धृतं सितार्कस्य मूलं वामेतरे भुजे।
बद्धा सौभाग्यमाप्नोति स्वामिनो दुर्भगाऽपि सा ॥ १ ॥
रक्तचित्रकमूलञ्च सोमग्रस्ते समुद्धृतम्।
चौद्रैः पिष्ट्वा वटिं कुर्य्यात् तिलकं शुभमङ्गना ॥ २ ॥

गोरोचनाकुङ्कुमाभ्यां यस्य नाम संलिख्य मधुमध्ये स्था येत्, सद्यः सौभाग्यं भवति। गोरोचनया भूर्जे यस्य नामाभि लिख्य मधुमध्ये स्थापयेत्, सौभाग्यं भवति। कुङ्कुमगोर चनाऽलक्तकेन यस्य नाम संलिख्य मधुमध्ये स्थापयेत्, सौभा भवति ॥ ३ ॥

अथ ईश्वरादीनां क्रोधोपशमनम्।

कण्टकेन तालपत्रे नामाभिलिख्य कर्दमे स्थापयेत् कुपितः प्रसन्नो भवति। गोरोचनया भूर्जे यस्य ना

समालिख्य पयोमध्ये स्थापयेत्, कुपितः प्रसन्नो भवति । "ओं शान्ते प्रशान्ते सर्वक्रुद्धोपशमनि स्वाहा"। अनेन मन्त्रेण त्रिःसप्तवारजप्तेन मुखं मार्जयेत् । ततः क्रोधोपशमनं भवति । प्रसादपरो भवति ॥ १ ॥

अथ अदातुर्दातृशक्तिकरणम् ।

गोरोचनया स्वानामिकारक्तेन भूर्जे यस्य नाम संलिख्य मधुमध्ये स्थापयेत् स अदाता दाता भवति ।

अथ गजनिवारणम् ।

विल्वपत्रस्य चूर्णन्तु कुक्कुकुर्य्याश्च तत् समम् ।
तल्लिप्ताङ्गं नरं दृष्ट्वा दूरे गच्छति कुञ्जरः ॥
मूलं मर्कटवल्याश्च बाहौ बद्धञ्च मूर्द्धनि ।
दुष्टदन्तिहरं दूरं चित्रं मंयति जायते ॥
श्वेतापराजितामूलं हस्तस्थं वारयेद् गजम् ।
मूलं विशूल्या वक्त्रस्थं गजवश्यकरं भवेत् ॥

अथ व्याघ्रनिवारणम् ।

मुखस्थं वृहतीमूलं हस्तस्थं व्याघ्रभीतिहृत् ।

"क्रीं क्रीं श्रीं क्रीं क्रीं"। इति पञ्चाक्षरमन्त्रेण लोष्ट्रं पठित्वा क्षिपेत्, तदा मुखं न चालयति गन्तुमशक्तः ।

मूलं कृष्णचतुर्दश्यां ग्राहयेत् लाङ्गलीभवम् ।
हस्तस्थं व्याघ्रसिंहादि-भयहृत् परिकीर्त्तितम् ॥

इति श्रीनागभट्टविरचिते कामरत्ने विजयादिव्याघ्रनिवारणं नाम तृतीयोपदेशः ।

अथ स्तम्भनम् ।

तत्र शत्रूणां मुखस्तम्भनम् ।

मेघनादस्य मूलन्तु मुखस्थं तारवेष्टितम् ।
परवादी भवेन्मूकोऽथवा याति दिगन्तरम् ॥
श्वेतगुञ्जोत्थितं मूलं मुखस्थं परतुण्डजित् ॥

अत्र मन्त्रः।—"श्रीं क्लीं रक्ष चामुण्डे तुरु तुरु अमुकं मे वश-मानय स्वाहा"। अयं चामुण्डामन्त्रः, अनेन उक्तयोगसिद्धिः ॥१॥

पुष्यार्के मधुवन्दाकं गृहीत्वा प्रक्षिपेद् बुधः।
सभामध्ये च सर्वेषां मुखस्तम्भः प्रजायते ॥ २ ॥

अर्कपत्रे हरितालरसेन यस्य नामाभिलिख्य उद्यानमध्ये ईशानकोणे स्थापयेत् तस्य मुखस्तम्भनं भवति। शिलापटले हरिद्रया यस्य नामाभिलिख्य अधोमुखीकृत्य स्थापयेत्, तस्यैव शत्रोः मुखं स्तम्भयति। यस्मिन् कस्मिंश्चित् तिथौ लिखित्वा यस्य नाम स्थापयेत्, तस्य मुखबन्धनं करोति। "अमुकस्य मुखं स्तम्भय स्तम्भय स्वाहा" इति त्रिकोणमध्ये हरिद्रया यस्य नामाभिलिख्य द्रुमविवरे स्थापयेत्, तेन शत्रुमुखं स्तम्भयति ॥ ३ ॥

नौकास्तम्भनम्। भरण्यां क्षीरिकाष्ठस्य कीलं पञ्चाङ्गुलं क्षिपेत्।
नौकामध्ये तदा नौका-स्तम्भनं जायते ध्रुवम् ॥

निद्रास्तम्भनम्। मूलं बृहत्या मधुकं पिष्ट्वा नस्यं समाहरेत्।
निद्रास्तम्भनमेतद्धि मूलदेवेन भाषितम् ॥

शस्त्रस्तम्भनम्। अङ्कुशी च जटा पाठा विष्णुक्रान्ता च पाटली।
श्वेतापराजिता पुङ्खा देवी च काकजङ्घिका ॥
पुष्यर्क्षेण समुद्धृत्य वक्त्रे शिरसि संस्थितम्।
एकैकं वारयत्येव शस्त्रसंहरणं नृणाम् ॥
वह्निश्च व्याघ्रभूपाल-भयं शत्रुभयं जयेत् ॥ १ ॥
जातीमूलं मुखे क्षिप्तं शस्त्रस्तम्भनमुत्तमम्।
पुङ्खायाः पाटलाया वा मुखस्थं काण्डशस्त्रहृत् ॥ २॥
कपित्थस्य च वन्दाकं कृत्तिकायां समाहरेत्।
वक्त्रसंस्थन्तु देवस्य शस्त्रस्तम्भकरं परम् ॥ ३ ॥
करे सुदर्शनामूलं बद्धास्त्रस्तम्भनं भवेत् ॥
केतकी मस्तके नेत्रे तालमूलं मुखे स्थितम्।

खर्जूरं चरणे हस्ते खड्गस्तम्भः प्रजायते ॥
एतानि त्रीणि मूलानि चूर्णितानि घृतैः पिबेत्।
त्र्यहं रात्रौ ततः सर्वैर्यावज्जीवं न बध्यते ॥ ४ ॥
सर्वेषामुक्तयोगानां कुम्भकर्णः प्रसीदति।
आयान्तं सैन्यकं शस्त्रसमूहं स निवारयेत् ॥ ५ ॥

अत्र मन्त्रः।—"ओं अहो कुम्भकर्ण महाराक्षस निकषागर्भसम्भूत परसैन्यस्तम्भन भगवन् रुद्र आज्ञापयति स्वाहा"। सर्वयोगाणामष्टोत्तरसहस्रजपेन सिद्धिः।

वक्री चक्री तथा वज्री त्रिशूली मुषली तथा ॥ ६ ॥
देहस्था समरे पुंसः सर्वायुधनिवारिणी ॥
गृहीत्वा शुभनक्षत्रे अपामार्गस्य मूलकम्।
लेपमात्रे शरीराणां सर्वशस्त्रनिवारणम् ॥ ७ ॥
खर्ज्जूरी मुखमध्यस्था कटिबद्धा च केतकी।
भुजदण्डस्थितश्चार्कः सर्वशस्त्रनिवारणः ॥ ८ ॥
पुष्यर्क्षे श्वेतगुञ्जाया मूलमुद्धृत्य धारयेत्।
हस्ते काण्डं भयं नास्ति सङ्ग्रामे च कदाचन ॥ ९ ॥
त्रिलोहवेष्टितं कृत्वा रसं वज्राभ्रसंयुतम्।
वक्त्रस्थञ्च करस्थञ्च सर्वायुधनिवारणम् ॥ १० ॥
ब्रह्मदण्डी च कौमारी ऐश्वरी वैष्णवी तथा।
वाराही वैष्णवी * चैन्द्री महालक्ष्मीस्तथैव च ॥
एताश्चौषधयो दिव्यास्तथैता मातरः स्मृताः।
स्मृताश्चैव करे बद्धाः सर्वशस्त्रनिवारिकाः ॥ ११ ॥

अग्निस्तम्भनम्। जप्त्वा जटीं नरो देवीं तारीं महिषमर्दिनीम्।
खदिराङ्गारमध्ये तु प्रविष्टोऽसौ न दह्यते ॥ १ ॥

---

* अत्र वैष्णवी नारसिंही।

अत्र मन्त्रः ।—"ओं मत्तकटोट छयघने सेकटीय मूलीयसी । आलिप्याग्नाय मुदीयते शनकवीज्जे मन्दी ह्रीं फट् । ओं ह्रीं महिषवाहिनी स्तम्भय मोहय भेदय अग्निं स्तम्भय ठठ" । एतन्मन्त्रद्वयस्य पूर्वमेवायुतजपेन सिद्धिः ॥ २ ॥

कुमारीरसकं पिष्ट्वा लिप्तहस्तो नरो भवेत् ।
दीप्ताङ्गारैस्तप्तलौहैर्मन्त्रयुक्तैर्न दह्यते ॥
करे सुदर्शनामूलं बद्धाग्निस्तम्भनं भवेत् ॥ ३ ॥

गोमहिष्यादिस्तम्भनम् ।

उष्ट्रस्यास्थि चतुर्दिक्षु निखनेद् भूतले ध्रुवम् ।
गोमेषमहिषीवाजीः स्तम्भयेत् करिणीमपि ॥

अथ मनुष्यस्तम्भनम् ।

गोरोचनाऽलक्तककुङ्कुमेन भूर्जे संलिख्य जले धारयेत्, यस्य नाम तस्य स्तम्भनं भवति ।

मृन्मयशरावे संलिख्य श्मशानभस्मनापूर्य्य शरावसम्पुटे कृत्वा श्मशाने निखनेत्, सद्यः स्तम्भनं भवति । गोरोचना-कुङ्कुमाभ्यां यस्य नाम संलिख्य रक्तसूत्रेण संवेष्ट्य धारयेत् । ते सर्वे दुष्टाः स्तम्भीभूता भवन्ति निश्चितम् ।

अथ सर्वेषां शत्रूणां बुद्धिस्तम्भनम् ।

भृङ्गराजोऽप्यपामार्गः सिद्धार्थं सहदेविका ।
तुल्यं तुल्यं वचा श्वेता द्रव्यमेषां समाहरेत् ॥
लौहपात्रे विनिक्षिप्य द्विदिनान्ते समुद्धरेत् ।
तिलकैः सर्वभूतानां बुद्धिस्तम्भकरं भवेत् ॥

अत्र मन्त्रः ।—"ओं नमो भगवते विश्वामित्राय नमः सर्वमुखीभ्यां विश्वामित्राय विश्वामित्र आज्ञापयति । शक्त्या आगच्छागच्छ स्वाहा" । उक्तयोगस्यायं मन्त्रः । अनेन मन्त्रेण नदीं प्रविष्टः कृताञ्जलिस्तर्पयेत् । शत्रूणां बुद्धिस्तम्भो भवति ।

अथ चौराणां गतिस्तम्भनम्।

"ओं ब्रह्मवेशिनि शिवे रक्ष रक्ष ठठ"। अनेन मन्त्रेण सप्त-
ाशान् गृहीत्वा त्रीणि कट्यां बद्ध्वा अपरान् मुष्टिभ्यां धारयेत्।
ौराणां गतिस्तम्भो भवति।

अथ गर्भस्तम्भनम्।

ग्राह्यं कृष्णचतुर्दश्यां धुस्तूरस्य तु ब्रध्नकम्।
कट्यां बद्ध्वा रमेत् कान्तां न गर्भं धारयेत् क्वचित्॥
मुक्तेन लभते गर्भं पुरा नागार्जुनोदितम्।
तन्मूलचूर्णं योनिस्थं न गर्भं सम्भवेत् क्वचित्॥
सिद्धार्थमूलं शिरसि बद्ध्वा कान्तं रमेत्तु या।
न गर्भं धारयेत् सा स्त्री त्यक्त्वा च लभते पुनः॥

मार्जारस्य मलं गृहीत्वा अनामिकाया रक्तेन भूर्जे लिखित्वा
ूमौ निखातयेत्। गर्भं स्तम्भयति।

अथ शुक्रस्तम्भनम्।

इन्द्रवारुणिकामूलं पुष्ये नग्नः समुद्धरेत्।
कटुत्रयैर्गवां क्षीरैः संपिष्य गोलकीकृतम्॥
छायाशुष्कं स्थितञ्चास्ये वीर्य्यस्तम्भकरं परम्॥ १॥
नीलीमूलं श्मशानस्थं कट्यां बद्ध्वा तु वीर्य्यधृक्।
कृष्णोन्मत्तवचामूलं मधुपिष्टं प्रलेपयेत्।
अत्यर्थं रमते कान्तां स्वभावात् द्विगुणं नरः॥ २॥
शृङ्गीविषं पारदञ्च प्रत्येकन्तु द्विगुञ्जकम्।
वराटन्तु क्षिपेद्बिन्दुः स्थिरः स्यान्मस्तके धृते॥ ३॥
रक्तापामार्गमूलन्तु सोमवारे निमन्त्रयेत्।
भौमे प्रातः समुद्धृत्य कट्यां बद्ध्वा तु वीर्य्यधृक्॥ ४॥
पुनर्नवाचूर्णविलेपनं वा जहाति वीर्य्यं न कदाचिदेव।
कृष्णधूर्त्तं महाकालं शनिवारे निमन्त्रयेत्॥

रविवारे समादाय अदत्तारमणीकृतैः ।
सूत्रैर्गुणत्रयैर्बद्धं करे वामे प्रयत्नतः ॥
उपवेश्यासने खण्डत्रये कामत्रयं ततः ।
बिन्दुस्थिरत्वमाप्नोति मुक्ते चरति तत्क्षणात् ॥ ५ ॥

इति कामरत्ने स्तम्भनं नाम चतुर्थोपदेशः ।

अथ सर्वजनमोहनम् ।

कन्यावरे सुरतिसङ्गमने नराणा-
मालोकने नरपतेः क्रयविक्रयादौ ।
प्रज्ञाविधौ सकलकर्मणि कौतुके वा
धूपैर्मदैः सुहृदयैर्विनियोजनीयः ॥
शृङ्गीवचानलदसर्जरसं समानं
कृत्वा त्रुटिं मलयजञ्च षड़ेकमिश्रम् ।
या धूपयेन्निजगृहं वसनं शरीरं
तस्यास्तु दास इव मोहमुपैति लोकः ॥ १ ॥
भृङ्गराजः केशराजो लज्जा च सहदेविका ।
एभिस्तु तिलकं कृत्वा त्रैलोक्यं मोहयेन्नरः ॥ २ ॥
त्रिदलं कुसुमं यस्य स धुस्तूरः कृताञ्जलिः ।
भृङ्गराजः सहाज्येन तिलकं मोहयेज्जगत् ॥ ३ ॥
तालकं कुलटीञ्चैव भृङ्गपत्त्रसमं समम् ।
कृष्णोन्मत्तस्य कुसुमं वटिकां कारयेद् बुधः ॥ ४ ॥
तेनैव तिलकं कृत्वा त्रैलोक्यं मोहयेन्नरः ।
अग्रे सप्तस्वरा ग्राह्या अन्ते क्रूंकारसंयुताः ॥
ओंकारशिरसं कृत्वा क्रूं अन्ते फट् च विन्यसेत् ।
मन्त्रः । "ओं अं आं इं ईं उं ऊं ऋं क्रूं फट्"।
अनेनैव तु मन्त्रेण कृत्वा ताम्बूलभावनम् ।
साध्यस्य मुखनिक्षिप्ते मोहमायाति तत्क्षणात् ॥

"ओं भीं चां भीं मोहय मोहय" इति वारत्रयं जपनात् मोहमाप्नोति मानवः। गोरोचनया अनामिकारक्तेन यस्य नामाभिलिख्य घृतमध्ये स्थापयेत् तं मोहयति॥ ५॥

अथ राजकुलमोहनम्।

नीलोत्पलं गुग्गुलुञ्च कृष्णागुरुसमं समम्।
धूपयित्वा निजं देहं राज्ञः कुलविमोहनम्॥

अथ ईश्वरकुलमोहनम्।

शुभामूलं तथा वीजं रक्तचन्दनसम्भवम्।
त्रुटीवीजं समं पिष्ट्वा वचामूलं प्रयोजयेत्।
भोक्तुं देयं स्वहस्तेन मोहमाप्नोति चेश्वरः॥

अथ दुष्टजनमोहनम्।

यस्य नाम रक्तद्रव्येण भूर्जे संलिख्य मधुमध्ये स्थापयेत्। स दुष्टोऽपि मोहमाप्नोति।

गोरोचनया भूर्जे यस्य नामाभिलिख्य पुष्पादिषड़ङ्गैः सम्पूज्य मधुमध्ये स्थापयेत् तमतिदुष्टमपि मोहयति।

सर्वमोहनम्। दुश्चिक्योद्भवचूर्णेन धूपो मोहयते नृणाम्॥ १॥
गरलं धूर्त्तपञ्चाङ्गं महिषीशोणितं कणा।
शिलायां कुरुते मोहं धूपो गुग्गुलुसंयुतः॥ २॥
हलिसी विषधुस्तूरं शिखिविष्ठाभिरन्वितम्।
समं भागं तथा धूपः योषित्येव विनिश्चितः॥ ३॥
कुकुन्दरोसप्तमुण्डं वृश्चिकस्य तु कण्ठकम्।
हरितालसमं धूपो मोहयेत् सकलान् नरान्॥ ४॥

अथ शत्रुमोहनम्।

अविः पीतशिखा चैव श्वेता च गिरिकर्णिका।
गोरोचनसमायोगे तिलकं शत्रुमोहनम्॥ ५॥

तालकोन्मत्तबीजानि पाने शत्रोश्च दापयेत्।
तत्क्षणान्मोहमाप्नोति चोन्मत्तो जायते नरः।
समाक्षिकैः सिताम्भोजैः सुस्थः पानाद् भवेन्नरः॥ ६॥

विद्वेषणम्। कपिरोम-हिङ्गुदार्वी-खरचर्माणि चूर्णयेत्।
तच्चूर्णं मन्त्रसञ्जप्तं नामकर्मविदर्भितम्॥
त्रिसहस्रं पुनस्तेन स्निग्धयोरन्तरात्मनोः।
धूपैरतीवविद्विष्टौ स्निग्धावपि भविष्यतः॥
तालपत्रे लिखेन्मन्त्रं नामकर्मविदर्भितम्।
कृतप्राणप्रतिष्ठान्तं प्रजप्तं त्रिसहस्रकम्॥
विषालिप्तं द्विधा कृत्वा निखनेत् सिन्धुतीरयोः।
स्निग्धयोराशु विद्वेषः स्यादुमेशानयोरपि॥

अथ रञ्जनम्।

तत्र देहरञ्जनम्।

अत्राङ्गरागः पुरुषेण कार्य्यः स्त्रियाऽपि सम्भोगसुखाय गात्रे।
तस्मादहं गन्धविधानमादौ विलासिनः सर्वमुदीरयामि॥ १॥
हरीतकीलोध्रमरिष्टपत्रं सप्तच्छदं दाड़िमवल्कलञ्च।
एषोऽङ्गनायाः कथितः कवीन्द्रैः शरीरदौर्गन्ध्यहरः प्रलेपः॥ २॥
हरीतकीचन्दनमुस्तनागैरुशीरलोध्रामयरात्रितुल्यैः।
स्त्रीपुंसयोर्घर्मजगात्रगन्धं विनाशयत्याशु विलेपनेन॥ ३॥
हरीतकी श्रीफलमुस्तचिञ्चा-फलत्रिकं पूतिकरञ्जबीजम्।
कक्षादिदौर्गन्ध्यमपि प्रभूतं विनाशयत्याशु निदाघकाले॥ ४॥
कदम्बपत्रं लोध्रञ्च अर्जुनस्य तु पुष्पकम्।
पिष्ट्वा गात्रोद्वर्त्तनञ्च दुर्गन्धचयनाशनम्॥ ५॥
सचन्दनोशीरकबालपत्रैः कोलाख्यमज्जाऽगुरुनागपुष्पैः।
पिष्ट्वा शरीरं प्रमदा हठेन चिरप्रभूतं विनिहन्ति गन्धम्॥ ६॥

दाड़िमत्वङ्मधुलोध्रपद्मैः पिष्टैः समानैः पिचुमर्दपत्रैः।
ालिप्य गात्रं तरुणी निदाघे दुर्गन्धि घर्माम्बुचयं निहन्ति ॥७॥
केशरोशीरशिरीषलोध्रैश्चूर्णीकृतैरङ्गविलेपनेन।
ामे नराणां न कदापि देहे घर्मच्युतिः स्यादिति भोजराजः॥८॥

तिलसर्षपरजनीद्वयदूर्वागोरोचनाकुष्ठसहितैः।
अजमूत्रतक्रपिष्टैरुद्वर्त्तिताङ्गमनुपमं स्यात्॥ ९ ॥

रीतकीतोयदतुल्यभागैर्घनेतरस्यापि चतुर्थभागः।
दर्द्धभागः कथितो नखस्य तेषाञ्च गन्धो मदनप्रकाशः॥ १० ॥
ताशठीपत्रकचन्दनानि तोयात्तथा शिग्रुघनामयानि।
सौरभोऽयं सुरराजयोग्यः ख्यातः सगन्धो नरमोहयोगः॥११॥

अथ मुखरञ्जनम्।

ालजम्बूफलगर्भसारः सकर्कटो माक्षिकसंयुतश्च।
यतो मुखान्ते पुरुषस्य रात्रौ करोति पुंसां मुखवासमिष्टम्॥१॥
ड़त्वगेलानखजातिशिह्वैः स्वर्णान्वितैः क्षुद्रवटी विधेया।
स्थूलगर्भा दिवसे च रात्रौ करोति पुंसां मुखवासमिष्टम्॥२॥
र्णं मुराकेशरकुष्ठकानां प्रातर्दिनान्ते परिलेढि या स्त्री।
स्यर्द्धमासेन मुखस्य वासः कर्पूरतुल्यो भवति प्रकाशः॥ ३ ॥
कृष्णचूर्णं मधुना घृतेन पिक्काम्रबीजान्वितमत्ति नित्यम्।
सैकमात्रेण मुखं तदीयं गन्धायते केतकगन्धतुल्यम्॥ ४ ॥
ष्ट्वा मसूरं घनसारकेण मुहुर्मुहुस्तेन विलिप्य वक्त्रम्।
यन्ति गन्धाः पिड़काः प्ररूढ़ा मासार्द्धमात्रेण विलासिनीनाम्॥५
कण्टकैः शाल्मलिपादपस्य क्षीरेण पिष्ट्वाऽऽशु दिनं प्रलिप्य।
रूढप्ररोहाः पिड़कास्त्र्यहेण प्रयान्ति नाशं पुरुषस्य तन्व्याः॥६॥
न्यं वचाशैलजलोध्रतुल्यं पिष्ट्वा लिपेत्* तेन मुखं नितान्तम्।
वोद्भवा या वनिताजनानां नश्यन्ति नूनं पिड़काः क्रमेण॥७॥

* लिपेत् इत्यार्षं पदम्।

सिद्धार्थबीजं द्वितयं तिलञ्च क्षीरेण पिष्ट्वा परिलिप्य वक्त्रम्।
सप्ताहमात्रेण मुखस्य नीलीं निहन्ति कृष्णामिति रन्तिदेवः ॥८

मरिचं रोचनायुक्तं सम्पिष्य मुखमालिपेत्।
तरुण्याः पिड़काः सर्वा नश्यन्ति मुखसम्भवाः ॥ ९ ॥

मातुलुङ्गजटासर्पिः शिला गोशकृतो रसः।
मुखकान्तिकरो लेपः पिड़कातिलकालजित् ॥ १० ॥

मनःशिला तथा लोध्रः द्विनिशा सर्षपाः समाः।
वारिपिष्टो हितो लेपो वदने श्यामिकां हरेत् ॥ ११ ॥

अथ केशस्य कृष्णीकरणम्।

स्रग्गन्धधूपाम्बरभूषणाद्यं न शोभते शुक्लशिरोरुहाणाम्।
यस्मादतो मूर्द्धजरागसेवां कुर्य्यात् यथैवाञ्जनभूषणानाम् ॥ १

अङ्कोलकोत्थितं तैलं कान्तपाषाणचूर्णकम्।
फलन्तु श्रीफलं कृष्णां चूर्णयित्वा प्रयत्नतः ॥
धान्यराशौ विनिक्षिप्य मासार्द्धं शिरसि स्थितम्।
नस्यं दिनत्रयं तेन केशरञ्जनकं भवेत् ॥
वर्षार्द्धं तिष्ठते कृष्णं भ्रमराञ्जनसन्निभम् ॥ २ ॥

त्रिफला लौहचूर्णञ्च इक्षुभृङ्गरसस्तथा।
कृष्णमृत्तिकया सार्द्धं भाण्डे मासं निरोधयेत्।
तल्लेपाद्रञ्जयेत् केशान् चतुर्मासं स्थिरं भवेत् ॥ ३ ॥

लौहकिट्टं जवापुष्पं पिष्ट्वा धात्रीफलं समम्।
त्रिदिनं लेपयेत् शीर्षं त्रिमासं केशरञ्जनम् ॥ ४ ॥

अथ केशस्य यूकादिनिवारणम्।

विड़ङ्गगन्धोपलकल्कयोगात् गोमूत्रसिद्धं कटुतैलमेतत्।
अभ्यङ्गयोगेन शिरोरुहाणां यूकादिलिख्यप्रचयं निहन्ति ॥ १

गोमूत्रे तु बलामूल-लेपो यूकादिवारणः ॥
पारदं घर्षयेल्लेख्यं कृष्णधुस्तूरजैर्द्रवैः।

तेनैव मिश्रितेनाथ खण्डवस्त्रं प्रलेपयेत्॥
तद्वस्त्रं वेष्टयेन्मौलौ धार्य्यं यामत्रयं तथा।
यूकाः पतन्ति निःशेषं मस्तकान्नात्र संशयः॥
बिल्वमूलं सगोमूत्रं लेपाद् यूकादिनाशनम्॥ २॥

अथ केशस्य इन्द्रलुप्तादिनिवारणम्।

गुञ्जाफलैः क्षौद्रयुतैर्विलिप्य शिरःप्रदेशे सकलेन्द्रलुप्ते।
अनेन योगेन सदैव केशा रोहन्ति कृष्णाः कुटिलाऽतिरम्याः॥१॥
मातङ्गदन्तस्य मसीं विधाय स्रोतोऽञ्जनं तुल्यतया सुपिष्टम्।
लेपेदनेनैवमिहेन्द्रलुप्तं केशाः प्ररोहन्त्यपि हस्तमध्ये॥ २॥
कुङ्कुमं मरिचैः सार्द्धं पिष्ट्वा तैलेन लेपयेत्।
इन्द्रलुप्तं निहन्त्याशु बिम्बीपुष्परसैर्द्रवैः॥ ३॥
सुदग्धहस्तिदन्तन्तु छागीदुग्धं रसाञ्जनम्।
पिष्ट्वा लेपात् प्रजायन्ते केशाः करतलेष्वपि॥ ४॥
जातीपुष्पदलं मूलं कृष्णगोमूत्रपेषितम्।
लेपोऽयं सप्तरात्रेण दृढ़ं केशकरं परम्॥ ५॥
शृङ्गाटं त्रिफलां भृङ्गीं नीलोत्पलमयो रजः।
श्लक्ष्णचूर्णं समं कृत्वा पचेत् तेन चतुर्दले॥
तल्लेपेन दृढ़ाः केशाः कुटिलाः सरला अपि।
कीटभक्षितकेशन्तु स्थानं स्वर्णेन घर्षयेत्।
यावत् सुतप्ततां याति ततो लेपमिदं कुरु॥ ६॥
भल्लातकं कृष्णतिलं कण्टकारीफलं समम्।
पिष्टं तण्डुलतोयेन लेपोऽयं तं विनाशयेत्।
जवापुष्पैश्च तं हन्यात् कृष्णगोमूत्रलेपनात्॥ ७॥
तिलस्य मूलं हि सगव्यक्षीरं
सशावरं गव्यघृतेन लिप्तम्।

सप्ताहमात्रेण शिरःप्रलेपात्
भवन्ति दीर्घाः प्रचुराश्च केशाः॥ ८॥
शाद्वला-तालमूलञ्च मूलं पद्मसमुद्भवम्।
आमदुग्धेन संपिष्टा लेपयेत् मुण्डितं शिरः॥
त्रिदिनं भक्षयेत् तच्च केशवर्द्धनमुत्तमम्॥ ९॥

अथ केशस्य शुक्लीकरणम्।

अजाक्षीरेण सप्ताहं भावयेदभयाफलम्।
तैलेन सह तच्चूर्ण-लेपात् शुक्ला भवन्ति हि॥ १॥
वज्रीक्षीरेण सप्ताहं तच्छेषं भावयेत् तिलान्।
तत्तैललिप्ताः केशाश्च शुक्लाः स्युर्नात्र संशयः॥ २॥
रोगामलकचूर्णन्तु वज्रीक्षीरेण सप्तधा।
भावयेत् तस्य लेपेन शुक्लतां यान्ति मूर्द्धजाः॥ ३॥

अथ वाजीकरणम्।

बलेन नारी परितोषमेति न हीनवीर्य्यस्य कदापि सौख्यम्।
अतो बलार्थं रतिलम्पटस्य वाजीविधानं प्रथमं विदध्ये॥ १॥
अश्विन्यां वटवन्दाकं क्षीरैः पिष्ट्वा महाबलः।
पुष्योद्धृतं पिबेन्मूलं श्वेतार्कस्य प्रयत्नतः॥
सप्तरात्रन्तु गोक्षीरैर्वृद्धोऽपि तरुणायते॥ २॥
पूर्वभाद्रपदा-ऋक्षे विम्बीमूलं पिबेद् बुधः॥ ३॥
चूर्णं विदार्य्याः स्वरसेन तस्या विभावितं भास्कररश्मिजालैः।
मध्वाज्यसंमिश्रितमेव लीढ्वा दश स्त्रियो गच्छति निर्विशङ्कः॥४॥
भूयो विभाव्यामलकस्य चूर्णं रसेन तस्यैव सिताज्यमिश्रम्।
सक्षौद्रमालेढ़ि निशामुखे यो नूनं स वृद्धस्तरुणत्वमेति॥ ५॥
कर्षप्रमाणं मधुकस्य चूर्णं क्षौद्राज्यसंमिश्रितमेव लीढ्वा।
क्षीरान्नपानं रमते तु तावद् यावन्नराणामुदरस्थमेतत्॥ ६॥

सितपिकतरुवीजं तण्डुलाः षष्टिकानाम्।
सघृतमधुसमेतं प्रत्यहं योऽवलेढ़ि॥
जठरकुहरमध्ये याति पाकं न यावत्।
रमयति कृशदेहोऽप्यङ्गनानां समूहम्॥ ७॥
वृद्धशाल्मलिमूलस्य रसं शर्करया पिवेत्।
एतत्प्रयोगात् सप्ताहाज्जायते रेतसोऽम्बुधिः॥ ८॥
लघुशाल्मलिमूलेन तालमूलीं सुचूर्णिताम्।
सर्पिषा पयसा पीत्वा रतौ चटकवद्भवेत्॥ ९॥
विदारीफलकन्दन्तु घृतेन पयसा नरः।
उडुम्बरसमं खादेद् वृद्धोऽपि तरुणायते॥ १०॥
पिप्पली लवणोपेतौ वस्ताण्डौ क्षीरसर्पिषा।
साधितौ भक्षयेद् यस्तु स गच्छेत् प्रमदाशतम्॥ ११॥
वस्ताम्बुसिद्धान् पयसि भावितानसकृत् तिलान्।
यः खादेत् स नरो गच्छेत् स्त्रीणां शतमपूर्ववत्॥ १२॥

श्रीमन्मदनमोदकः।

त्रैलोक्यविजयापत्रं सवीजं घृतभर्जितम्।
त्रिकटुत्रिफलाकुष्ठं भृङ्गं सैन्धवधान्यकम्॥ १३॥
शटीतालीशपत्रञ्च कट्फलं नागकेशरम्।
अजमोदां यमानीञ्च यष्टीमधुकमेव च॥ १४॥
मेथीं जीरकपत्रञ्च गृहीत्वा समभागतः।
यावन्त्येतानि चूर्णानि तावदेव तदौषधम्॥ १५॥
समे शिलातले पिष्ट्वा चूर्णयेदति चिक्कणम्।
तावदेव सिता देया यावदायाति बन्धनम्॥ १६॥
घृतेन मधुना मिश्रं मोदकं परिकल्पयेत् *॥ १७॥

* घृतभर्जिततिलचूर्णं मोदकोपरि विन्यसेत्।

त्रिसुगन्धिसमायुक्तं कर्पूरेणाधिवासितम् ।
स्थापयेद् घृतभाण्डे तु श्रीमन्मदनमोदकम् ॥ १८ ॥
भक्षयेत् प्रातरुत्थाय वातश्लेष्मामयापहम् ।
प्रवृद्धमग्निं कुरुते मन्दमग्निञ्च दीपयेत् ॥ १९ ॥
कृशानामतिरूक्षाणां स्नेहनं स्थौल्यकारणम् ।
कासघ्नं सर्वशूलघ्नं आमवातनिवारणम् ॥ २० ॥
सर्वरोगहरं ह्येतत् संग्रहग्रहणीहरम् ।
एतस्य सतताभ्यासात् वृद्धोऽपि तरुणायते ॥ २१ ॥
ब्रह्मणः स्वमुखात् श्रुत्वा वासुदेवे जगत्पतौ ।
एतत् कामस्य वृद्धयर्थं नारदेन प्रकाशितम् ।
येन लब्धं ध्रुवं स्त्रीणां रेमे स यदुनन्दनः ॥ २२ ॥

अथ गाढ़ीकरणम् ।

प्रौढ़ाङ्गनाया नवसूतिकायाः श्लथं वराङ्गं न सुखाय नृणाम् ।
तस्मान्नरैर्भेषजतो विधेया गाढ़ीक्रिया मन्मथमन्दिरस्य ॥ २३ ॥
निशाद्वयं पङ्कजकेशरञ्च निष्पिष्य देवद्रुमतुल्यभागम् ।
अनेन लिप्तं मदनातपत्रं प्रयाति सङ्कोचमलं युवत्याः ॥ २४ ॥
सधातकीपुष्पफलत्रिकोण-जम्बूत्वचा साररसं घृतेन ।
लिप्त्वा वराङ्गं मधुकेन तुल्यं वृद्धाऽपि कन्येव भवेत्पुरन्ध्री ॥ २५ ॥
पिकाक्षवीजेन मनोजगेहं विलिप्य योषा नियमञ्चरन्ती ।
हठेन गाढ़ं लभते तदङ्गं क्लिष्टो नरैरेष हठेन योगः ॥ २६ ॥
दाड़िम्बपत्रञ्च हरीतकीञ्च प्रक्षाल्य पिष्ट्वाऽथ तथा विलिम्पेत् ।
वस्त्रेण नीरं परितोल्य सम्यक् तदा नवं स्यात् मदनातपत्रम्॥२७
मृणालपङ्कं पयसा सुपिष्ट्वा दृढ़ा समङ्गा गुटिका विधेया ।
यस्या वराङ्गे निहिता क्षणेन कन्येव सद्यः सम्मृणालयोगः ॥२८॥
मदनकघनसारैः क्षौद्रतुल्यं वराङ्गम्
शिथिलमपि च यस्याः पूरितं भूय एव ।

भवति कठिनमुच्चैः कर्कशं कामिनीनाम्
इति निगदति योगं रन्तिदेवो नरेन्द्रः ॥ २९ ॥
अश्वगन्धैर्लिपेल्लिङ्गं गाढ़ीकरणमुत्तमम् ॥ ३० ॥

अथ स्त्रीद्रावणम्।

यद्यप्यष्टगुणाधिको निगदितः कामोऽङ्गनानां सदा
नो याति द्रवतां तथापि झटिति स्त्री योज्जिता सङ्गमे।
तस्माद्भेषजसम्प्रयोगविधिना संक्षेपतो द्रावणम्
किञ्चित्पल्लवयामि नीविजभृशं प्रद्रावणं कामिनीः ॥ ३१ ॥
सिन्दूरचिञ्चाफलमाक्षिकाणि तुल्यानि यस्या मदनातपत्रे।
प्रलिप्य तस्यास्तु सहप्रसङ्गात् प्रागेव वीर्य्यच्युतिमातनोति ॥३२॥
सव्योषजक्षौद्रसमन्वितन्तु लिप्तं यदि स्यात् स्मरगेहयन्त्रे।
द्रुता भवेत् सा हठमेव नारी दृष्टः सदाऽयं किल योगराजः ॥३३॥
सुपक्वचिञ्चाफलघोषमूली गुड़ं तथा माक्षिकतुल्यभागम्।
अमीभिरालिप्य पुनः सलिङ्गं वीजं करोत्याशु नितम्बिनीनाम् ॥३४॥
सटङ्कनक्षौद्रमहेशवीजैः कर्पूरतुल्यैरुपलिप्य लिङ्गम्।
शतं नरो याति विलासिनीनां रेतः प्रपातं कुरुते हठेन ॥ ३५ ॥
गोष्ठवार्त्ताक्यपामार्ग-रसेन लिङ्गलेपनात्।
तत्क्षणात् द्रवते नारी पद्मपत्रे यथा पयः ॥ ३६ ॥
पिप्पली चन्दनञ्चैव वृहती पक्वतिन्तिड़ी।
एतैर्लिङ्गप्रलेपेन द्रवेन्नारी न संशयः ॥ ३७ ॥
जलेन लाङ्गलीमूलं पिष्ट्वा हस्तं प्रलेपयेत्।
हस्तेन स्त्रीकरे स्पृष्टे द्रवत्यग्नौ घृतं यथा ॥ ३८ ॥
सर्वेषां द्रवयोगानां मन्त्रराजः शिवोदितः।
अष्टोत्तरशतं जप्त्वा तत्र योगस्य सिद्धये ॥

अत्र मन्त्रः।—"ओं नमो भगवते रुद्राय उड्डामरेश्वराय द्रावय द्रावय स्त्रीणां मदं द्रावय द्रावय स्वाहा" ॥ ३९ ॥

अथ लिङ्गस्थूलीकरणं दृढ़ीकरणञ्च ।

सकुष्ठमातङ्गबलायुतानां वचाऽश्वगन्धागजपिप्पलीनाम् ।
तुरङ्गशत्रोर्नवनीतयोगात् लेपेन लिङ्गं मुषलत्वमेति ॥ १ ॥

लेपं दिने दिने ह्येवं सुधीः कुर्य्यात् प्रयत्नतः ।
तदा लेपे कृते लिङ्गं स्थूलो भवति निश्चितम् ॥ २ ॥

सलोध्रकाशीशतुरङ्गगन्धा-मातङ्गगन्धापरिपाटितेन ।
तैलेन वृद्धिं खलु याति लिङ्गं वराङ्गनालोकमनोहरञ्च ॥ ३ ॥

टङ्कनञ्च महाराष्ट्री जम्बूशूकरतैलकम् ।
मधुना सह लेपेन लिङ्गं स्यान्मुषलोपमम् ॥ ४ ॥

महिषीनवनीतञ्च मुषलीचूर्णमिश्रितम् ।
धान्यराशिस्थितं भाण्डे सप्ताहाच्च समुद्धरेत् ॥ ५ ॥

तेन प्रलेपयेल्लिङ्गं यामैकाद्वर्द्धते ध्रुवम् ।
मुषली सतिला भक्ष्या लिङ्गवृद्धिकरी मता ॥ ६ ॥

मांसवराक्षफलं कुष्ठं अश्वगन्धा शतावरी ।
तैलपक्वप्रलेपेन लिङ्गस्थौल्यकरं ध्रुवम् ॥ ७ ॥

रोहितस्य तु मत्स्यस्य पित्ताम्धुलाङ्गुणैः सह ।
अनेन वर्द्धयेल्लिङ्गं वर्द्धते मुषलोपमम् ॥ ८ ॥

कृष्णाऽपराजितामूलं पुष्ये खदिरकीलकैः ।
कृष्णसूत्रैः कटिं बद्ध्वा ऊर्द्धलिङ्गं करोति सः ॥ ९ ॥

देवदालीरसं धात्री चीरपानात् स्थिरो भवेत् ॥ १० ॥

इत्येवं सर्वयोगानां मन्त्रराजः शिवोदितः ।
अनेन मन्त्रितं कृत्वा मासैकं लेपयेत् ततः ॥

अत्र मन्त्रः ।—"ओं नमो भगवते उड्डामरेश्वराय सव सव प्रसव प्रसव कुरु कुरु स्वाहा" । दृढ़ीकरणञ्च विनाऽपि मन्त्रेण कार्य्यम् ॥ ११ ॥

अथ स्तनवर्द्धनं स्तनोत्थानञ्च ।

मातङ्गकृष्णामय-वाजिगन्धा वचायुताः पर्य्युषिताम्बुमिश्राः ।

हयारिपत्नीनवनीतयोगाः कुर्वन्ति पीनं कुचकुम्भयुग्मम् ॥१॥
तैलं वचादाड़िमकल्कसिद्धं सिद्धार्थजं लेपनतो नितान्तम्।
नारीकुचौ चारुतरौ च पीनौ कुर्य्यादसौ योगवरः प्रदिष्टः ॥२॥
श्रीपर्णिकाया रसकल्कसिद्धं तिलोद्भवं तैलवरं प्रदिष्टम्।
तूलेन वक्षोजयुगे प्रदेयं प्रयाति वृद्धिं पतितोऽपि नार्य्याः ॥ ३ ॥

प्रथमकुसुमकाले नस्ययोगेन पीतम्
सनियममथवा स्यात् तण्डुलाम्भो * युवत्या।
कुचयुगलसुपीनं क्वापि नो याति पातम्
कथित इति पुरैकः चक्रदत्तेन योगः ॥ ४ ॥

शुण्ठीचूर्णं दशपलं तोयैश्चतुर्गुणैः पचेत्।
अर्द्धं शेषं हरेत् क्वाथं क्वाथार्द्धं तिलतैलकम् ॥ ५ ॥
तैलशेषं पचेत् तेन नस्यं पानञ्च कारयेत्।
पतितं यौवनं स्त्रीणां मासादुत्तिष्ठते स्वयम् ॥ ६ ॥

अथ श्यामादितैलम्।

श्यामा निशा बला लाजा लवणं क्वाथयेत् समम्।
तोये चतुर्गुणे पाच्यं पादशेषं समाहरेत् ॥
तिलतैलं क्वाथपादं तैलार्द्धं माहिषं घृतम्।
स्नेहशेषं पचेत्तैलं नस्येन मासमात्रकैः।
बालास्त्रीवृद्धनारीणां यौवनं कुरुते द्रुतम् ॥ ७ ॥
इतैलं शकुलस्य तैलं तथाऽऽमविल्वस्य रसं गृहीत्वा।
र्दयेद्दृढ्वगहस्तकेन तदा स्तनो स्यात् पतितो न चैव ॥ ८ ॥

अथ योनिसंस्कारः।

ालयेन्निम्बकषायनीरैः शिलाज्यकृष्णागुरुगुग्गुलूनाम्।
ान योनिं निशि धूपयित्वा नारीप्रमोदं विदधाति भर्त्तुः ॥१॥

---

* शालितण्डुलोदककर्षमात्रं वामदक्षिणनासापुटाभ्यां पेयम्।

प्रक्षाल्य निम्बस्य जलेन भूयस्तस्यैव कल्केन विलेपयेच्च।
त्यजेद् युवत्याश्चिरकालभूतं गन्धं वराङ्गस्य न संशयोऽत्र ॥ २ ॥

अथ लोमपातनम्।

पलाशभस्मान्विततालचूर्णैः रम्भाम्बुमिश्रैः परिलिप्य भूयः।
कन्दर्पगेहे मृगलोचनानां रोमाणि रोहन्ति कदापि नैव ॥ १ ॥
एकः प्रदेयो हरितालभागः पञ्च प्रदेया जलजस्य भागाः।
ब्रह्मतरोर्भस्म स एव पञ्च गोक्षाश्च भागाः कदलीजलार्द्राः ॥
समेत्य सप्ताहकभाविताना कृत्वा स्मरागारविलेपनञ्च।
रोमाणि सर्वाणि विलासिनीनां पुनर्न रोहन्ति कदाचिदेव ॥२॥
रम्भाजलैः सप्तदिनं विभाव्य भस्मानि कम्बोर्मसृणानि पश्चात्।
तालेन युक्तानि विलेपनानि लोमानि निर्मूलयितुं क्षमाणि ॥३॥

तालकं शङ्खचूर्णञ्च मञ्जिष्ठाभस्म किंशुकम्।
समभागं प्रलेपेन रोमखण्डनमुत्तमम् ॥ ४ ॥
तालकं शङ्खचूर्णन्तु पिष्ट्वा च क्षारतोयकैः।
तेन लिप्ताः कचा घर्मे स्थिते गच्छन्ति तत्क्षणात् ॥ ५ ॥
पूगवृक्षस्य पत्रोत्थद्रवैः पिष्ट्वाऽथ गन्धकम्।
तेन लिप्ता स्थिते घर्मे रोमखण्डनमुत्तमम् ॥ ६ ॥
नराणां खण्डकेशानां कुच्छुन्दर्य्याश्च तैलतः।
न निर्य्यान्ति पुनर्लेपात् त्रिसप्ताहे कृते सति ॥ ७ ॥
कुसुम्भतैलतो लिप्ता सप्तवारं तथा पुनः।
सद्योजातस्य महिषीवत्सस्य मलमाहरेत् ॥
तल्लिप्तान् वेष्टयेद्रात्रौ केशान् वा तान् व्युपद्रवः।
प्रातस्तप्तोदकैः क्षाल्य पतन्त्यामूलमुत्थिताः ॥ ८ ॥
पिपीलिकानां कृष्णानां स्थूलानां भूगृहं हरेत्।
छायाशुष्कञ्च तच्चूर्णं सप्ताहं लेपयेत् सदा ॥
लेपात् पतन्ति रोमाणि पक्वपत्रमिव द्रुमात् ॥ ९ ॥

शङ्खं तालं यवं गुञ्जां काञ्जिकैः पेषयेत् सदा ।
लेपात् पतन्ति लोमानि पक्वपत्रमिव द्रुमात् ॥
लेपनात् हन्ति केशांश्च कटुतैलैर्मनःशिला ॥ १० ॥

अथ षण्डीकरणं तत्शान्त्यश्च ।

नरो मूत्रयते यत्र कृष्णान्तु तत्र वृश्चिकम् ।
निखन्याज्जायते षण्ड उद्धृते च पुनः सुखी ॥ १ ॥
अजामूत्रेण सम्भाव्य निशि षड्बिन्दुचूर्णितम् ।
खाद्ये पाने प्रयोगेण षण्डत्वमाप्नुयान्नरः ॥ २ ॥
तिलगोक्षुरयोश्चूर्णं छागदुग्धेन भावितम् ।
शीतलं मधुना युक्तं पिबेत् षण्डत्व शान्तये ॥ ३ ॥
जलौकादग्धचूर्णन्तु नवनीतेन भक्षितम् ।
यावज्जीवं न सन्देहः षण्डत्वं प्राप्नुयान्नरः ।
धुस्तूरपुष्पभक्ष्येण पुनः सम्पद्यते सुखम् ॥ ४ ॥
या गोविषाणं पतितं विघृष्य लिम्पेद्रती तस्य मनोभवास्त्रम् ।
रकान्तकं तत्कुरुतेऽन्यपत्नयां नोत्तिष्ठते तामपहाय तस्याम् ॥ ५ ॥
अत्युन्नतं चापरगोविषाणं घृष्ट्वा पुनस्तेन विलिप्य लिङ्गम् ।
ययाति भूयः प्रकृतं तदङ्गं दृष्टो नरैरेष सदा प्रयोगः ॥ ६ ॥
निशा विचूर्णं घनसारयुक्तं समीकृतं बस्तपयोवियुक्तम् ।
भक्तं निपीतं कुरुते निकामं नरस्य षण्डत्वमिति प्रसिद्धम् ॥७॥
तिलस्य दण्डाविटपस्य चूर्णं प्रसाधितं बस्तपयोऽर्द्धमाषम् ।
ययावकं शर्करयान्वितञ्च पीत्वा हरेत् षण्डकतामवाप्ताम् ॥ ८ ॥

अथ दुष्टस्त्रीकृतलिङ्गपातीत्थानम् ।

भूमिचम्पकमूलञ्च सगुवाकं समं तथा ।
तद्भक्षणाद्भवेत् सद्यो लिङ्गोत्थानं न संशयः ॥ १ ॥
रक्तशाल्मलिमूलन्तु शिवं दुर्गां विनायकम् ।
सम्पूज्य विविधैर्द्रव्यैर्निमन्त्र्य निशि संयतः ॥

प्रातस्त्वचं हरेत् सम्यक् शुष्कं कुर्य्याच्च चूर्णकम् ।
घृतेन पेषितं कृत्वा सैन्धवेन सदा शुचिः ॥
प्रातर्भुक्त्वा च किञ्चित्तु भोक्तव्यं प्रहरावधि ।
पतितस्य भवेल्लिङ्गस्योत्थानं नात्र संशयः ॥
अयोमयं भवेल्लिङ्गं कोद्रवान्नं विवर्जयेत् ॥ २ ॥

अथ भगबन्धनं तस्य मोचनञ्च ।

पूर्वोत्थं लाङ्गलीमूलं वामपादस्य पांशुकम् ।
एकत्र कारयेद्धीमान् दाहयेत् शुक्तिसम्पुटे ॥
लेपनाद्भगबन्धः स्यात् तक्रैः प्रक्षाल्य मुच्यते ॥ १ ॥
श्मशानचेलमादाय वामपादस्य पांशुकम् ।
साध्याया बन्धयेत् तेन पोटली भगबन्धनी ॥ २ ॥
मन्त्रस्तु ।—"ओं अमुकीभगं बन्धयामि विस्फुरय विर रन्ध्रशोणितं मया कृतं भगबन्धनं नास्ते लोकचिकित्सकः ।
यदि वा यान्ति मन्त्रेण ये चान्ये भगमर्दकाः ।
सर्वे वै विमुखा यान्ति वर्ज्यते कामुकैस्तदा ।
ओं चिटि चिटि खचिटि खचिटि ठः ठः"। प्रयोगद्वयस्यायं मन्त्रः ॥३॥
एलाफलं वासरगोपचूर्णं गुप्तं क्षिपेद् योषिदुपस्थमार्गे ।
तस्यैव लिङ्गस्य वरः प्रवेशः स्यात् तत्र नान्यस्य कदाचिदेव ॥ ४ ॥
गव्येन दध्ना मथितं विधाय प्रक्षालयेत् तेन तदङ्गमुच्चैः ।
भवेद्वराङ्गं प्रकृतं युवत्या इत्याह कर्त्ता हरमेखलायाः ॥ ५ ॥
वचैलाचन्दनक्षीरैः प्रक्षाल्य मर्दयेद्भगम् ।
यन्त्रमन्त्रादितन्त्रे यद् यत्किञ्चिच्छत्रुणा कृतम् ।
तत् तस्यैव भवेन्नित्यं सिद्धमन्त्रः स उच्यते ॥ ६ ॥
सप्ताभिमन्त्रितं तोयं शुद्धं पूतं पिबेत्तु यः ।
तस्य शत्रुकृतो दोषः शत्रुवेश्मनि यास्यति ॥ ७ ॥

प्राकाशदेशे पतितं गृहीत्वा योषिन्नखं दन्तमलं सुपिष्टा ।
लिप्ता ध्वजं तेन रमेत् ततो यां तस्या विनाशः पुरुषान्तरेण ॥८॥
निर्वान्तलोहस्य जलेन भूयः प्रक्षालनं कामगृहस्य कुर्यात् ।
पुनः समासादयति प्रकृष्टं नारी तदङ्गं खलु पूर्वरूपम् ॥ ९ ॥
मुहुर्मुहुर्या मथितेन नारी प्रक्षालयेत् सप्त दिनानि तेन ।
नार्य्यास्तदङ्गं पुनरेव भूयात् पूर्वाऽनुरूपं न हि संशयोऽत्र ॥ १०॥

अथ गृहकोद्दारक निवारणम् ।

वधू टुण्टीयमूलन्तु तस्या हस्तेन बन्धनात् ।
गृहकोट्टारकं न स्याद् यावद्धस्ते तु बन्धनम् ॥ १ ॥

अथ नष्टपुष्पायाः पुष्पकरणम् ।

ज्योतिष्मती कोमलपत्रमग्नौ भृष्टं जवायाः कुसुमञ्च पिष्टम् ।
गृहाम्बुना पीतमिदं युवत्याः करोति पुष्पं स्मरमन्दिरस्य ॥ १ ॥
दूर्वादलं तण्डुलतुल्यभागं निष्पिष्य पिष्टं परिपाचितञ्च ।
तद्भक्षयित्वा वनिता प्रनष्टं पुष्पं लभेत स्वबलानुरूपम् ॥ २ ॥

लाङ्गलीमूलचूर्णं वाऽपामार्गस्यापि मूलकम् ।
इन्द्रवारुणिकामूलं योनिस्थं पुष्पशोधनम् ॥ ३ ॥
पारावतपुरीषञ्च मधुना संपिबेत् ततः ।
रजस्वला भवेन्नारी मूलदेवेन भाषितम् ॥ ४ ॥
तिलमूलकषायन्तु ब्रह्मदण्डीय मूलकम् ।
यष्टित्रिकटुकोन्मिश्रं क्वाथयुक्तञ्च पाययेत् ।
पुष्परोधे रक्तगुल्मे स्त्रीणां सद्यः प्रशस्यते ॥ ५ ॥
क्वाथं गुड़त्र्यषणजं तिलभागी कृतं पिबेत् ।
क्वाथं रक्तभवे गुल्मे नष्टपुष्पे च योजयेत् ॥ ६ ॥

अथ गर्भपातनम् ।

कृते जारे क्षिपेद् योनौ तिलतैलञ्च सैन्धवम् ।
द्रवते तत्क्षणादेव शुष्कपुष्पं स्रवत्यपि ॥ १ ॥

अथ आमगर्भपातनम् ।

काण्डमेरण्डपत्रस्य योनावष्टाङ्गुलं क्षिपेत् ।
चतुर्मासभवो गर्भस्तत्क्षणात् स्रवते खलु ॥ १ ॥
देवदालीयमूलन्तु कार्षिकं तोयपेषितम् ।
पिबेद् गर्भवती नारी गर्भं स्रवति तत्क्षणात् ॥ २ ॥
निर्गुण्डोद्रवसंमिश्रं चित्रमूलं मधुप्लुतम् ।
कर्षं भुक्त्वा पतत्याशु गर्भोरण्डाकुलोद्भवः ॥ ३ ॥

अथ अतिरजो निवारणम् ।

धात्रीञ्च पथ्याञ्च रसाञ्जनञ्च कृत्वा विचूर्णं सजलं निपीतम् ।
अत्यन्तरक्तोत्थितमुग्रवेगं निवारयेत् सेतुरिवाम्बुपूरम् ॥ १ ॥
शेलुत्वचामिश्रिततण्डुलेन विधाय पिष्टं विनियोजनीयम् ।
कन्दर्पगेहे मृगलोचनाया रक्तं निहन्त्याशु हठेन योगः ॥ २ ॥
मूलन्तु शरपुङ्खायाः पेषयेत् तण्डुलोदकैः ।
पाययेत् कर्षमात्रं तदतिरक्तप्रशान्तये ॥ ३ ॥
अपामार्गस्य मूलन्तु दृढ़पूगेन भक्षयेत् ।
रक्तस्रावं निहन्त्याशु सुखीभवति सुन्दरी ॥ ४ ॥
कुशस्य मूलं कदलीफलं वा वलाशिफा वा वदरी फलं वा ।
गुड़ूचिका तण्डुलवारिपीता स्त्रीणामनेकं रुधिरं जयेच्च ॥ ५ ॥
कुरण्टकस्य मूलानि मधुकं श्वेतचन्दनम् ।
पिष्ट्वा वै सममात्रन्तु पाययेत् तण्डुलाम्बुना ।
सकृत् पीत्वा माषयूषं प्रदरात् परिमुच्यते * ॥ ६ ॥
चन्दनं † क्षीरसंयुक्तं सघृतं पाययेद्भिषक् ।
शर्करामधुसंयुक्तमसृक्स्रवविनाशनम् ॥ ७ ॥
दार्वी रसाञ्जनवृषाब्दकिरातविल्व-
भल्लातकैरथ कृतो मधुना कषायः ।

* घृतभृष्टमाषयूषेण पथ्यम् ।   † अत्र चन्दनं रक्तम् ।

पीतो जयत्यतिबलं प्रदरं सशूलम्
पीतं सितारुणविलोहितनीलकृष्णम् ॥ ८ ॥
अशोकस्य त्वचा सिद्धं क्षीरं रक्तहरं पिबेत् ॥ ९ ॥
पेटारिकायाः पत्रञ्च माषचूर्णेन संयुतम् ।
रम्भादलैर्वेष्टयित्वा दाहयेच्च प्रयत्नतः ।
तस्य भक्षणमात्रेण अतिरक्तनिवारणम् ॥ १० ॥
तन्मूलं तण्डुलैः पिष्ट्वा पिष्टकं भर्जयेद् बुधः ।
तस्य भक्षणमात्रेण रक्तं विप्रकृतं हरेत् ॥ ११ ॥
तस्य वल्कलचूर्णन्तु भ्रष्टतण्डुलचूर्णकम् ।
भक्षणादेव हृद्रक्तं स्त्रीणां शमयति ध्रुवम् ॥ १२ ॥
शतावर्य्यास्तु मूलस्य समाहृत्य निजद्रवम् ।
चत्वारिंशत्पलान्येव वस्त्रपूतं समाहरेत् ॥
द्रवतुल्यं गवां क्षीरं क्षीरस्य द्विगुणं घृतम् ।
धातकी क्षीरकाकोली जीवन्ती शैलोमञ्जिका ॥
मुद्गपर्णी माषपर्णी महामेदा शतावरी ।
द्राक्षा परुषको यष्टी जीरकं प्रतिकार्षिकम् ॥
पलार्द्धं मधुकं पुष्पं सर्वमेकत्र पाचयेत् ।
घृतशेषं समुत्तार्य्य शीतीभूते च निक्षिपेत् ॥
क्षौद्रं पलाष्टकं नेयं शुण्ठीचूर्णं पलाष्टकम् ।
शतावरीघृतं ह्येतत्सिता दशपलान्वितम् ॥
लेह्यं कर्षं शमेदाशु दुःसाध्यमतिरक्तजम् ।
कमलां वातरोगांश्च अश्मरीञ्च शिरोग्रहम् ॥ १३ ॥

अथ बन्ध्याया गर्भधारणम् ।

जन्मबन्ध्या काकबन्ध्या मृतवत्सा क्वचित् स्त्रियः ।
तासां पुत्रोदयार्थञ्च शम्भुना सूचितं पुरा ॥ १ ॥

आदौ जन्मबन्ध्याचिकित्सा ।

समूलपत्रां सर्पाक्षीं रविवारे समुद्धरेत् ।
एकवर्णागवीक्षीरैः कन्याहस्तेन पेषयेत् ॥
ऋतुकाले पिबेद्वन्ध्या पलार्द्धं तद्दिने दिने ।
क्षीरशाल्यन्नमुद्गञ्च लघ्वाहारं प्रदापयेत् ॥
एवं सप्तदिनं कृत्वा बन्ध्या भवति पुत्त्रिणी ।
उद्वेगं भयशोकञ्च व्यायामञ्च विवर्जयेत् ॥
अनङ्गं भयशोकञ्च दिवानिद्रां विवर्जयेत् ।
न कर्म्म कारयेत् किञ्चिद्वर्जयेच्छीतमातपम् ॥
न तया परमां सेवां कारयेत् पूर्ववत् क्रियाम् ।
पतिसङ्गाद्गर्भलाभो नात्र कार्य्या विचारणा ॥ २ ॥
एकमेव तु रुद्राक्षं सर्पाक्षी-कर्षमात्रकम् ।
पूर्ववच्च गवां क्षीरे ऋतुकाले प्रदापयेत् ।
महागणेश मन्त्रेण रक्षां तस्याश्च कारयेत् ॥
मन्त्रस्तु—"ओं ह्रदन्महागणपते रक्षामृतं मत्सुतं देहि" ॥३॥
पत्रमेकं पलाशस्य गर्भिणी पयसाऽन्वितम् ।
पीत्वा तु लभते पुत्त्रं रूपवन्तं न संशयः ॥ ४ ॥
पथ्यमुक्तं यथा पूर्वं तद्वत् सप्तदिनावधि ।
देवदालीयमूलन्तु ग्राहयेत् पुष्यभास्करे ॥
निष्कत्रयं पिबेत् क्षीरैः पूर्ववत् क्रमयोगतः ।
बन्ध्याऽपि लभते पुत्त्रं देयं पथ्यं यथा पुरा ॥ ५ ॥
शीततोयेन सम्पिष्टं शरपुङ्खीयमूलकम् ।
कर्षं पीत्वा लभेद्गर्भं पूर्ववत् क्रमयोगतः ॥ ६ ॥
मुस्ताप्रियङ्गुसौवीरं लाक्षाक्षौद्रं समं पिबेत् ।
कर्षं तण्डुलतोयेन बन्ध्या भवति पुत्रिणी ॥
पथ्यमुक्तं यथापूर्वं तद्वत् सप्तदिनं पिबेत् ॥ ७ ॥

समूलां सहदेवीञ्च संग्राह्यं पुष्यभास्करे।
छाया शुष्कञ्च तत् चूर्णं एकवर्णगवां पयः॥
पूर्ववत् पिबते नारी बन्ध्या भवति पुत्त्रिणी॥ ८॥
मूलं शिफां वा किल लक्षणाया ऋतौ निपीय त्रिदिनं पयोभिः।
क्षीरानुचर्य्यां नियमेन भुङ्क्ते पुत्त्रं प्रसूते वनिता न चित्रम्॥ ९॥
गपिप्पलीकेशरशृङ्गवेरं क्षुद्रोषणं गव्यघृतेन पीतम्।
बन्ध्यापि पुत्रं लभते हठेन योगोत्तमोऽयं मुनिभिः प्रदिष्टः॥१०॥
तुरङ्गगन्धाघृतवारिसिद्धं साज्यं पयः स्नानदिने च पीत्वा।
प्राप्नोति गर्भं विषयं चरन्ती बन्ध्याऽपि पुत्त्रं पुरुषप्रसङ्गात्*॥११॥
पुष्यार्कयोगोद्धृतलक्षणाया मूलं तथा वज्रतरोश्च पिष्ट्वा।
प्रध्येकवर्णापयसा निपीतं स्त्रियः स्मृतं पुत्त्रकरं मुनीन्द्रैः॥१२॥
पुष्योद्धृतं लाक्षणमेव चूर्णं पुंसा निपिष्टं सघृतं निपीय।
क्षीरौदनं प्राश्य पतिप्रसङ्गात् गर्भं विदध्यात् तरुणी न चित्रम्॥१३॥
कृष्णाऽपराजितामूलं बस्तक्षीरेण संपिबेत्।
ऋतुस्नाता त्रिधा या तु बन्ध्या गर्भधरा भवेत्॥ १४॥
नागकेशरकं चूर्णं नूतनं गव्यदुग्धतः।
पिबेत् सप्तदिनं दुग्धं घृतैर्भोजनमाचरेत्॥
तद्दृतौ लभते गर्भं सा नारी पतिसङ्गतः॥ १५॥
पुत्त्रजीवस्य पत्रैकं पिबेत् क्षीरैः ऋतौ तु या।
पतिसङ्गा च सा नारी सत्यं पुत्त्रवती भवेत्॥
तस्य मूलं चैकवर्णाक्षीरैः पीत्वा च पुत्त्रिणी॥ १६॥
काकोल्यौ लक्षणामूलं तथा षष्टिकतण्डुलम्।
नार्य्यैकवर्णापयसा पीत्वा गर्भवती ऋतौ॥ १७॥
अश्विन्यां बोधिवृक्षस्य वन्दाकं ग्राहयेद् बुधः।
गोक्षीरैः पानमात्रेण बन्ध्या पुत्त्रवती भवेत्॥ १८॥

* घृतस्तु शयनसमये पेयम्।

तिलरसकुड़वैकं गोकरीषाग्नियोगात्
तरुणवृषभमूत्रं प्रस्थयुक्तं विपक्वम्।
ऋतुषु दिवसमध्ये सप्तवारैश्च पीतम्
जनयति सुतमेतन्निश्चितं पुष्पितैव॥ १९॥

कदम्बपत्रं श्वेतञ्च वृहतीमूलमेव च।
एतानि समभागानि अजाक्षीरेण पेषयेत्॥
त्रिरात्रं पञ्चरात्रं वा पिबेदेतन्महौषधम्।
अस्मिन्निपीयमाने तु गर्भो भवति निश्चितम्॥ २०॥
गोक्षुरस्य तु वीजन्तु पिबेन्निर्गुण्डिकारसैः।
त्रिरात्रं सप्तरात्रं वा बन्ध्या भवति पुत्त्रिणी॥ २१॥
कर्कोटवीजचूर्णन्तु एकवर्णागवां पयः।
ऋतौ निपीयमाने तु बन्ध्या भवति पुत्त्रिणी॥ २२॥
भगाख्ये चैव नक्षत्रे वटवृक्षस्य मूलकम्।
हस्ते बद्ध्वा लभेत् पुत्त्रं सुन्दरं कुलवर्द्धनम्॥ २३॥
अश्वत्थस्य तु वन्दाकं पूर्वद्युः सुनिमन्त्रितम्।
ऋतुस्नाने तु पीतं स्यादपि बन्ध्या लभेत् सुतम्॥ २४॥
एकवर्णासवत्साया गोः क्षीरेण सुपेषितम्।
भावितं वटवन्दाकं पीतं बन्ध्या सुतं लभेत्॥ २५॥

अथ काकबन्ध्यालक्षणम्।

पूर्वं पुत्त्रवती भूत्वा पश्चान्नो सूयते यदि।
काकबन्ध्या च सा ज्ञेया चिकित्सास्याश्च कथ्यते॥ १॥

तच्चिकित्सा। विष्णुक्रान्तां समूलान्तु पिष्ट्वा दुग्धैस्तु माहिषैः।
महिषीनवनीतेन ऋतुकाले च भक्षयेत्॥
एवं सप्तदिनं कुर्य्यात् पथ्यमुक्तञ्च पूर्ववत्।
गर्भं सा लभते नारी काकबन्ध्या सुशोभनम्॥ २॥
अश्वगन्धीयमूलन्तु ग्राहयेत् पुष्यभास्करे।

योजयेन्महिषीक्षीरैः पलाण्डं भक्षयेत् सदा।
सप्ताहाल्लभते गर्भं काकवन्ध्या न संशयः॥ ३॥

अथ मृतवत्सालक्षणम्।

गर्भसञ्जातमात्रेण पश्चान्मासाच्च वत्सरात्।
म्रियते द्वित्रिवर्षाद्वा यस्याः सा मृतवत्सिका॥
तत्र प्रयोगः कर्त्तव्यो यथा शङ्करभाषितम्॥ १॥

चिकित्सा। मार्गशीर्षे तथा ज्येष्ठे पूर्णायां लिप्त मन्दिरे।
नूतनं कलसं पूर्णं गन्धतोयेन कारयेत्॥
शाखाफलसमायुक्तं नवरत्नसमन्वितम्।
सुवर्णसूत्रिकायुक्तं षट्कोणमण्डले स्थितम्॥
तन्मध्ये पूजयेद्देवीमिकान्तीं मनसा स्थितः।
गन्धपुष्पाऽक्षतैर्द्दीपैर्धूपैर्नैवेद्यसंयुतैः॥
अर्च्चयेद्भक्तिभावेन मत्स्यमांसैः समद्यकैः।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा॥
वाराही च तथाचैन्द्री षट्पत्रेषु च मातरः।
पूजयेन्मन्त्रवीजेन श्रींकारेण विधिश्रुतैः॥
दधिभक्तैश्च पिण्डानि सप्त संख्यानि कारयेत्।
षट्संख्याः षट्सु पत्रेषु मातृभ्यः कल्पयेत् पृथक्॥
विल्वाभं सप्तमं पिण्डं शुचिस्थाने वहिः क्षिपेत्।
तैर्भुक्ते गृहमागच्छेच्चक्राङ्गं यावदाचरेत्॥
कन्यकां योगिनीं बालां भोजयेत् सकुटुम्बकैः।
दक्षिणां दापयेत् तासां देवताग्रेण चान्यथा॥
विसर्ज्य देवताञ्चाथ नद्यां तत्फलमोदकम्।
सकुलं वीक्षयेद्धीमान् शुभेन शुभमादिशेत्॥
विपरीते पुनः कार्य्यं योगान्तर सुसिद्धिदम्।
प्रतिवर्षमिदं कार्य्यं दीर्घजीविसुतं लभेत्॥

"ओं ह्रीं फें एकान्तोदेवतायै नमः"। अनेन मन्त्रेण पूजा जपश्च कार्य्यः ॥ २ ॥

प्राङ्मुखो कृत्तिका-ऋक्षे बन्ध्याकर्कोटकीं हरेत्।
तत्कन्दं पेषयेत् तोयैः कर्षमात्रं सदा पिबेत्॥
ऋतुकाले तु सप्ताहं दीर्घजीविसुतं लभेत्॥ ३॥

या वीजपूरद्रुममूलमेकं क्षीरेण सिद्धं हविषा विमिश्रम्।
ऋतौ निपीय स्वपतिं प्रयाति दीर्घायुषं सा तनयं प्रसूते॥ ४॥

द्रुममूलघृतम्।

मञ्जिष्ठा मधुकं द्राक्षा त्रिफला शर्करा बला।
मेदा पयस्या * काकोली मूलञ्चैवाश्वगन्धजम्॥
अजमोदा हरिद्रे द्वे हिङ्गुनी कटुरोहिणी।
उत्पलं † कुमुदं कुष्ठं काकोल्यौ चन्दनद्वयम्॥
एतेषां कार्षिकैर्भागैर्घृतप्रस्थं विपाचयेत्।
शतावरीरसं क्षीरं घृताद्देयं चतुर्गुणम्॥
सर्पिरेतन्नरः पीत्वा नित्यं स्त्रीषु वृषायते।
पुत्रान् जनयते नारी मेधाढ्यान् प्रियदर्शनान्॥
याचैवास्थिरगर्भा स्याद् या नारी जनयेन्मृतम्।
अल्पायुषं वा जनयेत् या च कन्यां प्रसूयते॥
योनिदोषे रजोदोषे गर्भस्रावे च शस्यते।
प्रजावर्द्धनमायुष्यं सर्वग्रहनिवारणम्॥
नाम्ना द्रुमघृतं ह्येतदश्विभ्यां परिकीर्त्तितम्।
तद्युक्तं लक्षणामूलं क्षिपन्त्यत्र चिकित्सकाः॥
जीवद्वत्सैकवर्णाया घृतमत्र तु दीयते।
आरण्यगोमयेनैव वह्निज्वाला प्रदीयते॥ ४॥

* पयस्या—क्षीरयुक्तभूमिकुष्माण्डः।

† उत्पलं नीलमिति।

अथ गर्भरक्षा।

अकस्मात् प्रथमे मासि गर्भे भवति वेदना।
गोक्षीरैः पाययेत् तुल्यं पद्मकेशरचन्दनम्॥
पलमात्रं पिबेन्नारी त्र्यहं गर्भः स्थिरो भवेत्॥ १॥
अथवा मधुकं दारु शरवृक्षस्य वीजकम्।
संपिष्य क्षीरकाकोलीं पिबेत् क्षीरैस्तु गोभवैः॥ २॥

२ये मासि। नीलोत्पलं मृणालञ्च यष्टिः कर्कटशृङ्गिका।
गोक्षीरैस्तु द्वितीये च पीत्वा शाम्यति वेदना॥ ३॥
अश्वत्थवल्कलञ्चाथ तिलं कृष्णं शतावरी।
मञ्जिष्ठासहितं पिष्ट्वा पिबेत् क्षीरैश्चतुर्गुणैः॥ ४॥

३ये मासि। श्रीखण्डञ्च वचा कुष्ठं मृणालं पद्मकेशरम्।
पिबेत् शीतोदकं पिष्टं तृतीये वेदनावती॥
अथवा क्षीरकाकोलीं वलां पिष्ट्वा पयः पिबेत्॥ ५॥

४र्थे मासि। नीलोत्पलं मृणालानि गोक्षुरञ्च कशेरुकम्।
तुर्य्यमासे गवां क्षीरैः पिबेत् सा वेदनापरा॥ ६॥
अथवा मधुकं रास्नां श्यामां ब्राह्मणयष्टिकाम्।
अनन्तां पेषयित्वा च गव्यक्षीरेण सम्पिबेत्॥ ७॥

५मे मासि। पुनर्नवाञ्च काकोलीं तगरं नीलमुत्पलम्।
गोक्षीरं पञ्चमे मासि गर्भक्लेशहरं भवेत्॥ ८॥
अथवा वृहतीयुग्मं यज्ञाङ्गं कटुकं त्वचम्।
गोघृतं क्षीरसंयुक्तं पिबेत् पिष्ट्वा च पञ्चमे॥ ९॥

६ष्ठे मासि। सिता कपित्थमज्जा च शीततोयेन पेषयेत्।
षष्ठे मासि गवां क्षीरैः पिबेत् क्लेशनिवृत्तये॥ १०॥
अथवा गोक्षुरं शिग्रुं मधुकं पृश्निपर्णिकाम्।
वलायुक्तं पिबेत् पिष्ट्वा गोदुग्धैः षष्ठमासके॥ ११॥

७मे मासि । कशेरु पौष्करं मूलं शृङ्गाटं नीलमुत्पलम् ।
पिष्ट्वा च सप्तमे मासि क्षीरैः पीत्वा प्रशाम्यति ॥१२॥
अथवा मधुकं द्राक्षां शृङ्गाटञ्च कशेरुकम् ।
मृणालं शर्करायुक्तं क्षीरैः पेयन्तु सप्तमे ॥ १३ ॥
८मे मासि । यष्टीं पद्माख्यकं मुस्तां कशेरु गजपिप्पलीम् ।
नीलोत्पलं गवां क्षीरैः पिबेदष्टममासके ॥ १४ ॥
अथवा विल्वमूलञ्च कपित्थं वृहतीफलम् ।
इक्षुपटोलयोर्मूलमेभिः क्षीरं प्रसाधयेत् ।
तत्क्षीरमम्भसा पीत्वा गर्भे शाम्यति वेदना ॥ १५ ॥
९मे मासि । विशालावीज-कक्कोलं मधुना सह लेहयेत् ।
वेदना नवमे मासि शान्तिमाप्नोति नान्यथा ॥ १६ ॥
अथवा मधुकं श्यामा त्वनन्ता क्षीरकाकोली ।
एभिः सिद्धं पिबेत् क्षीरं नवमे वेदनावती ॥ १७ ॥
१०मे मासि । शर्करा गोस्तनीक्वाथैः सक्षौद्रं नीलमुत्पलम् ।
पाययेद्दशमे मासि गवां क्षीरैः प्रशान्तये ॥ १८ ॥
अथवा शुण्ठीसंसिद्धं गोक्षीरं दशमे पिवेत् ।
अथवा मधुकं दारु शुद्धक्षीरेण सम्पिवेत् ॥ १९ ॥

सामान्यौषधम् ।

धान्याञ्जनं सावरयष्टिकाख्यं त्र्यहं निपीतं प्रमदा हठेन ।
सप्ताहमात्रं विनियोज्य नारी स्तम्भाति गर्भं चलितं न चित्रम् ॥१॥
क्षौद्रं वृषं चन्दनसिन्धुजातं महेन्द्रमाज्यं पयसा सुपिष्टम् ।
गर्भं चरन्तं प्रतिहन्ति शीघ्रं योगोऽयमुक्तः किल मूलदेवैः ॥२॥
कुलालहस्तोद्भवकर्दमस्य बस्तीपयःक्षौद्रयुतस्य मात्रम् ।
गर्भच्युतिं शूलमयीं निवार्य करोति गर्भं प्रकृतं हठेन ॥ ३ ॥
कशेरुशृङ्गाटकजीरकाणि पयोवनैरण्डशतावरीभिः ।
सिद्धं पयः शर्करया विमिश्रं संस्थापयेद्गर्भमुदीर्य शूलम् ॥ ४ ॥

कन्दं कौमुदकस्य माक्षिकयुतं क्षीराज्ययुक्तं पिबेत्
सप्ताहं सितया सुपक्कमबला शीतीकृतं वायुना।
गर्भस्रावमशेषकं सपवनं शोषं त्रिदोषं वमिम्
शूलं सर्वविधं निहन्ति नियमादेवञ्च तत्तत् स्मृतम्॥ ५॥

ह्रीवेराऽतिविषामुस्तैर्मोचशक्रैः शृतं यवम्।
दद्याद्गर्भस्रवे चैव प्रदरे कुक्षिसंरुजे॥ ६॥

कुवलयकन्दं सतिलं पीत्वा क्षीरेण,मधुयुतं वनिता।
मुक्तिं गुरुतरदोषैश्चलितं गर्भं दधत्याशु॥ ७॥

पद्मोत्पलस्य मूलानि मधुशर्करया तिलाः।
क्षरमाणेषु गर्भेषु गर्भस्थापनमुत्तमम्॥ ८॥

य गर्भे शुष्के। गोक्षीरं शर्करायुक्तं शुष्कगर्भप्रशान्तये।
पिबेद्वा मधुकं चूर्णं गाम्भारीफलचूर्णकम्।
समांशं गव्यदुग्धेन गर्भिणी तत्प्रशान्तये॥ १॥

अथ सूतिकानिरोधे सुखप्रसवमाह।

श्वेतं पुनर्नवामूलचूर्णं योनौ प्रवेशयेत्।
क्षणात् प्रसूयते नारी गर्भेणातिप्रपीड़िते॥ १॥

उत्तराभिमुखं ग्राह्यं श्वेतगुञ्जोयमूलकम्।
कट्यां बद्धा विमुक्तश्च गर्भं पुत्रन्तु तत्क्षणात्॥ २॥

वासकस्य तु मूलन्तु चोत्तरस्थं समुद्धरेत्।
कट्यां बद्धा सप्तसूत्रैः सुखं नारी प्रसूयते॥ ३॥

उत्तरे च समालोक्य श्वेतगुञ्जाफलीयकम्।
सुखप्रसवमाप्नोति तत्क्षणान्नात्र संशयः॥ ४॥

योनिं वा लेपयेत् तेन सा सुखेन प्रसूयते।
सहदेव्याश्च मूलन्तु कटिस्थं प्रसवेत् सुखम्॥ ५॥

अपामार्गस्य मूलन्तु ग्राहयेच्चतुरङ्गुलम्।
नारी प्रवेशयेद्द योनौ तत्क्षणात् सा प्रसूयते॥ ६॥

तोयेन लाङ्गलीमूलं पिष्ट्वा योनौ प्रवेशयेत् ।
नाभिञ्च लेपयेत् तेन चणात् सा सूयते सुखम् ॥ ७ ॥
गुञ्जाफलार्कपुष्पञ्च तोयपूगं तथाऽर्द्दकम् ।
पिबेद्दा तोयपिष्टञ्च सा सुखेन प्रसूयते ॥ ८ ॥
गुञ्जातरोर्मूलयुगं विधानादुत्पाद्य पुष्ये च रवौ निबद्धम् ।
कटीतले मूर्द्धनि नीलसूत्रैः शीघ्रं प्रसूतिं कुरुतेऽङ्गनायाः ॥९॥
आगारधूमं गृहवारिणा वा पीत्वाऽबला शीघ्रतरं प्रसूते ।
अलम्बुषामूलमथो निबद्धं योगद्वयं भूपतिरित्यवादीत् ॥ १० ॥
समातुलुङ्गं मधुकस्य चूर्णं मध्वाज्यमिश्रं प्रमदा निपीय । *
व्यथाविहीनं प्रसवं हठेन प्राप्नोति नैवात्र विकल्पबुद्धिः ॥ ११ ॥
दशमूलीशृतं तोयं घृतसैन्धवसंयुतम् ।
शूलातुरा पिबेदाशु सुखं नारी प्रसूयते ॥ १२ ॥

"ओं मन्मथ मन्मथ वाहिनि लम्बोदरं मुञ्च मुञ्च स्वाहा" ।

अनेन मन्त्रेण जलं सुतप्तं पातुं प्रदेयं शुचिना नरेण ।
तोयाभिपानात् खलु गर्भवत्या प्रसूयते शीघ्रतरं सुखेन ॥ १३ ॥
ओं कारञ्च हकारञ्च आंकारेण सुपूजितम् ।
अंकारं शिरसं कृत्वा अन्ते नमस्त्रिमूर्त्तये ॥

"अं ओं ह्रां नमस्त्रिमूर्त्तये" ।

अनेनैव तु मन्त्रेण जप्तव्यं सूतिकागृहे ।
सुखप्रसवमाप्नोति सा पुत्त्रं लभते ध्रुवम् ॥ १४ ॥

अथ बालानां प्रसूतानां भूतग्रहादिनिवारणम् ।

विल्वमूलं देवदारु गोशृङ्गञ्च प्रियङ्गुकः ।
मार्जारस्य मलं कुष्ठं वंशत्वग्गजमूत्रकैः ॥
पिष्ट्वा धूपो निहन्त्याशु ग्रहभूतज्वरादिकान् ।
शाकिनीराक्षसाः प्रेताः पिशाचाः ब्रह्मराक्षसाः ।

* अत्र मातुलुङ्गस्य मूलं योज्यं, न तु फलम् । पेयं क्वाथयेद्वा ।

ऐकाहिको द्व्याहिकश्च ज्वरो नश्यति तत्क्षणात्॥
"ओं द्रावितं तापे ठं ठः स्वाहा"। अनेन धूपं दद्यात्॥ १॥
श्रीवासं सैन्धवं कुष्ठं वचा तैलं घृतं वसा।
धूपो बालगृहे देयो ग्रहराक्षसशान्तये॥ २॥
शिरीषनिम्बयोः पत्रं गोशृङ्गस्य त्वचा वचा।
वंशत्वक् शिखिपुच्छञ्च कङ्गुना च समं घृतम्।
धूपो बालग्रहान् हन्ति एतन्मन्त्रेण मन्त्रितः॥
"ओं द्रुतं मुञ्च मुञ्च उड्डामरेश्वरं आज्ञापयति स्वाहा"
धूपवयाणामेष मन्त्रः॥ ३॥
पुनर्नवानिम्बपत्रसर्षपघृतैर्विरचितो धूपः।
गर्भिण्या बालानां सततं रक्षाकरः कथितः॥ ४॥
दाड़िमस्य च वन्दाकं ज्येष्ठा-ऋक्षे समुद्धरेत्।
द्वारबन्धे च बालानां सर्वग्रहनिवारणम्॥ ५॥
पुष्यार्के श्वेतगुञ्जाया मूलमुद्धृत्य धारयेत्।
बालानां कण्ठदेशे तु डाकिनीभयनाशनम्॥ ६॥
श्वेतापराजितापत्रं जयापत्रं द्वयोः रसम्।
नस्यं कुर्य्यात् पलायन्ते डाकिनीदानवादयः॥ ७॥
सर्पत्वक् शिंशपावृक्ष-पल्लवं रजनी वचा।
रसोनहिङ्गुगोरोमशृङ्गीमरिचमाक्षिकैः।
धूपः सर्वज्वरघ्नोऽयं कुमाराणां ज्वरापहः॥ ८॥
रसोनहिङ्गुगोरोमशृङ्गीमरिचमाक्षिकैः।
कुच्छुन्दरीमलं मांसं हरिद्रा विल्वपत्रकम्॥
इन्द्रः शिरीषपत्रञ्च धूपेन तत्प्रयोजितम्।
निहन्ति रोदनं रात्रौ बालस्याशु न संशयः॥ ९॥
मत्स्यराजस्य पित्तेन मरिचं भावयेद् बुधः।
रविवारे रौद्रशुष्कमञ्जनात् सर्वभूतहृत्॥ १०॥

नरसिंहस्य वीजन्तु सकृदुच्चरितं हरेत्।
डाकिनीप्रेतभूतानि तमः सूर्य्योदये यथा॥

अत्र मन्त्रः।—"ओं नमो नरसिंहाय हिरण्यकशिपुवक्षःस्थलविदारणाय त्रिभुवनव्यापकाय भूतप्रेतपिशाचडाकिनीकुलोन्मूलनाय स्तम्भोद्भवाय समस्तदोषान् हर हर विसर विसर पच पच हन हन कम्पय कम्पय मथ मथ ह्रीं ह्रीं ह्रीं फट् फट् ठः ठः एह्येति रुद्र आज्ञापयति स्वाहा"। इति नरसिंहमन्त्रः। "ओं ओं ह्रीं ह्रीं क्रः क्रः फट् स्वाहा। अनेन सर्षपमभिमन्त्रितं कृत्वा रोगिणं प्रहारयेत् तदा सर्वे ग्रहाः पलायन्ते॥ ११॥

अथ बलिरुच्यते।

बालग्रहाभिभूतानां बलिं यत्नेन कल्पयेत्।
शुचिः पक्वा तु सप्ताहं मत्स्यमांससुराफलम्॥
पुष्पधूपाक्षतं गन्धं दीपञ्च दक्षिणादिकम्।
चतुष्पथे क्षिपेद्रात्रौ शुद्धे नूतनखर्परे।
शनौ वा कुजवारे वा बालदोषोपशान्तये।

"ओं सर्वभूतेभ्यो बलिं गृह्ण गृह्ण स्वाहा"। इति बलिदानमन्त्रः॥१॥

अथ सद्योजातबालकस्याहितुण्डिकानिवारणम्।

उडुम्बरभवं मूलं शिशुकण्ठाञ्च धारयेत्।
वृहत्कुष्माण्डचूर्णं वा तेनाहितुण्डिकां जयेत्॥ १॥
श्वेतार्कमूलं संगृह्य गृहस्तम्भे च बन्धयेत्।
पुष्यार्के वा रवौ वारे तेनाहितुण्डिकां जयेत्॥ २॥
चन्द्रग्रस्ते शिखीमूलं विधिवद्बन्धयेद् बुधः।
बद्ध्वा बालस्य जघने बालाऽहितुण्डिकां जयेत्॥ ३॥

अथ स्त्रीणां पुष्परक्षा।

पलाशराजादनयोः फलानि पुष्पाण्यथो शाल्मलिपादपस्य।
आज्येन मासार्द्धदिनं पिबन्ति स्यात्पुष्परक्षाद्भुतमङ्गनानाम्॥१॥

तुषाम्बुना पावकवृक्षमूलं निक्काथ्य पीत्वा नियमं चरन्ती।
ऋतौश्च काले त्रिदिनं पिबन्ती रक्षाभवेद्दोषविनाशमेति ॥ २ ॥
फलं कदम्बस्य च माक्षिकाणि तुषाम्बुना तु त्रिदिनं पिबन्ती।
स्नानावसाने नियमेन गर्भं बन्ध्या त्ववश्यं लभते हठेन ॥ ३ ॥
वैहायणं वा शुभमत्ति नित्यं पलप्रमाणं वनिताऽर्द्धमासम्।
जीवन्तिकं निश्चितमेव नश्येत् बन्ध्यात्वमुक्तं कविपुङ्गवेन ॥ ४ ॥
कर्षद्वयं राक्षसबीज़चूर्णं सप्ताहमात्रं सितशालिधान्यम्।
ऋतौ निपीतं मृगशावकाक्ष्या रक्षार्थमेतन्नियतं प्रदिष्टम् ॥ ५ ॥

अथ दुर्भगाकरणम्।

ज्येष्ठानक्षत्रे निम्बवन्दाकं यस्या अङ्गे दीयते सा दुर्भगा भवति ॥ १ ॥

अथ कलहकरणम्।

विशाखायां निम्बवृक्षस्योत्तरमूलं विवस्त्रो विमुखीभूयोत्पाद्य सुखेन यस्य चाले प्रक्षिपेत् तस्य प्रत्यहं कलहो भवति। दूरीकृते तु तन्मूले भद्रं भवति ॥ १ ॥

तन्नक्षत्रे शाखोटवदरीबीजद्वयमेकीकृत्य यस्य गृहे स्थापयेत् तस्य नित्यं कलहो भवति ॥ २ ॥

शाखोटमूलपत्रञ्च एकीकृत्य यस्य गृहे स्थापयेत् तेन कलहो जायते नात्र संशयः ॥ ३ ॥

ब्रह्मदण्डीं समूलाञ्च काकमाचीसमन्विताम्।
जातीपुष्परसैः पिष्ट्वा सप्तरात्रं पुनः पुनः ॥
एष धूपः प्रदातव्यः शत्रुगोत्रस्य मध्यतः।
यथागोत्रं समाघ्राति पितापुत्रैः समं कलिः ॥ ४ ॥

अथ सर्वानिष्टनिवारणार्थं रक्षाविधिः।

क़ादिहिरवसानञ्च अक्षरं स्वरभूषितम्।
ईकारेणाऽपि संयोज्य अधोरेफत्रयान्वितम् ॥

ओंकारशिरसं कृत्वा जप्तव्यं सिद्धिमिच्छता ।
"ओं क्रीं क्रीं खीं" । केचित्तु "ओं क्रीं ख्रीं च्रीं" ॥
स्वसंयमनमन्त्रोऽयं शतार्द्धजापमात्रतः ।
अशेषारिष्टनाशः स्यादित्याह पुरसूदनः ॥ १ ॥
कपरं चपरञ्चैव ठपरं तपरन्तथा ।
पपरं वर्णमाकृष्य ईकारेण सुपूजितम् ॥
अधोरेफसमायुक्तं चोङ्कारशिरसं तथा ।
"ओं क्रीं ख्रीं छ्रीं ठ्रीं थ्रीं फ्रीं क्रीं" ।
श्रद्धया तु महामन्त्रं ये जपन्ति सदा हृदि ।
सर्वथा तस्य पुंसः स्यात् सर्वारिष्टविनाशनम् ॥
हस्तेन रक्तपुष्पेण ग्रथितां मालिकां शुभाम् ।
अभिमन्त्र्य शतेनापि दद्याद्देव्यै सदाऽनघे ! ॥
यावज्जीवं सुखं तस्य सर्वलाभो दिने दिने ।
न गृहेऽनिष्टपातः स्याल्लिखित्वा स्थापने गृहे ॥ ३ ॥
अक्षराणामन्त्यवर्णं लिखित्वा पञ्चधाऽनघे ! ।
अधोरेफसमायुक्तमोङ्कारशिरसं तथा ॥
ईकारेण च सम्पूज्य अन्ते फड़क्षरान्वितम् ।
"ओं क्ष्रीं क्ष्रीं क्ष्रीं क्ष्रीं क्ष्रीं फट्" ।
मन्त्रोऽयं ममरूपश्च ध्यानं जापं तथैव च ।
सदा स्यात् तद्गृहे क्षेमं सहस्रार्द्धस्य जापनात् ॥
त्रैलोक्ये तत्समो नास्ति नित्यं फलमवाप्नुयात् ।
नित्यं सम्पद्यते वासः पत्न्या पुत्रेण बान्धवैः ॥
ज्ञातिभिः सज्जनैश्चापि शत्रुभिश्च विवर्जितः ।
अन्यजन्मसुखी प्राणी शृणु देवि ! महाफलः ॥ ४ ॥
अन्तद्वयं समागृह्य अधोरेफसमायुतम् ।
औंकारेण युतं कृत्वा ओङ्कारशिरसं तथा ॥

"श्रीं च्रीं च्रीं"

अनेनैव तु मन्त्रेण ये जपन्ति महाजनाः।
ते सर्वे शान्तिमायान्ति सततं तस्य जापतः॥ ५॥
श्वेतार्कमूलं पुष्यार्के समुद्धृत्य विधारयेत्।
बाहुभ्यां धारणात् तस्य त्वनिष्टानि विशेषतः॥
तद्दर्शनेन नश्यन्ति डाकिनी प्रेतदानवाः।
तद्धूपेन पलायन्ते प्रेताद्या दूरतो ध्रुवम्॥ ६॥
पूर्वभाद्रपदे ऋक्षे वन्दाकन्तु शिरीषजम्।
संगृह्य शिरसि क्षिप्ते अभयं भवति ध्रुवम्॥ ७॥
विष्णुक्रान्ताभवं मूलं हस्तस्थं चोरभीतिहृत्।
नरसिंहस्य मन्त्रे* तु सकृदुच्चरिते हरेत्।
डाकिनीग्रहभूतानि तमः सूर्योदये यथा॥
भूतप्रेतपिशाचादिभये स्मृत्वाऽभयो नरः।
भैरवोऽत्र महापूर्वो भवेदेव न संशयः॥
चक्राणि लेख्यानि॥ ८॥

अथ निद्रालुकरणम्।

निगड़े चौरिकायाञ्च पठेद्वारत्रयं यदि।
सर्वे प्रहरिका यान्ति निद्राया वशमेव च॥ १॥

गुवाकं खादित्वा तस्यावशिष्टं विवरं कृत्वा संप्रीतयेत्, तत्र स्रावयेत्। तस्य वाटिकायां य आयाति तस्याऽनेन निद्रा भवति॥ २॥

नीलोत्पलं समरिचं नागकेशरमूलकम्।
घृष्येत् तदञ्जयेच्चक्षुर्निद्रामाप्नोत्यसंशयः॥ ३॥
काकजङ्घा जटा निद्रां जनयेत् शिरसि स्थिता।
मूलं वा काकमाच्याश्च कृष्णायास्तद्गुणं स्मृतम्॥ ४॥

* नरसिंहमन्त्रः पुरा कथितः।

सुनिषसकशाखाञ्च शय्यास्थाने खनेदथ।
करञ्जमूलं शिरसि बन्धनात् कुरुते तथा ॥ ५ ॥

अथ निद्राभञ्जनम्।

कनकधूस्तूरमूलं मृताभ्रं केतकीपुष्परजः। एतानि पिष्ट्वा कपटवेशेन खादयेत्, तेन निद्राभञ्जनं भवति ॥ १ ॥

अथ बन्धनमोचनम्।

मार्गशीर्षस्य पूर्णायां शिखिमूलं समुद्धरेत्।
बन्धनान्मुच्यते तेन शिखाबद्धो न संशयः ॥

मन्त्रस्तु।—"ओं नमः कमलपिङ्गले रुद्रहृदयाङ्गे वेताल अस्थिधारिणि तिष्ठ तिष्ठ सर सर सर्वान् मोहय मोहय भगवति शिखाजे तिमिरे महामाये स्वाहा"। अष्टोत्तरशतं जप्त्वा शिखायां पूर्वोक्तमौषधं बन्धयेत्, तेन सिद्धिः।

लक्षं वर्णं ककारञ्च लिखेद्बन्धनमोचनम्। यन्त्राणि लेख्यानि ॥ १ ॥

अथ निगड़ादिभञ्जनम्।

हस्तार्के सिन्धुवारस्य मूलं चोत्तरगं हरेत्।
स्पर्शनं बन्धविच्छेदं कुरुते शीघ्रमारुतः ॥ १ ॥
मांसीं रक्तोत्पलं तुल्यं कृकलासञ्च भोजयेत्।
तन्मलैर्गुटिकास्पर्शात् तदा बन्धं भिनत्त्यलम् ॥ २ ॥
सुपक्वामिष्टिकां कृष्ण-वज्रीं ग्राह्यान्तु योगिभिः।
सूक्ष्मचूर्णन्तु तत् कृत्वा लोहकिट्टमथापि वा ॥
सूत्रैः रज्जुं दृढ़ीकृत्य तिलतैलेन लेपिताम्।
तच्चूर्णलोटिकां कृत्वा महालोहं भिनत्त्यपि ॥ ३ ॥

अत्र मन्त्रः।—"ओं नमो भगवते रुद्राय उड्डामरेश्वराय बहुरूपाय नानारूपधराय हस हस नृत्य नृत्य तुद तुद नाना कौतुकेन्द्रजालदर्शकाय ठः ठः स्वाहा"। अनेन सर्वयोगानभिमन्त्र्य सिद्धिः ॥ ४ ॥

अत्रास्ति मन्त्रान्तरमेकं तत्रैव।—"ओं अग्निमुखी पिशाची ।मुकं हन हन पच पच शीघ्रं मे वशमानय स्वाहा"। उक्तमन्त्रेण सद्धिः ॥ ५ ॥

"दं हं ओं आय आय चिं चिटि चिटि हांलां वज्र नन्दिका ालिका"। अनेन मन्त्रेण श्वेतसर्षपं श्वेतओड्रपुष्पत्रयं त्रिः पठित्वा प्रथमद्वारि नक्षिपेत्, तेन सर्वाणि द्वाराणि भज्जन्ति ॥ ६ ॥

अथ गृहक्लेशनिवारणम् ।

तक्रपिष्टेन तालेन लेपयेत् पुत्तिकाकृतिम् ।
तामाघ्राय गृहाद् यान्ति मक्षिका नात्र संशयः ॥ १ ॥
श्वेतार्कदुग्धकुल्माषं तिलचूर्णसमन्वितम् ।
अर्कपत्रेषु विन्यस्तं मूषिकान्तकरं गृहे ॥ २ ॥
तालकं छागविण्मूत्रं पलाण्डुं सह पेषयेत् ।
आलेप्य मूषिकं तेन जीवितञ्च विसर्जयेत् ।
तं दृष्ट्वा च गृहं त्यक्त्वा पलायन्ते हि मूषिकाः ॥ ३ ॥
मार्जारस्य मलं तालं पिष्ट्वा मूषिकमालिपेत् ।
तमाघ्राय गृहं त्यक्त्वा सद्यो निर्यान्ति मूषिकाः ॥ ४ ॥
गन्धकं हरितालञ्च ब्राह्मीं त्रिकटुकं समम् ।
छागलीमूत्रतः पिष्ट्वा लिप्तं मूषन्तु पूर्ववत् ॥ ५ ॥
मघायां ब्रध्नकं चैत्रे स्थापयेन्मधुकोद्भवम् ।
मक्षिका मूषिकाणाञ्च जायते तुण्डबन्धनम् ॥ ६ ॥
मशकाकर्षको दीपः सावरो गुड़तैलजः ।

अत्र मन्त्रः।—"पूर्वे ब्रह्मणे बन्ध, पश्चिमे विष्णवे बन्ध, उत्तरे द्राय बन्ध, दक्षिणे यमाय बन्ध, पाताले वासुकये बन्ध, फणा- हस्राय बन्ध, हुं"। अङ्गुष्ठाभ्यां नमः। करसम्पुटं कृत्वा तालत्रयं दद्यात्। षकमशकनिवारणं भवति ॥ ७ ॥

रोहिषतृणपुष्पन्तु वर्त्तिमध्ये निवेशयेत्।
तद्दीपदर्शनादेव क्षिप्रं नश्यन्ति मत्कुणाः॥ ८॥
ममनीयस्य वृक्षस्य पल्लवाग्रेण वर्त्तिकाम्।
कृत्वा दीपं प्रकुर्वीत क्षारकीटो विनश्यति॥ ९॥
अर्कतूलामयीं वर्त्तिं भावयेत् तारकेन च।
दीपं तत्कटुतैलेन निःशेषा यान्ति मत्कुणाः॥ १०॥
अर्जुनस्य फलं पुष्पं लाक्षा श्रीवासगुग्गुलुम्।
श्वेतापराजितामूलं भल्लातकविड़ङ्गकम्॥
धूपं सर्जरसोपेतं प्रदेयं गृहमध्यतः।
सर्पाश्च मत्कुणा मूषा गन्धाद् यान्ति दिशो दश॥ ११॥
गुड़श्रीवामभल्लात-विड़ङ्गत्रिफलायुतम्।
लाक्षारसोऽर्कपुष्पञ्च धूपो वृश्चिकसर्पहृत्॥ १२॥
मुस्तसिद्धार्थभल्लात-कपिकच्छूफलं गुड़म्।
चूर्णं भानुफलोपेतं दहेत् सर्जरसैः समम्॥
मत्कुणा मशकाः सर्पा मूषिका विषकीटकाः।
पलायन्ते गृहं त्यक्त्वा यथा युद्धेऽति कातराः॥ १३॥
सर्जरसकल्कमेदोऽर्जुनमूलमरुवककेतकनखोविद्धः।
एतैर्धूपो रचितः कीटभुजङ्गमशकमक्षिकादिहरः॥ १४॥
राजवृक्षफलं बद्धं खट्वायां मत्कुणापहम्।
लाक्षासर्जरसोशीर-सर्षपाः पत्रकं पुरम्॥
भल्लातकविड़ङ्गानि रेणुकं पुष्करं तथा।
जम्बुलो मशकं हन्ति धूपाद्वा गृहमध्यतः॥ १५॥

अथ क्षेत्रस्य शस्यानामुपद्रवनाशनं जम्बूकादीनां तुण्डबन्धनञ्च।

बालुकाश्वेतसिद्धार्थान् प्रक्षिपेत् क्षेत्रमध्यतः।
शलभाः सर्पकीटाश्च वराहमृगमूषिकाः।
मशकास्तत्र नो यान्ति मन्त्रविद्याप्रसादतः॥

मन्त्रस्तु।—"ओं नमः सुरेभ्यो बलजः जपरि परि परि मिलि स्वाहा"। "ओं सुरेभ्यो नमः"। इति नमस्कृत्य इमां विद्यां प्रयोजयेत्। "विद्यां प्रयोजयामीति विद्या मे सिद्ध्यते स्वाहा"। अखिल-जम्बूकानां मृगाणां शलभानाम् अन्येषां प्राणिनां तुण्डबन्धनं करोति ॥ १ ॥

मूषजम्बूककीटानां कुरुते मुखबन्धनम्।
विद्यामङ्कुशनाथस्य मन्त्रं वा भैरवस्य च ॥

मन्त्रस्तु।—"ओं नमो नगरनाथाय हर हर शिलि शिलि सर्वेषां प्राणिनां तुण्डबन्धनं कुरु कुरु हुं फट् स्वाहा"। वालुकादिभिः सह श्वेतसर्षपान् सप्तवारमभिमन्त्र्य क्षेत्रमध्ये क्षिपेत्, सर्वोपद्रवनाशो भवति ॥ २ ॥

विद्यामङ्कुशनाथस्य मन्त्रं वा भैरवस्य च।
मूषजम्बूककीटानां कुरुते तुण्डबन्धनम् ॥ ३ ॥

अथ पक्ष्यादिभयनिवारणम्।

देवदालीयसिद्धार्थगुटिकां कारयेद् बुधः।
क्षेत्रमध्ये तु निक्षिप्य सर्वपक्षिभयं हरेत् ॥ १ ॥

अथ शस्यवृद्धिः।

पूर्वाषाढ़ाख्य ऋक्षे च वन्दां विभीतसम्भवाम्।
शस्यमध्ये क्षिपेत्तेन शस्यवृद्धिर्भवेद् ध्रुवम् ॥ १ ॥

अथ गोमहिष्यादेर्दुग्धवर्द्धनम्।

"ओं हुङ्कारिणी प्रसव ओं शीतलम्"। अनेन तृणादिकमभिमन्त्र्य भोक्तुं दद्यात् तदा बहुदुग्धं भवति ॥

अथ उच्चाटनम्।

मङ्गलवारे रात्रौ श्मशानाङ्गारं कृष्णवस्त्रेण कृत्वा रक्त-सूत्रेण संवेष्ट्य यस्य गृहे परिक्षिपेत् सप्ताहाभ्यन्तरे तस्य उच्चाटनं भवति ॥ १ ॥

पञ्चाङ्गुलं चित्रकस्य कीलं ग्राह्यं पुनर्वसौ।
सप्ताभिर्मन्त्रितं गेहे खनेदुच्चाटनं भवेत्॥

मन्त्रस्तु।—"ओं लोहितमुखे स्वाहा"। अस्य अष्टोत्तरसहस्रजपेन पुरश्चरणम्॥ २॥

ख्यातमौडुम्बरं कीलं मन्त्रितं चतुरङ्गुलम्।
तं यस्य निखनेद्गेहे तस्य चोच्चाटनं भवेत्॥

मन्त्रस्तु।—"ओं शिनि शिनि स्वाहा"॥ ३॥

भरण्यामङ्गुलैकन्तु उलूकस्यास्थिकीलकम्।
सप्ताभिर्मन्त्रितं यस्य निखन्योच्चाटनं भवेत्॥

मन्त्रस्तु।—"ओं दह दह हल हल स्वाहा"॥ ४॥

काकोलूकस्य पक्षांस्तु हुत्वा ह्यष्टाधिकं शतम्।
यन्नाम्ना मन्त्रयोगेन समस्तोच्चाटनं भवेत्॥

मन्त्रस्तु।—"ओं नमो भगवते रुद्राय हुं दंष्ट्राकरालाय अमुकं सपुत्रबान्धवैः सह हन हन दह दह पच पच शीघ्रं उच्चाटय उच्चाटय हुं फट् स्वाहा ठः ठः"॥ ५॥

लेपयेत् काकपित्तेन कीलमङ्गुलसम्मितम्।
निखनेद् यस्य भवने तस्य चोच्चाटनं भवेत्॥

मन्त्रस्तु।—"ओं क्लीं दण्डिन् दण्डिन् महादण्डिन् नमोऽस्तु ते ठः ठः"॥ ६॥

नरास्थिकीलकं द्वारे निखन्याच्चतुरङ्गुलम्।
अरिद्वारे मन्त्रयुक्तं सद्यरुच्चाटनं भवेत्॥

मन्त्रस्तु।—"ओं नमो भगवते रुद्राय अमुकं गृह्ण गृह्ण पच पच त्रासय त्रासय त्रोटय त्रोटय नाशय नाशय पशुपतिराज्ञापयति ठः ठः"॥ ७॥

मृतस्य पुरुषस्याथ निर्माल्यं चेलमेव च।
प्रेतालये समागृह्य यस्य गेहे निधापयेत्।

अष्टम्याञ्च चतुर्दश्यां तथैवोच्चाटनं भवेत्॥

उद्धृतेन शान्तिः॥ ८॥

श्वेतलाङ्गलिकामूलं स्थापयेद् यस्य वेश्मनि।
निखन्य तु भवेत् तस्य सद्य उच्चाटनं ध्रुवम्॥ ९॥
सिद्धार्थं शिवनिर्माल्यं यद्गेहे निखनेद् बुधः।
उच्चाटनं भवेत् तस्य उद्धृते तु पुनः सुखी॥

यन्त्राख्यत्र विलिख्यानि॥ १०॥

अथ उच्चाटनप्रकारान्तरमाह।

उच्चाटनविधिं वक्ष्ये यथोक्तं श्रीमतोत्तरे।
निम्बपत्रे लिखेन्नाम महिषाश्वपुरीषकैः।
काकपक्षविलेखन्या लेखनीयमनन्तरम्॥

मन्त्रस्तु।—"ओं काकतुण्डि धवलामुखि देवि अमुकमुच्चाटय मुकमुच्चाटय हुं फट् स्वाहा"।

एतन्मन्त्रं महादेवि! लिखित्वा पूर्ववस्तुभिः।
निम्बवृक्षस्थितं सर्वं काकालयं हरेदथ॥
श्मशानवह्निमानीय धुस्तूरकाष्ठदीपितम्।
वह्निं कृत्वा महातैलैरथवा कटुवस्तुभिः॥
पूर्वोक्तमनुना तत्र होमयेद् विधिपूर्वकम्।
पञ्चोपचारयोगेन सम्पूज्य धवलामुखीम्॥
तस्माद्भस्म प्रक्षिपेच्च शत्रोश्च मन्दिरोपरि।
उच्चाटनं भवेत् तस्य सपुत्रपशुबान्धवैः॥
धूम्रवर्णां महादेवीं त्रिनेत्रां शशिशेखराम्।
जटाजूटसमायुक्तां व्याघ्रचर्मपरिच्छदाम्॥
कृशाङ्गीमस्थिमालाञ्च कर्त्तृकाञ्च तथाम्बुजम्।
कोटराक्षीं भीमदंष्ट्रां पातालसदृशोदरीम्॥

इति ध्यात्वा पूजयेत्।

एष योगविधिः ख्यातो वीरतन्त्रे महेश्वरि ! ॥

अथ विद्वेषणम् ।

एकहस्ते काकपक्षमुलूकस्य तथाऽपरे ।
मन्त्रयित्वा मेलयित्वा कृष्णसूत्रेण बन्धयेत् ॥
अञ्जलिं सजलञ्चैव तर्पयेद्धस्तपक्षकैः ।
एवं सप्तदिनं कुर्य्यादष्टोत्तरशतं जपेत् ।
विद्वेषो जायते तत्र महाकौतुकमद्भुतम् ॥ १ ॥
मार्जारमूषिकाविष्ठा साध्यपुत्तलिका कृता ।
नीलवस्त्रेण संवेष्ट्य मन्त्रयित्वा शतेन च ॥
विद्वेषो जायते तत्र भ्रातरौ तातपुत्रकौ ।

मन्त्रस्तु ।—"ओं नमो महाभैरवाय श्मशानवासिन्यै अमुक मुकयोर्विद्वेषं कुरु कुरु क्रूं फट्" ॥ २ ॥

एकहस्ते काकपक्षमुलूकस्य तथाऽपरे ।
दर्भेण धारयेद् यत्नात् त्रिसप्ताहं जलाञ्जलिम् ॥
रक्ताश्वमारपुष्पैकमन्त्रयुक्तं जलाञ्जलिम् ।
नित्यं नित्यं प्रदातव्यमष्टोत्तरसहस्रकम् ।
परस्परं भवेद्द्वेषः सिद्धियोग उदाहृतः ॥

अत्र मन्त्रः ।—"ओं नमः कटीटनी प्रमोटनीकी गौरी गौ अमुकस्य अमुकेन सह काकोलूकादिवत् कुरु कुरु स्वाहा" यन्त्राणि अत्र लेख्यानि ॥ ३ ॥

अथ व्याधीकरणम् ।

"ओं अमुकं हन हन स्वाहा"। अनेन मन्त्रेण कटुतैला त्रिकटुं जुहुयात् तदा शत्रुर्बधिरो भवति ॥ १ ॥

भल्लातकरसे गुञ्जां कुर्य्यादतिसुचूर्णिताम् ।
क्षिपेद्गात्रे भवेत् कुष्ठं सिताक्षीरैः पुनः सुखी ॥ २ ॥

वानरीफललोमानि विषं भल्लातचित्रकम्।
गुञ्जायुतं क्षिपेद्गात्रे स्याल्लूता वेदनान्विता ॥ ३ ॥
उशीरचन्दनञ्चैव प्रियङ्गुरक्तचन्दनम्।
तगरं पेषयेत् तोयैर्लेपाल्लूतादिनाशनम् ॥ ४ ॥
क्रोड़ीपयस्तैललेपात् पानाद्वै श्वेतकुष्ठहृत्।
ताम्बूले इन्द्रगोपञ्च दत्त्वाऽऽस्ये श्वेतकुष्ठहृत् ॥ ५ ॥
नीत्वा तेन यथापूर्वं भक्ष्या वा सोमराजिका ॥

मन्त्रस्तु।—"ओं नमो भगवते रुद्राय उड्डामरेश्वराय अमुकं रोगेण गृह्ण गृह्ण पच पच ताड़य ताड़य छेदय छेदय हूं फट् स्वाहा ठः ठः"। उक्तयोगानामयं मन्त्रः ॥ ६ ॥

क्षिपेन्मृगशिरा-ऋक्षे चिञ्चाकाष्ठस्य कीलकम्।
पञ्चाङ्गुलं रिपोर्गेहे वह्निमान्द्यं प्रजायते ॥ ७ ॥
सामुद्रलवणं वह्निः केवलं वा समुद्रजम्।
वन्ध्यकया उदरन्यस्तं सर्वमन्तःपुटे पचेत् ॥ ८ ॥
करवीरार्द्रकाष्ठेन तमादाय सुचूर्णयेत्।
खाद्ये पानेऽर्पयेद् यस्य तस्य चक्षुः प्रणश्यति ॥ ९ ॥
उलूकमस्तकं ग्राह्यं लवणेन प्रपूरयेत्।
मृत्पात्रस्थन्तु सप्ताहं अक्षकाष्ठेन चालयेत्।
दृष्टिं स्तम्भयितुं तस्य मरीचाक्षफलं वचा ॥ १० ॥

मन्त्रस्तु।—"ओं चामुण्डे हन हन दह दह पच पच अमुकं गृह्ण गृह्ण स्वाहा"।

अनेन निम्बपत्रं कटुतैलेन साध्यस्य नाम गृहीत्वा जुहुयात्, स चाशु कुज्वरेण गृह्यते।

अनेन लवणाहुतिमष्टसहस्रं जुहुयात्, स शूलेन कुज्वरेण गृह्यते ॥ ११ ॥

तेनैव वेत्रपत्रमष्टसहस्रं जुहुयात्, स चाशु कुञ्जरेण गृह्यते ॥ १२ ॥

रक्तपुष्पं चित्रकरसेन यस्य नामाभिलिख्य भूर्जे अर्क-लतिकायां स्थापयेत् स दाहज्वरेण गृह्यते ।

व्याधीकरणयन्त्राण्येव लेख्यानि ॥ १३ ॥

अथ शत्रुभ्रामणम् ।

अश्वत्थकीलमश्विन्यां यस्य गेहे दशाङ्गुलम् ।
स्थापयेद्दीर्घयात्रा स्यात् तस्यापि न हि संशयः ॥ १ ॥
शृगालस्यास्थिकीलञ्च स्थाप्यं स्याच्चतुरङ्गुलम् ।
रिपोर्गेहे चन्द्र ऋक्षे दीर्घयात्रा च तस्य वै ॥ २ ॥

अथ उन्मत्तीकरणम् ।

तालकं धूर्त्तबीजञ्च घनचूर्णन्तु भक्षणे ।
दत्ते मत्तो भवेच्छत्रुः सिताक्षीरैः पुनः सुखी ॥ १ ॥
तालकं लशुनं मूर्ध्नि क्षिप्तं तस्य पिशाचकृत् ।
सुरामांसौसिताक्षीरं भक्षणात् स्यात् सुखावहम् ॥ २ ॥
मध्वाज्याभ्यां स्वर्णमाक्षीं लिप्त्वा तन्नीतकज्जलम् ।
दत्तं यस्याञ्जनं नेत्रे उन्मत्तो वै प्रजायते ॥ ३ ॥
गोघृतं सैन्धवं तुल्यं वराहस्य च पित्तकम् ।
अजाक्षीरेण तद्योज्यं पानेनोन्मत्त्यनाशनम् ॥ ४ ॥

मयूरपारावतकुक्कुटानां ग्राह्यं पुरीषं कनकञ्च तालम् ।
तन्मूर्द्ध्नि दत्तं कुरुते पिशाचं निवर्त्तते मुण्डितमस्तकेन ॥ ५ ॥

गुड़ं करञ्जबीजञ्च घनचूर्णं समं समम् ।
फलस्यान्ते प्रदातव्यमुन्मत्तो भक्षणाद्भवेत् ॥
शर्कराशतपुष्पाभ्यां क्षीरपाने सुखावहम् ॥ ६ ॥

यन्त्राण्येव । मन्त्रस्तु ।—"ओं उन्मत्तकारिणि ठः ठः" । उक्तयोगानामयं मन्त्रः ।

अथ मारणम्।

नरास्थिकीलकं पुष्ये गृह्णीयाच्चतुरङ्गुलम्।
निखनेत्तु गृहे यावत् तावत् तस्य कुलक्षयः॥

"ओं क्रीं फट् स्वाहा"। सहस्रजपात् सिद्धिः॥ १॥

"ओं डं डां डिं डीं डुं डूं डें डैं डों डौं डं डः अमुकं गृह्ण गृह्ण हुं हुं ठः ठः"। अनेन नरास्थिकीलकं सहस्राभिमन्त्रितं चितामध्ये निखनेत्, स ज्वरेण नश्यति॥ २॥

अनेन मन्त्रेण मनुष्यास्थिकीलकं सहस्राभिमन्त्रितं यस्य गेहे निखनेद् यस्य नाम्ना श्मशाने वा निखनेत्, तस्य नाशः स्यात्॥ ३॥

"ओं णं णां णिं णीं णुं णूं णें णैं णों णौं णं णः ठः ठः"। अनेन नरास्थिषड़ङ्गुलकीलकं सहस्राभिमन्त्रितं यस्य नाम्ना गृहे श्मशाने वा निखनेत्, तस्य सर्वनाशो भवति॥ ४॥

अश्वास्थिकीलमश्विन्यां निखनेच्चतुरङ्गुलम्।
शत्रुगेहे निहन्त्याशु कुटुम्बं वैरिणां कुलम्॥

मन्त्रस्तु।—"हुं हुं फट् स्वाहा"। अनेन सप्ताभिमन्त्रितं शत्रुगृहे निखनेत्, आशु वैरिणां कुटुम्बकुलं क्षयं याति॥ ५॥

"ओं सुरेश्वराय स्वाहा"। अनेन मन्त्रेण—

सर्पास्थ्यङ्गुलमात्रन्तु चाश्लेषायां रिपोर्गृहे।
निखनेत् सप्तधा जप्तं मारयेद्रिपुसन्ततिम्॥ ६॥

निम्बषड़ङ्गुलको ग्राह्यो विषं त्वग्वानरीफलात्।
एतच्चूर्णं प्रदातव्यं शत्रुशय्यासनादिषु।
जायन्ते स्फोटकास्तीव्रा दशाहान्मरणं भवेत्॥ ७॥

आर्द्रायां निम्बवन्दाकं शत्रोः शयनमन्दिरे।
निखनेत् म्रियते शत्रुरुद्धृते च पुनः सुखी॥ ८॥

तथा शिरीषवन्दाकं पूर्वोक्तेनोडुना हरेत्।

शत्रोर्गेहे स्थापयित्वा रिपोर्नाशो भविष्यति ॥ ९ ॥
कृष्णषण्डस्य रक्तेन गङ्गामृत्तिकया सह।
तिलकं भालदेशे च कृत्वा सम्भावयेत्तु यम्।
विद्धः स्यात् तत्क्षणादेव प्रोञ्छिते च शुभं भवेत् ॥ १० ॥
कृष्णच्छागाश्वपादस्य खुरस्थं रोमकं हरेत्।
कृष्णकुक्कुट-काकस्य ग्राह्यं पक्षचतुष्टयम् ॥
सर्वं दग्ध्वा तु भाण्डान्तस्तद्भस्म जलसंयुतम्।
ललाटे तिलकं कृत्वा वामहस्तकनिष्ठया।
स शिरो नम्यते यस्य तस्य वेधोऽस्मि निश्चितः ॥ ११ ॥
वामदन्तं कुलीरस्य अधोभागस्य चाहरेत्।
शराग्रे फलकं कुर्य्याद्धनुश्च चितिजिह्वनैः ॥
गवां शिरां गुणं कृत्वा शत्रुं कुर्य्याच्च मृन्मयम्।
तद्दज्जातेन वाणेन म्रियते तत्क्षणाद्रिपुः ॥ १२ ॥
ऊर्णनाभिश्च षड्बिन्दुः समांसः कृष्णवृश्चिकः।
यस्याङ्गे तत् क्षिपेच्चूर्णं सप्ताहात् स्फोटनं भवेत्।
मयूरपुच्छनीलाब्जं पिष्ट्वा लेपः सुखावहः ॥ १३ ॥
रिपुविष्ठां वृश्चिकञ्च खनित्वा तु विनिक्षिपेत्।
आच्छाद्यावरणेनाथ तत्पृष्ठे मृत्तिकां क्षिपेत्।
म्रियते मलरोधेन उद्धृतेन पुनःसुखी ॥ १४ ॥

"ओं क्रीं क्षः अमुकं क्षं"। अनेन मन्त्रेण राजिकालवणेन शिव-निर्माल्यानि कटुतैलेन सहस्रहोमात् शत्रोर्बधः ॥ १५ ॥

अथ अश्वमारणम्।

कृष्णजीरकचूर्णेन अञ्जिताश्वो न पश्यति।
तक्रेण क्षालयेच्चक्षुः सुस्थो भवति घोटकः ॥ १ ॥
घ्राणे छुच्छुन्दरीचूर्णं दत्ते पतति घोटकः।
सुस्थश्चन्दनपानेन नासायान्तु न संशयः ॥ २ ॥

अश्वास्थिकीलमश्विन्यां कुर्य्यात् सप्ताङ्गुलं पुनः।
निखनेदश्वशालायां मारयत्येव घोटकान्॥
"ओं पच पच स्वाहा"। उक्तयोगेष्वयं मन्त्रः॥ ३॥
भरण्यामुक्तमन्त्रेण चितिकाष्ठस्य कीलकम्।
अष्टाङ्गुलन्तु निखनेदश्वशाला विनश्यति॥
मन्त्रस्तु।—"ओं नमो भगवते रुद्राय ओं अश्वान् स्वाहा"।

अथ शस्यनाशनम्।

पुनर्वसौ चिताकाष्ठकीलकं त्र्यङ्गुलं क्षिपेत्।
शताभिमन्त्रितं क्षेत्रे शस्यं तत्र विनश्यति॥
"ओं लोहितमुखि स्वाहा"। इति मन्त्रः॥ १॥
आर्द्रायां निक्षिपेत् कीलं भल्लूकस्यास्थिसम्भवम्।
क्षेत्रमध्ये तथा शत्रोः सर्वं शस्यं विनश्यति॥ २॥
विशाखायां कालकाष्ठ-कीलमष्टाङ्गुलं क्षिपेत्।
कदलीवाटिकामध्ये नाशयेत् कदलीफलम्॥ ३॥

अथ रजकस्य वस्त्रनाशनम्।

ग्राहयेत् पूर्वफल्गुन्यां जातीकाष्ठस्य कीलकम्।
अष्टाङ्गुलप्रमाणन्तु निखन्याद्राजके गृहे।
शताभिमन्त्रितं तेन तस्य वस्त्राणि नाशयेत्॥
"ओं कुम्भं स्वाहा"। अनेन मन्त्रेण साधयेदिति॥

अथ धीवरस्य मत्स्यनाशनम्।

संग्राह्यं पूर्वफल्गुन्यां वदरीकाष्ठकीलकम्।
अष्टाङ्गुलञ्च निखनेन्नाशयेत् धैवरे गृहे॥
"ओं जले स्वाहा"। "ओं मत्स्ये स्वाहा"। इति
[द्व]यस्य तुल्यं फलम्॥ १॥
सप्ताङ्गुलं मघा-ऋक्षे भाल्लातं काष्ठकीलकम्।
गृहीत्वा दासगेहे तु देयं मत्स्यो विनश्यति॥ २॥

कृत्तिकायामर्ककाष्ठ-कीलकञ्चाङ्गुलं क्षिपेत् ।
शत्रोर्वापि तड़ागादौ मत्स्यस्तत्र विनश्यति ॥ ३ ॥

अथ कुम्भकारस्य भाण्डनाशनम् ।

हस्तायां त्र्यङ्गुलं कीलं करवीरस्य काष्ठजम् ।
निखनेत् कुम्भकारस्य शालायां भाण्डनाशकृत् ।
पञ्चाङ्गुलं निम्बकीलं तद्दृक्षे पूर्ववत्फलम् ॥ १ ॥
गोक्षुरं मेषशृङ्गञ्च वीजं वा कोकिलाक्षजम् ।
शूकरस्य मलं वापि मूलं वा श्वेतगुञ्जजम् ।
पाकस्थाने तु भाण्डानां क्षिप्तं स्फोटयते ध्रुवम् ॥ २ ॥
तालं करञ्जवीजञ्च टङ्कनेन समन्वितम् ।
कृत्वा भाण्डाः स्फुटन्त्येव उक्तानां मन्त्र उच्यते ॥
अत्र मन्त्रः ।—"ओं दमन्य दमन्य स्वाहा" ॥ ३ ॥

अथ तैलिकस्य तैलनाशनम् ।

मधुकाष्ठकीलकन्तु चित्रायां चतुरङ्गुलम् ।
निखनेत् तैलशालायां तैलं तत्र विनश्यति ॥
"ओं दह दह स्वाहा" । अनेन मन्त्रेण सहस्रजपः ॥ १ ॥
भल्लातकाष्ठं चित्रायां निखनेत् तैलिके गृहे ।
अष्टाङ्गुलं तदा तत्र ग्राहको न हि गच्छति ॥ २ ॥

अथ गोपानां दुग्धनाशनम् ।

निक्षिपेदनुराधायां जम्बूकाष्ठस्य कीलकम् ।
अष्टाङ्गुलं गोपगेहे गोदुग्धं च प्रणश्यति ॥

अथ शाकनाशनम् ।

गन्धकं चूर्णितं तत्र निक्षिपेज्जलमिश्रितम् ।
नश्यन्ति सर्वशाकानि शेषान्यल्पबलानि च ॥

अथ वारजीविनः पर्णनाशनम् ।

नवाङ्गुलं पूगकाष्ठकीलकं निक्षिपेद् गृहे ।

ताम्बूलिकस्य क्षेत्रे वा ऋक्षे-शतभिषाह्वये ।
तदा तस्य च ताम्बूलं नाशयत्याशु निश्चितम् ॥

अथ तन्तुवायस्य सूत्रनाशनम् ।

अश्विन्यां जाम्बरं * काष्ठं तन्तुवायगृहे क्षिपेत् ।
द्वादशाङ्गुलमानन्तु तन्तुं तत्र छिनत्त्यलम् ॥ १ ॥

अथ शौण्डिकस्य मदिरानाशनम् ।

षोड़शाङ्गुलकं कीलं कृत्तिकायां सितार्कजम् ।
शौण्डिकस्य गृहे क्षिप्तं मदिरां नाशयत्यलम् ॥

अथ कर्मकारस्य लौहनाशनम् ।

रोहिण्यां वदरीकाष्ठकीलमेकादशाङ्गुलम् ।
कर्मकारगृहे क्षिप्तं लौहं तप्तं भवेन्न हि ॥

अथ नानाकौतुकम् ।

शिखिनस्तु शिखाचूर्णं भोजयेद्दिनसप्तकम् ।
तद्विष्ठालिप्तहस्तस्य द्रव्यं शक्नोत्यनेकताम् ॥ १ ॥
सप्ताहं तिलतैलेन भावयेदातपे चिरम् ।
अङ्कोलवीजचूर्णन्तु योज्यं पेष्यं पुनः पुनः ॥
तत्तैलं ग्राहयेद् यत्नात् तैलकारस्य यन्त्रतः ।
अथवा कांस्यपात्रे द्वे तेन कल्केन लेपयेत् ॥
उत्थाप्य स्थापयेद् घर्मे सम्मुखन्तु परस्परम् ।
तयोरधः कांस्यपात्रे पतितं तैलमाहरेत् ॥
इदमेवाङ्कुलीतैलं सर्वयोगेषु योजयेत् ।
इदमङ्कुलीतैलन्तु मण्डितं तत्क्षणाद्विशेत् ।
सफलो जायते वृक्षस्तत्क्षणान्नात्र संशयः ॥ २ ॥
पद्मिनीवीजचूर्णन्तु भाव्यमङ्कुलीतैलतः ।

* जाम्बरं—जाम्बीर स्थाने छन्दोऽनुरोधात् पठितम् ।

न्यस्तं जले महाश्चर्य्यं तत्क्षणात् पुष्पसम्भवः ॥ ३ ॥
यानि कानि च बीजानि जलजस्थलजानि च।
अङ्कुलीतैललिप्तानि तानि तान्युद्भवानि च ॥ ४ ॥
यत्किञ्चित् काण्डमूलोत्थं पत्रपुष्पफलादिकम्।
अङ्कुलीतैललिप्तन्तु तुल्यरूपं भवेत् ध्रुवम् ॥ ५ ॥
गुञ्जाफलाम्बुपिष्टञ्च लेपयेत् पादुकाद्वयम्।
विना क्लेशं नरो गच्छेत् क्रोशमेकं न संशयः ॥ ६ ॥
लघु दारुमयं पीठं गुञ्जापिष्टेन लेपयेत्।
शुष्कमन्तर्जलैः सार्द्धं उपविष्टं न मज्जति ॥ ७ ॥
गुञ्जाबीजं त्वचोन्मुक्तं चूर्णं भाव्यं नृमूत्रकैः।
सप्तवारं ततः काष्ठं लिप्तमङ्कुलसम्भवम् ॥
तैलमादाय तल्लिप्तं पूर्ववत्पादुकागतिः ॥ ८ ॥
वर्त्तिः सर्जरसैः पूर्णा तैललिप्ता जले स्थिता।
ज्वालिता दीपवर्त्तिस्तु ज्वलत्येव न संशयः ॥ ९ ॥
कटुतुम्ब्युत्थतैलेन पारावतचटोद्भवम्।
मलञ्च शिखिमूलञ्च पेषितं गर्दभास्थिजम् ॥
ललाटे तिलकं कृत्वा तेनादृश्यः पुनः पुनः।
दशाऽऽस्यो जायते तेन यथा लङ्केश्वरो नृपः ॥ १० ॥
शिग्रुबीजोत्थितं तैलं पारावतपुरीषकम्।
वराहस्य वसायुक्तं शिखिमूलं समं समम् ॥
ललाटे तिलकं तेन यः करोति स वै जनैः।
दृश्यते पञ्चवक्त्रोऽसौ यथा साक्षान्महेश्वरः ॥ ११ ॥
रात्रौ कृष्णचतुर्दश्यां मयूरास्ये विनिक्षिपेत्।
भार्गीबीजं मृदं कृष्णां कृष्णभूमौ निवापयेत् ॥
तज्जातभार्गीं संगृह्य तया कुर्य्यात्तु रज्जुकम्।
तद्रज्जुबद्धः पुरुषो मयूरो दृश्यते जनैः ॥ १२ ॥

तद्योगे कृष्णमार्जारवक्त्रे चैरण्डबीजकम्।
तज्जातैरण्डबीजानामेकं वक्त्रेण धारयेत्।
तं प्रपश्यन्ति मार्जारं मनुष्या नात्र संशयः॥ १३॥
शृगालमश्वान् मेषांश्च यद्दिने वापयेत् पृथक्।
मयूरास्ये तदा भार्गी जाता सिद्धिश्च तादृशी॥ १४॥
रक्तगुञ्जाफलं वाप्यं स्त्रीकपाले च सेचयेत्।
जातं फलं क्षिपेद्वक्त्रे स्त्रीरूपो दृश्यते पुमान्॥ १५॥
नरादिसर्वजन्तूनां ग्राह्यं सद्योहृतं शिरः।
तच्च कृष्णचतुर्दश्यां सर्वबीजान्वितं वपेत्॥
भृङ्गीधुस्तूरबीजानि गुल्मं निम्बफलैर्युतम्।
निखनेत् कृष्णभूम्यान्तु बलिपूजासमन्वितम्॥
सेचयेत् फलपर्य्यन्तं यावद्बीजानि चाहरेत्।
तत्तद्बीजे कृते वक्त्रे तत्तद्रूपं भवेत् ध्रुवम्॥
इत्येवं कौतुकं लोके नानारूपस्य दर्शनम्।
मुक्तबीजो भवेत् सुस्थो नात्र कार्य्या विचारणा॥ १६॥
हरितालं शिलाचूर्णं अङ्कुलीतैलभावितम्।
तल्लिप्तवक्त्रशिरसं स्थितं पश्यति वह्निवत्॥
तथैवाङ्कोलतैलेन स्फुरत्येव न संशयः॥ १७॥
सिन्दूरं गन्धकं तालं समं पिष्ट्वा मनःशिलाम्।
तल्लिप्तवस्त्रधृक् चासौ रात्रौ संदृश्यतेऽग्निवत्॥
दूरेऽपि स्थितलोकैश्च रात्रौ तु कौतुकं महत्॥ १८॥
खद्योतभूलताचूर्णं ललाटे तिलके कृते।
रात्रौ संदृश्यते ज्योतिस्तस्मिन् स्थाने तु कौतुकम्॥१९॥
मुनिपुष्परसैः पुष्पैर्घृष्ट्वा स्रोतोऽञ्जनं ततः।
अञ्जिताक्षो नरः पश्येन्मध्याह्ने तारका मयम्॥ २०॥
वाप्यं वार्त्ताकुबीजञ्च नृकपाले मृदा सह।

तज्जातवीजं मूलं वा मुखे प्रक्षिप्य मानवः।
शतयोजनपर्य्यन्तं पश्येत् सर्वं यथाऽन्तिकम् ॥ २१ ॥
वारिमक्षिकया सार्द्धं तज्जलं यस्य भक्षणे।
दीयते निःसरेत् तस्य ह्यधोवायुस्तु कौतुकम् ॥

मन्त्रस्तु।—"ओं नमो भगवते रुद्राय उड्डामरेश्वराय। वज्ररूपाय हस हस नृत्य नृत्य तुद तुद नानाकौतुकेन्द्रजालदर्शकाय ठः ठः स्वाहा"। अनेन सर्वयोगानभिमन्त्र्य सिद्धिः। अष्टोत्तरशतजपेन पुरश्चरणम् ॥ २२ ॥

अथ काम्यसिद्धिः।

पुष्यार्के तु समागृह्य मूलं श्वेतार्कसम्भवम्।
अङ्गुष्ठप्रमितां तस्य प्रतिमान्तु प्रपूजयेत् ॥
गणनाथस्वरूपान्तु भक्त्या रक्ताश्वमारजैः।
कुसुमैश्चापि गन्धाद्यैर्हविष्याशी जितेन्द्रियः ॥
पूजयेन्नाममन्त्रैश्च तद्बीजानि नमोऽन्तकैः।
यान् यान् प्रार्थयते कामान् मासैकेन तु तान् लभेत् ॥
प्रत्येकं काम्यसिद्ध्यर्थं मासमेकं प्रपूजयेत् ॥

गणेशवीजमाह।—"पञ्चान्तकं ओं अन्तरीक्षाय स्वाहा"। अनेन पूजयेत्। पञ्चान्तकं शशिधरं वीजं गणपतेर्विदुः। "ओं ह्रीं पूर्वदयां ओं ह्रीं फट् स्वाहा"। अनेन मन्त्रेण रक्ताश्वमारपुष्पाणि घृतक्षौद्रयुतानि जुहुयात्। वाञ्छितं ददाति। "ओं ह्रीं श्रीं मानसे सिद्धिकरि ह्रीं नमः"। अनेन मन्त्रेण रक्तकुसुममेकं जप्त्वा नित्यं क्षिपेद्। एवं लक्षं जपेत्। ततो भगवती वरदा अष्टगुणानामेकगुणं ददाति।

अथ वाक्यसिद्धिः।

कृत्तिकायां स्नुहीवृक्ष-वन्दाञ्च धारयेत् करे।
वाक्यसिद्धिर्भवेत् तस्य महाश्चर्य्यमिदं स्मृतम् ॥ १ ॥

अनेन ग्राहयेत् स्वाती-नक्षत्रे वदरीभवम्।
वन्दाकं तत्करे धृत्वा यद्दस्तु प्रार्थ्यते जनैः॥
तत्क्षणात् प्राप्यते सर्वं मन्त्रमत्रैव कथ्यते।
"ओं अन्तरीक्षाय स्वाहा"। अनेन ग्राहयेत्॥ २॥

अथ गुप्तधन-गुप्तप्रवेश-चौर-देवदानवादिप्रकाशनम्।

वन्दां शाखोटवृक्षस्थां गोक्षुरं लक्षणापदम्।
अजाक्षीरेण पिष्ट्वा च ललाटे तिलके कृते॥
प्रकाशं जायते सर्वं तच्छृणुष्व समासतः।
धनानि यत्र वा सन्ति ये वा चौरादिकास्तथा॥
गुप्तवेशा महात्मानो गन्धर्वा यक्षिणीश्वराः।
जन्तुर्धातुश्च वृक्षाद्या मर्त्यलोके स्थिता ध्रुवम्॥ १॥
अश्लेषायां शनैर्वारे सायं दाड़िम्ववीजकम्।
रसं संगृह्य तुवरीं कृष्णाष्टम्याञ्च भूमिजे॥
पद्ममूलं मङ्गलेऽहन्यञ्जनं कारयेत् सुधीः।
प्रकाशं पूर्ववत् सर्वं जायते नात्र संशयः॥
इति गुप्तधनादिप्रकाशनम्॥ २॥

अथ धनुर्विद्या।

इन्द्रेण या विद्या पूर्वमर्जुनं प्रति कथिता सा सप्तविंशत्य-
क्षरा। "कालायुत रक्ताधरे ओंकारशतगुण आधारे एकादश-
शतसहस्र"। इन्द्र आज्ञा। एतन्मन्त्रेण शरं धृत्वा आकर्णं पूरिते
धनुषि शरं मेलयेत्। सहस्रधा भवति। कलौ दशधा॥ १॥
महादेवेन इन्द्रं प्रति या विद्या कथिता सा सप्तदशाक्षरा।
"चान्दधरगुण रेख काण्ड ब्रह्मज्ञान ओं ओं ओं"। एतन्मन्त्रं
पठित्वा पञ्चधा शरं तदाक्षिपेत् पूर्ववद्भवति।
सर्पात् कवलितं भेकमर्द्धमात्रं समुद्धरेत्।
छित्वा सर्पस्य मुण्डञ्च आतपे शोषयेत् पृथक्॥

पिष्ट्वा पृथग्वटी कार्य्या लक्ष्यवाणप्रदा स्मृता।
लक्ष्ये च भेकतिलकं शराग्रे सर्पमुण्डजम्॥
दत्त्वा तिलकमाकर्णगुणं धनुषि वेधयेत्।
लक्ष्यस्य तिलकं बाणो विध्यत्येव न संशयः॥

अथ धनधान्याक्षयकरणम्।

ऋक्षे च पूर्वफल्गुन्यां दाड़िमीवृक्षसम्भवा।
वृक्षादनी धने देया अक्षयं भवति ध्रुवम्॥ १॥
वन्दाकन्तु मघा-ऋक्षे बहुवारकवृक्षजम्।
धान्यागारे प्रदातव्यमक्षयं भवति ध्रुवम्॥ २॥
शेफालिकाया वन्दाकं हस्तायाञ्च समुद्धरेत्।
धान्यमध्ये तु संस्थाप्यं तद्धान्यमक्षयं भवेत्॥ ३॥
भरण्यां कुशवन्दाकं गृहीत्वा स्थापयेद् बुधः।
सम्पूर्णधनधान्यान्तःस्थः करोत्यक्षयं ध्रुवम्॥ ४॥
उडुम्बरस्य वन्दाकं रोहिण्यां ग्राहयेद् बुधः।
स्थापयेत् सञ्चितार्थान्तः सदा भवति चाक्षयम्।
मन्त्रेण मन्त्रितं कृत्वा मन्त्रमत्रैव कथ्यते॥
"ओं नमो धनदाय स्वाहा"॥ ५॥

अथ श्रुतिधर-कवित्वादिकरणम्।

पथ्याघृतम्।

पथ्या वचा कणा शुण्ठी सैन्धवं मरिचं वचा।
शिग्रुं प्रतिपलं चूर्णं द्वाविंशतिपलं घृतम्॥
घृताच्चतुर्गुणं क्षीरं दत्त्वा सर्वं विपाचयेत्।
घृतशेषं पिबेन्नित्यं वाङ्मेधास्मृतिबुद्धिदम्॥ १॥

ब्राह्मीघृतम्।

वचा ब्राह्मीफलं कुष्ठं सैन्धवं तिलपुष्पिकाम्।
चूर्णयित्वा द्रवैर्भाव्यं ब्राह्मीमण्डूकसम्भवैः॥

दिनमेकं ततः पाच्यं घृतं कल्काच्चतुर्गुणम्।
घृताच्चतुर्गुणं देयं क्षीरं ब्राह्मीरसान्वितम्।
घृतशेषं समुत्तार्य्य लिहेद्वा बुद्धिदायकम्॥ १॥
द्वे हरिद्रे वचा कुष्ठं पिप्पली विश्वभेषजम्।
अजाजी अजमोदा च यष्टीमधुकसैन्धवम्॥
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत्।
तच्चूर्णं सर्पिषा लेह्यं कार्षिकं वाक्यशुद्धिकृत्।
भक्षयेन्मासमेकन्तु बृहस्पतिसमो भवेत्॥ २॥
ब्राह्मी-मुण्डी-वचा-शुण्ठी-पिप्पली-समचूर्णकम्।
मधुना भक्षयेत् कर्षं नष्टवाक् शुद्धवाग्भवेत्॥ ३॥
वचाऽस्थि करवी गुन्द्रा मुषली मधुकं बला।
अपामार्गस्य पञ्चाङ्गं क्षौद्रेण पूर्ववत् फलम्॥ ४॥
अपामार्गः वचा शुण्ठी विड़ङ्गः शङ्खपुष्पिका।
शतावरी गुड़ूची च समं चूर्ण्यां हरीतकी॥
घृतेन भक्षयेत् सर्वं नित्यं ग्रन्थसहस्रधृक्॥ ५॥
अश्वगन्धा चाजमोदा पाठा कुष्ठं कटुत्रयम्।
शतपुष्पी विश्ववीजं सैन्धवञ्च समं समम्॥
एतदर्द्धं वचा चूर्णं मेलितं मधुसर्पिषा।
भक्षयेत् कर्षमात्रन्तु जीर्णान्ते क्षीरभोजनम्।
सहस्रग्रन्थधारी स्याद् ब्रह्मचारी कविर्भवेत्॥ ६॥
लिहेज्ज्योतिष्मतीतैलं बलया वचया सह।
स्तोकं स्तोकं क्रमेणैव यावन्निष्कचतुष्टयम्।
निर्वाते मधुराशी स्याद् ब्रह्मचारी कविर्भवेत्॥ ७॥
सूर्य्यस्य ग्रहणे वेन्दोः समन्त्रामाहरेद्वचाम्।
चूर्णितां सघृतां भुक्त्वा सप्ताहं वाक्पतिर्भवेत्॥
इत्येवमादियोगानां मन्त्रराजो शिवोदिता।

जप्त्वा मन्त्रेण सिद्धिः स्यात् पश्चात् तैरेव भक्षयेत् ॥
मन्त्रस्तु।—"ओं ह्रूं हयग्रीवागीश्वराय नमः"। सहस्रजपः ॥८॥

धात्रीफलरसैर्भाव्यं वचाचूर्णं दिनावधि।
घृतेन लेहयेन्निष्कं वाक्शुद्धिस्मृतिबुद्धिकृत् ॥ ९ ॥
वचाचूर्णं पिबेत् क्षीरैः पुनर्मन्त्रेण मन्त्रयेत्।
भोज्यक्षीरान्नशाल्यन्नं सप्ताहाद् वाक्पतिर्भवेत्।
सप्तमे अष्टमे चैव साक्षात् श्रुतिधरो भवेत् ॥ १० ॥
वचाचूर्णं पिबेत् क्षीरैर्घृतैः क्षौद्रैश्च यत् पुनः।
सप्ताहक्रमयोगेन लेह्यं स्यात् पूर्ववत् फलम् ॥ ११ ॥
पुष्यार्कयोगे संगृह्य श्वेतार्कस्य तु मूलकम्।
छायाशुष्कन्तु तच्चूर्णं मन्त्रेणैवाभिमन्त्रितम् ॥
कर्षमर्द्धपलं वापि प्रातरुत्थाय यः पिबेत्।
तक्रेण सर्पिषा वापि जीर्णान्ते क्षीरभोजनम्।
एवं सप्ताहमात्रेण कविर्भवति बालकः ॥
"ओं महेश्वराय नमः"। अनेनाभिमन्त्र्य पिबेत् ॥ १२ ॥

अथ किन्नरीकरणम्।

विभीतकं कणा शुण्ठी सैन्धवं त्वक् समं समम्।
गोमूत्रेण पिबेत् कर्षं किन्नरैः सह गीयते ॥ १ ॥
जातीपत्रं कणा लाजा मातुलुङ्गदलं मधु।
पलं लेह्यं भवेन्नादः किन्नराधिक एव च ॥ २ ॥
देवदारु कणा व्योषं शताह्वा पत्रकं निशा।
वचासैन्धव-शिग्रूत्थ-मूलं पेष्यं समं समम् ॥
कर्षैकं मधुसर्पिर्भ्यां मासं लिह्यात् सदा तु यः।
कण्ठशुद्धिर्भवेत् तेन किन्नरैः सह गीयते ॥ ३ ॥
शुण्ठी च शर्करा चैव क्षौद्रेण सह संयुता।
कोकिलस्वर एव स्याद् गुटिका भुक्तिमात्रतः ॥ ४ ॥

आर्द्रकं रङ्कोरण्ट बला ब्राह्मी वचा तथा।
एतच्चूर्णं समांशेन पलैकं वारिणा पिबेत्॥
माघमासे चतुर्दश्यां कृष्णपक्षे दिनसप्तकम्।
गन्धर्वसदृशं गानं कोकिलानां स्वरो यथा॥ ५॥
निर्गुण्डीमूलचूर्णन्तु तिलतैलेन लिह्यते।
कण्ठशुद्धिर्भवेत् तस्य किन्नरैः सह गीयते॥ ६॥

अथ चक्षुष्यम्।

वर्षाकाले काकमाची समूला तैलपाचिता।
खादेत् समासतश्चक्षुर्गृध्रदृष्टिर्भवेत् समम्॥ १॥
श्वेतं पुनर्नवामूलं घृतघृष्टं सदाञ्जयेत्।
जलस्रावं निहन्त्याशु तन्मूलञ्च निशायुतम्।
अञ्जने नेत्ररोगाणि न भवन्ति कदाचन॥ २॥
द्विनिशा सैन्धवं त्रूषं वीजं कारञ्जकं समम्।
भृङ्गोद्रवैर्युतं वापि तिमिरं पटलं हरेत्॥ ३॥
शम्बूकं वा वराटं वा दग्धं शुष्कं विचूर्णितम्।
अञ्जनान्नवनीतेन हन्ति पुष्पं चिरन्तनम्॥ ४॥
अजामूत्रेण भूधात्रीमूलं पिष्ट्वा च वर्त्तिका।
नवनीतसमायुक्ता हन्ति पुष्पं चिरन्तनम्॥ ५॥
अञ्जनान्नाशयेत् पुष्पं क्षौद्रैर्वा स्वर्णमाक्षिकम्।
मरीचमर्दनात् रक्तैः * वर्त्ती रात्र्यन्धतां जयेत्॥ ६॥
जयन्ती वाऽभया वाथ घृष्ट्वा स्तन्यैर्निशान्धहृत्।
शोणितं चर्मकोपञ्च मांसवृद्धिञ्च नाशयेत्॥ ७॥
अजस्य कृष्णमांसान्तः पिप्पलीं मरिचं क्षिपेत्।
भावयित्वा घृते पक्वा घटिकान्ते समुद्धरेत्।
मध्वाज्यस्तन्यसंपिष्टं रात्र्यन्धहरमञ्जनम्॥ ८॥

* अत्र रक्तैरित्यनेन स्त्रीयरक्तैरित्यर्थः।

अजापित्तगतं व्योषं धूमस्थाने विशोषयेत्।
चिरविल्वरसैर्घृष्टं रात्र्यन्धहरमञ्जनम्॥
घृतेन पुष्पं मधुनाऽश्रुपातं तैलेन कण्डूं तिमिरं जलेन।
रात्र्यन्धकं काञ्जिकया निहन्ति पुनर्नवा* नेत्रनवाङ्कुरी स्यात्॥८॥
चन्द्रोदया वटी। हरीतकी वचा कुष्ठं पिप्पली मरिचानि च।
विभीतकस्य मज्जा च शङ्खनाभिर्मनःशिला॥
सर्वमेतत् समं कृत्वा छागीक्षीरेण पेषयेत्।
नाशयेत् तिमिरं कण्डूं पटलान्यर्वुदानि च॥
अधिकानि च मांसानि येन रात्रौ न पश्यति।
अपि द्विवार्षिकं पुष्पं मासेनैकेन नाशयेत्॥
वर्त्तिश्चन्द्रोदया नाम नृणां दृष्टिप्रसादनी।
छायाशुष्का वटी कार्य्या नाम चन्द्रोदया वटी॥१०॥
यस्त्रैफलं चूर्णमपथ्यवर्जी सायं समश्नाति हविर्मधुभ्याम्।
स मुच्यते नेत्रगतैर्विकारैर्भृत्यैर्यथा क्षीणधनो मनुष्यः॥ ११ ॥

अथ कर्णस्य बाधिर्य्य-क्रिमिनाशनम्।

शिखरिक्षारयुतेन जलकृतकल्केन साधितं तिलजम्।
अपहरति कर्णनादं बाधिर्य्यञ्चापि पूरणतः॥ १ ॥
दशमूलकषायेण तैलप्रस्थं विपाचयेत्।
एतत् कल्कं प्रदायैव बाधिर्य्ये परमौषधम्॥ २ ॥
नीलोत्र्यध्नरसे तैलं सिद्धं काञ्जिकसंयुतम्।
कदुष्णपूरणात् कर्णे निःशेषक्रिमिनाशनम्॥ ३ ॥
दन्तेन चर्वयेन्मूलं नन्द्यावर्त्तपलाशयोः।
तन्नालीपूरिते कर्णे ध्रुवं गोमाक्षिकां जयेत्॥ ४ ॥
ताम्बूलभक्षणं कृत्वा तत्र सन्दापयेद् बुधः।
तत्र स्थितास्तु क्रमयो नाशमायान्ति निश्चितम्।

* अत्र श्वेतपुनर्नवा ग्राह्या।

मुषली वागुजीचूर्णं खादेद्बाधिर्य्यशान्तये ॥ ५ ॥
मनःशिलाऽपामार्गोऽथ मूलं चूर्णं मधुप्लुतम् ।
भक्षयेत् कर्षमात्रन्तु बधिरत्वप्रशान्तये ॥ ६ ॥
लशुनामलकं तालं पिष्ट्वा तैले चतुर्गुणे ।
तैलाच्चतुर्गुणं क्षीरं पाच्यं तैलावशेषितम् ॥
तत् तैलं निक्षिपेत् कर्णे बाधिर्य्यञ्च विनाशयेत् ॥ ७ ॥

अथ कर्णपालीवर्द्धनम् ।

सिद्धार्थं बृहतीञ्चैव ह्यपामार्गं समं समम् ।
छागीक्षीरैः प्रलेपोऽयं कर्णपालीं विवर्द्धयेत् ॥ १ ॥
मूषलीकन्दचूर्णन्तु महिषीनवनीततः ।
लोड़येत् स्निग्धभाण्डे तु धान्यराशौ निवेशयेत् ॥
सप्ताहादुत्थितं लेप्यं कर्णपाली विवर्द्धते ॥ २ ॥
गुञ्जामूलं कृतं चूर्णं महिषीक्षीरसंयुतम् ।
सृतं दधि ततः कुर्य्यान्नवनीतं तदुद्भवम् ॥
कर्णयोर्लेपनं नित्यं वर्द्धते नात्र संशयः ॥ ३ ॥
अश्वगन्धा वचा कुष्ठं गजपिप्पलिका समम् ।
महिषीनवनीतेन लेपात् कर्णौ विवर्द्धते ॥ ४ ॥
वराहोत्थेन तैलेन लेपात् कर्णं विवर्द्धयेत् ।
चर्मचटकरक्तेन लेपात् कर्णं विवर्द्धयेत् ॥ ५ ॥

अथ दन्तदृढ़ीकरणम् ।

यमचिञ्चा जया पुङ्खा मूलं वा हयमारजम् ।
चलदन्ता दृढ़ा यान्ति प्रत्येकं दन्तधावनात् ॥ १ ॥
ताम्रपात्रे क्षणं पाच्यमभयाचूर्णकं मधु ।
पिष्ट्वा च गुटिका कार्य्या दन्तैर्धार्य्या कृमिं हरेत् ॥ २ ॥
दन्तैर्धार्य्यं स्नुहीमूलं कृमिनाशं करोत्यलम् ।
कासीसं घृतसंपक्वं धार्य्यं दन्तैर्व्यथापहम् ॥ ३ ॥

विशालायाः फलं चूर्णं तप्तलौहोपरि क्षिपेत् ।
तद्धूमस्पृष्टदन्तानां कीटपातो भवत्यलम् ॥ ४ ॥
जातीकीलकपत्रं वा चर्वयेत् प्रातरुत्थितः ।
स्थिराः सुश्चलिता दन्तास्तत्काष्ठैर्दन्तधावनात् ॥
गुञ्जामूलञ्च कर्णाभ्यां बद्धं दन्तक्रमिप्रणुत् ॥ ५ ॥
त्रिसूतं रौप्यमेकञ्च जम्बीररसमर्दितम् ।
जम्बीरफलमध्यस्थं वस्त्रे बद्धा त्र्यहं पचेत् ॥
क्षीरमध्ये समुद्धृत्य गुटिकां तां ततः पुनः ।
भावितं भानुदुग्धेन तालकं सूक्ष्मपेषितम् ॥
तन्मध्ये गुटिकां क्षिप्त्वा वस्त्रे बद्धा दिनत्रयम् ।
मधुभाण्डगतात् पश्चादुद्धृत्य चास्यधारितम् ॥
घर्षणाच्चलितान् दन्तान् सप्ताहात् कुरुते दृढ़ान् ॥ ६ ॥
तालकं भानुदुग्धेन दिनमेकं विमर्दयेत् ।
तद्गर्भे रसहेमोत्थां पिण्डिकां तारसंयुताम् ॥
जम्बीरफलमध्यस्थां दोलायन्त्रे त्र्यहं पचेत् ।
तैलक्षौद्रयुते भाण्डे समुद्धृत्य विधारयेत् ।
दन्तरोगान् हरेत्सर्वान् घर्षणाच्चलिता दृढ़ाः ॥ ७ ॥
चलद्दन्तस्थिरकरं कार्य्यं वकुलचर्वणम् ।
वकुलस्य च वीजन्तु पिष्ट्वा कोष्णेन वारिणा ॥
मुखे च धारयेद्धीमान् दन्तदार्ढ्यकरं परम् ॥ ८ ॥
वकुलस्य त्वचः क्काथमुष्णं वक्त्रेण धारयेत् ।
दृढ़ाः सुश्चलिता दन्ता सप्ताहान्नात्र संशयः ॥ ९ ॥

अथ अत्याहारकरणम् ।

त्र्यश्वकेनापि वृक्षस्य पीठं कृत्वाऽऽसने स्थितः ।
योऽसौ भुङ्क्ते घृतैः सार्द्धं भोजनं भीमसेनवत् ॥ १ ॥
सन्ध्यायां प्लक्षवृक्षस्य कर्त्तव्यमभिमन्त्रणम् ।

प्रातः पुष्पाणि संगृह्य मालां शिरसि धारयेत्॥
कौपीनं संपरित्यज्य भुङ्क्तेऽसौ भीमसेनवत्॥ २॥
उद्भ्रान्तपत्रमादाय कपिलाश्वानदन्तकम्।
कट्यामेव स्वयं बद्ध्वा भोजने वकवद्भवेत्॥ ३॥
गृहीत्वा मन्त्रितान् मन्त्री विभीतवरपल्लवान्।
आक्रम्य दक्षिणां जङ्घां विंशत्याहारभुग् भवेत्॥
मन्त्रस्तु।—"ओं, नमः सर्वभूताधिपतये ग्रस ग्रस शोषय
ोषय भैरवीश्चाज्ञापयति स्वाहा"। उक्तयोगानामयं मन्त्रः॥ ४॥
अधरं कृकलासस्य शिखास्थाने विबन्धयेत्।
वायुपुत्र इवाश्चर्य्यमसौ भुङ्क्ते न संशयः॥
"ओं नाभिवेगेन उर्वशी स्वाहा"। अनेनेति॥ ५॥

अथ अनाहारकरणम्।

अन्त्राणि कृकलासस्य मज्जां कारञ्जवीजिकाम्।
पिष्ट्वा तद्गुलिकां कृत्वा त्रिलोहेन तु वेष्टिताम्॥
तां वक्त्रे धारयेद् योऽसौ क्षुत्पिपासा न बाधते।
"ओं शां चां शरीरममृतमाकर्षय स्वाहा"॥ १॥
पद्मवीजं महाशालीन् छागीदुग्धेन पाचयेत्।
साज्यं तत्पायसं भुक्त्वा द्वादशाहं क्षुधापहम्॥ २॥
उडुम्बरस्य जम्बीरशालिशिम्बीशिरीषजम्।
वीजं संचूर्ण्यमारभ्य भुक्त्वा पक्षं क्षुधापहम्॥ ३॥
औडुम्बरफलं पक्वमिङ्गुदीतैलभावितम्।
भुक्त्वा मासात् क्षुधां हन्ति पिपासाञ्च न संशयः॥ ४॥
अपामार्गस्य वीजानि दुग्धाज्याभ्यां प्रपाचयेत्।
पायसं छागलीक्षीरैर्भुक्त्वा मासात् क्षुधापहम्॥
"ओं नमो भगवते रुद्राय अमृतार्कमध्ये संस्थिताय मम
रीरे अमृतं कुरु कुरु सः स्वाहा"। उक्तयोगानामयं मन्त्रः॥ ५॥

अथ पादुकासाधनम् ।

अञ्जनालेङ्गुदीतैलैः पेषयेत् श्वेतसर्षपान् ।
तल्लिप्तहस्तपादस्तु योजनानां शतं व्रजेत् ॥ १ ॥
अङ्कोलतैलसंपिष्टां श्वेतसर्षपलेपिताम् ।
पादुकामुष्ट्रचर्मोत्थां समारुह्य शतं व्रजेत् ॥ २ ॥
अङ्कोलस्य तु मूलन्तु तिलतैलेन पाचयेत् ।
पादं संजानुपर्य्यन्तं लिप्त्वा दूराध्वगो भवेत् ॥

"ओं नमश्चण्डिकायै गगनं गगनं चालय वेशय हिलि हि
वेगवाहिनि क्लीं स्वाहा" । उक्तयोगद्वयस्यायं मन्त्रः ॥ ३ ॥

गैरिकं सिन्धुजञ्चैव हयमारी च मालती ।
समं रुद्रजटा चैव विदार्य्या सह पेषयेत् ॥
तल्लिप्तपादः सहसा सहस्रयोजनं व्रजेत् ।
बलीपलितनिर्मुक्तो यावदाभूतसंप्लवम् ॥

अत्र मन्त्रः ।—"ओं नमो भगवति रुद्राय नमो हरितगदाधरा
त्रासय त्रासय क्षोभय क्षोभय चरणे स्वाहा" ॥ ४ ॥

कोकजिह्वां ब्रह्मचारी गुड़लोहेन वेष्टयेत् ।
गच्छति मुखे प्रक्षिप्य योजनं शतमेव च ॥
आगच्छति तदा तूर्णं स नरो नात्र संशयः ॥ ५ ॥

अथ अनावृष्टिहरणम् ।

"हुं श्रीं हुं" इमं मन्त्रं जलं प्रविश्य यदि जपति तदा अनाव
हरति ।

कामरत्ने द्वादशोपदेशः

अथ निधिदर्शकमञ्जनम् ।

अञ्जनानान्तु सर्वेषां मन्त्रं साध्यमघोरकम् ।
विना घोरेण विद्याश्च नाशयन्ति पदे पदे ॥ १ ॥
यक्षाणां मूर्त्तिमाश्रित्य जपेदष्टसहस्रकम् ।

ततः सर्वविधानानि सुसाध्यानि च आहरेत् ॥
ओं बहुरूपं विश्वरूपं विद्याधर-महेश्वरम्।
जपाम्यहं महादेवं सर्वसिद्धिप्रदायकम् ॥

अत्र मन्त्रः।—"ओं नमो रुद्राय रुद्ररूपाय नमो बहुरूपाय नमो विश्वरूपाय नमो विश्वात्मने नमस्तत्पुरुषयक्षाय नमो यक्षरूपाय नम एकस्मै नम एकाय नम एक रौरवाय नम एकयक्षाय नम एकेक्षणाय नमो यक्षाय नमो वरदाय नमः तुद तुद स्वाहा"। सोपवासो जितेन्द्रियो सिद्धिर्भवति ॥ २ ॥

इञ्जलानां पत्रकस्य ग्राह्यो यत्नेन पावकः।
दीक्षितस्य गृहे श्रेष्ठं चितायान्तु विशेषतः ॥
रजकस्य गृहाद्वापि तस्करस्य गृहाच्च यः ॥

"ओं ज्वलितविद्युते स्वाहा" अग्निग्रहणमन्त्रः। "ओं नमो भगवते वासुदेवाय बबन्ध श्रीपतये स्वाहा"। अनेन वर्त्तिमभिमन्त्रयेत्। "ओं नमो भगवते सिद्धिसाधकाय ज्वल ज्वल पत पत पातय पातय बन्ध बन्ध संहर संहर दर्शय दर्शय निधिं मम"। अनेन दीपं ज्वालयेत्। "ओं ऐं मन्त्रसिद्धेभ्यो नमो विश्वेभ्यः स्वाहा"। अनेन कज्जलं ग्राह्यम्। "ओं कालि कालि महाकालि रक्षेदमञ्जनं नमो विश्वेभ्यः स्वाहा"। अनेन मन्त्रेण यत्किञ्चिदञ्जनद्रव्यमभिमन्त्रयेत्। "ओं सर्व सर्वसहिते सर्वौषधिप्रयाहिते विरते नमो नमः स्वाहा"। अनेन मन्त्रेणाञ्जयेत्। न योगां मूलिकां मन्त्रयेत्। आदौ हेमशलाकया नेत्रमञ्जयित्वा ततस्तयैव शलाकया अञ्जनद्रव्यमञ्जयेत् ॥ ३ ॥

अञ्जयित्वाऽञ्जनं पश्चात् सप्तधारस्य पत्रकम्।
बन्धयेत् प्रतिनेत्रन्तु अच्छिद्रं तदधोमुखम् ॥
तस्योपरि सितं वस्त्रं पट्टजं वाऽथ बन्धयेत्।
नाञ्जयादधिकहीनाङ्गं खदंष्ट्राग्निदग्धकम् ॥

सम्पूर्णाङ्गं शुचिं स्नात्वा द्विदिनं नक्तभोजनम्।
क्षीरशाल्यन्नभोक्तव्ये द्विदिनान्ते ततोऽञ्जयेत्।
अञ्जितस्य शिखाबन्धः कर्त्तव्यो मन्त्र उच्यते॥

अत्र मन्त्रः।—"ओं नमो भगवति रुद्राय ओं नन्न नन्न महेन्नन विहेन्न विहेन्न मिहेन्न मिहेन्न हर हर रक्ष रक्ष पूजिते यक्षकुमारि सुलोचने स्वाहा"।

यक्षाणां मूर्त्तिमाश्रित्य उदयास्तं मनुं जपेत्।
पूर्वमेव समाख्यातं शिखाबन्धं शिवोदितम्॥

अयं सर्वजनेन ज्ञातव्यः॥ ४॥

शरत्काले तु संग्राह्या भूलता रक्तवर्णका।
सिन्दूरपूरितां कृत्वा रवितूलेन लेपयेत्॥
अतिकृष्णतिलात् तैलं ग्राहयेद्राहयेत् सुधीः।
तैलवर्त्तौ प्रयोगेण कज्जलञ्चोत्तरायणम्॥
ग्राहयित्वाऽञ्जनं चक्षुर्निधिं पश्यति साधकः।
प्रमाणञ्च विजानाति गृह्णाति च यथेष्टकम्॥ ५॥
अतिकृष्णस्य काकस्य जिह्वामांसं समाहरेत्।
वेष्टयेद्रवितूलेन वर्त्तिं तैलेन कारयेत्॥
अजाघृतेन दीपन्तु प्रज्वाल्यादाय कज्जलम्।
अञ्जिताक्षो नरस्तेन निधिं पश्यति पूर्ववत्॥ ६॥
सप्तधा पद्मसूत्राणि भावयेदिक्षुजै रसैः।
उद्धृत्य ज्वालयेद्दीपं अङ्कुलोतैलसंयुतम्॥
ग्राह्यं पुष्यत्रयोदश्यां कज्जलं निधिदर्शकम्।
सर्वाञ्जनमिदं सिद्धं शम्भुना परिकीर्त्तितम्॥ ७॥
दीपकज्जलयोः पात्रं कर्त्तव्यं नरमुण्डजम्।
सर्वेषां कज्जलानान्तु सत्यं स्याच्छिवभाषितम्॥ ८॥
रक्तेन कृकलासस्य भावयित्वा मनःशिलाम्।

तेनैवाञ्जितनेत्रस्तु निधिं पश्यति भूगतम् ॥ ९ ॥
गृहीत्वा चानुराधायां वन्दां शाखोटवृक्षजाम्।
गोरोचनां समं पिष्ट्वा त्वञ्जनं निधिदर्शकम् ॥ १० ॥
एतत् सर्वाञ्जनं ख्यातं प्रसिद्धं शिवभाषितम्।
अगस्त्यवृक्षजां कुर्य्यात् पादुकां निधिदर्शिकाम् ॥
पादुकाऽञ्जनयोगेन सिद्धियोगा भवन्ति वै ॥ ११ ॥

मन्त्रस्तु।—"ओं नमो भगवते रुद्राय नम उड्डामरेश्वराय शिलि शिलि धूमले नागवेतालिनि स्वाहा"। अनेन पादुकामभिमन्त्रयेत्।

तुलसीमूलिकां पुष्ये शनिवारे समुद्धरेत्।
निष्पिष्य काञ्जिकेनाथ मधुना पुनरञ्जयेत् ॥
पादजातकुमारो वा कन्यका वापि दृश्यते।
तदानीं नात्र सन्देहः पातालजम्बिका अपि ॥

"ओं नमो भगवते रुद्राय कज्जललेपाञ्जनं दर्शय दर्शय स्वाहा ठः ठः"। अनेन मन्त्रेण कज्जलमभिमन्त्रयेत् ॥ १२ ॥

खन्यमाने च सर्पाश्च निःसरन्ति पदे पदे।
औषधेन विना तेभ्यो भयं स्यान्मन्त्रिणामपि ॥
तस्मादौषधयोगेन पादलेपेन तान् जयेत् ॥ १३ ॥

औषधन्तु।—अर्कस्य करवीरस्य उत्पलस्य च मूलिकाम्।
पिष्ट्वा पादप्रलेपाच्च दूरं गच्छन्ति पन्नगाः ॥ १४ ॥

अथ अदृश्यीकरणम्।

चतुर्लक्षमितं मन्त्रं श्मशाने प्रजपेच्छुचिः।
लग्नवृत्तिस्ततस्तुष्टा पदं यच्छति यक्षिणी ॥
तेनावृतो नरोऽदृश्यो विचरेत् पृथिवीतले।
निधिं पश्यति गृह्णाति न विघ्नैः परिभूयते ॥

मन्त्रस्तु।—"ओं ह्रीं ह्रीं स्फें श्मशानवासिनी स्वाहा" ॥ १ ॥

निशाचरं निशि ध्यात्वा जप्तव्यं वामपाणिना ।
अदृश्यकारिणीं विद्यां लक्षजाप्ये प्रयच्छति ॥

मन्त्रस्तु।—"ओं नमो निशाचर महामहेश्वर मम पर्य्यटतः सर्वलोकलोचनानि बन्धय बन्धय देव्याज्ञापयति स्वाहा" ॥२॥

रात्रौ कृष्णचतुर्द्दश्यां श्मशानान्तःशिवालये ।
बलिनान्योपहारेण कुर्य्यादर्चनमुत्तमम् ॥
ततो दीपाङ्गुलीतैलैर्वर्त्तिः स्यादर्कतन्तुभिः ।
प्रज्वाल्य नृकपाले तु तत्पात्रे धृतकज्जलम् ॥
अञ्जयेन्नेत्रयुगलं देवैरपि न दृश्यते ॥ ३ ॥
अर्कशाल्मलिकार्पासपट्टपदाब्जतन्तुभिः ।
पञ्चभिर्वर्त्तिकाभिश्च नृकपालेषु पञ्चसु ॥
नरतैलेन दीपाः स्युः कज्जलं नृकपालतः ।
ग्राहयेत् पञ्चभिर्यत्नात् पूर्ववच्च शिवालये ॥
पञ्चस्थानीयजातन्तु एकीकुर्य्यात् ततः पुनः ।
मन्त्रयित्वाऽञ्जयेन्नेत्रे देवैरपि न दृश्यते ॥ ४ ॥

मन्त्रस्तु।—"ओं हुं फट् स्वाहा"।

कालि कालि महाकालि मांसशोणितभोजिनि ! ।
रक्तकृष्णमुखे देवि ! मा मे पश्यतु मानुषः ॥ ४ ॥

"ओं हुं फट् स्वाहा" एतन्मन्त्रायुतजपात् सिद्धो भवति। उक्ताः सर्वे अदृश्यीकरणप्रयोगाः। अनेन मन्त्रणाष्टोत्तरशताभिमन्त्रिताः अङ्गुलीतैलप्रयोगाः सिद्धा भवन्ति ॥ ५ ॥

अङ्गुलीतैलसंसिक्ता जटा सप्तच्छदोद्भवा ।
त्रिलोहवेष्टिता सा तु वटिका कार्य्यते शुभा ॥
अदृश्यकारिणी सा तु मुखस्था नात्र संशयः ॥ ६ ॥
तत्तैले सर्षपाः श्वेतास्त्रिलोहेन च वेष्टिता ।
अदृश्यकारिणी साक्षात् गुटिका मुखमध्यगा ॥ ७ ॥

कृष्णकाकस्य रुधिरं पित्तं गोमायुसम्भवम्।
काकारिनखचञ्चूंश्चापि समभागं विचूर्णयेत्॥
ऋक्षे पुनर्वसौ वर्त्तिं कृत्वा नेत्रे च रञ्जयेत्।
अदृश्यो भवति क्षिप्रं सर्वकार्य्यप्रसाधकः॥ ८॥
कृष्णकुक्कुरपुच्छाग्रं निर्माल्यं मृतकस्य च।
काकनेत्रञ्च मरिचं पिष्ट्वा कार्य्यञ्च मूत्रकैः॥
कलायार्द्धप्रमाणेन वटीं कृत्वा तु शोषयेत्।
तेनैवाञ्जितमात्रेण अदृश्यो भवति ध्रुवम्॥ ९॥
नक्तमालस्य तैलेन तत्र श्वेतार्कसूत्रजाम्।
वर्त्तिं प्रज्वाल्य वज्रस्य दले संगृह्य कज्जलम्॥
तेनाञ्जनेन मनुजस्त्वदृश्यो भवति ध्रुवम्॥ १०॥
सुकृष्णञ्चैव मार्जारं मारयित्वा चतुष्पथे।
प्रोक्षणं कारयित्वा तु दिनानां पञ्चविंशतिम्॥
तं संगृह्य प्रयत्नेन चालयेच्छ्रोतवारिणि।
स्रोतोभिदि यदस्थि स्यात् तद्ग्राह्यं यत्नतोऽभयम्॥
पूजयित्वा महाकालं गोरोचनसमन्वितम्।
नकुलस्य तु पित्तेन भावयित्वा प्रपेषयेत्॥
तद्वर्त्तितिलकादेव नरोऽदृश्यो भवेद् ध्रुवम्॥ ११॥
नृमांसञ्च शिवामांसं यत्नतो ग्राहयेद् बुधः।
रजस्वलायाः प्रथमरुधिरेण वटीं कुरु॥
त्रिलोहवेष्टिता सा तु मुखस्थाऽदृश्यकारिणी॥ १२॥
कृष्णमार्जारमुण्डे तु कृष्णगुञ्जां प्रवापयेत्।
अदृश्यकारकं साक्षात् तत्फलं मस्तके धृतम्॥ १३॥
कोकाया नयनं वामं त्रिलौहेन प्रवेष्टयेत्।
सा वटी मुखमध्यस्था अदृश्यं कुरुते ध्रुवम्॥ १४॥
दिवाभीतस्य नयनं त्रिलोहेन प्रवेष्टितम्।

मुखस्थं कुरुतेऽदृश्यं यथेच्छं विचरेन्महीम् ॥ १५ ॥
ऋक्षे चैवानुराधायां वन्दां राक्षसवृक्षजाम् ।
मुखे प्रक्षिप्य च नरो ह्यदृश्यः स्यादसंशयः ॥ १६ ॥
शाखोटकस्य वन्दाकं नक्षत्रे मृगशीर्षके ।
गृहीत्वा पानमात्रेण अदृश्यो जायते नरः ॥ १७ ॥
भरण्यान्तु समागृह्य वन्दां कार्पाससम्भवाम् ।
हस्ते बद्धा ह्यदृश्यः स्यात् स्वात्यां वा निम्बवृक्षजाम् ॥१८॥
पिबेदुत्तरषाढ़ायाम् अशोकवृक्षसम्भवाम् ।
वन्दां तदा ह्यदृश्यः स्यादश्विन्यां बिल्ववृक्षजाम् ॥
वन्दाकं वा करे धृत्वा ह्यदृश्यो जायते नरः ॥ १९ ॥

अथ मृतसञ्जीवनी ।

मृतसञ्जीवनीं विद्यां प्रवक्ष्यामि समासतः ।
लिङ्गमङ्कोलवृक्षाधः स्थापयित्वा प्रपूजयेत् ॥
नवं घटञ्च तत्रैव पूजयेल्लिङ्गसन्निधौ ।
वृक्षं लिङ्गं घटञ्चैव सूत्रेणैकेन वेष्टयेत् ॥
चतुर्भिः साधकैर्नित्यं प्रणिपत्य क्रमेण तु ।
एवं द्वितीणि यः कुर्य्यादघोरेण समर्चयेत् ॥
पुष्पादिफलपाकान्तं साधनं कारयेद् बुधः ।
फलानि पक्कान्यादाय पूर्वोक्तं पूरयेद् घटम् ॥
तद्घटं पूजयेन्नित्यं गन्धपुष्पाऽक्षतादिभिः ।
ओष्ठवर्ज्यं ततः कुर्य्याद्वाजिनां घर्षयेन्मुखम् ॥
तन्मुखे बृंहणं वृक्षं किञ्चित् किञ्चित् प्रलेपयेत् ।
विस्तीर्णमुखभागान्तः कुम्भकारकरोद्धृताम् ॥
मृत्तिकां लेपयेत् तत्र तानि बीजानि रोपयेत् ।
कुण्डल्याकारयोगेन यत्नादूर्द्ध्वमुखैर्नरैः ॥
शुष्कं तत् ताम्रपात्रोर्द्ध्वं भाण्डे देयमधोमुखम् ।

आतपे धारयेत् तैलं ग्राहयेत्तच्च रक्षयेत् ॥
मासार्द्धञ्चैव तत्तैलं मासार्द्धं तिलतैलकम् ।
नस्यं देयं मृतस्यैतत् समाकृष्य हि तेन तु ॥
तत् कृत्वा जीव्यते सत्यं गतेनापि यमालयम् ।
रोगापमृत्युसर्पादिमृतो जीवति हि स्वयम् ॥ १ ॥
पुंशुक्रं पारदं तुल्यं तिलतैलेन मर्दयेद् ।
नस्यं देयं मृतस्यैव कालदष्टस्य वा क्षणात् ॥
जीव आयाति नो चित्रं महादेवेन भाषितम् ॥ २ ॥
पुष्यभास्करयोगे तु गुड़ूचीमूलमाहरेत् ।
कर्षमुष्णजलैः पीतो मृतमृत्युहरो भवेत् ॥
"ओं अघोरेभ्योऽथ घोरेभ्यो घोरमघोरतरेभ्यः सर्वतः सर्व-सर्वेभ्यो नमस्ते रुद्ररूपेभ्यः"। उक्तयोगानामयं मन्त्रः ॥ ३ ॥

अथ विषनामानि ।

शम्भुनोक्तं समासेन विषं स्थावरजङ्गमम् ।
योगञ्च कृत्रिमञ्चैव वृश्चिकाद्यैस्तु सम्भवम् ॥
क्रमाल्लक्षणमेतेषां मन्त्रयुक्तं वदाम्यहम् ।
नाम वक्ष्ये विधानञ्च शम्भुना कीर्त्तितं पुरा ॥
वहवो वत्सनाभश्च मुस्तकं पुष्करं विषम् ।
क्रूरं शठं कर्मठञ्च हरिद्रा कालकूटजम् ॥
इन्द्रवज्रञ्चैव वीरं हरितं गालवं विषम् ।
शृङ्गी कर्कटशृङ्गी च मेषशृङ्गी हलाहलम् ॥
शाकूटं वज्रशृङ्गी च अञ्जनं पुण्डरीककम् ।
सङ्कोचं मधुपाकञ्च मसूरं रोहिणं तथा ॥
पञ्चविंशतिभिर्भेदैर्विज्ञेयं स्थावरं विषम् ।
एतन्मध्ये ह्यतिक्रूरं सङ्कोचं कालकूटकम् ॥

शृङ्गीं मुस्तं वत्सनाभं पञ्चमन्तु विषाविषम्॥ १॥
एषां देहप्रविष्टानां शृणु लक्षणमुच्यते।
वान्तिर्मूर्च्छाऽतिसारञ्च भ्रान्तिं शूलञ्च कम्पनम्।
कासश्वासौ तीव्रदाहं लक्षयेद्दंशने स्वयम्॥ २॥

विषचिकित्सा। पुत्रजीवफलात् मज्जां शीततोयेन पेषयेत्।
भोजने चाञ्जने पाने लेपैः सर्वविषापहाम्॥
स्थावरं जङ्गमं क्रूरं कृत्रिमं योगजं तथा।
निष्कमात्रं न सन्देहः कालदष्टो हि जीवति॥ ३॥
शाद्वलं टङ्कणं तुत्थं कट्फलं रजनी वचा।
नरमूत्रेण संपिष्य एकैकन्तु विषं हरेत्॥ ४॥
समूलपत्रां सर्पाक्षीं तथैव देवदालिकाम्।
गिरिकर्ण्याश्च वा मूलं नरमूत्रेण पूर्ववत्॥ ५॥
त्रिकटुं देवदालीञ्च नस्ये सर्वविषापहम्।
टङ्कणं देवदालीञ्च जलपाने विषापहाम्॥ ६॥
ब्रह्मदण्डीयमूलञ्च मधुना सह भक्षयेत्।
श्वेताङ्कोलस्य मूले च मुखस्थे तिलकेऽथवा॥
मुखस्थैरण्डमूलं वा छायाशुष्कं विषापहम्॥ ७॥
नीलसर्पस्य पुच्छन्तु कृकलासस्य पुच्छकम्।
ताम्रेण वेष्टितं कृत्वा मुद्रिकां ताञ्च धारयेत्।
तया स्पृष्टजलं पीतं स्थावरं जङ्गमं हरेत्॥ ८॥
भूनागसत्त्वसञ्जातां मुद्रिकां धारयेत् करे।
न तस्याक्रमते सत्यं विषं स्थावरजङ्गमम्॥
तत्स्पृष्टोदकपानेन विषं सर्वं विनश्यति॥ ९॥
शिरीषबन्धकं ग्राह्यं रेवत्यां चन्दनान्वितम्।
तद्घृष्टं मर्दितं गात्रे तस्याङ्गे विषनाशनम्॥ १०॥
वराहगोधानकुल-शशकुक्कुटपित्तकम्।

श्वेताया गिरिकर्ण्याश्च फलं मूलञ्च पेषयेत् ॥
पाने सर्वविषं हन्ति मृतोऽप्युत्तिष्ठते क्षणात् ।
नाम्ना चामृतयोगोऽयं स्वयं रुद्रेण भाषितः ॥ ११ ॥
एवं पटहञ्चैव ह्यनेनैव प्रलेपयेत् ।
मृतोऽपि विषयोगेन श्रुत्वा वाद्यं प्रबुध्यते ॥ १२ ॥
श्वेतापराजितामूलं पीत्वा दुग्धेन मानवः ।
स्थावरञ्च विषं हन्ति उदरस्थं न संशयः ॥
ससिन्धुकाञ्जिकं पीत्वा स्थावराद्यविषं हरेत् ॥ १३ ॥

मन्त्रस्तु ।—"ओं नमो भगवते उड्डामरेश्वराय कुञ्चिताऽमृतमर्चितजटाय ठः ठः स्वाहा" । अनेन सर्वौषधमभिमन्त्रयेत् ॥ १४ ॥

अथ सर्पविषलक्षणम् ।

जातीनां नामरूपाद्याः जङ्गमानामिहोदिताः ।
ब्राह्मणाः श्वेतवर्णास्तु क्षत्रिया रक्तवर्णकाः ॥
वैश्यास्तु पीतवर्णाः स्युः कृष्णवर्णास्तु शूद्रकाः ।
अनन्तः कुलिकश्चैव वासुकिः शङ्खपालकः ॥
तक्षकश्च महापद्मः कर्कोटः पद्म एव च ।
कुलनागाष्टकं ह्येतत् तेषां चिह्नं शिवोदितम् ॥ १ ॥
श्वेतपद्ममनन्तस्य मूर्द्ध्नि पृष्ठे च दृश्यते ।
शङ्खं शेषस्य शिरसि वासुकेः पृष्ठ उत्पलम् ॥
त्रिनेत्राङ्कस्तु कर्कोटस्तक्षकः शशकाङ्कितः ।
ज्वलत्त्रिशूलचन्द्रार्द्धं शङ्खपालस्य मूर्द्धनि ॥
राजवत्तु समोबिन्दुर्महापद्मस्य पृष्ठतः ।
पद्मपृष्ठे च दृश्यन्ते सुरक्ताः पञ्च बिन्दवः ॥
एवं यो वेत्ति जात्यादीन् नाम चिह्नं शिवोदितम् ।
तस्य मन्त्रौषधान्येव सिध्यन्ते नान्यथा पुनः ॥

दूरतस्तस्य सर्पाद्याः पतन्ति गुरुड़े यथा ।
कालाख्या नाम तच्चिह्नं शिवेनोक्तं यथा पुरा ॥ २ ॥
ज्ञेयो दशविधो दंशो भुजङ्गानां भिषग्वरैः ।
भीतोन्मत्तः क्षुधार्त्तश्च आक्रान्तो विषदर्पितः ॥
आहारेच्छः सरोषश्च स्वस्थानपरिरक्षणे ।
नवमो वैरिसन्धानो दशमः कालसंज्ञकः ॥ ३ ॥
उद्याने जीर्णकूपे च वटशृङ्गाटचत्वरे ।
शुष्कवृक्षे श्मशाने च प्लक्षश्लेषातशिग्रुके ॥
देवतायतनागारे तथा च शाकवृक्षके ।
एषु स्थानेषु ये दष्टास्ते न जीवन्ति मानवाः ॥ ४ ॥
भ्रूमध्ये चाधरे मूर्द्धि जङ्घे नेत्रे भ्रुवोस्तथा ।
ग्रीवाचिवुककण्ठेषु करमध्ये च तालुके ॥
स्तनयोः स्कन्धयोः कुक्षौ लिङ्गवृषणनाभिषु ।
मर्मसन्धिषु सर्वत्र सर्पदष्टो न जीवति ॥ ५ ॥
रवौ भौमे शनेर्वारे सर्पदष्टो न जीवति ।
अष्टमी पञ्चमी पूर्णा अमावस्या चतुर्दशी ॥
अशुभास्तिथयः प्रोक्ताः सर्पदष्टविनाशिकाः ॥ ६ ॥
कृत्तिका श्रवणा मूला विशाखा भरणी तथा ।
पूर्वास्त्रिस्रस्तथा चित्राऽश्लेषा दष्टो न जीवति ॥ ७ ॥
मध्याह्ने सन्ध्ययोश्चैव ह्यर्द्धरात्रे निशात्यये ।
कालवेला-वारवेला-सर्पदष्टो न जीवति ॥ ८ ॥
सर्पस्य तालुकामध्ये दन्तो योऽङ्कुशसन्निभः ।
विमुञ्चति विषं घोरं तेनायं कालसंज्ञकः ॥ ९ ॥
चक्राकृतिश्च वा दंशः पक्वजम्बूफलाकृतिः ।
सुनीलः श्वेतरक्तो वा त्रिदशोऽपि न जीवति ॥ १० ॥
स्रवेन्मूत्रं पुरीषं वा हृच्छूलं छर्दिदाहकृत् ।

सानुनासिकवाक्यञ्च सन्धिभेदमथापि वा॥
ताम्राभं नेत्रयुगलं अथवा काकनीलकम्।
वियोगी देवदष्टाख्यस्तं विद्यात् कालपार्श्वगम्॥ ११॥
सेचनादुदकेनाथ शीतलेन मुहुर्मुहुः।
रोमाञ्चो न भवेद् यस्य तं विद्यात् कालभक्षितम्॥१२॥
वेदना दंशमूलो वा नष्टदंशोऽथवा भवेत्।
तत्क्षणाद् तीव्रदाहश्च सोऽपि कालेन भक्षितः॥ १३॥
सोमं सूर्य्यं तथा दीप्तं न पश्यति च तारकाम्।
दर्पणे सलिले वाऽथ घृते तैलेऽथवा मुखम्।
न पश्येद्दीक्ष्यमाणोऽपि कालदष्टो न संशयः॥ १४॥
ज्ञात्वा कालमकालञ्च पश्चाद् भेषजमाचरेत्।
सर्पदंशे विषं नश्येत् कालदष्टो न जीवति॥
तस्य तत्रापि कर्त्तव्या चिकित्सा जीवनावधि।
रसदिव्यौषधीनाञ्च प्रभावात् कालजिद्भवेत्॥ १५॥

अथ सर्पविषौषधम्।

सूतकं गन्धकं तुल्यं टङ्कणं रजनीसमम्।
देवदान्या द्रवैर्मर्थ्यं दिनं निष्कन्तु भक्षयेत्॥ १॥
कालशैलाशनिर्नाम रसः सर्पविषापहः।
नरमूत्रं पिबेच्चानु कालदष्टोऽपि जीवति॥ २॥
श्वेतापराजितामूलं देवदानीयमूलकम्।
वारिणा पेषितं नस्यं कालदष्टोऽपि जीवति॥ ३॥
दधिमधुनवनीतं पिप्पलीशृङ्गवेरम्
मरिचमपि च कुष्ठं चाष्टमं सैन्धवञ्च।
यदि दशति सरोषस्तक्षको वासुकिर्वा
यमसदनगतः स्यादानयेत् तत्क्षणेन॥ ४॥
कटुकीमुषलीमूलं पीत्वा तोयैर्विषापहम्।

वृश्चिकावीरणामूलं लेपात् सर्पविषापहम् * ॥ ५ ॥
वारिणा टङ्कणं पीतमथवाऽर्कस्य मूलकम्।
सैन्धवं वा नृमूत्रेण प्रत्येकं विषनाशनम् ॥ ६ ॥
इन्द्रवारुणिकामूलं शुक्ला वाऽथ पुनर्नवा।
बन्ध्याकर्कोटकीमूलं मुषली शिखिमूलिका † ॥
तण्डुलोदकपानेन प्रत्येकं विषनाशनम् ॥ ७ ॥
भृङ्गराजस्य मूलन्तु त्रिशूल्यानन्तमूलकम्।
तोयैर्वा तण्डुलीमूलं प्रत्येकं विषजिद्भवेत् ॥ ८ ॥
सोमराजीवीजचूर्णं सक्षद्गोमूत्रभावितम्।
चराचरविषघ्नन्तं मृतसञ्जीवनं पिबेत् ॥ ९ ॥
कटुतुम्बुरुद्भवं मूलं सूक्ष्मं गोमूत्रपेषितम्।
छायाशुष्कां वटीं मूत्रैः पाणिलेपो विषापहः ॥ १० ॥
गोमूत्रैर्नरमूत्रैर्वा पुराणेन घृतेन वा।
हरिद्रापानमात्रेण विषं हन्ति चराचरम् ॥
दशवर्षात् परं सर्पिः पुराणमिति कथ्यते ॥ ११ ॥
यदि सर्पविषार्त्तानां सर्वस्थानगतं विषम्।
गोच्चोरैः रजनीं क्वाथ्य पिबेत् सर्वविषापहाम् ॥ १२ ॥
गोच्चोरैः रजनीकुष्ठं क्वाथ्यमानं विषापहम्।
हरिद्राकुष्ठमध्वाज्यं भुक्तं सर्वविषापहम् ॥ १३ ॥
मूलन्तु श्वेतगुञ्जाया वक्त्रस्थं विषनाशनम्।
पुष्योद्धृतं तस्य मूलं नस्येन विषनाशनम् ॥ १४ ॥
पाठाद्रवेण तन्मूलं पाने स्यात् कालकूटजित्।
अर्कमूलेन संलेप्य दंशं विषहरं महत् ॥

* वृश्चिका—विछुटी इति। वीरणामूल—वेणा इति च भाषा।
† मुषली—तालमूली इति। शिखिमूलिका—अपमार्गः इति च अर्थः।

रक्तचित्रेन्द्रगोपाभ्यां तथा विषविनाशनम् ॥ १५ ॥
सर्पं हरितवर्णञ्च पुच्छाग्रे पाटयेच्छिरः ।
शुक्लं कृष्णं पृथक् कार्य्यं नस्यं सर्वविषापहम् ॥
शुक्लं शुक्ले दक्षिणाङ्गे कृष्णं कृष्णे च वामके ।
मृतसञ्जीवनं ह्येतत् कालदष्टोऽपि जीवति ॥ १६ ॥
तिक्ता कोषातकीक्वाथं मध्वाज्यसंयुतं पिबेत् ।
तत्क्षणाद्वमयेद् यस्तु विषयोगाद्विमुच्यते ॥ १७ ॥
कटुकी जंम्बुमूलं वा तक्राम्लैर्वा पिबेज्जलैः ।
तत्क्षणाद्वमयेच्छीघ्रं विषयोगाद्विमुच्यते ॥ १८ ॥
राजवृक्षत्वचं ग्राह्यं शुक्लं कृष्णं पृथक् पृथक् ।
शुक्लपक्षे तु शुक्लान्तां चतुर्विंशतिभिः सह ॥
मरिचैः पाननिष्ठस्य कृष्णे कृष्णत्वचं तथा ।
पीत्वा तैर्निर्विषो दष्टः कथितं हरमेखले ॥ १९ ॥
कुङ्कुमालक्तकं लोध्रं शिला चैवाथ रोचना ।
गुटिका लेपनाद्धन्ति विषं स्थावरजङ्गमम् ॥ २० ॥
द्वे हरिद्रे शिला तालं कुङ्कुमं मुस्तकं जलैः ।
गुटिका लेपमात्रेण विषं हन्ति महाऽद्भुतम् ॥ २१ ॥
पूतीकरञ्जवीजस्य मज्जानं कारवेल्लजम् ।
पिष्ट्वा पिबेत् ससर्पिष्कं विषं हन्ति न संशयः ॥ २२ ॥
पिप्पलीं मरिचं कुष्ठं गृहधूमं मनःशिलाम् ।
तालकं सर्षपान् श्वेतान् गवां पित्तेन लोड़येत् ॥ *
गुटिकाऽञ्जननस्येन पानाभ्यञ्जनलेपनात् ।
तक्षकेणापि दष्टस्य निर्विषीकुरुते क्षणात् ॥२३ ॥
पथ्या क्षौद्रञ्च मरीचं पत्रं † हिङ्गु शिला वचा ।

* "गवां क्षीरेण लोड़येत्" इति पाठान्तरम् ।

† पत्रं पलमिति वा पाठ्यम् ।

जलेन गुटिकानस्ये कालदष्टोऽपि जीवति ॥ २४ ॥
अश्वगन्धा मेघनादो गोमूत्रं महिषाचकम्।
गृहधूमेन वा लेपः शिरःकण्ठविषं हरेत् ॥ २५ ॥
पञ्चाङ्गमश्वगन्धायाश्छागोमूत्रेण पेषयेत्।
लेपे पाने न सन्देहो नानाविषविनाशनम् ॥ २६ ॥
शिला हिङ्गु वचा व्योषमभयात्वक् च पत्रकम्। *
नस्ये वासुकिदष्टश्च निर्विषं शीतवारिणा ॥ २७ ॥
पुत्रजीवफलान्मज्जां गवां चीरेण पेषयेत्।
लेपनाञ्जननस्येन कालदष्टोऽपि जीवति ॥ २८ ॥
कृष्णधुस्तूरमूलस्य चूर्णं ग्राह्यं पलोन्मितम्।
करञ्जतैलकर्षेण वटीं कृत्वा तु धारयेत् ॥
जम्बीरस्य रसैः पीत्वा रौद्रीविषनिवारणम् ॥ २९ ॥
लज्जालुमूलं नील्या वा मूलं स्वच्छेन वारिणा।
पीत्वा रौद्रीविषं हन्ति लेपाद् गुञ्जाबलोद्भवम् ॥ ३० ॥
गृहधूमं हरिद्रे द्वे समूलं तण्डुलीयकम्।
अपि वासुकिना दष्टः पिबेद्दधिघृतान्वितम् ॥ ३१ ॥
तण्डुलीयकमूलन्तु पीतं तण्डुलवारिणा।
तक्षकेणापि दष्टश्च निर्विषं कुरुते ध्रुवम् ॥ ३२ ॥
कौलिक्यमूलनस्येन कालदष्टोऽपि जीवति।

अत्र मन्त्रः।—"ओं आदित्यचक्षुषा दृष्टः दृष्टोऽहं हर विषं स्वाहा" ॥ ३३ ॥

विष्णुक्रान्तोद्भवं मूलं घृतेन त्वग्गतं विषम्।
पयसा रक्तगं हन्ति मांसगं कुष्ठचूर्णतः ॥
अस्थिगं रजनीयुक्तं मेदोगं काकलीयुतम्।
मज्जागं पिप्पलीयुक्तं चण्डालीकन्दसंयुतम् ॥

* व्योषं—त्रिकटुकमित्यर्थः।

शुक्रगं हन्ति लौहित्यं तस्माद्देयाऽपराजिता ।
इति भावो भवेद् यस्य आत्मरूपमिदं जगत् ॥
तत्सर्वैर्विषकीटाद्यैर्भक्ष्यमाणो न बाध्यते ॥ ३४ ॥
सद्यः सर्पेण दष्टस्य वामनासिकया धृतः ।
लेपः कर्णमलेनापि नृमूत्रैः सेचनञ्च वा ॥
स्तम्भते गरलस्तेन नोर्द्धं धावति धातुषु ॥ ३५ ॥
वराहकर्णिकामूलं हस्ते बद्धं विषापहम् ॥ ३६ ॥
शिरीषपुष्पस्वरसे सप्ताहं मरिचं सितम् ।
भावितं सर्पदष्टानां पानेऽप्यभ्यञ्जने हितम् ॥ ३७ ॥
स्वच्छन्दभैरवी विद्या कथ्यते विषनाशिनी ।

अत्र मन्त्रः ।—"ओं नमो भगवति स्वच्छन्दभैरवि महाभैरवि कालकूटविषं स्फोटय स्फोटय विस्फारय विस्फारय खादय खादय अवतारय अवतारय नास्ति विष हलाहलविष संयोगविष स्थावरविष अत्युग्रविष जङ्गमविष कालचक्षुया"। परा इष्टमन्त्रः । "तड़दर्घायण इथय इथय" "ओं कालाय महाकालाय कालमर्द देवि ! अमृतगर्भदेवि ओं ओं फट् फट् स्वाहा"। अनेन मन्त्रेण झाड़येत् जलं वाचयेच्च निर्विषः स्यात् । इयं स्वच्छन्दभैरवीविद्या । "ओं क्रूं क्रूं सं स्वः हं सः"। अनेनाभिमन्त्रितपानीयपानेनापि मार्जनेन वा निर्विषः स्यात् ॥ ३८ ॥

देवदारु चित्रकञ्च करवीरार्कलाङ्गली ।
मूलानि वारिणा पिष्ट्वा कालदष्टहरं पिबेत् ॥ ३९ ॥
मन्त्रौषधप्रयोगेण यदि दष्टो न जीवति ।
छेदयेत् तीक्ष्णशस्त्रेण दंशस्थाने भिषग्वरः ॥
स्थावरन्तु विषं दद्याद्दष्टो दष्टेन हन्यते ॥ ४० ॥
यस्तु संरोषितः सर्पो धूमं वक्त्रादिमुञ्चति ।
तुण्डाग्रं पेषितं यस्य बहुशस्तेन दंशिताः ॥

अशक्यमगदैरन्यैर्विषेणैव चिकित्सयेत् ॥ ४१ ॥
क्षीरक्षौद्रघृतैर्युक्तं द्विगुञ्जं पाययेद्विषम् ।
विषेण लेपयेद्दंशं कालदष्टोऽपि जीवति ॥ ४२ ॥
मृतसञ्जीवनं ख्यातं निर्गुण्डी तगरं विषम् ।
पिण्डीतगरमूलञ्च पुष्येणोत्पाद्य योजयेत् ॥
दंशे देयं मृतस्यापि दष्टो जीवति तत्क्षणात् ॥ ४३ ॥
दंशे मृतोऽपि दष्टः कः पुरुषो नाशमेति इति चित्रम् ? ।
सर्पदष्टो यदा वीरस्तं सर्पो दंशते स्वयम् ।
मुक्तोऽसौ म्रियते सर्पः स्वयं निर्विषतां व्रजेत् ॥ ४४ ॥
यद्वा तद्वा फलं दन्तैः सर्पभावेन भक्षयेत् ।
दन्तैर्वा भक्षयेद्भूमिं दण्डवत् पतितो नरः ॥
सर्पभावैः न सन्देहो तस्य नो संक्रमेद्विषम् ।
अत्यन्तविषरोगार्त्तान् जलमध्ये विनिक्षिपेत् ॥ ४५ ॥
मूलं तण्डुलवारिणा पिबति यः प्रत्यङ्गिरासम्भवम् ।
निष्पिष्टं शुचिभद्रयोगदिवसे तस्याऽहिभीतिः कुतः ॥
दर्पादेव फणी यदा दशति तं मोहान्वितो मानवम् ।
स्थाने तत्र स एव याति नियतं चक्री यमस्याचिरात् ॥ ४६ ॥
आषाढ़शुक्लपञ्चम्यां कव्यां शैरीषमूलकम् ।
तण्डुलोदकपानेन सर्पदंशो न जायते ॥
भ्रमाद्वा दंशते सर्पस्तदा सर्पो विनश्यति ॥ ४७ ॥
पुष्ये श्वेतार्कमूलन्तु श्वेतवर्षाभूमूलकम् ।
संगृह्य पेयं तट्टक्षे स्नात्वा तण्डुलवारिणा ॥
सर्पभीतिविनाशार्थं प्रतिसंवत्सरं नरः ॥ ४८ ॥
मसूरं निम्बपत्राभ्यां खादेन्मेषगते रवौ ।
अब्दमेकं न भीतिः स्याद्विषार्त्तान्नात्र संशयः ॥
यद्वा—मसूरं निम्बपत्राभ्यां योऽत्ति मेषगते रवौ ।

अतिरोषान्वितस्तस्य तक्षकः किं करिष्यति ?॥ ४८॥

कृकलासस्य दन्तांस्तु सितसूत्रेण वेष्टयेत्।
बाहौ बद्ध्वा विषं हन्ति विषं भुक्त्वा न बाध्यते॥
सर्पवृश्चिकमूषाणां मुखस्तम्भः प्रजायते।

अत्र मन्त्रः।—"ओं शवरि कीर्त्तय कीर्त्तय संजाव संजाव स्वाहा"। सहस्रजपात् सिद्धिः। अनेन मन्त्रेण सूत्रं हस्ते बन्धयेत्॥ ५०॥

पातालगारुड़ीमूलं लम्बमानं गृहे स्थितम्।
दृष्ट्वा गच्छन्ति ते दूरं सर्पाद्या विषकीटकाः॥

अत्र मन्त्रः।—"ओं प्लः सर्पकुलाय स्वाहा। अशेषकुलसर्पकुलाय स्वाहा"। अनेन सप्ताभिमन्त्रितां मृत्तिकां गृहमध्ये क्षिपेत्, सर्पाः पलायन्ते॥ ५१॥

अथ वृश्चिकविषनिवारणम्।

शिरीषबीजं गोमेदं दाड़िमस्य च मूलकम्।
अर्कक्षीरयुतं हन्ति धूपो वृश्चिकजं विषम्॥ १॥
मयूरपारावतकुक्कुटानां ग्राह्यं पुरीषं सह भानुमूलैः।
धूपो निहन्त्याशु विषं समस्तं चतुर्विधं वृश्चिकसर्पजातम्॥ २॥
रजनीचूर्णधूपेन विषं वृश्चिकजं हरेत्।
वस्त्रेणाच्छाद्य गात्राणि धूपधूमञ्च पाययेत्॥
दंशञ्च धूपयेच्छीघ्रं सर्वधूपेष्वयं विधिः॥ ३॥
तोयैर्वा नागरं नस्यं पिबेद्वा सैन्धवं घृतम्।
अर्कधुस्तूरमूलं वा जलपाने विषापहम्॥ ४॥
पुत्रजीवफलान्मज्जां पलाशोत्थां करञ्जजाम्।
मज्जां तोयैः प्रलेपोऽयं हन्ति वृश्चिकजं विषम्॥ ५॥
हिङ्गु वा जललेपेन वृश्चिकोत्थं विषं हरेत्॥ ६॥
सिक्थकं सप्तधा भाव्यं स्नुह्यर्कपयसाऽऽतपे।
तत्तप्तं वह्निना स्पृष्टं दंशस्थाने विषं हरेत्॥ ७॥

घृतार्कदुग्धलेपेन यष्ट्या वा धूपितेन वा।
वीजपूरकमूलस्य लेपाद्वापि हरीतकी॥
लेपोजातीगुड़ाभ्यां वा हरिद्रालेपनेन वा।
वृश्चिकस्य विषं हन्ति प्रत्येकेन न संशयः॥ ८॥
मातुलुङ्गस्य मूलन्तु रविवारे समुद्धरेत्।
उत्तराभिमुखेनैव क्रूं मन्त्रोच्चारणात् स्पृशेत्।
वामाङ्गे दक्षिणे दष्टे वामदष्टे च दक्षिणे।
मार्जनेन विषं हन्यात् सदंशं दृष्टप्रत्ययम्॥
सप्तधा मार्जनेनैव विषं वृश्चिकजं हरेत्॥ ९॥
कार्पासमूलं चर्वित्वा विषजित् कर्णफुत्कृतैः॥ १०॥
ग्राह्यं हंसपदीमूलं प्रातरादित्यवासरे।
मुखस्थं फुत्कृतं कर्णे विषं वृश्चिकजं हरेत्॥ ११॥

अत्र मन्त्रः।—"ओं चः फट् स्वाहा"। अनेनापीमार्जयेन्निर्विषी भवति। "शांखो मांखो मांहीं खोंहीं। अनेन गरुड़मन्त्रेण वृश्चिकदष्टं करवीर-काष्ठेनापी मार्जयेन्निर्विषी भवति॥ १२॥

वकुलत्वचवीजं वा निष्पीड्य दंशनस्थले।
प्रलेपाद् वृश्चिकविषहरणञ्चाभिमन्त्रितात्॥
"ओं भं हुं यं क्रं ङं वं वं लं चं एं ऐं ओं औं हं हः"।

इति मन्त्रेणाभिमन्त्र्य प्रलेपयेत्॥ १३॥

"हां हीं मं चं ओं" इति मन्त्रेण श्रीलवृन्तमभिमन्त्र्य तेन मार्जनाद् वृश्चिकविषनाशी भवति।

शिवेन भाषितो योगो नावहेलनमर्हति॥ १४॥

अथ मूषिकविषहरणम्।

शिला तालककुष्ठञ्च भाव्यं निर्गुण्डिकाद्रवैः।
पानं मूषिकदष्टानां दत्तं तीव्रविषं हरेत्॥ १॥
गृहगोधां समादाय पिष्ट्वा तण्डुलवारिणा।

लेपादाखुविषं हन्ति पिबेद्वा क्षीरपाचिताम् ॥ २ ॥
सर्षपं कुङ्कुमं तक्रं समभागं घृतं पिबेत् ।
विषं मूषिकदष्टानां शममाप्नोति तत्क्षणात् ॥ ३ ॥
चिञ्चाफलसमायुक्तं गृहधूमं पलार्द्धकम् ।
पुराणाज्येन सप्ताहं लिहत्याखुविषं हरेत् ॥ ४ ॥

अथ कुक्कुरविषनिवारणम् ।

गुड़ं तैलार्कदुग्धञ्च लेपाच्छ्वानविषं हरेत् ॥ १ ॥
पिष्ट्वाऽपामार्गमूलञ्च कर्षैकं मधुना लिहेत् ।
शुना दष्टविषं हन्ति लेपात् कुक्कुटविष्ठया ॥ २ ॥
उन्मत्तश्वानदष्टानां कुमारीदलसैन्धवम् ।
सुखोष्णं बन्धयेत् पिष्टं त्रिदिनान्ते सुखावहम् ॥ ३ ॥

अथ मत्स्यभेकादिविषहरणम् ।

शिरीषफलमूलञ्च स्नुक्क्षीरेण सुपेषितम् ।
कुष्ठाऽङ्कोठजटामिश्रं पिबेद्भेकविषापहम् ॥ १ ॥
त्र्यूषणं मेघनादा च भेकमत्स्यविषापहा ॥ २ ॥
शृङ्गिमत्स्यविषं खेदात् किञ्चिद् घृतसमन्वितात् ॥ ३ ॥

अथ गृहगोधाविषनिवारणम् ।

गृहगोधाविषं हन्ति काश्मरीफलनस्यतः ॥ १ ॥

अथ व्याघ्रादिविषनिवारणम् ।

वृकव्याघ्रशृगालाखु-भल्लूकद्विपवाजिनाम् ।
विषं श्वापददंशश्चेद्दहेल्लौहशलाकया ॥ १ ॥
लेपात् सर्वविषं हन्ति मूलं श्वेतपुनर्नवम् ।
किमत्र बहुनोक्तेन तत्क्षणाद्विषनाशनम् ॥ २ ॥
चिञ्चटस्याऽदनेनाथ व्याघ्रव्यालविषं हरेत् ॥ ३ ॥
धुस्तूरपत्रतोयेन चूर्णं त्रिकटुसम्भवम् ।
उदरस्थं विषं हन्ति व्याघ्रव्यालसमुद्भवम् ॥ ४ ॥

करञ्जतैललेपेन ज्वालां व्याघ्रनखोद्भवाम् ॥ ५ ॥
गोजिह्वामूलिकां पिष्ट्वा जलेन मधुना सह ।
लेपोऽपि सर्वजन्तूनां नखतुण्डविषं हरेत् ॥ ६ ॥
तथा निम्बत्वचञ्चैव शमीवृक्षत्वचं तथा ।
उष्णोदकेन लेपः स्यान्नखदन्तविषापहः ।
तथा दारुहरिद्राया लेपो दन्तविषापहः ॥ ७ ॥

अथ कीटविषनिवारणम् ।

आशोणतण्डुलीमूलं तुलसीमूलिकाऽपि वा ।
तण्डुलोदकपानेन कीटकोत्थं विषं हरेत् ॥ १ ॥
लाङ्गल्या कटुतुम्ब्या वा देवदारुनिशोरपि ।
मूलं वीजं काञ्जिकेन लेपः कीटविषापहः ॥ २ ॥
तिलञ्च सर्षपं कुष्ठं वीजं कारञ्जकं स्मृतम् ।
उद्वर्त्तनात् प्रलेपाद्वा सर्वकीटविषावजित् ॥ ३ ॥
करञ्जवीजसिद्धार्थ-तिलैर्लेपो विषापहः ।
एरण्डतैललेपो वा सर्वकीटविषापहः ॥ ४ ॥
निशा दारुनिशा चैव मञ्जिष्ठा नागकेशरम् ।
एषां लेपो निहन्त्याशु विषं लूतादिसम्भवम् ॥ ५ ॥

अथ सर्वजन्तुविषनिवारणम् ।

पुत्त्रजीवफलान्मज्जां शीततोयेन पेषिताम् ।
लेपनाञ्जननस्यैस्तु पानाद्वा निष्कमात्रतः ॥
व्याघ्रमूषिकगोनाग-वृश्चिकादिविषं हरेत् ।
दुःसहं यद्विषं चाशु विष्फोटञ्च विनाशयेत् ॥ १ ॥
वन्ध्याकर्कोटकीकन्दं जलैः पिष्ट्वा प्रलेपयेत् ।
सर्पमूषिकमार्जार-वृश्चिकादिविषापहम् ॥ २ ॥

अथ उपविषनिवारणम् ।

स्नुह्यर्कोन्मत्तकश्चैव करवीरश्च लाङ्गली ।

वज्रो जैपालकः कणा कुष्ठं भल्ला तथैव च॥
महाकालश्च इत्याद्याः स्मृतास्तूपविषापहाः॥ १॥
ससिन्धुं काञ्जिकं पीत्वा समस्तोपविषं हरेत्।
सारमेयविषं हन्ति घृतेनापि हरीतकी॥
निम्बपत्रं घृता हन्ति घृतेन मधुना ततः॥ २॥

अथ कृत्रिमविषनिवारणम्।

अनेकविषजीवानां चूर्णञ्चोपविषैर्युतम्।
मिश्रितं नखकेशाद्यैर्लेपयेच्चूर्णसञ्चयम्॥ १॥
कृत्रिमञ्च विष ख्यातं पश्चान्मासाद्धि बाध्यते।
आलस्यं कुरुते जाड्यं कासं श्वासं बलक्षयम्॥
रक्तस्रावं ज्वरं शोथं पीड़ां चक्षुषि लक्षयेत्॥ २॥
मृतं सूतं मृतं स्वर्णं शुद्धलौहं समाक्षिकाम्।
त्रयाणां गन्धकं तुल्यं मर्द्यं कल्कद्रवैर्दिनम्॥
तच्छुष्कं ससिताक्षौद्रैर्मासमेकं लिहेत् सदा॥ ३॥
वह्निमूलयुतं क्षीरं मनुष्यगरनाशनम्॥ ४॥
पुत्रजीवफलान्मज्जां निष्कमात्रं गवां पयः।
पीत्वा चोग्रं गरं हन्याद्विषं कृत्रिमयोगजम्॥ ५॥
शटीपुष्करमूलञ्च पाच्यं शीतलवारिणा।
तत् पिबेत् शीतलं पाने गरतृष्णाज्वरापहम्॥
क्षीरमुद्गयुतं पथ्यं शाल्यन्नं परमं हितम्॥ ६॥
गृहधूमं जलैः पिष्ट्वा तण्डुलीमूलतुल्यकम्।
तस्माच्चतुर्गुणं चाज्यं घृतात् क्षीरं चतुर्गुणम्॥
घृतशेषं पचेत् सर्वं पिबेत् सर्वगरापहम्॥ ७॥
समूलपत्रां सर्पाक्षीं जलेन क्वथितां पिबेत्।
नरमूत्रैश्च वा पिष्टं पिबेत् सर्वगरापहम्॥ ८॥
एलातालीशपत्राणि त्र्यूषणं जीरकं समम्।

चूर्णार्द्धा च सिता योज्या भुक्ता गरहरं भवेत् ॥ ८ ॥
पयसा रजनीकुष्ठं मध्वाज्यगृहधूमकम् ।
तण्डुलीमूलसंयुक्तं कर्षं गरहरं पिबेत् ॥ १० ॥

अथ योगजविषनिवारणम् ।

तैलकर्पूरजम्बीर-संयोगाद् योगजं विषम् ।
समांशेन तु मध्वाज्यमेवं संयोगजं विषम् ॥ १ ॥
नारिकेलाम्बुकर्पूरं संयोगाद् योगजं विषम् ॥ २ ॥
मरिचं तुम्बिकामूलं योगजं विषमेव च ।
पुत्रजीवफलेनैव रजनीमारनालकैः ॥
देवदानी नृमूत्रैर्वा सर्पाक्षी चेन्द्रवारुणी ।
गिरिकर्णीयमूलं वा प्रत्येकं विषजिद्भवेत् ॥ ३ ॥
मध्वाज्यं काकमाच्यास्तु द्रवैः पिष्टा विषं हरेत् ।
गिरिकर्णीनागपुष्पी-मुण्डीपानाद्विषापहा ॥ ४ ॥

अथ भल्लातकविषनिवारणम् ।

भल्लाततैलसम्पर्कात् स्फोटः संजायते नृणाम् ।
नवनीतं तिलं पिष्टा तल्लेपेन तु तं जयेत् ॥
बिम्बीपत्रप्रलेपाद्वा तं जयेत् तत्पदेन वा ॥ १ ॥
भल्लातकस्य मूलञ्च मृत्तिकाभिः प्रलेपयेत् ।
तत्सञ्जातविकाराणि नाशयत्येव निश्चितम् ॥ २ ॥

अथ यक्षिणीसाधनम् ।

सर्वासां यक्षिणीनान्तु ध्यानं कुर्य्यात् समाहितः ।
भगिनीमातृपुत्रस्त्री-रूपतुल्यं यथेप्सितम् ॥
भोज्यं निरामिषं चान्नं वर्ज्यं ताम्बूलभक्षणम् ॥ १ ॥
उपविश्याजिनादौ च प्रातः स्नात्वा न कं स्पृशेत् * ।

* न कं स्पृशेत्—न कमपि स्पृशेदित्यर्थः ।

नित्यकृत्यञ्च कृत्वा तु स्थाने निर्जनके जपेत् ॥
यावत् प्रत्यक्षतां यान्ति यक्षिण्यो वाञ्छितप्रदाः ॥ २ ॥
जपेल्लक्षद्वयं मन्त्रं श्मशाने निर्भयो मुनिः ।
दशांशं गुग्गुलुं साज्यं हुत्वा तुष्यति विभ्रमा ॥

अत्र मन्त्रः ।—"ओं ह्रीं विभ्रमरूपे ! विभ्रमं कुरु कुरु एह्येहि भगवति ! स्वाहा" ॥ १ ॥

शङ्कलिप्तपटे देवीं गौरवर्णां धृतोत्पलाम् ।
सर्वालङ्कारिणीं दिव्यां समालिख्यार्चयेत्ततः ॥
जातीपुष्पैः सोपचारैः सहस्रैकं ततो जपेत् ।
त्रिसन्ध्यं सप्तरात्रन्तु ततो रात्रिषु निर्जपेत् ॥
अर्द्धरात्रे गते देवी समागत्य प्रयच्छति ।
पञ्चविंशति दीनारान् प्रत्यहं तोषिता सती ॥

अत्र मन्त्रः ।—"ओं ह्रीं रतिप्रिये स्वाहा" ॥ २ ॥

एकलिङ्गं महादेवं त्रिसन्ध्यं पूजयेत् सदा ।
धूपं दत्त्वा जपेन्मन्त्रं त्रिसन्ध्यं त्रिसहस्रकम् ॥
मासमेकं ततो याति यक्षिणी सुरसुन्दरी ।
दत्त्वार्घ्यं प्रणमेन्मन्त्री ब्रूते सा "त्वं किमिच्छसि ?" ॥
देवि ! दारिद्र्यदग्धोऽस्मि तन्मे नाशय शङ्करि ! ।
ततो ददाति सा तुष्टा वित्तायुश्चिरजीवितम् ॥

अत्र मन्त्रः ।—"ओं ह्रीं आगच्छ सुरसुन्दरि ! स्वाहा" ॥ ३ ॥

कुङ्कुमेन समालिख्य भूर्जपत्रे सुलक्षणाम् ।
प्रतिपत्तः समारभ्य पूजां कृत्वा जपेत्ततः ॥
त्रिसन्ध्यं त्रिसहस्रन्तु मासान्ते पूजयेन्निशि ।
संजपेदर्द्धरात्रन्तु समागत्य प्रयच्छति ।
दीनाराणां सहस्रैकं प्रत्यहं परितोषिता ॥

अत्र मन्त्रः ।—"ओं ह्रीं अनुरागिणि ! मैथुनप्रिये ! स्वाहा" ॥४॥

ध्यात्वा जपेत् ततो रात्रौ सागरस्य तटे शुचिः ।
लक्षजप्ये कृते सिद्धिः दत्ते सागत्य वेष्टकः ।
रत्नं वरं तथा भोज्यं सौम्यो मन्त्री सुखी भवेत् ॥

अत्र मन्त्रः ।—"ओं भगवन्! समुद्र! देहि रत्नानि जलवासो ह्रीं नमोऽस्तु ते स्वाहा" ॥ ५ ॥

त्रिपथे तु वटस्थाने रात्रौ मन्त्री जपेच्छुचिः ।
लक्षत्रयं ततः सिद्धा देवी च वटयक्षिणी ॥
वस्त्रालङ्कारकं दिव्यं रसं सर्वरसायनम् ।
दिव्याञ्जनञ्च सा तुष्टा साधकाय प्रयच्छति ॥

अत्र मन्त्रः ।—"ओं ह्रीं वटवासिनि ! यक्षकुलप्रसूते ! वटयक्षिणि ! एह्येहि स्वाहा" ॥ ६ ॥

वटवृक्षं समारुह्य लक्षमेकं जपेन्मनुम् ।
ततः सप्ताभिमन्त्रेण काञ्जिकैः चालयेन्मुखम् ॥
मासत्रयं जपेद्रात्रौ वरं यच्छति यक्षिणी ।
रसं रसायनं दिव्यं क्षुद्रकर्म ह्यनेकधा ।
सिद्धानि सर्वकार्य्याणि नान्यथा शङ्करोऽब्रवीत् ॥

अत्र मन्त्रः ।—"ओं नमश्चन्द्राद्यावा कर्णकारण स्वाहा" । "ओं नमो भगवते रुद्राय चण्डवेगिने स्वाहा" । मन्त्रद्वयस्यैक एव सिद्धिहेतुः ॥ ७ ॥

चिञ्चावृक्षतले लक्षं मन्त्रमावर्त्तयेच्छुचिः ।
शतपुष्पोद्भवैः पुष्पैः सघृतैर्होममाचरेत् ॥
ततः सिद्धा भवेद्देवी विशाला कामगामिनी ।
ददाति मन्त्रिणे तुष्टा रसं दिव्यं रसायनम् ॥

अत्र मन्त्रः ।—"ओं ऐं विशाले ! क्रीं ह्रीं व्रीं क्लीं क्रीं स्वाहा" ॥ ८ ॥

नरास्थिनिर्मिता माला गले पाणौ च कर्णयोः ।

धारयेज्जपमालाञ्च तादृशीञ्च श्मशानतः॥
लक्षमेकं जपेन्मन्त्रं साधको निर्भयः शुचिः।
ततो महाभया यक्षी दद्यादेनं रसायनम्॥
तस्य भक्षणमात्रेण सर्वरत्नानि चालयेत्।
वलीपलितनिर्मुक्तश्चिरजीवी भवेन्नरः॥

अत्र मन्त्रः।—"ओं क्रीं महाभये! क्लीं स्वाहा"॥ ९॥

शुक्लपक्षे जपेत्तावद् यावद्दृश्येत चन्द्रमाः।
प्रतिपत्पूर्वपूर्णान्तं नवलक्षमिदं जपेत्।
अमृतं चन्द्रिकादत्तं पीत्वा जीवोऽमरो भवेत्॥

अत्र मन्त्रः।—"ओं ह्रीं चन्द्रिके! हंसः क्रीं क्लीं स्वाहा" ॥१०॥

जप्यं मासत्रयं रक्त-कम्बला सा प्रसीदति।
मृतकोत्थापने कुर्य्यात् प्रतिमां चालयेत्तथा॥

अत्र मन्त्रः।—"ओं ह्रीं रक्तकम्बले! महादेवि! मृतकमुत्थापय प्रतिमाञ्चालय पर्वतान् कम्पय नीलय विलसत् हुं हुं" ॥११॥

अष्टोत्तरशतं जप्त्वा यत्किञ्चित् स्वादुभोजनम्।
तद्वलिर्दीयते तस्यै वटाधो मासमेकतः॥
ततो देवी समागत्य हस्ताद् गृह्णाति भोजनम्।
तत्रैव सा वरं दत्ते नित्यं सान्निध्यकारकम्॥
अतीतानागतं कर्म सुस्थासुस्थं ब्रवीति सा।
प्रतिमाः पर्वतान् सर्वान् चालयत्येव तत्क्षणात्॥

अत्र मन्त्रः।—"ओंकारमुखे! विद्युज्जिह्वे! ओं हुं चेटके! जय जय स्वाहा"॥ १२॥

पूर्वमेवायुतं जप्त्वा कृष्णकन्याभिमन्त्रिताम्।
हस्तपादप्रलेपेन सुप्ते वक्ति शुभाशुभम्॥

अत्र मन्त्रः।—"ओं क्रीं सनामशक्तिभगवति! कर्णपिशाचिनि! चण्डरूपिणि! वद वद स्वाहा"॥ १३॥

लिम्पेन्मृद्गोमयैर्भूमिं कुशांस्तत्र समास्तरेत् ।
पञ्चोपचारनैवेद्यैर्देवदेवीं प्रपूजयेत् ॥
अक्षसूत्रं करे धृत्वा पूर्वमेवायुतं जपेत् ।
अर्द्धरात्रे गते देवी सुप्ते वक्ति शुभाशुभम् ॥

अत्र मन्त्रः।—"ओं क्रीं आगच्छागच्छ चामुण्डे ! श्रीं स्वाहा" ॥ १४ ॥

रोचनैः कुङ्कुमैः क्षीरैः पद्मकाष्टदलं लिखेत् ।
नीलवर्णे भूर्जपत्रे मायाबीजं दले दले ॥
लिखित्वा धारयेन्मूर्ध्नि इमं मन्त्रं ततो जपेत् ।
पूर्वमेव तु सप्ताहं कुर्य्यादेवं प्रयत्नतः ।
अतीतानागतं सर्वं स्वप्ने वदति देवता ॥

अत्र मन्त्रः।—"ओं क्रीं चिञ्चि पिशाचिनि ! स्वाहा" ॥ १५ ॥

अलाबुमूलिकां पुष्ये तथा सर्पाक्षिमूलिकाम् ।
गृह्याभिमन्त्रितां यत्नाद्रक्तसूत्रेण वेष्टयेत् ।
मूर्ध्नि बद्धा तु तां सुप्ते वदत्येव शुभाशुभम् ॥

अत्र मन्त्रः।—"ओं नमो भगवते कर्णपिशाचाय स्वाहा" ॥१६॥

लक्षमेकं जपेन्मन्त्रं वटवृक्षतले शुचिः ।
बन्धूककुसुमैः पश्चान्मध्वन्नं क्षीरमिश्रितम् ॥
दत्ते धूपे दशांशेन जुहुयात् पूर्णयान्वितम् ।
ततः सिद्धा भवेद्देवी विचित्रा वाञ्छितप्रदा ॥

अत्र मन्त्रः।—"ओं विचित्रे ! विचित्ररूपे ! सिद्धिं कुरु कुरु स्वाहा" ॥ १७ ॥

प्रविश्य नगरस्यान्तं लक्षसंख्यं जपेच्छुचिः ।
पद्मपत्रैः कृतो होमो घृतोपेतैर्दशांशतः ॥
प्रयच्छत्यञ्जनं हंसी येन पश्यति भूनिधिम् ।
सुखेन तच्च गृह्णाति न विघ्नैः परिभूयते ॥

अथ मन्त्रः।—"श्रीं हंसि हंसि जने ह्रीं क्लीं स्वाहा" ॥ १८ ॥

लक्षसंख्यं जपेन्मन्त्रं राजद्वारे शुचिः स्थिरः।
सक्षीरैः मालतीपुष्पैः कृतहोमैः सहस्रकैः॥
मदना यक्षिणी सिद्धिं गुटिकां सम्प्रयच्छति।
तया मुखस्थयाऽदृश्यश्चिरस्थायी भवेन्नरः॥

अथ मन्त्रः।—श्रीं ऐं मदने मदनविड़म्बिनि! अनङ्गसङ्गं सन्देहि देहि क्लीं क्रीं स्वाहा" ॥ १९ ॥

लक्षसंख्यं जपेन्मन्त्रं पलाशतरुजेन्धनैः।
मधुनाऽऽज्यैः कृतो होमः कालकर्णी प्रसीदति।
सततं तां स्मरेन्मन्त्री विविधैश्वर्य्यकारिणीम्॥

अथ मन्त्रः।—"श्रीं ह्रीं क्लीं कालकर्णिके! ठः ठः स्वाहा"॥२०॥

स्वगृहे संस्थितो रक्तैः करवीरप्रसूनकैः।
लक्षमावर्त्तयेन्मन्त्रं होमं कुर्य्याद्दशांशतः॥
होमे कृते भवेत् सिद्धिर्लक्ष्मीनाम्नी च यक्षिणी।
रसं रसायनं दिव्यं विशालञ्च प्रयच्छति॥

अथ मन्त्रः।—"श्रीं ऐं लक्ष्मीं श्रीं कमलधारिणीं कलहंसः स्वाह" ॥ २१ ॥

रक्तमाल्याम्बरो मन्त्रं चतुर्दश्यां दिने जपेत्।
ततः सिद्धा भवेद्देवी शोभना भोगदायिनी॥

अथ मन्त्रः।—"श्रीं अशोकपल्लवाकारकरतले! शोभने! श्रीं क्षः स्वाहा" ॥ २२ ॥

पुण्याऽशोकतलं गत्वा चन्दनेन सुमण्डलम्।
कृत्वा देवीं समभ्यर्च्य धूपं दत्त्वा सहस्रकम्॥
मन्त्रमावर्त्तयेन्मासं नक्तभोजी वनङ्गतः।
रात्रौ पूजां ततः कृत्वा जपेन्मन्त्री निशार्द्धके॥
नटी देवी समागत्य निधानं रसमञ्जनम्।

ददाति मन्त्रिणे मन्त्रं दिव्ययोगञ्च निश्चितम् ॥

अत्र मन्त्रः ।—"ओं क्लीं क्रीं नटि ! महानटि ! रूपवति ! स्वाहा" ॥ २३ ॥

स्रक् सुगन्धि गृहस्थाने चन्दनेन तु मण्डलम् ।
कृत्वा हस्तप्रमाणेन पूजयेत् तत्र पद्मिनीम् ॥
धूपं सगुग्गुलुं दत्त्वा जपेन्मन्त्रसहस्रकम् ।
मासमेकं ततः पूजां कृत्वा रात्रौ पुनर्जपेत् ॥
अर्द्धरात्रे गते देवी समागत्य प्रयच्छति ।
निधानं दिव्ययोगञ्च तस्मान्मन्त्री सुखी भवेत् ॥

अत्र मन्त्रः ।—"ओं क्रीं पद्मिनि स्वाहा" ॥

अथ रसशोधन-मारणञ्च ।

अथ वीर्य्यस्तम्भनवाजीकरणादिषु प्रोक्तरसयोगादिसिद्धये रसादिशोधनमारणञ्च । तत्रादौ रसशोधनम् ।—

पलादूर्द्ध्वं न कर्त्तव्यं रससंस्कारमुत्तमम् ।
अघोरेणैव मन्त्रेण रससंस्कारपूजनम् ॥

अत्र मन्त्रः ।—"ओं अघोरेभ्योऽथ घोरेभ्यो घोराघोरतरेभ्यश्च । सर्वतः सर्वसर्वेभ्यो नमस्ते रुद्ररूपेभ्यः नमः" । इति अघोरमन्त्रः ।

कुमार्य्या च निशाचूर्णैः दिनं सूतं विमर्दयेत् ।
पातयेत् पातनायन्त्रे सम्यक्शुद्धो भवेद्रसः ॥
अथवा हिङ्गुलात् सूतं ग्राहयेत् तन्निगद्यते ।
पारिभद्ररसैः पेष्यं हिङ्गुलं याममात्रकम् ॥
जम्बीराणां द्रवैर्वाथ पाच्यं पातनयन्त्रके ।
तत्सूतं योजयेद् योगे सप्तकञ्चुकवर्जितम् ॥
रसस्य दशमांशन्तु गन्धं दत्त्वा विमर्दयेत् ।
जम्बीरस्य द्रवैर्यामं पाच्यं पातनयन्त्रके ॥

पुनर्मर्द्यं पुनः पाल्यं सप्तवारं विशुद्धये ।
इत्येवं शुद्धिराख्याता यथेष्टैकप्रकारिका ॥

अथ रसमारणम् ।

युक्तं सर्वस्य सूतस्य तप्तखल्ले विमर्दनम् ।
अजाशकृत्तुषाग्निन्तु भूगर्त्ते वितयं क्षिपेत् ॥
तस्योपरि स्थितं खल्लं तप्तखल्लमिदं भवेत् ।
खल्लं लोहमयं शस्तं पाषाणोत्थमथापि वा ॥
अजीर्णं चाप्यबीजञ्च यत्सूतं घातयेन्नरः ।
ब्रह्महा स दुराचारो मन्त्रद्रोही महेश्वरि ! ॥
रामठं पञ्चलवणं तथा क्षारचतुष्टयम् ।
त्रिकटुं शृङ्गवेरञ्च मातुलुङ्गरसाप्लुतम् ॥
पिण्डमध्ये रसं दत्त्वा स्वेदयेत् सप्तवासरम् ।
मारणालेपसृङ्गाण्डे ग्रासार्थी जायते ध्रुवम् ॥
एतदेव रसं यत्नाज्जम्बीरनीरसंयुतम् ।
दिनैकं धारयेद्घर्मे मृत्पात्रे वा मृतो भवेत् ॥
तदा ग्रासः प्रदातव्यः स्वर्णशुद्धिः शनैः शनैः ।
चतुर्दशदिनान्यन्तः क्रमाज्जीर्णस्य चालयेत् ॥
सूतं स्वर्णं व्योमशङ्ख-तुल्यं रम्भाद्रवैर्दिनम् ।
मर्दयेद्बीजसंयुक्तं चार्वाचारणयन्त्रके ॥
सर्वकैर्मूलिकाद्रावैर्दिनमेकन्तु मर्दयेत् ।
गर्भयन्त्रगतं पाच्यं मन्त्रयेत् पूर्ववद्रसम् ॥
ब्रह्मदण्डी मेघनादा चित्रकः कटुतुम्बिका ।
वज्रवल्ली बला कन्या त्रिकटूर्कस्नुहीपयः ॥
कन्दो रम्भा च निर्गुण्डी लज्जा जाती जयन्तिका ।
विष्णुक्रान्ता हस्तिशुण्डी दद्रुघ्नो भृङ्गराट् पटुः ॥
गुडूची लाङ्गली नीरकणाकालीमहोरगाः ।

काकमाची च दन्ती च सर्पाक्षी चार्द्रचन्द्रिका॥
एता समस्ता व्यस्ता वा देया ह्यष्टादशाधिकाः।
उक्तस्थाने प्रयोक्तव्या रसराजस्य सिद्धये॥
बालुकायन्त्रः।

हिङ्गुलशुद्धिः। मेषीक्षीराम्लवृक्षाणां दरदं घर्मभावितम्।
सप्तवारं प्रयत्नेन शुद्धिमायाति निश्चितम्॥

गन्धकशुद्धिः। शुकपक्षसमच्छायो नवनीतसमप्रभः।
मसृणः कठिनः स्निग्धः श्रेष्ठो गन्धः स उच्यते॥
साज्यभाण्डे पयः क्षिप्त्वा मुखं वस्त्रेण वेष्टयेत्।
तत्पूर्वं चूर्णितं गन्धं श्रावेण बोधयेत् पुनः॥
भाण्डं निक्षिप्य भूम्यन्ते रुद्ध्वा देयं पुटं लघु।
तत्क्षीरेण द्रुतं गन्धं शुद्धं योगेषु योजयेत्॥
गन्धं घृते विपक्तव्यं यावत्तैलनिभं भवेत्।
वस्त्रेणान्तरितं कृत्वा चालयेत् त्रिंशदन्तरम्॥
पुनर्विंशति संग्राह्यं शुद्धश्चाष्टद्वादश क्रमात्।
अष्टमाषं चतुर्थं वाप्यर्द्धञ्चैव समांशकम्॥
प्रतिग्रासे तप्तखल्ले दिनमम्लेन मर्दयेत्।
विना यन्त्रे क्षिपेत् तच्च जम्बीररससंयुतम्॥
तद्यन्त्रं धारयेद्घर्मे दिनं स्याज्जारितो रसः।
तं पटुक्षारगोमूत्रं स्नुक्क्षीराम्लैः प्रलेपिते॥
दृढ़वस्त्रे वह्निर्बद्धा मृद्घटे स्वेदयेद् बुधः।
काञ्जिके क्षारसंयुक्ते यन्त्रे पाच्यं त्र्यहर्निशम्॥
तदुद्धृत्य रसं देयं खल्ले संमर्दयेत् क्षणम्।
संमर्द्य पूर्ववत् पेष्यं यन्त्रे लिप्तपुटे पुनः॥
क्रमे पाकेन दिवसे त्रिभिर्ग्रासः प्रजीर्य्यति।
जीवितं न यतः तस्माद्बीजं दत्त्वा विमर्दयेत्॥

प्रतिग्रासं तप्तखल्ले यथाशक्त्या च जारयेत्।
तं जीर्णं मारयेत् सूतं मारणं कथ्यते द्रवैः॥
अङ्कोलस्य शिफाम्बाद्भिः पिष्ट्वा खल्ले विमर्दयेत्।
सूतं गन्धकसंयुक्तं दिनान्ते तद्विशोधयेत्॥
पुटयेद्भूधरे यन्त्रे दिनान्ते तन्मृतं भवेत्।
कृष्णधुस्तरतैलेन सूतं मर्द्यं द्वियामकम्॥
दिनैकं,तत्पचेद् यन्त्रे कटुपाके न संशयः।
रसं गन्धं समं मर्द्यं दिनं निर्गुण्डिकाद्रवैः॥
वज्रमूषान्वितं ध्मातं भस्म सूतं भवेन्मलम्।
सूतमूर्णां रसं गुञ्जां मधुलाचाञ्च टङ्कणम्॥
मर्दयेद् भृङ्गजद्रावैर्दिनैकं ध्मापयेत् पुनः।
ध्माते भस्मत्वमायाति शुद्धस्फटिकसन्निभः॥
द्विपलं सूतराजस्य पलैकं गन्धकस्य च।
कन्यानीरेण संमर्द्य दिनमेकं निरुत्तरम्॥
बद्धा तद्भूधरे यन्त्रे दिनैकं मारयेत् पुटात्।
इत्येवं जारिते सूते मारणं परिकीर्त्तितम्॥
अथवा मासयोग्यन्तु हन्यागन्धान्वितं रसम्।
सूतञ्च घनसत्त्वञ्च मर्दयेत् कङ्गुलीद्रवैः॥
दिनैकं गोलकञ्चैव शोषयेदातपे खरे।
गर्भयन्त्रगतं पाच्यं त्रिदिनन्तु महाग्निना॥
करीषाग्नौ दिवारात्रौ पचित्वा भस्मतां नयेत्॥

समाप्तम्।

दत्तात्रेयतन्त्रम् ।

श्रीदत्तात्रेय उवाच ।

कैलासशिखरासीनं देवदेवं महेश्वरम् ।
दत्तात्रेयश्च पप्रच्छ शङ्करं लोकशङ्करम् ॥ १ ॥
कृताञ्जलिपुटो भूत्वा समूचे भक्तवत्सलम् ।
भक्तानाञ्च हितार्थाय कालमन्त्रं प्रकथ्यताम् ॥ २ ॥
कलौ सिद्धिर्महाकाल ! मन्त्रतन्त्रविधायिका ।
कथयस्व महादेव ! देवदेवं महेश्वरम् ॥ ३ ॥
सन्ति नानाविधा लोके यन्त्रमन्त्राभिचारिकाः ।
आगमोक्ताः पुराणोक्ता वेदोक्ता डामरे तथा ॥ ४ ॥
उड्डीशे मेरुतन्त्रे च कालचण्डेश्वरे तथा ।
राधातन्त्रे च देवेश ! तारातन्त्रेऽमृतेश्वरे ॥ ५ ॥
तत्सर्वं कीलकं कृत्वा कलौ वीर्य्यविवर्जितम् ।
ब्राह्मणाः कामवशगास्तेषां कारणसिद्धये ॥ ६ ॥
कीलकञ्च विनामन्त्रं कार्य्यसिद्धिप्रदं नृणाम् ।
कथयस्व महादेव ! कृपां कुरु मम प्रभो ! ॥ ७ ॥

श्रीईश्वर उवाच । शृणु सिद्धिं महायोगिन् ! सर्वयोगविशारद ! ।
मन्त्रविद्यां महागुप्तां देवानामपि दुर्लभाम् ॥ ८ ॥
तवाग्रे कथितो ह्येष मन्त्रविद्याशिरामणिः ।
गुह्याद् गुह्यं महागुह्यं गुह्यं गुह्यं पुनः पुनः ॥९॥
गुरुभक्ताय दातव्यं नाभक्ताय कदाचन ।
शिवभक्तैकमनसि दृढ़चित्तसमन्विते ॥ १० ॥
अथातः संप्रवक्ष्यामि शृणु श्रेयस्तथाऽऽत्मनः ।
कलौ सिद्धं महामन्त्रं विना कालेन कथ्यते ॥ ११ ॥

न तिथिर्न च नक्षत्रं नियमो नास्ति वासरः।
न पूजा न जपो होमो न च कालादिनिर्णयः॥ १२॥
केवलं मन्त्रतन्त्रेण औषधी सिद्धिरूपिणी।
यस्य साधनमात्रेण क्षणं सिद्धिश्च जायते॥ १३॥
मारणं मोहनं स्तम्भं विद्वेषोच्चाटनं वशी।
आकर्षणम् इन्द्रजालं यक्षिणी च रसायनम्॥ १४॥
कालज्ञानम् अनाहारं तथैव निधिदर्शनम्।
बन्ध्यापुत्रवतीयोगं मृता च मृतजीवितम्॥ १५॥
वाजीकरणविद्या च भूतग्रहनिवारणम्।
सिंहव्याघ्रभयं सर्पवृश्चिकानां तथैव च॥ १६॥
विषादिनाशनञ्चैव नान्यथा शङ्करोदितम्।
गोप्यं गोप्यं महागोप्यं गोप्यं गोप्यं पुनः पुनः॥ १७॥

सर्वोपरिमन्त्रः।—"ओं परं ब्रह्म परमात्मने ओं नमः उत्पत्ति-स्थितिप्रलयकराय ब्रह्महरिहराय त्रिगुणात्मने सर्वकौतुकानि दर्शय दत्तात्रेय! नमः तन्त्राणि सिद्धिं कुरु कुरु स्वाहा"। अष्टोत्तरशतजपेन सिद्धिः॥ १८॥

इति दत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे प्रथमः पटलः।

अथ मोहनम्।

ईश्वर उवाच। तुलसीबीजचूर्णन्तु सहदेवीरसेन च।
तिलकञ्च रवौ वारे मोहनं सर्वतो जगत्॥ १॥
हरितालम् अश्वगन्धां पेषयेत् कदलीरसे।
गोरोचनासमायुक्तं तिलकं लोकमोहनम्॥ २॥
शृङ्गीचन्दनसंयुक्तः वचाकुष्ठसमन्वितः।
धूपो ग्राह्यस्तया वस्त्रे मुखे चैव विशेषतः।
राजप्रजापक्षिपशु-दर्शनान्मोहकारकः॥ ३॥

सिन्दूरं कुङ्कुमञ्चैव गोरोचनसमन्वितम् ।
धात्रीरससमायुक्तं तिलकं लोकमोहनम् ॥ ४ ॥
मनःशिलाञ्च कर्पूरं पेषयेत् कदलीरसे ।
अनेनैव तु तन्त्रेण तिलकं लोकमोहनम् ॥ ५ ॥
श्वेतार्कमूलं सिन्दूरं पेषयेत् कदलीरसे ।
अनेनैव तु तन्त्रेण तिलकं लोकमोहनम् ॥ ६ ॥
भृङ्गराजो ह्यपामार्गः लज्जालू सहदेविका ।
एभिस्तु तिलकं कृत्वा त्रैलोक्यं मोहयेन्नरः ॥ ७ ॥
श्वेतगुञ्जारसं पेष्यं ब्रह्मदन्त्याश्च मूलकम् ।
लेपमात्रे शरीराणां मोहनं सर्वतो जगत् ॥ ८ ॥
श्वेतार्कमूलमादाय श्वेतचन्दनसंयुतम् ।
अनेन तिलकं कृत्वा त्रैलोक्यं मोहयेन्नरः ॥ ९ ॥
विल्वपत्रं गृहीत्वा तु छायाशुष्कन्तु कारयेत् ।
कपिलापयसाक्तेन वटिं कृत्वा तु गोलकम् ॥
एभिस्तु तिलकं कृत्वा मोहनं सर्वतो जगत् ॥ १० ॥
विजयापत्रमादाय श्वेतसर्षपसंयुतम् ।
अनेन लेपनादेव मोहयेत् सर्वतो जगत् ॥ ११ ॥
गृहीत्वा तुलसीपत्रं छायाशुष्कन्तु कारयेत् ।
अश्वगन्धासमायुक्तं विजयाबीजसंयुतम् ॥ १२ ॥
कपिलादुग्धसार्द्धेन वटी रत्तिप्रमाणतः ।
भक्षिता प्रातरुत्थाय मोहयेत् सर्वतो जगत् ॥ १३ ॥
पञ्चाङ्गदाड़िमं पिष्ट्वा श्वेतगुञ्जासमन्वितम् ।
एभिस्तु तिलकं कृत्वा मोहयेत् सर्वतो जगत् ॥ १४ ॥
कटुतुम्बीबीजतैल-वर्त्तिज्वालासु कज्जलम् ।
गृहीत्वा चाञ्जयेन्नेत्रं मोहनं भवति ध्रुवम् ॥ १५ ॥

इति श्रीदत्तात्रेयतन्त्रे मोहनं नाम द्वितीयः पटलः ।

अथ अग्निस्तम्भनम्।

ईश्वर उवाच। अथातः सम्प्रवक्ष्यामि अग्निस्तम्भनमुत्तमम्।
यस्मै कस्मै न दातव्यं नान्यथा शङ्करोदितम्॥ १॥
वसां गृहीत्वा माण्डूकीं कौमारीरसपेषिताम्।
लेपमात्रे शरीराणाम् अग्निस्तम्भः प्रजायते॥ २॥
अर्कदुग्धं समादाय कुमारीवारि पेषयेत्।
लेपमात्रे शरीराणाम् अग्निस्तम्भः प्रजायते॥ ३॥
कदलीरसमादाय कुमारीरसपेषितम्।
लेपमात्रे शरीराणाम् अग्निस्तम्भः प्रजायते॥ ४॥
मण्डूकस्य वसा ग्राह्या कर्पूरेणैव संयुता।
लेपमात्रे शरीराणाम् अग्निस्तम्भः प्रजायते॥ ५॥
कुमारीकन्दमादाय कदलीकन्दसंयुतम्।
लेपमात्रे शरीराणाम् अग्निस्तम्भः प्रजायते॥ ६॥
पिप्पलीमरिचं शुण्ठीं चर्वयित्वा पुनः पुनः।
दीप्ताङ्गारे नरैर्भुक्तैः न वक्त्रं दह्यते क्वचित्॥ ७॥
आज्यं शर्करया पीत्वा चर्वयित्वा च नागरम्।
तप्तलोहे मुखे क्षिप्ते वक्त्रं न दह्यते क्वचित्॥ ८॥

अथ मन्त्रः।—"ओं नमो अग्निरूपाय मम शरीरे स्तम्भनं कुरु कुरु स्वाहा"। अष्टोत्तरशतजपेन सिद्धिः।

अथ आसनस्तम्भनम्।

चर्मकारस्य कुण्डानां मलं ग्राह्यं तथा रजः।
चटकीरुधिरे युक्तं यस्याग्रे तद् विनिक्षिपेत्॥ १॥
तस्य स्थाने भवेत् स्तम्भः सिद्धियोग उदाहृतः।
यस्मै कस्मै न दातव्यं नान्यथा शङ्करोदितम्॥ २॥
श्वेतगुञ्जाफलं क्षिप्तं नृकपाले तु मृत्तिकाम्।
बलिं दत्त्वा तु दुग्धस्य तस्य वृक्षो भवेद् यदा॥ ३॥

तस्य शाखा लता ग्राह्या यस्याग्रे तां विनिक्षिपेत् ।
तस्य स्थाने भवेत् स्तम्भः सिद्धियोग उदाहृतः ॥ ४ ॥

अथ मन्त्रः ।—"ओं नमो दिगम्बराय अमुकासनस्तम्भनं कुरु कुरु स्वाहा" । अष्टोत्तरशतजपेन सिद्धिः ॥

अथ बुद्धिस्तम्भनम् ।

ऊलूविष्ठां * गृहीत्वा तु छायाशुष्कान्तु कारयेत् ।
ताम्बूले यस्य दातव्यं बुद्धिस्तम्भनमुत्तमम् ॥ १ ॥
भृङ्गराजरसैर्भाव्यं सिद्धार्थं श्वेतनामकम् ।
एभिस्तु तिलकं दत्त्वा बुद्धिस्तम्भनमुत्तमम् ॥ २ ॥
सहदेवीमपामार्गं लोहपात्रे च पेषयेत् ।
तिलकं सर्वभूतानां बुद्धिस्तम्भकरं भवेत् ॥ ३ ॥

मन्त्रः ।—"ओं नमो भगवते शत्रूणां बुद्धिं स्तम्भय स्तम्भय स्वाहा" ॥

अथ शस्त्रस्तम्भनम् ।

पुष्यार्केण समुद्धृत्य विष्णुक्रान्तास्वमूलकम् ।
वक्त्रे शिरसि धार्य्येत शस्त्रं संहरते नृणाम् ॥ १ ॥
वराहव्याघ्रभूपाल-चौरशत्रुभये जयम् ।
जातीमूलं मूखे क्षिप्तं शस्त्रस्तम्भनमुत्तमम् ॥ २ ॥
करे सुदर्शनामूलं बद्ध्वा स्तम्भनशस्त्रकम् ।
केतकी मस्तके चैव तालमूलं मुखे स्थितम् ॥
खर्जूरीचरणे हस्ते खड्गस्तम्भः प्रजायते ।
एतानि त्रीणि मूलानि चूर्णेन च घृतैः पिबेत् ॥
अहोरात्रं ततः शस्त्रैर्यावज्जीवं न बाध्यते ।
आयान्तं शैवशस्त्रञ्च सम्मुखे सन्निवारयेत् ॥ ३ ॥
गृहीत्वा पुष्यनक्षत्रे अपामार्गस्य मूलकम् ।
लेपमात्रे शरीराणां सर्वशस्त्रनिवारणम् ॥ ४ ॥

* ऊलूकविष्ठामित्यत्र ऊलूविष्ठामिति निर्द्देशः ।

खर्जूरी मुखमध्यस्था कटीबद्धा च केतकी।
भुजदण्डस्थिते चार्के सर्वशस्त्रनिवारणा: ॥ ५ ॥
पुष्यार्के श्वेतगुञ्जाया मूलमुद्धृत्य धारयेत्।
हस्ते चास्त्रभयं नास्ति संग्रामेषु कदाचन ॥ ६ ॥
गृहीत्वा रविवारे तु विल्वपत्रञ्च कोमलम्।
पिष्ट्वा विससमं सद्य: शस्त्रस्तम्भनलेपनात् ॥ ७ ॥

अथ मन्त्र:।—"ओं अहो कुम्भकर्ण महाराक्षस निकषागर्भ-
भूत परसैन्यस्तंभन महाभगवन्! रुद्रोपजयति स्वाहा"।
टोत्तरशतजपेन सिद्धि: ॥ ८ ॥

त्रलेप:।—विष्णुक्रान्तीयवीजानि मन्त्रभावेण ग्राहयेत्।
तत्तैलं ग्राहयेत् पात्रे विषञ्चैव समन्वितम् ॥
भल्लाततैलसंयुक्तम् अहिफेनञ्च संयुतम्।
परमूत्रञ्च संयुक्तं धुस्तूरवीजचूर्णकम् ॥
तालञ्चैव रसं युक्तं गन्धकञ्च मन:शिला।
गन्धकञ्चैव संयुक्तं वटिका क्रियते नरै: ॥
पञ्चटङ्कप्रमाणानि शस्त्रलेपन्तु कारयेत्।
रणे दारुणशस्त्रौघं खण्डं खण्डं प्रजायते ॥
शस्त्रं दृष्ट्वा पलायन्ते यथा युद्धेषु कातरा:।
वृथा भवति शस्त्रञ्च न भयं विद्यते क्वचित् ॥ १ ॥

अथ मन्त्र:।—"ओं नमो विकरालरूपाय महाबलाय परा-
माय अमुकस्य भुजबलं बन्धय बन्धय दृष्टिं स्तम्भय स्तम्भय
तय पातय महीगे हुं"। अष्टोत्तरशतजपेन सिद्धि: ॥ २ ॥

अथ सेनानिस्तम्भनम्।

मन्त्राभावेण गृह्णीयात् श्वेतगुञ्जाविधानकम्।
निखनेच्च श्मशाने वै पाषाणं तत्र दापयेत् ॥

अष्टौ च योगिनी पूज्या रौद्री माहेश्वरी तथा।
वाराही नारसिंही च वैष्णवी च कुमारिका॥
लक्ष्मीर्ब्राह्मी च संपूज्या गणेशो वटुकस्तथा।
क्षेत्रपालः सदा पूज्यः सेनास्तम्भो भविष्यति॥
पृथक् पृथक् बलिं दत्वा दशानामविभागतः।
मांसं मद्यं तथा पुष्पं धूपं दीपाबलिक्रियाम्॥
यस्मै कस्मै न दातव्यं नान्यथा शङ्करोदितम्॥

मन्त्रः।—"ओं नमः कालरात्रि त्रिशूलधारिणि! मम शत्रु सैन्यस्तम्भनं कुरु कुरु स्वाहा"। अष्टोत्तरशतजपेन सिद्धिः॥ २॥

अथ सेनापलायनम्।

भौमवारे गृहीत्वा तु काकोलूकौ तु पक्षिणौ।
भूर्जपत्रे लिखेन्मन्त्रं तस्य नाम समन्वितम्॥
गोरोचनैः गले बद्धा काकोलूकस्य पक्षिणः॥
सेनानीसम्मुखं गच्छेत् नान्यथा शङ्करोदितम्॥
शब्दमात्रे सैन्यमध्ये पलायन्तेऽतिनिश्चितम्।
राजाप्रजागजाद्याश्च नान्यथा शङ्करोदितम्॥ १॥

मन्त्रः।—"ओं नमो भयङ्कराय खड्गधारिणे मम शत्रुसैन्य पलायिनं कुरु कुरु स्वाहा"। अष्टोत्तरशतजपेन सिद्धिः॥ २॥

श्मशानभस्मनाऽऽलिप्य मृत्तिकापात्रमध्यतः।
रिपुनामसमायुक्तं नीलसूत्रेण बन्धयेत्।
गर्त्तकुण्डे विनिक्षिप्तो पाषाणोपरि दीयते।
स्तम्भनं कुरुते सैन्यं सिद्धियोग उदाहृतः॥ ३॥

अथ गोमहिष्यादिस्तम्भनम्।

उष्ट्रस्यास्थि चतुर्दिक्षु निखनेद् भूतले ध्रुवम्।
गोमहिष्यादिकस्तम्भः सिद्धियोग उदाहृतः॥ १॥

उष्ट्रलोमं गृहीत्वा तु पशूपरि विनिक्षिपेत्।
पशूनां भवति स्तम्भः सिद्धियोग उदाहृतः ॥ २ ॥

मनुष्यस्तम्भनम्।—धृत्वा रजस्वलावस्त्रं गोरोचनसमन्वितम्।
यस्य नाम क्षिपेत् कुम्भे सद्यः स्तम्भनकारकः ॥३॥

मेघस्तम्भनम्।— इष्टकाद्वयमादाय श्मशानाङ्गारसंपुटे।
स्थापयेद् वनमध्ये च मेघस्तम्भनकारकम् ॥४॥

निद्रास्तम्भनम्।—मूलं बृहत्याः मधुकं पिष्ट्वा नस्यं समाचरेत्।
निद्रास्तम्भनमेतद्धि मूलदेवेन भाषितम् ॥५॥

नौकास्तम्भनम्।—तरण्यां क्षीरकाष्ठस्य कीलं पञ्चाङ्गुलं क्षिपेत्।
नौकास्तम्भनमेतद्धि मूलदेवेन भाषितम् ॥६॥

जलस्तम्भनम्।— पद्मकं नाम यद्द्रव्यं सूक्ष्मचूर्णन्तु कारयेत्।
वापीकूपतड़ागादौ निक्षिपेत् स्तम्भते जलम् ॥

मन्त्रः।—"ओं नमो भगवते रुद्राय जलं स्तम्भय स्तम्भय ठः ठः ठः"। अष्टोत्तरशतजपेन सिद्धिः ॥७॥

गर्भस्तम्भनम्।—एरण्डवीजं ऋत्वन्ते भुक्तं स्तम्भनगर्भकम्।
कटिबद्धं हेममूलं गर्भस्तम्भनकं परम् ॥ ८ ॥
सिद्धार्थमूलं शिरसि बद्ध्वा कान्तं रमेत्तु या।
न गर्भं धारयेत् सा स्त्री मुक्तेन लभते पुनः ॥९॥
धुस्तूरमूलचूर्णन्तु योनिस्थं स्तम्भनम्मतम्।
तण्डुलीमूलतोयेन देयं तण्डुलवारिणा ॥ १० ॥
धूपितो योनिरन्ध्रेषु निम्बकाष्ठेन युक्तितः।
ऋत्वन्ते दीयते तत्र गर्भदुःखविवर्जिता ॥

अत्र मन्त्रः।—"ओं गर्भं स्तम्भय स्तम्भय स्वाहा" ॥ अष्टोत्तरशतजपेन सिद्धिः ॥ ११ ॥

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे स्तम्भनं नाम चतुर्थः पटलः।

अथ विद्वेषणम् ।

ईश्वर उवाच ।—विद्वेषो नरनारीणां विद्वेषो राजमन्त्रिणः ।
महाकौतुकविद्वेषं शृणु सिद्धिं प्रयत्नतः ॥ १ ॥
एकहस्ते काकपक्षम् उलूपक्षं करेऽपरे ।
मन्त्रयित्वा मिलत्यग्रं कृष्णसूत्रेण बन्धयेत् ॥
अञ्जलिञ्च जले चैव तर्पयेत् हस्तपक्षकैः ।
एवं सप्तदिनं कुर्य्यादष्टोत्तरशतं जपेत् ॥
गृहीत्वा गजकेशञ्च गृहीत्वा सिंहकेशकम् ।
गृहीत्वा मृत्तिकापादं पुत्तलिं निखनेद्भुवि ॥
अग्निस्तस्योपरि स्थाप्यो मालतीकुसुमाहुतिः ।
विद्वेषं कुरुते तस्य नान्यथा शङ्करोदितम् ॥ २ ॥
मार्ज्जारविष्ठामादाय विष्ठामादाय मौषिकीम् ।
पादानां मृत्तिकायुक्तां पुत्तलिं क्रियते ततः ॥
नीलवस्त्रेण संवेष्ट्य मन्त्रयित्वा शतेन च ।
विद्वेषं तत्क्षणाच्चैव भ्रातरौ तातपुत्रकौ ॥ ३ ॥
गृहीत्वा सर्पदन्तञ्च गृहीत्वा बभ्रुरोमकम् ।
चिताभस्मसमायुक्तां गुटिकां कारयेन्नरः ॥
उद्याने निखनेद्भूमौ मन्त्रयित्वा सनामकम् ।
विद्वेषं तत्क्षणाच्चैव नान्यथा शङ्करोदितम् ॥ ४ ॥
सभायां धूपयन् बभ्रु-रोमकाहेयकञ्चुकैः ।
विद्वेषं जायते सत्यं नान्यथा शङ्करोदितम् ॥ ५ ॥
गृहीत्वा श्वानरोमाणि मार्जारस्य तथा नखम् ।
सभायां दीयते धूपो विद्वेषं जायते तदा ॥ ६ ॥
गृहीत्वा शिखिविष्ठाञ्च सर्पदन्तञ्च पेषयेत् ।
ललाटे तिलकं कृत्वा विद्वेषो जायते क्षणात् ॥७॥

गृहीत्वा गजदन्तञ्च गृहीत्वा सिंहदन्तकम्।
पेषयेत् नवनीतेन तिलकं द्वेषकारकम्॥ ८॥
अश्वकेशं गृहीत्वा तु माहिषं केशमुत्तमम्।
सभायां दीयते धूपं विद्वेषो जायते ध्रुवम्॥ ९॥
सल्लकीकण्टकं धृत्वा निखनेद् द्वारतो भुवि।
कलहो जायते नित्यं विद्वेषं जायते तदा॥ १०॥
यस्य,यस्य भवेद्वैरं जीवाजीवो भवेत् तदा।
तत्पदोर्मृत्तिकायुक्तं शत्रुपांशुसमन्वितम्॥
पुत्तली क्रियते सम्यक् श्मशाने निखनेद्भुवि।
विद्वेषो जायते सत्यं सिद्धियोग उदाहृतः॥ ११॥

अत्र मन्त्रः।—"ओं नमो नारायणाय अमुकं अमुकेन सह विद्वेषं कुरु कुरु स्वाहा"। अष्टोत्तरशतजपेन सिद्धिः॥ १२॥

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे विद्वेषी नाम पञ्चमः पटलः।

अथ उच्चाटनम्।

ईश्वर उवाच। येन हृतं गृहं कन्या धनं पुत्त्रः कलत्रकम्।
उच्चाटनबधं कुर्य्याद् दुष्टदण्डो विधीयते॥ १॥
ब्रह्मदण्डी चिताभस्म शिवलिङ्गे प्रलेपयेत्।
सिद्धार्थञ्चैव संयुक्तं शनिवारे क्षिपेद् गृहे॥
उच्चाटनं भवेत् तस्य जायते मरणान्तिकम्।
विना मन्त्रेण सिद्धिश्च सिद्धियोग उदाहृतः॥ २॥
सिद्धार्थं शिवनिर्माल्यं यद्गृहे निखनेन्नरः।
उच्चाटनं भवेत्तस्य उद्धृते च पुनः सुखी॥ ३॥
काकपक्षे रवौ वारे यद्गृहे निखनेन्नरः।
उच्चाटनं भवेत्तस्य नान्यथा शङ्करोदितम्॥ ४॥

उलूविष्ठां गृहीत्वा तु सिद्धार्थसहसंयुतम्।
यस्याङ्गे निःक्षिपेच्चूर्णं तस्य उच्चाटनं परम्॥ ५॥
उलूपक्षे कुजे वारे यद्गृहे निखनेन्नरः।
उच्चाटनं भवेत्तस्य विना मन्त्रेण सिद्ध्यति॥ ६॥
गृहीत्वौडुम्बरं कीलं मन्त्रेण चतुरङ्गुलम्।
तं यस्य निखनेद्गेहे तदाऽस्योच्चाटनं भवेत्॥ ७॥
काकोलूकस्य पक्षन्तु हुत्वा चाष्टाधिकं शतम्।
यन्नाम्ना मन्त्रयोगेन तदाऽस्योच्चाटनं भवेत्॥ ८॥
गृहीत्वा नरकङ्कालं निखनेच्चतुरङ्गुलम्।
मन्त्रयुक्तं गृहद्वारे सद्य उच्चाटनं भवेत्॥ ९॥

मन्त्रः।—"ॐ नमो भगवते रुद्राय दंष्ट्राकरालाय अमुकं सपुत्रबान्धवैः सह हन हन दह दह पच पच शीघ्रम् उच्चाटय उच्चाटय हुं फट् स्वाहा ठः ठः"। अष्टोत्तरशतजपेन सिद्धिः॥ १०॥

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे उच्चाटनं नाम षष्ठः पटलः।

अथ सर्वजनवशीकरणम्।

ईश्वर उवाच।—ब्रह्मदण्डीवचाकुष्ठ-चूर्णैस्ताम्बूलदापनात्।
रवौ वारे कृते योगः सर्वलोकवशङ्करः॥ १॥
गृहीत्वा वटमूलञ्च जलेन सह घर्षयेत्।
विभूत्या संयुतो भाले तिलको लोकवश्यकृत्॥ २॥
पुष्ये पुनर्नवामूलं करे सप्ताभिमन्त्रितम्।
बद्ध्वा सर्वत्र पूजार्हः सर्वलोकवशङ्करः॥ ३॥
अपामार्गस्य मूलन्तु कपिलापयसाऽन्वितम्।
ललाटे तिलकं कृत्वा वशीकुर्य्याज्जगत्त्रयम्॥ ४॥

गृहीत्वा सहदेवीञ्च छायाशुष्काञ्च कारयेत्।
ताम्बूले दत्तचूर्णन्तु सर्वलोकवशङ्करम् ॥ ५ ॥
रोचनासहदेवीभ्यां तिलको लोकवश्यकृत्।
गृहीत्वौडुम्बरं मूलं ललाटे तिलकं कृतम् ॥
प्रियो भवति सर्वेषां दृष्टमात्रो न संशयः।
ताम्बूलेन प्रदातव्यं सर्वलोकवशङ्करम् ॥ ६ ॥
देवदानी,च सिद्धार्थं गुटिकां कारयेद् बुधः।
मुखे निक्षिप्य सर्वेषां सर्वलोकवशङ्करम् ॥ ७ ॥
कुङ्कुमं तगरं कुष्ठं हरितालं मनःशिलाम्।
अनामिकाया रक्तेन तिलको सर्ववश्यकृत् ॥ ८ ॥
गोरोचनां पद्मपत्रं प्रियङ्गुं रक्तचन्दनम्।
एकीकृत्याञ्जयेन्नेत्रे सर्वलोकवशङ्करम् ॥ ९ ॥
गृहीत्वा श्वेतगुञ्जान्तु छायाशुष्कान्तु कारयेत्।
कपिलापयसाक्तेन तिलको लोकवश्यकृत् ॥ १० ॥
श्वेतदूर्वां गृहीत्वा तु कपिलादुग्धपेषणात्।
लेपमात्रे शरीराणां सर्वलोकवशङ्करम् ॥ ११ ॥
श्वेतमर्कं गृहीत्वा तु छायाशुष्कन्तु कारयेत्।
कपिलापयसाक्तेन तिलको सर्ववश्यकृत् ॥ १२ ॥
विल्वपत्राणि संगृह्य मातुलुङ्गं तथैव च।
अजादुग्धेन संपेष्य तिलको लोकवश्यकृत् ॥ १३ ॥
कुमारीकन्दमादाय विजयावीजसंयुतम्।
तिलकं क्रियते भाले सर्वलोकवशङ्करम् ॥ १४ ॥
हरितालमश्वगन्धां सिन्दूरं कदलीरसम्।
तिलकं क्रियते भाले सर्वलोकवशङ्करम् ॥ १५ ॥
अपामार्गस्य वीजानि छागीदुग्धेन पेषयेत्।
लेपमात्रे शरीराणां सर्वलोकवशङ्करम् ॥ १६ ॥

हरितालं तुलसिकां कपिलादुग्धपेषिताम्।
अनेन तिलकं भाले सर्वलोकवशङ्करम्॥ १७॥
धात्रीफलरसै र्भाव्या अश्वगन्धा मनःशिला।
अनेन तिलकं भाले सर्वलोकवशङ्करम्॥ १८॥

मन्त्रः।—"ओं नमः सर्वलोकवशङ्कराय कुरु कुरु स्वाहा"।
अष्टोत्तरशतजपेन सिद्धिः।

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे वश्यकरं नाम सप्तमः पटलः।

अथ स्त्रीवशीकरणम्।

ईश्वर उवाच।—रविवारे गृहीत्वा तु कृष्णधुस्तूरपुष्पकम्।
शाखालतां गृहीत्वा तु पत्रं मूलं तथैव च॥
पिष्ट्वा कर्पूरसंयुक्तं कुङ्कुमं रोचनं समम्।
तिलके स्त्री वशीभूता यदि साक्षादरुन्धती॥ १॥
काकजङ्घा वचा कुष्ठं शुक्रशोणितमिश्रितम्।
दत्त्वा तु भोजने बाला श्मशाने क्रन्दते सदा॥२॥
चिताभस्म वचा कुष्ठं कुङ्कुमं रोचनं समम्।
चूर्णं स्त्रीशिरसि क्षिप्त्वा वशीकरणमुत्तमम्॥ ३॥
जिह्वामलं दन्तमलं नासाकर्णमलं तथा।
ताम्बूलेन प्रदातव्यं वशीकरणमद्भुतम्॥ ४॥
भौमवारे लवङ्गञ्च स्त्रियाः शिरसि निक्षिपेत्।
बुधवारे समुद्धृत्य खाने पाने वशीभवेत्॥ ५॥
करपादनखानाञ्च तद्भस्म क्रियते नरैः।
खाने पाने प्रदातव्यं वशीकरणमद्भुतम्॥ ६॥
शनिवारे गृहीत्वा तु वनितापादपांशुकम्।
वामे पुत्तलिकां कृत्वा तत्केशसंयुतां कृताम्॥

नीलवस्त्रेण संवेष्ट्य स्ववीर्य्येण च संयुताम् ।
सिन्दूरलेपितां कृत्वा निखनेद्द्वारवामके ॥
उल्लङ्घ्य वशमायाति प्राणैरपि धनैरपि ।
यस्मै कस्मै न दातव्यं देवानामपि दुर्लभम् ॥ ७ ॥
ब्रह्मदण्डी चिताभस्म यस्याङ्गे निक्षिपेन्नरः ।
वशीभवति सा नारी नान्यथा शङ्करोदितम् ॥ ८ ॥
पूगीफलं गृहीत्वा तु चन्द्रवारयुते मृगे ।
खण्डकं वीर्य्यसंयुक्तं ताम्बूलं वश्यकारकम् ॥ ९ ॥
ताम्बूलरसमध्ये च पिष्ट्वा तालं मनःशिलाम् ।
भौमे तु तिलकं कृत्वा वशीकुर्य्यात्स्वैव योषिताम् ॥ १० ॥
सिन्दूरं कदलीकन्दं पेषयेद् गुरुवासरे ।
अनेन तिलकं कृत्वा सद्यो नारी वशीभवेत् ॥ ११ ॥
गोदन्तं नरदन्तञ्च पिष्ट्वा तैलेन पेषयेत् ।
एभिस्तु तिलकं कृत्वा कान्तावश्यकरं परम् ॥ १२ ॥
—मलं गृहीत्वा तु खाने पाने प्रदापयेत् ।
वशीभवति सा नारी विना मन्त्रेण सिध्यति ॥१३॥
स्वमूत्रसंयुतं कुष्ठं दत्तं पर्णेन वश्यकृत् ।
मलं जैह्वं जातीफलं ताम्बूले वश्यकारकम् ॥
गृहीत्वोलूकमांसन्तु खाने पाने प्रदापयेत् ।
सिद्धियोगमिदं सत्यं विना मन्त्रेण सिध्यति ॥ १४ ॥
यवचूर्णं हरिद्रा च गोमूत्रं घृतसर्षपाः ।
ताम्बूलरससंयुक्तमनेन मर्दयेत् सुधीः ॥
मुखं भवति पद्माभं पादौ पद्मदलोपमौ ।
प्रियो भवति सर्वेषां स्त्रीषु राजकुलेषु च ॥ १५ ॥
गोरोचनं पद्मपत्रं पेषयेत् तिलकं कृतम् ।
शनिवारे कृते योगे वशीभवति कामिनी ॥ १६ ॥

गृहीत्वा मालतीपुष्पं पट्टसूत्रेण वर्त्तिका।
भृगुवारे नृकपाले एरण्डतैलकज्जलम्॥
कज्जलेनाञ्जयेन्नेत्रं दृष्ट्वा नारी वशीभवेत्।
विना मन्त्रेण सिद्धिः स्यान्नान्यथा शङ्करोदितम्॥

मन्त्रः।—"ओं नमः कामाख्या-देवि! अमुकीं मे वशं कुरु कुरु स्वाहा"। अष्टोत्तरशतजपेन सिद्धिः॥ १७॥

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे स्त्रीवशीकरणं नाम अष्टमः पटलः।

अथ पुरुषवशीकरणम्।

ईश्वर उवाच।—गोरोचनं पद्मपत्रं कदलीरससंयुतम्।
एभिस्तु तिलकं कृत्वा पतिवश्यकरं परम्॥ १॥
पञ्चाङ्गं दाड़िमं पिष्ट्वा श्वेतसर्षपसंयुतम्।
—लेपे पतिं दासं करोत्यपि च दुर्भगा॥ २॥
मालतीपुष्पसंयुक्तं कटुतैलं सुपाचितम्।
एतल्लिप्त—नारी रतौ मोहयते पतिम्॥ ३॥
भौमे पूगीफलं भुक्तं प्रातर्गृह्यात् समाहरेत्।
अखण्डं जलनिर्धौतं ताम्बूले पतिवश्यकृत्॥ ४॥
जिह्वामलं सलवणं खाने पाने प्रदापयेत्।
पतिवश्यकरं सत्यं दासदासस्तु जायते॥

मन्त्रः।—"ओं नमो महापद्मिणि पतिं मे वश्यं कुरु कुरु स्वाहा"। अष्टोत्तरशतजपेन सिद्धिः॥ ५॥

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे पुरुषवशीकरणं नाम नवमः पटलः।

अथ राजवशीकरणम्।

ईश्वर उवाच।—कुङ्कुमं चन्दनञ्चैव कर्पूरं तुलसीदलम्।
गवां क्षीरेण तिलकं राजवश्यकरं परम्॥ १॥

करे सुदर्शनामूलं बद्ध्वा राजप्रियो भवेत्।
हरितालमश्वगन्धा कर्पूरञ्च मनःशिला।
अजाक्षीरेण तिलकं राजवश्यकरं परम्॥ २॥
धृत्वा सुदर्शनामूलं पुष्यानक्षत्रवासरे।
कर्पूरं तुलसीपत्रं पेषयेत्कपिलवस्त्रके॥
विष्णुक्रान्तानि वीजानि तैलं प्रज्वाल्य दीपके।
कज्जलं पातयेद्रात्रौ शुचिपूर्वः समाहितः॥
कज्जलेनाञ्जयेन्नेत्रं राजवश्यकरं परम्।
चक्रवर्त्ती भवेद्वश्यश्चान्यलोकेषु का कथा॥३॥
अपामार्गस्य वीजानि गृहीत्वा पुष्यभास्करे।
खाने पाने प्रदातव्यं राजवश्यकरं परम्॥

मन्त्रः।—"श्रीं नमो भास्कराय त्रिलोकात्मने अमुकमहीपतिं वशी कुरु कुरु स्वाहा"। अष्टोत्तरशतजपेन सिद्धिः॥४॥

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे राजवशीकरणं नाम नवमः पटलः।

अथ आकर्षणम्।

[ईश्व]र उवाच।—आकर्षणविधिं वक्ष्ये शृणु सिद्धिं प्रयत्नतः।
राजा प्रजा च सर्वेषां सत्यमाकर्षणं भवेत्॥ १॥
कृष्णधुस्तूरपत्राणां रसं रोचनसंयुतम्।
भूर्जपत्रे लिखेन्मन्त्रम् अश्वमारकलेखनैः॥
यस्य नाम लिखेन्मध्ये खदिराङ्गारतापनात्।
शतयोजनमायाति नान्यथा शङ्करोदितम्॥ २॥
अनामिकाया रक्तेन लिखेन्मन्त्रञ्च भूर्जके।
यस्य मध्ये लिखेन्नाम मधुमध्ये च निक्षिपेत्॥
तदा चाकर्षणं याति सिद्धियोग उदाहृतः।
यस्मै कस्मै न दातव्यं देवानामपि दुर्लभम्॥ ३॥

नृकपाले लिखेन्मन्त्रं गोरोचनरसेन च।
तापयेत् खदिराङ्गारैः त्रिसन्ध्यन्तु प्रयत्नतः॥
उर्वशी चापि स्वायाति नान्यथा शङ्करोदितम्।
यस्मै कस्मै न दातव्यं देवानामपि दुर्लभम्॥

मन्त्रः।—"ओं नमो आदिपुरुषाय अमुकम् आकर्षणं कुरु कुरु स्वाहा"। अष्टोत्तरशतजपेन सिद्धिः॥ ४॥

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे आकर्षणं नाम दशमः पटलः।

अथ त्वरितवश्यादिसिद्धियोगः।

वश्याकर्षणविद्वेष-स्तम्भनोच्चाटनादिकम्।
कर्माणि कुर्य्यादिष्टानि मन्त्रेणानेन मन्त्रवित्॥१॥
आलिख्य मन्त्रेण विदर्भितं तत् साध्याह्वयं तालवरस्य पत्रे।
प्राणान् प्रतिष्ठाप्य शतं यथाऽष्टौ जप्त्वा धृतश्चेत् शरणं प्रयाति॥२॥
पर्ण्यान्यष्टौ वै साहस्रं जप्त्वा दत्तं भुक्त्यै यस्याः।
वश्या नित्यं प्रत्युद्देशाद्दास्यत्यर्थान् प्रार्थ्यान् भोगान्॥३॥
मन्त्रं जप्त्वा पञ्चककमलं यः कनकाह्वयपञ्चकयुक्तम्।
लेह्यभोज्यविधिषु प्रतियोज्यं सास्य याति वशमामरणान्तम्॥४॥
मूलं मूलकशुङ्गभागसहितं चित्राह्वयस्य त्वचम्
पुष्पं वीजस्ववीर्य्यहस्तिकुसुमं स्वर्णासिकान्तर्जलम्।
पत्रं रोहिणमङ्गपञ्चकमलं तङ्गाण्डयुक्तं मिथो
दत्तं वा पुरुषस्य तद्वृतमिदं वश्याङ्गनामन्मथैः॥५॥
अष्टोत्तरशतं जप्त्वा हयमारप्रसूनकम् *।
सप्तरात्रौ क्षिपेद् यस्या मूर्ध्नि सास्य वशीभवेत्॥६॥
भूर्जे साध्यविदर्भितं मनुमिमं संलिख्य कौलालमृत्-
स्नाकाकल्पितपुत्तली हृदि कृतं प्राणान् प्रतिष्ठाप्य च।

---

* हयमारः—श्वेतकरवीरम्।

जप्त्वा सप्तदिनं त्रिसन्ध्यमथ तामालोड्य भाण्डीरसैः *
लिम्पेद्दश्यमवश्यमेव भविता चान्येषु जन्मस्वपि ॥ ७॥
अष्टोत्तरशतं जप्त्वा समूलकाण्डां कृताञ्जलिं † शिरसा।
धारयति सर्वलोकप्रियो भवेन्नियतमेव मन्त्रिवरः ॥८॥
तच्छतमश्ववल्ली लक्ष्मी पुष्पाणि धारयेदेवम्।
समुद्राभद्रकविष्णुप्रियाश्च मुषलीं समन्त्रजापेन ॥९॥

सयष्टिमधुकां दूर्वां सहाञ्चैव यथा धृताम्।
शिरसा सा तथैवैकं स्वर्गकल्याणदायकम् ॥१०॥

दशरविवसुरुद्रराममनुवासवाच्चिविश्वदेवभागे।
अञ्जल्यादि-क्रमशः संयोज्या दशकमखिलवश्यकरम् ॥११॥
प्रत्येकं शतमष्टौ जप्त्वा संयोज्य च दशकमपिष्ट्वा।
गुटिकीकृत्य सहस्राष्टं जप्त्वा गुटिकया रचिता ॥
तिलकक्रिया सुरनारीनरलोकरञ्जनादिकम् ॥१२॥
कपिलाघृतदीपितया तत्तच्चूर्णैर्विगर्भया वर्त्या।
मृन्मय आमशरावे प्रयतात्मतया सुकज्जलं पात्यम् ॥
कज्जलमुद्धृतमिव तत् कर्पूरयुतं सहस्रपरिजप्तम्।
दिनमनुदिननयनयुतं कुर्य्यादखिललोककस्य वश्यकरम् ॥१३॥

आत्मानं कुक्कुटं ध्यात्वा स्वकीयगणशक्तया।
साध्यां शृङ्खलया कण्ठे बद्धा कर्षमनुव्रजेत् ॥१४॥
सहस्रमर्द्धरात्रे तु रात्रित्रयमतन्द्रितः।
तुरीयकुक्कुटस्यान्ते साध्यनाम स्वकर्म च।
जपेत् संयोज्य वश्यादि-कार्य्येषु सकलेष्वपि ॥१५॥
यामारभ्य जपेदेनं पेषितं सा मदालसा।
विभ्रस्तसदार्द्रवसना मदनाकुलचेतना ॥

* भाण्डी—भार्गी।

† कृताञ्जलि—लज्जावतीम्।

उत्फुल्लगुह्यजघना शिथिलांशुकभूषणा।
चलत्पादपरिन्यासा स्फुरद्रोमाञ्चकञ्चुका॥
कामानलोष्णनिश्वासा शोभिताधरपल्लवा।
विकीर्णकेशपाशासौ वेपिता घूर्णितेक्षणा।
रचिताञ्जलिरायाति स्वयमस्यालयं निशि॥१६॥

साध्याख्यानविदर्भितं मनुमिमं ताम्बूलपत्रोदरे
लेखन्या प्रतिलिख्य कर्मसहितं प्राणान् प्रतिष्ठाप्य च।
जप्त्वाऽष्टौ शतमर्कदुग्धजनिते दीपे त्रिरात्रान्तरे
गुप्तं दीपशिखाग्निना स्वयममुं वश्योवशी चाश्रयेत्॥१७॥

भूर्जे मन्त्रममुं विलिख्य सकलं साध्याह्वया संपुटम्
प्राप्तप्राणमथाष्टकोत्तरशतं जप्तं त्रिरात्रं पुनः।
चौद्रक्षीरघृतेष्विदं पृथगपि प्रक्षिप्य मन्त्रं जपन्
आकर्षत्यचिरादभीष्टवनितां नागादिलोकादपि॥१८॥

आलिख्यैव शरावके मनुमिमं तन्नामकर्मान्वितम्
रात्रौ रोचनया प्रणीतपवनं जप्त्वा च साष्टौ शतम्।
तस्या नाभिमुखाङ्गजन्मभवनं सन्तापयन् खादिरे
वह्नौ चेत्तमनङ्गवेगविवशा योषा समायाति च॥१९॥

नाभिमात्रजले स्थित्वा साध्यनाम विदर्भितम्।
जपेत् सहस्रं त्रिदिनमिष्टामाकर्षयेद् ध्रुवम्।
उलूककाकयोः पक्षौ गृहीत्वा मन्त्रवित्तमः॥२०॥

मन्त्रेणालिख्य वै शरावे निशायाञ्च साध्याक्षरसम्पुटितम्।
मन्त्रं स्थापितपवनं सहस्रजप्तं चतुष्पथे निखनेत्।
स्तम्भनमेतदवश्यं भविता जगतां नात्र सन्देहः॥२१॥

मन्त्रं स्थापितपवनं निजकृतप्राणप्रतिष्ठकं कृत्वा।
प्रतिकृतिमथवा ध्यायन् श्मशानाङ्गारे मृतकवसनजातम्।
सम्यगधिष्ठितपवनां हृततनाम्नोश्च समन्त्रललाटाम्॥२२॥

सनाधिष्ठितपवनां सहस्रजप्तां प्रतिष्ठितप्राणाम् ।
म्भनं प्रतितीक्ष्णतरं स्तम्भनमतितीक्ष्णाम्बुनिक्षिप्ताम् ॥२३॥
लिखितमन्त्रचितामयकीलकं सहितकर्मसनाम समाहृतम् ।
तजपं त्रिसहस्रकसंख्यया पथि खनेदथ याननिवारणम् ॥२४॥
हितनिम्बतरौ रिपुनामयुक् मनुमिमं निशया कृतनामकम् ।
वसहस्रजपादिषु साधितं पथि खनेत् स्वकसैन्यनिरोधनम् ॥२५

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे दशमपटलान्तर्गत-
त्वरितवश्यादिसिद्धयोग: ।

अथ इन्द्रजालकौतुकम् ।

र उवाच ।—इन्द्रजालं विना रक्षां न करोतीति निश्चितम् ।
रक्षामन्त्रो महामन्त्र: सर्वसिद्धिप्रदायक: ॥

मन्त्र: ।—"ओं नमो नारायणाय विश्वम्भराय इन्द्रजाल-
ौतुकानि दर्शय दर्शय सिद्धिं कुरु कुरु स्वाहा"। अष्टोत्तरशतजपेन
द्धि: ।

अथ रक्षामन्त्र: ।—"ओं परं ब्रह्म परमात्मने मम शरीरे
ाहि पाहि कुरु कुरु"। अष्टोत्तरशतजपेन सिद्धि: ॥ १ ॥

टबन्धम् ।— बाला तालकपञ्चाङ्गं वेष्टितं कनकेन तु ।
दृष्टिमात्रे दृष्टिबन्धं नान्यथा शङ्करोदितम् ॥ २ ॥

दर्शनम् ।— भौमवारे सर्पमुखे क्षिप्त्वा कार्पासबीजकम् ।
बीजादुद्भूतकार्पासं वर्त्तिरैरण्डतैलके ।
तद्वर्त्तिं ज्वालयेद्रात्रौ सर्पवत् पश्यति ध्रुवम् ॥३॥

श्चिकदर्शनम् ।—वृश्चिकस्य मुखे बीजं क्षिपेत् कार्पाससम्भवम् ।
तद्वर्त्तिं ज्वालयेद्रात्रौ वृश्चिकं पश्यति ध्रुवम् ।
वर्त्तिशीलं प्रकर्त्तव्यं महाकौतुककौतुकम् ॥ ४ ॥

लदर्शनम् ।—कार्पासस्य च बीजानि नकुलस्य मुखे क्षिपेत् ।

रवौ वारे कृते योगे नान्यथा शङ्करोदितम्।
तद्वर्त्तिं ज्वालयेत् सन्ध्यां नकुलं पश्यति ध्रुवम् ॥५॥

सर्पदर्शनभेदः।—एरण्डतैलजं दीपं शमीपुष्पाह्निकञ्चुकम्।
मण्डूकवसया दीपे सर्वं पश्यति सर्पवत् ॥ ६ ॥

सरटदर्शनम्।— हृदयं कृकलासस्य ग्राहयेद्विधिपूर्वकम्।
तमेव तालपत्रेण वेष्टितं मुखदृश्यकृत्।
यस्मै कस्मै न दातव्यं देवानामपि दुर्लभम् ॥ ७॥

तिमिरे दर्शनम्।—उलूकस्य कपालेन घृतेनाहृतकज्जलम्।
तेन नेत्राञ्जनं कृत्वा रात्रौ पठति पुस्तकम् ॥८॥

मीनजीवनम्।—भल्लातैलेन मत्स्यन्तु लेपयेत् सर्वगात्रकम्।
निक्षिप्ते जलमध्ये तु तत्क्षणान्मीनजीवितम् ॥ ९

मार्जारीकरणम्।—चन्द्रवारे च निक्षिप्ते मुखे मार्जारके ध्रुवम्।
जायते वीज एरण्डं मुखे धृत्वा विड़ालकम् ॥१०

मातङ्गीकरणम्।—अङ्कोलवीजे निक्षिप्ते गुरुवारे द्विपानने।
मन्त्रेण सिञ्चयेन्नित्यं यावद्वीजे फलं भवेत् ॥
त्रिलौहवेष्टितं कृत्वा एकवीजं मुखे स्थितम्।
मत्तमातङ्गवीर्य्यस्तु वायुतुल्यपराक्रमः ॥

त्रिलौहम्।— दश हेम द्विषट् ताम्रं षोड़शं रौप्यभागकम्।
एवं संख्या त्रिलौहस्य ज्ञातव्या सर्वकर्मणि ॥११॥

तुरगीकरणम्।—हयानने तु तद्वीजं रविवारे विनिक्षिपेत्।
जायन्ते सुफला वृक्षास्तद्वीजं ग्राहयेत् पुनः ॥
त्रिलौहैर्वेष्टितं कृत्वा मुखमध्ये च धारितम्।
महाबलो महातेजो जायते च तुरङ्गमः ॥ १२ ॥

वृषभीकरणम्।—वृषानने तु तद्वीजं निक्षिपेद्भुवि निश्चितम्।
तद्वीजं मुखमध्यस्थं त्रिलौहैर्वेष्टितं कुरु।
महाबलो महातेजा जायते वृषभश्च सः ॥ १३ ॥

मृगीकरणम्।— मृगानने तु तद्बीजं निक्षिपेद् भूतले ध्रुवम्।
त्रिलौहवेष्टितं बीजं मृगराजसमो भवेत्॥ १४॥

सिंहीकरणम्।—तद्बीजं सिंहवक्त्रे च निक्षिपेच्च महीतले।
त्रिलौहवेष्टितं बीजं मुखमध्ये च धारितम्।
महाबलो महातेजा जायते सिंहरूपधृक्॥१५॥

कुक्कुरीकरणम्।—शुनो वक्त्रे तु तद्बीजं निक्षिपेद् भूतले ध्रुवम्।
त्रिलौहवेष्टितं कृत्वा मुखे क्षिप्त्वा च कुक्कुरः॥१६॥

मयूरीकरणम्।—मयूरमुखमध्यस्थं तद्बीजन्तु विनिक्षिपेत्।
त्रिलौहवेष्टितं कृत्वा मयूरो दृश्यते जनैः॥ १७॥
यानि कानि च जीवानि जलस्थलभवानि च।
अङ्कोलबीजे निक्षिप्ते मुखे भूमितले ध्रुवम्॥
तद्बीजं मुखमध्यस्थं त्रिलौहैर्वेष्टितं कुरु।
तत्तद्रूपो भवेन्मर्त्यो नान्यथा शङ्करोदितम्॥१८॥

ग्रहणदर्शनम्।— कृकलासस्य रक्तेन दर्पणादेस्य लेपनात्।
धारयेच्च गिरेर्मूर्ध्नि ग्रहणं दृश्यते जनैः॥ १९॥

अदृश्यीकरणम्।—खञ्जरीटं सजीवन्तु गृहीत्वा फाल्गुने क्षिपेत्।
पञ्जरे रक्षयेत् तावद् यावद्भाद्रपदं लभेत्॥
अदृश्यं जायते सत्यं देवैरपि न दृश्यते।
करेण च शिखा ग्राह्या त्रिलौहैर्वेष्टितां कुरु॥
गुटिका मुखमध्यस्था अदृश्यो जायते ध्रुवम्।
यस्मै कस्मै न दातव्यं देवैरपि न दृश्यते॥ २०॥
अङ्कोलस्य तु बीजानि तत्तैलं ग्राहयेत् पुनः।
धूपं दत्त्वा तु तत्तैलं सर्वसिद्धिप्रदायकम्॥ २१॥

पद्मोत्पादनम्।—पद्मबीजं क्षिपेत्तैले निक्षिपेच्च तड़ागके।
तत्क्षणाज्जायते चर्य्यां तत्क्षणात् कर्मणोद्भवः॥२२॥

आम्रोत्पादनम्।—तत्तैलमाम्रबीजन्तु निक्षिपेद्बिन्दुमात्रतः।

जायते सफलो वृक्षो नान्यथा शङ्करोदितम् ॥२३॥
यानि कानि च वीजानि अङ्कोलतैललेपनात्।
सफलो जायते वृक्षः सिद्धियोग उदाहृतः ॥ २४ ॥
शवमुखे बिन्दुमात्रं तत्तैलं निक्षिपेद् यदि।
एकया स भवेज्जीवो नान्यथा शङ्करोदितम् ॥२५॥

खण्डदर्शनयोगः।—वर्षाकाले मयूरन्तु कीटकेनैव भोजयेत्।
तद्विष्ठागोमयं युक्तं मृत्तिकासंयुतं ततः ॥
लेपयेदेव सर्वाङ्गे खण्डः खण्डः प्रजायते।
लोके भवति चाश्चर्यं महाकौतुककौतुकम् ॥२६॥

अदृश्यीकरणम्।—मयूरन्तु शिलां तालं भोजयेद्दिनसप्तकम्।
तद्विष्ठां लेपयेद्धस्ते अदृश्यो भवति ध्रुवम् ॥ २७ ॥

प्रतापवर्द्धनम्।— शिग्रुवीजोत्थितं तैलं पारावतपुरीषकम्।
वराहस्य वसायुक्तं गृहीत्वा च समं समम् ॥
गर्दभस्य वसायुक्तं हरितालं मनःशिला।
एभिस्तु तिलकं कृत्वा यथा लङ्केश्वरो नृपः ॥२८॥

महेश्वरीकरणम्।—विल्वपत्रं गृहीत्वा तु कृष्णसर्पवसा समम्।
वृषकेशं गृहीत्वा तु गन्धकञ्च मनःशिलाम् ॥
एभिस्तु तिलकं कृत्वा यथा साक्षात् सदाशिवः।
यस्मै कस्मै न दातव्यं गोपितं न प्रकाशयेत् ॥२९॥

ब्रह्मदर्शनयोगः।—ब्रह्मवृक्षस्य पुष्पन्तु श्वेतं ग्राह्यं प्रयत्नतः।
पेषयेन्नवनीतेन अश्वगन्धा मनःशिलाः।
एभिस्तु तिलकं कृत्वा यथा साक्षात् पितामहः॥३०॥

पद्मदर्शनयोगः।—पयस्विन्याः मृतं बालं तद्गृदे निखनेन्नरः।
हरिद्राग्रन्थिसंयुक्तम् अजादुग्धेन सिञ्चयेत् ॥
यावत् फलति तद्वृक्षस्तां हरिद्रां समाहरेत्।
श्वेतदूर्वाबलाऽरैश्च हरिद्रां तां प्रपेषयेत्।

तल्लिप्तदेहपुरुषः पञ्चधा दृश्यते नरैः ॥ ३१ ॥

पिशाचीकरणम्।—यस्य नामान्वितं मन्त्रं नृकपाले लिखेत् सति !।
भौमे चितायां निक्षिप्ते पिशाचो जायते नरः ॥३२॥

मत्तीकरणम्।—उलूकविष्ठां गृहीत्वा त्वेरण्डतैलेन पेषयेत्।
यस्याङ्गे निक्षिपेद्बिन्दुं क्षिप्तो हि जायते ध्रुवम् ॥३३॥

सूर्यदर्शनम्।— मातुलङ्गस्य वीजेन तैलं ग्राह्यं प्रयत्नतः।
लेपयेत् ताम्रपात्रेण मध्याह्ने च विलोकयेत् ॥
रथेन सहिताकारं भास्करं पश्यति ध्रुवम्।
विना मन्त्रेण सिद्धिः स्यात् सिद्धियोग उदाहृतः ॥३४

दृष्टिबन्धयोगः।—वराहक्रान्तिकामूलं सिद्धार्थस्नेहलेपितम्।
मुखे प्रक्षिप्य लोकानां दृष्टिबन्धं करोत्यलम् ॥३५॥

सद्यो मारणम्।—सर्पदन्तं गृहीत्वा तु कृष्णवृश्चिककण्टकम्।
कृकलासरक्तयुतं सूक्ष्मचूर्णन्तु कारयेत् ॥
यस्याङ्गे निक्षिपेच्चूर्णं सद्यो याति यमालयम्।
विना मन्त्रेण सिद्धिः स्यात् सिद्धियोग उदाहृतः ॥३६

सर्वनर्त्तनयोगः।—पल्लिपुच्छं गृहीत्वा तु वर्त्तिम् ऋतुमतीवसा।
ज्वालिता च रवौ वारे यैर्दृष्टं नृत्यकारकम् ॥३७॥

नटनर्त्तनम्।— कूर्मभुक्तं हरितालं सप्ताहं भोजयेद् ध्रुवम्।
तद्विष्ठा करलेपेन नटा नृत्यन्ति कौतुकम् ॥३८॥

मूत्रस्तम्भनम्।— भौमवारे गृहीत्वा तु मृत्तिकां रिपुमूत्रतः।
कृकलासमुखे क्षिप्त्वा कण्टकवृक्षबन्धनम् ॥
मूत्रबन्धो भवेत् तस्य उद्धृते च पुनः सुखी।
विना मन्त्रेण सिद्धिः स्यात् सिद्धियोग उदाहृतः ॥३९

अग्निदर्शनम्।— सिन्दूरं गन्धकं तालं संपिष्टा च मनःशिलाम्।
तल्लिप्तवस्त्रं शिरसि अग्निश्च दृश्यते ध्रुवम् ॥ ४० ॥

तारकादर्शनम्।—कोद्रवतृणमादाय कार्पासं धवलं तथा।

वर्त्तिं कृत्वा ज्वालयेत् तु कज्जलं पातयेन्निशि ॥
कज्जलेनाञ्जयेन्नेत्रे दृश्यते चैव तारकाः ।
गोमूत्रेणैव प्रक्षाल्य न पश्यत्येव तारकाः ॥ ४१ ॥

अश्वदृष्टिरोधः ।—कृष्णजीरकचूर्णेन अञ्जितोऽश्वो न पश्यति ।
तक्रेण चालयेच्चक्षुः सुस्थो भवति घोटकः ॥४२॥

अश्वमारणम् ।— अश्वास्थिकीलमश्विन्यां कुर्य्यात् सप्ताङ्गुलं ततः ।
निखनेदश्वशालायां मारयत्येव घोटकान् ॥४३॥

रजतीकरणम् ।—गृहीत्वा मृत्तिकां गन्धं कदलीरससंयुतम् ।
ताम्रपात्रे प्रलिप्तेन जायते रौप्यभाजनम् ॥४४॥

आकाशगमनम् ।—कृकलासाण्डमादाय छिद्रेण पारदं क्षिपेत् ।
सम्मुखे भास्करं कृत्वा आकाशं गच्छति ध्रुवम् ॥४५॥

दुग्धीकरणम् ।—अर्कक्षीरं वटक्षीरं क्षीरमौडुम्बरं तथा ।
गृहीत्वा पात्रकं लिप्तं जलपूर्णं करोति च ।
दुग्धं सञ्जायते तत्र महाकौतुककौतुकम् ॥४६॥

गुड़ीकरणम् ।— पत्रं गृहीत्वा गुञ्जायाः प्रथमं भक्षयेन्नरः ।
पश्चाच्च मृत्तिकां भुङ्क्ते कृष्णरात्रौ तु कौतुकम् ।
मृत्तिका गुड़वत् भाति महाकौतुककौतुकम् ॥४७॥

राक्षसीकरणम् ।—अङ्कोलतैललिप्ताङ्गो दृश्यते राक्षसाकृतिः ।
पलायन्ते नराः सर्वे पशुपक्षिमृगादयः ॥ ४८ ॥

खेचरदर्शनम् ।—अङ्कोलस्य तु तैलेन दीपं प्रज्वालयेन्नरः ।
रात्रौ पश्यति भूतानि खेचराणि महीतले ॥४९॥

शस्त्रोत्तेजनम् ।—अङ्कोलतैललिप्तानि शस्त्राणि यानि कानि च ।
दृष्ट्वा वै मूर्च्छितो भूत्वा पतत्येवं महीतले ॥
रणे दारुणशस्त्रौघं दृष्ट्वैव च पलायते ।
नरादि-सर्वजीवानां नान्यथा शङ्करोदितम् ॥५०॥

मूत्रदीपनम् ।— त्रिदिनं भोजनं कृत्वा तिलं सर्षपसंयुतम् ।

तन्मूत्रे ज्वालिते दीपे महाकौतुककौतुकम्॥ ५१॥

वशीकरणम्।—नृकपाले रवौ वारे तण्डुलैः पायसं कृतम्।
छायाशुष्कन्तु तच्चूर्णं कृत्वा खाने प्रदीयते॥
यावज्जीवं वशं याति नारी वा पुरुषोऽपि वा।
अदासी दास्यतां याति प्राणैरपि धनैरपि॥५२॥

युग्ममुद्रायोगः।—मण्डूकद्वितयं ग्राह्यम् एका नार्य्यपरो नरः।
तद्द्वयोमुखमध्ये च मुद्रां स्वर्णञ्च दीयते॥
श्मशाने गर्त्तमध्ये च निखनेद् भूतले ध्रुवम्।
युग्मसंज्ञा चितावामे चितापुरुषदक्षिणे॥
एकादशदिनं यावत् गन्धकं धूपयेत् ततः।
तद्दिने च गृहीत्वा तु मुद्रिकां ग्राह्य यत्नतः॥
युग्मसंज्ञां मुद्रिकाञ्च त्रिलौहैर्वेष्टितां क्रियात्।
दक्षिणे बाहुमूले च कण्ठस्थाने विशेषतः॥
धारयेच्च इमां सत्यं सिद्धियोग उदाहृतः।
युग्मसंज्ञा मुद्रिका च संसारे दीयते तथा॥
व्यापकं तस्य कृत्वा तु यथेच्छं सुखमाप्नुयात्।
क्षणमात्रे हस्तमध्ये आगच्छति न संशयः॥
यावज्जीवन्नरः सत्यं तावत् कौतुककौतुकम्।
युग्मसंज्ञा इयं सत्यं सिद्धियोग उदाहृतः॥ ५३॥

वस्तुवर्द्धनम्।— रविवारे गृहीत्वा तु मार्जारीनालमादरात्।
यस्य वस्तुनि निक्षिप्तं तद्वस्तु वर्द्धयेत् ध्रुवम्॥५४॥

कलहनाशनम्।—नालिकां तक्रसंपिष्टमृत्तिकायुक्तपुत्तलीम्।
निखनेद् गृहमध्ये च कलहं नाशयेदियम्॥५५॥

कलहकृद्योगः।—शल्लकीकण्टकं ग्राह्यं नव वा पञ्चभिः सह।
सौर्य्यहे निखनेद्द्वारे कलहो भवति ध्रुवम्॥५६॥

क्लीबीकरणम्।— बुधवारे शनेर्वारे गृह्णीयात् सरटं बुधः।

शत्रुर्मूत्रयते यत्र धीरस्तं तत्र निक्षिपेत् ॥
निखनेद्भूमिमध्ये च उद्धृते च पुनः सुखी ।
नपुंसकं भवेत् सत्यं नान्यथा शङ्करोदितम् ॥५७॥

प्रमदाकर्षणम् ।—चाटकं मैथुनं पश्येद् यावद् वारं करोति च ।
तावद् ग्रन्थिश्च सूत्रेण दीयते कौतुकं महत् ॥
कृकलासस्य रक्तेन लेपितं सूत्रग्रन्थिकम् ।
आगच्छति महारूपाऽबला स्वच्छन्दचारिणी ॥
स्खलिता मध्यग्रन्थिश्चेत् योषिद्वीर्य्यं स्रवत्यलम् ।
विना मन्त्रेण सिद्धिः स्यात् सिद्धियोग उदाहृतः ॥५८॥

पुंस्त्ववर्द्धनयोगः ।—गृहीत्वा विजयावीजं यत्नात् तैलानि ग्राहयेत् ।
तत्तैलमहिफेनञ्च विषं जातीफलं तथा ॥
धुस्तूरवीजचूर्णन्तु गृहीत्वा तु समं समम् ।
नवनीतेन तैलेन पेषयेत् सर्वमौषधम् ॥
अष्टयामे कृते तन्त्रे महाकौतुककौतुकम् ।
तत्तैलं बिन्दुमात्रेण लिङ्गलेपेन कारयेत् ॥
भोगैषिणः न तृप्यन्ति जायते मुषलोपमम् ।
दृष्टं दीर्घं भवेत्सद्यः सिद्धियोग उदाहृतः ॥५९॥

शस्यारिकीलनम् ।—रविवारे गृहीत्वा तु मृत्तिकाभाण्डसम्मुखम् ।
तस्य मध्ये स्थितं कृत्वा अर्ककीलं नवाङ्गुलम् ॥
सुश्वेतदूर्वया युक्तम् अश्वगन्धां मनःशिलाम् ।
ताम्बूलसंयुतं कृत्वा तुलसीपत्रकैः सह ॥
अपामार्गपत्रयुक्तं धात्रीपत्रं तथैव च ।
वटपत्रं तयोर्मध्ये घृतं मिष्टान्नदुग्धकम् ॥
मुखे वस्त्रेण संवेष्ट्य निखनेत् शस्यमध्यके ।
तस्योपरि भूर्जपत्रे सदा पञ्चदशीं लिखेत् ॥
शलभा मृगपा मूषा शृगालाः कीटकं तथा ।

पशुपक्षिनराश्चौराः जायन्ते कीलितास्तदा ॥
वसुन्धरा शस्यपूर्णा न विघ्नं परिभूयते।
यस्मै कस्मै न दातव्यं नान्यथा शङ्करोदितम् ॥६०॥

विघ्नविनाशनम्।—गन्धकं हरितालञ्च गोमूत्रञ्च विषं तथा।
सूक्ष्मचूर्णमयं कृत्वा वह्निःकिञ्चिद्विनिक्षिपेत् ॥
विघ्नाः सर्वे पलायन्ते यथा युद्धेषु कातराः।
विना मन्त्रेण सिद्धिः स्यात् सिद्धियोग उदाहृतः।
इन्द्रजालं महाविद्यां विद्यानां सर्वमुत्तमम् ॥६१॥

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे इन्द्रजालकौतुकदर्शनं नाम एकादशः पटलः।

अथ यक्षिणीमन्त्रसाधनम्।

ईश्वर उवाच।—शृणु सिद्धिं महायोगिन् यक्षिणीमन्त्रसाधने।
यस्य साधनमात्रेण नृणां सर्वे मनोरथाः ॥
अश्वत्थवृक्षमारुह्य जपेदेकाग्रमानसः।
धनदात्री यक्षिणी च धनं प्राप्नोति मानवः ॥

अत्र मन्त्रः।—"ओं ऐं क्लीं श्रीं धनं कुरु कुरु स्वाहा"। अयुतजपेन सिद्धिः ॥ १ ॥

चूतवृक्षसमारूढो जपेदेकाग्रमानसः।
अपुत्रो लभते पुत्रं नान्यथा शङ्करोदितम् ॥

अत्र मन्त्रः।—"ओं ऋां ऋीं ऋूं पुत्रं कुरु कुरु स्वाहा"। अयुतं जपेत् ॥२॥

वटवृक्षसमारूढो जपेदेकाग्रमानसः।
महालक्ष्मीर्यक्षिणी च स्थिरा लक्ष्मीश्च प्राप्यते ॥

अत्र मन्त्रः।—"ओं ऋीं क्लीं महालक्ष्म्यै नमः"। अयुतं जपेत् ॥ ३ ॥

अर्कमूलसमारूढो जपेदेकाग्रमानसः।
यक्षिणी च जया नाम सर्वकार्य्ये जयङ्करी ॥

अत्र मन्त्रः।—"ओं जयं कुरु कुरु स्वाहा"। अयुतं जपेत् ॥ ४ ॥

धात्रीमूलसमारूढ़ो जपेदेकाग्रमानसः।
अशुभक्षययक्षिण्यो अशुभक्षयकारिकाः ॥

अत्र मन्त्रः।—"ओं ऐं क्लीं नमः"। अयुतं जपेत् ॥ ५ ॥

तुलसीमूलमारूढ़ो जपेदेकाग्रमानसः।
अकस्माद्राज्यमाप्नोति नान्यथा शङ्करोदितम् ॥

अत्र मन्त्रः।—"ओं क्लीं क्लीं नमः"। अयुतं जपेत् ॥ ६ ॥

अङ्कोलवृक्षमारूढ़ो जपेदेकाग्रमानसः।
राजाधिराजो भवति नान्यथा शङ्करोदितम् ॥

अत्र मन्त्रः।—"ओं ह्रौं नमः"। अयुतं जपेत् ॥ ७ ॥

कुशमूलसमारूढ़ो जपेदेकाग्रमानसः।
सर्वकार्य्याणि सिध्यन्ति नान्यथा शङ्करोदितम् ॥

अत्र मन्त्रः।—"ओं वाङ्मयायै नमः"। अयुतं जपेत् ॥ ८ ॥

अपामार्गसमारूढ़ो जपेदेकाग्रमानसः।
वाचां सिद्धिर्भवेत् सत्यं नान्यथा शङ्करोदितम् ॥

अत्र मन्त्रः।—"ओं ह्रीं भारत्यै ईं नमः"। अयुतं जपेत् ॥ ९ ॥

उडुम्बरसमारूढ़ो जपेदेकाग्रमानसः।
भवेत् पुस्तकसंसिद्धिः सर्वविद्याश्चतुर्दश ॥

अत्र मन्त्रः।—"ओं ह्रीं श्रीसारदायै नमः"। अयुतं जपेत् ॥ १० ॥

निर्गुण्डीमूलमारूढ़ो जपेदेकाग्रमानसः।
विद्याप्राप्तिर्भवेन्नित्यं नान्यथा शङ्करोदितम् ॥

अत्र मन्त्रः।—"ओं सरस्वत्यै नमः"। अयुतं जपेत् ॥ ११ ॥

श्वेतगुञ्जासमारूढ़ो जपेदेकाग्रमानसः।
सन्तोषा नाम यक्षिण्यो ददते वाञ्छितं फलम् ॥

अत्र मन्त्रः।—"ओं जगन्मात्रे नमः"। अयुतं जपेत् ॥ १२ ॥

एकलिङ्गं महादेवं त्रिकालं पूजयेत् सदा।
धूपं दत्त्वा जपेन्मन्त्रं संयतस्त्रिसहस्रकम्॥
मासमेकं ततो याति यक्षिणी सुरसुन्दरी।
"देवि! दारिद्र्यदग्धोऽस्मि तस्य नाशकरी भव"॥
दत्त्वाऽर्घ्यं प्रणमेन्मन्त्री वदेत् सा "त्वं किमिच्छसि?"।
ततो ददाति सा तुष्टा वित्तायुश्चिरजीवितम्॥

अत्र मन्त्रः।—"ओं क्लीं आगच्छ आगच्छ सुरसुन्दरि! स्वाहा"। अयुतं जपेत्॥ १३॥

कुङ्कुमेन समालिख्य भूर्जपत्रे सुलक्षणे।
प्रतिपत्तः समारभ्य पूजां कृत्वा जपेत्ततः॥
त्रिसन्ध्यं त्रिसहस्रन्तु मासान्ते पूजयेन्निशि।
संजपेदर्द्धरात्रे तु समागत्य प्रयच्छति॥
दीनाराणां सहस्रन्तु प्रत्यहं परितोषिता।
यस्मै कस्मै न दातव्यं नान्यथा शङ्करोदितम्॥

अत्र मन्त्रः।—"ओं अनुरागिणि मैथुनप्रिये! स्वाहा"। अयुतं जपेत्॥ १४॥

शुक्लपक्षे जपेत् तावद् यावत् पश्येत् क्षपाकरम्।
प्रतिपत् पूर्वमारभ्य एकलक्षमिदं जपेत्॥
अमृता यक्षिणी नाम अमृतं दीयते तया।
यस्मै कस्मै न दातव्यं पीत्वा तदमरो भवेत्॥

अत्र मन्त्रः।—"ओं क्लीं चन्द्रिके! हंसः ओं क्लीं स्वाहा"। अयुत जपेत्॥ १५॥

पूर्वमेवायुतं जप्त्वा कृष्णकन्याऽभिमन्त्रणम्।
हस्तपादप्रलेपेन स्वप्ने वक्ति शुभाशुभम्॥
त्रैलोक्ये यादृशी वार्त्ता तादृशी कथयेत् फलम्।
कर्णपिशाचिनी नाम नान्यथा शङ्करोदितम्॥

अथ मन्त्रः।—"ओं क्लीं चण्डवेगिनि वरदे! स्वाहा"। अयुतं जपेत् ॥ १६ ॥

अलर्के मूलिकापुष्ये तथा सर्पाक्षिमूलिकाम्।
ग्राह्याभिमन्त्रितां यच्च रक्तसूत्रेण वेष्टयेत् ॥
मूर्ध्नि बद्ध्वा कृता सुप्तः वक्तव्यञ्च शुभाशुभम्।
त्रैलोक्ये यादृशी वार्त्ता तादृशीं कथयेदलम् ॥

अथ मन्त्रः।—"ओं नमो भगवते रुद्राय कर्णपिशाचाय स्वाहा"। अयुतं जपेत् ॥ १७ ॥

प्रविश्य नगरस्यान्तं लक्षसंख्यं जपेन्मनुम्।
पद्मपत्रैर्घृतोपेतैः कृत्वा होमं दशांशतः ॥
प्रयच्छत्यञ्जनं हंसो येन पश्यति भूनिधिम्।
सुखं तमनुगृह्णाति न विघ्नैः परिभूयते ॥

अथ मन्त्रः।—"ओं हंसि हं याने! क्लीं क्लीं स्वाहा"। अयुतं जपेत् ॥१८॥

इति दत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे यक्षिणीसाधनं नाम द्वादशः पटलः ॥

अथ रसायनम्।

ईश्वर उवाच।—गोमूत्रं हरितालञ्च गन्धकञ्च मनःशिलाम्।
समं समं गृहीत्वा तु यावत् शुष्यति पेषणात् ॥
एकादशदिनं यावत् यत्नेन रक्षयेत् शुचिः।
मन्त्रेण धूपदीपादिनैवेद्यैर्दुग्धमिश्रितैः ॥

मन्त्रस्तु।—"ओं नमो हरिहराय रसायनं सिद्धिं कुरु कुरु स्वाहा"। अयुतजपेन सिद्धिः ॥ १ ॥

तद्वटीं गोलकं कृत्वा वस्त्रेण वेष्टयेत् पुनः।
मृत्तिकां लेपयेत् तच्च छायाशुष्कन्तु कारयेत् ॥
गर्त्ते कुण्डे विनिक्षिप्ते पलाशकाष्ठवह्निना।
ज्वालयेदष्टयामन्तु नान्यथा शङ्करोदितम् ॥

तद्भस्म जायते सिद्धिं विद्धि सिद्धिसमाकुलम्।
ताम्रपात्रे अग्निमध्ये बिन्दुमात्रं नियच्छति॥
तत्क्षणाज्जायते स्वर्णं नान्यथा शङ्करोदितम्।
दातव्यं गुरुभक्ताय न दद्याद् दुष्टमानसे॥
सिद्धपीठे भवेत् सिद्धिर्गायत्रीलक्षजापनैः।
यस्मै कस्मै न दातव्यं दातव्यं शिवभक्तके॥
अग्निमुखद्विजातीनां पाचकानां विशेषतः।
गोप्यं गोप्यं महागोप्यं देवानामपि दुर्लभम्॥
रसप्रतिक्रियां कृत्वा गोप्यं नैव प्रकाशयेत्।
वनितापुत्रमित्रादिगोप्यं सिद्धिप्रदायकम्॥
आनीय बहुयत्नेन सम्बलं तोलकद्वयम्।
वसुराद्यं शिवश्चाद्यं मायाबिन्दुसमन्वितम्॥
बीजत्रयञ्चाष्टशतं प्रजपेत् सम्बलोपरि।
अशीतितोलकं मानं कृष्णधेनुसमुद्भवम्॥
दुग्धमानीय यत्नेन चाष्टोत्तरशतं जपेत्।
वस्त्रयुक्तेन सूत्रेण दुग्धमध्ये विनिक्षिपेत्॥
उत्तापं ज्वालयेद्धीमान् मन्दमन्देन वह्निना।
रिपुर्वेदार्द्धपर्य्यन्तमर्द्धशेषं भवेद् यदि।
तदैवोत्तोल्य तद्द्रव्यं दग्धं तोये विनिक्षिपेत्॥ २॥

ततः परीक्षा कर्त्तव्या।

निर्धूमं पावके द्रव्यं दृष्ट्वा उत्थाप्य यत्नतः।
तत्रैव प्रजपेन्मन्त्रं सर्वमङ्गलमात्मकम्॥
सार्द्धेन तोलनं ताम्रं वह्निमध्ये विनिक्षिपेत्।
यथा वह्निस्तथा ताम्रं दृष्ट्वा उत्थाप्य यत्नतः॥
गुञ्जाप्रमाणं तद्द्रव्यं सत्यं सत्यं हि शङ्करि!।
रौप्यं भवति तद्द्रव्यं नान्यथा शङ्करोदितम्॥ ३॥

अन्यमतेन।—कृष्णसर्पमेकं गृहीत्वा तस्य मुखे शिववीर्य पूरयित्वा सर्पस्य मुखं गुदञ्च बद्ध्वा नूतनमृन्मयस्थालीमध्ये संस्थाप्य स्थालीमुखं मृदादिना संलिप्य निर्जनस्थाने प्रातरारभ्य पुनः प्रातर्यावत् वह्निना ज्वालं दद्यात्। ततः शुभक्षणे स्थालीमुखमुद्धृत्य सर्पभस्म विहाय शिववीर्य्यं गृह्णीयात्। ततस्तोलकमितं ताम्रं गालयित्वा तस्मिन् गलितताम्रे रक्तिका- मात्रं तत् शिववीर्य्यं दद्यात्, तेन तत्क्षणादेव तत् ताम्रं सुवर्णी- भूतं जायत इति। आदौ शिवार्चनं कृत्वा पश्चात् प्रयोग एष प्रकर्त्तव्यः॥ ४॥

इति दत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे रसायनं नाम त्रयोदशः पटलः।

अथ मृत्युकालज्ञानम्।

शृणु सिद्धिं महायोगिन् दत्तात्रेय! महामुने!।
मनुष्याणां हितार्थाय मृत्युज्ञानञ्च कथ्यते॥ १॥
दातव्यं गुरुभक्ताय न दद्याद्दुष्टमानसे।
यस्मै कस्मै न दातव्यं नान्यथा शङ्करोदितम्॥ २॥
न दृष्टा नासिका येन नेत्रभ्रमरदृष्टिकः।
षण्मासाभ्यन्तरे मृत्युर्यदि पाति पितामहः॥ ३॥
न दृष्टाऽरुन्धती येन सप्तर्षीणाञ्च मध्यतः।
षण्मसाभ्यन्तरे मृत्युर्यदि रक्षति ईश्वरः॥ ४॥
स्नानस्य समये चैव मृत्युज्ञानं निरीक्षते।
हृदि शुष्कं भवेद् यस्य षण्मासस्तस्य जीवनम्॥ ५॥
बुद्धिज्ञानं क्रियाहीनं विपरीतन्तु जायते।
द्विमासेन भवेन्मृत्युः सत्यमेव न संशयः॥ ६॥
गतिचालनपादानां खण्डितं खण्डितं पदम्।
मासेन मृत्युमाप्नोति अथवा पक्षशेषतः॥ ७॥

दलद्वादशचक्रस्थं मृत्युकालञ्च वीक्षितम् ।
चैत्रादिमाससंख्यानि लिख्यन्ते दलद्वादशे ॥ ८ ॥
मेषादिराशयः स्थाप्याः सूर्य्यादिर्लिख्यते ग्रहः ।
जन्मऋक्षं जन्मराशिं वीक्षते मृत्युकालके ॥ ९ ॥
शनिभौमकेतुराहु-राशिविद्धे तु कष्टभाक् ।
ऋक्षविद्धे राशिविद्धे कालमृत्युर्न संशयः ॥ १० ॥
सूर्य्यवेधे मनस्तापं बुधे सौख्यं प्रवर्त्तते ।
तीर्थयात्रा हि जीवे च चन्द्रे स्त्रीसुखसम्पदः ॥ ११ ॥
भृगुवेधे राज्यलाभं मासे मासे विचारयेत् ।
वर्षं द्वादशमासानि मृत्युकाले वदन्ति च ॥ १२ ॥
अहोरात्रं यदैकत्र वहते पात्रमध्यतः ।
तदा तस्य भवेदायुः सम्पूर्णवत्सरत्रयम् ॥ १३ ॥
अहोरात्रद्वयं पश्येत् पिङ्गलायां सदागतिम् ।
तस्य वर्षद्वयं प्रोक्तं जीवितं तत्त्ववेदिभिः ॥ १४ ॥
त्रिरात्रं वहते यस्य वायुरेकपुरे स्थितः ।
संवत्सरं तदा आयुः प्रवदन्ति मुनीश्वराः ॥ १५ ॥
रात्रौ चन्द्रं दिवा सूर्य्यं मासमेकं निरन्तरम् ।
पश्येन्मृत्युर्नरस्यास्य षण्मासाभ्यन्तरे ध्रुवम् ॥ १६ ॥
शशाङ्कं वारयेद्रात्रौ दिवा यश्च दिवाकरम् ।
इत्यभ्यासरतो नित्यं स योगी नात्र संशयः ॥

अत्र मन्त्रः ।—"ओँ नमः कालरूपाय कालज्ञानं कुरु कुरु स्वाहा" । अयुतजपात् सिद्धिः ॥ १७ ॥

इति दत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे मृत्युकालज्ञानं नाम चतुर्दशः पटलः ।

अथ अनाहारः ।

ईश्वर उवाच ।—अन्त्राणि कृकलासस्य मज्जां कारञ्जवीजिकाम् ।
पिष्ट्वा तु वटिकां कृत्वा त्रिलौहेन तु वेष्टयेत् ॥
तां वक्त्रे धारयेद् यस्तु क्षुत्पिपासा न बाधते ।
यस्मै कस्मै न दातव्य नान्यथा शङ्करोदितम् ॥ १ ॥
पद्मवीजं महेशानि ! छागीदुग्धेन पेषयेत् ।
साज्यं तत् पायसं कृत्वा भोक्तव्यं द्वादशं दिनम् ॥२॥
अपामार्गस्य वीजानि अजादुग्धेन पाचयेत् ।
पायसं वटिका चारैर्भुक्ता मासं क्षुधापहा ॥ ३ ॥
कोकिलाक्षस्य वीजञ्च विजयावीजसंयुतम् ।
तुलसीवीजसंयुक्तं ताम्बूलमूलसंयुतम् ॥
छागीदुग्धेन संपिष्य वटिका क्रियते नरैः ।
भक्षयेत् प्रातरुत्थाय क्षुत्पिपासा न बाधते ॥ ४ ॥
पद्मवीजमपामार्गं तुलसीवीजसंयुतम् ।
धात्रीवीजसमायुक्तं वटिका क्रियते नरैः ॥
तस्य भक्षणमात्रेण तस्योपरि गवां पयः ।
क्षुत्पिपासाहरं नित्यं नान्यथा शङ्करोदितम् ॥ ५ ॥
ओषधिः कुण्डली नाम द्विहस्तोऽस्याश्च काण्डकः ।
एरण्डसदृशं पत्रं पुष्पञ्चापि सुलक्षणम् ॥
तस्याः कन्दं समादाय ताम्बूलटङ्कमात्रतः ।
भक्षणं प्रातरुत्थाय क्षुत्पिपासाहरं परम् ॥

मन्त्रस्तु ।—"ओं नमः सिद्धिरूपाय मम शरीरे अमृतं कुरु कुरु स्वाहा"। अष्टोत्तरशतजपेन सिद्धिः ॥ ६ ॥

इति दत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे अनाहारः नाम पञ्चदशः पटलः ।

अथ अत्यन्ताहारः।

धातकीनामवृक्षस्य पत्रं सितोपलैर्युतम्।
पलं भुङ्क्ते घृतैः सार्द्धं भोजने भीमसेनवत्॥ १॥
सन्ध्यायां पुष्पवृक्षस्य कर्त्तव्यमभिमन्त्रणम्।
प्रातः पुष्पाणि संगृह्य माला शिरसि धार्य्यते॥
कौपीनं संपरित्यज्य भोजने भीमसेनवत्।
यस्मै कस्मै न दातव्यं सिद्धियोग उदाहृतः॥ २॥
उष्ट्रानुपत्रमादाय कपिलाश्वानदन्तकम्।
कण्ठामिव द्वयं बद्धा भोजने भीमसेनवत्॥ ३॥
गृहीत्वा मन्त्रितं मन्त्री विभीततरुपल्लवम्।
धारयेद्दक्षिणे हस्ते विषमाहारभुग् भवेत्॥ ४॥
अधरं कृकलासस्य शिखास्थाने च बन्धयेत्।
वायुपुत्र इवाश्चर्य्यं स भुङ्क्ते वरपर्वतम्॥

मन्त्रस्तु।—"ओं नमः सर्वभूताधिपतये ग्रसय ग्रसय शोषय
षय क्षोभय क्षोभय भैरवो आज्ञापयति स्वाहा"। अयुतजपेन
द्धिः॥ ५॥

इति दत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे अत्यन्ताहारः नाम षोड़शः पटलः॥

अथ निधिग्रहणम्।

र उवाच।—शिरीषवृक्षपञ्चाङ्गं कटुतैलेन पाचितम्।
विषञ्चैव समायुक्तं धुस्तूरबीजसंयुतम्॥
पञ्चाङ्गं करवीरञ्च श्वेतगुञ्जासमन्वितम्।
उष्ट्रविष्ठासमायुक्तं गन्धकञ्च मनःशिला॥
धूपं दत्त्वा जपेन्मन्त्रं निधिस्थाने विशेषतः।
पलायन्ते निधिं त्यक्त्वा यथा युद्धेषु कातराः॥

राक्षसाः भूतवेतालाः देवदानवपन्नगाः।
सुखेन गृह्णाति निधिं न विघ्नैः परिभूयते॥

मन्त्रस्तु।—"ओं नमो विघ्नविनाशाय निधिग्रहणं कुरु कु
स्वाहा"। अयुतजपेन सिद्धिः॥ १॥

इति दत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे निधिग्रहणं नाम सप्तदशः पटलः।

अथ बन्ध्यागर्भधारणम्।

ईश्वर उवाच।—जन्मबन्ध्या काकबन्ध्या मृतवत्सा क्वचित् स्त्रियः।
तासां पुत्रहितार्थाय शम्भुना सूचितं पुरा॥१॥
पत्रमेकं पलाशस्य गर्भिणी-पयसाऽन्वितम्।
ऋत्वन्ते तच्च पीत्वा हि बन्ध्या भवति पुत्त्रिणी॥
एवं सप्तदिनं कुर्य्यात् शोकोद्वेगविवर्जितम्।
पतिसङ्गं गता सा च नात्र कार्य्या विचारणा।
क्षीरशाल्यन्नमुद्गञ्च लघ्वाहारं प्रदापयेत्॥२॥
एकमेव तु रुद्राक्षं सर्पाक्षीकर्षमात्रकम्।
एकवर्णगवां क्षीरम् ऋतुकाले प्रदापयेत्॥
एवं सप्तदिनं कुर्य्याद् बन्ध्या भवति पुत्त्रिणी।
यस्मै कस्मै न दातव्यं नान्यथा शङ्करोदितम्॥३॥
देवदानीयमूलानि ग्राहयेत् पुष्यभास्करे।
ऋत्वन्ते तानि पीतानि एकवर्णगवां पयः॥
एवं सप्तदिनं कुर्य्याद् बन्ध्या पुत्त्रवती भवेत्।
उद्वेगभयशोकञ्च दिवा रात्रिञ्च वर्जयेत्॥ ४॥
शीततोयेन संपिष्य शरपुङ्खीयमूलकम्।
कर्षं पीत्वा लभेद् गर्भं सा नारी पतिसङ्गमे॥५॥
समूलां सहदेवीं च ग्राह्या पुष्यार्कवासरे।
छायाशुष्कन्तु तच्चूर्णम् एकवर्णगवां पयः॥

पूर्ववत् पीयते नार्य्या वन्ध्या भवति पुत्त्रिणी।
यस्मै कस्मै न दातव्यं सिद्धियोग उदाहृतः॥ ६॥
नागकेशरचूर्णन्तु नूतनं गव्यदुग्धकम्।
पिबेत् सप्तदिनं दुग्धं घृतैर्भोजनमाचरेत्॥
ऋत्वन्ते लभते गर्भं सा नारी पतिसङ्गतः।
सिद्धियोगमिदं चूर्णं नान्यथा शङ्करोदितम्॥ ७॥
पुत्त्रजीवकपत्रैकं पिबेत् चीरे ऋतौ च या।
पतिसङ्गकृता नारी सत्यं पुत्रवती भवेत्॥८॥
कदम्बपत्रं श्वेतायाः वृहत्या मूलमेव च।
एतानि समभागानि अजाचीरेण पेषयेत्॥
त्रिरात्रं पञ्चरात्रं वा पिबेदेतन्महौषधम्।
सत्यं पुत्त्रवती वन्ध्या नान्यथा शङ्करोदितम्॥९॥
वीजं गोक्षुरकस्यैवं पिबेन्निर्गुण्डिकारसैः।
त्रिरात्रं पञ्चरात्रं वा वन्ध्या भवति पुत्त्रिणी॥१०॥
कर्कोटवीजचूर्णन्तु एकवर्णगवां पयः।
घृतेन पीयमाने तु बन्ध्या भवति पुत्त्रिणी॥

मन्त्रस्तु।—"श्रीं नमः सिद्धिरूपाय अमुकीं पुत्त्रवतीं कुरु कुरु स्वाहा"। अष्टोत्तरशतजपेन सिद्धिः॥ ११॥

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे बन्ध्यागर्भधारणं नाम अष्टादशः पटलः।

अथ मृतवत्सासुतजीवित्वम्।

गर्भसञ्जातमात्रेण पक्षे मासि च वत्सरे।
पुत्रो म्रियेत वर्षादौ यस्याः सा मृतवत्सिका॥ १॥
गृहीत्वा शुभनक्षत्रे त्वपामार्गस्य मूलकम्।
गृहीत्वा लक्ष्मणामूलम् एकवर्णगवां पयः॥
पीत्वा सा लभते गर्भं दीर्घजीवी सुतो भवेत्।
यस्मै कस्मै न दातव्यं नान्यथा शङ्करोदितम्॥२॥

बन्ध्या कर्कोटिकाकन्दं पीतं मोचारसेन च।
ऋतुकाले तु सप्ताहं दीर्घजीवी सुतो भवेत्॥
अत्र योगः प्रकर्त्तव्यो यथाशङ्करभाषितम्॥ ३॥
मार्गशीर्षेऽथवा ज्येष्ठे पूर्णायां लेपिते गृहे।
नूतनं कलसंपूर्णं गन्धतोयेन कारयेत्॥
शाखाफलसमायुक्तं नवरत्नसमन्वितम्।
सुवर्णमुद्रिकायुक्तं षट्कोणमण्डले स्थितम्॥
तन्मध्ये पूजयेद्देवीमेकान्तीनामविश्रुताम्।
गन्धपुष्पाक्षतैर्धूपैर्दीपैर्नैवेद्यसंयुतैः।
अर्चयेद् भक्तिभावेन मत्स्यमांसैः समद्यकैः॥
वाराही च तथा चैन्द्री ब्राह्मी माहेश्वरी तथा।
कौमारी वैष्णवी देवी षट्सु पत्रेषु मातरः॥
पूजयेन्मन्त्रवीजेन दधिपिण्डानि कारयेत्।
सप्तसंख्याप्रमाणानि षट्संख्या षट्सु पत्रतः॥
सप्तमन्तु पृथक् कृत्वा श्रुतिस्थाने विशेषतः।
तद्भुक्ते गृहमागच्छेत् कन्यका वटवः स्त्रियः॥
भोजयेद्दक्षिणां दत्त्वा प्रमाणं कारयेत् ततः।
विसृज्य देवतां तस्यां नद्यां तत्कालसोदकम्॥
स्वकुलं वीक्षयेत् धीमान् शुभेन शुभमादिशेत्।
विपरीते पुनः कार्य्यं योगान्तरसुसिद्धिदम्॥
प्रतिवर्षमिदं कुर्य्याद्दीर्घजीविसुतं लभेत्।
सिद्धियोगमिदं ख्यातं नान्यथा शङ्करोदितम्॥

मन्त्रस्तु।—"ओं परमं ब्रह्मपरमात्मने अमुकीगर्भे दीर्घजीविसुतं कुरु कुरु स्वाहा"। अष्टोत्तरशतजपेन सिद्धिः॥ ४॥

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे मृतवत्सासुतजीवित्वं नाम ऊनविंशः पटलः।

अथ काकवन्ध्याप्रयोगः।

पूर्वं पुत्त्रवती या सा क्वचिद्वन्ध्या भवेद् यदि।
काकवन्ध्या तु सा ज्ञेया चिकित्सा तत्र कथ्यते ॥१॥
विष्णुक्रान्तां समूलान्तु पिष्ट्वा माहिषदुग्धके।
महिषीनवनीतेन ऋतुकाले तु भक्षयेत्॥
एवं सप्तदिनं कुर्य्यात् पथ्यमुक्तञ्च पूर्ववत्।
गर्भं सा लभते नारी काकवन्ध्या सुशोभनम् ॥२॥
मूलन्तु हयगन्धायाः ग्राहयेत् पुष्यभास्करे।
पेषयेन्माहिषक्षीरैः पलार्द्धं भक्षयेत् सदा॥
सप्ताहाल्लभते गर्भं काकवन्ध्या चिरायुषम्।
यस्मै कस्मै न दातव्यं नान्यथा शङ्करोदितम्॥
मन्त्रस्तु।—"श्रीं नमः शक्तिरूपाय अस्याः गृहे पुत्रं कुरु कुरु स्वाहा"। अष्टोत्तरशतजपेन सिद्धिः॥ ३ ॥

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे काकवन्ध्यापुत्रकरणं नाम विंशः पटलः।

अथ विवादविजयम्।

ईश्वर उवाच।—मार्गशीर्षे च पूर्णायां शिखिमूलन्तु बन्धयेत्।
बाहौ शिरसि वा धार्य्यं विवादे विजयी भवेत् ॥१॥
कृष्णसर्पकपाले तु शवमृत्तिकयान्विते।
श्वेतगुञ्जां क्षिपेत् तत्र तस्या मूलं समाहरेत्॥
ललाटे तिलकं कुर्य्यात् पश्येत्तं पञ्चधा रिपुः।
खगणैर्भक्ष्यमाणस्तु पतितश्च ततो भुवि ॥२॥
करे सुदर्शनामूलं बद्ध्वा राजकुले जयी ॥३॥

जयामूलं राजकुले सुखसंस्थं जयप्रदम् ॥ ४ ॥
लिप्यन्ते यानि शस्त्राणि ह्यपामार्गरसेन वै।
जायन्ते तानि संग्रामे रक्तसाराणि निश्चितम् ॥ ५ ॥
गृहीत्वा पुष्यनक्षत्रे श्वेतगुञ्जीयमूलकम्।
धारयेद्दक्षिणे हस्ते द्रुतं कार्य्ये जयो भवेत् ॥ ६ ॥
धुस्तूरं करवीरञ्च ह्यपामार्गस्य मूलकम्।
हरितालसमायुक्तं तिलकं सुदिने कृतम् ॥ ७ ॥
अजाक्षीरेण संपिष्य रणे राजकुले जयी।
विवादे दूतकार्य्ये च नान्यथा शङ्करोदितम् ॥

मन्त्रस्तु।—"ओं नमो विश्वरूपाय अमुकस्य अमुकेन विजयं कुरु कुरु स्वाहा"। अष्टोत्तरशतजपेनैव सिद्धिः ॥ ८ ॥

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे विवादविजयं नाम एकविंशः पटलः।

अथ वाजीकरणम्।

ईश्वर उवाच।—

बलेन नारी परितोषमेति न हीनवीर्य्यस्य कदापि सौख्यम्।
अतो बलार्थं रतिलम्पटस्य वाजीविधानं प्रथमं विधत्ते ॥१॥

वल्कलं चूतवृक्षस्य मृत्पात्रे सुष्ठु निक्षिपेत्।
तस्योपरि जलं क्षिप्तं तत्र वस्त्रञ्च दापयेत् ॥
प्रातः दुग्धेन सार्द्धं तत् यः पिबेन्मकरध्वजम्।
धातुवृद्धिकरं लोके बलपुष्टिकरं तथा ॥ २ ॥
कुमारीकन्दमादाय गवां क्षीरेण यः पिबेत्।
बलपुष्टिकरं धातुर्जायते मकरध्वजः ॥ ३ ॥
गृहीत्वा तु रवौ वारे भण्डिकां शुचिपूर्वकम्।
छायाशुष्कस्तु तच्चूर्णम् अश्वगन्धासमन्वितम् ॥

मुषलीं गोक्षुरञ्चैव विजयाबीजसंयुतम् ।
एकवर्णगवां क्षीरैर्यः पिबेत् टङ्कमात्रतः ॥
बलपुष्टिकरं देहस्तम्भनं धातुवृद्धिदम् ।
सिद्धियोगमिदं तन्त्रं कामदेवो भवेन्नरः ॥ ४ ॥
अश्वत्थफलं संग्राह्यं छायाशुष्कन्तु कारयेत् ।
पिबन् दुग्धेन सार्द्धं वै जायते मकरध्वजः ॥ ५ ॥
गृहीत्वा शुभनक्षत्रे ब्रह्मदण्डीयमूलकम् ।
सार्द्धं माहिषदुग्धेन यः पिबेन्मकरध्वजः ॥ ६ ॥
गृहीत्वा चामृतामूलं रविवारेऽभिमन्त्रितम् ।
छायाशुष्कन्तु तच्चूर्णं शर्कराभक्षणाद्बली ॥
महासौख्यकरं पुंसां तस्योपरि गवां पयः ।
यस्मै कस्मै न दातव्यं नारी भवति किङ्करी ॥

मन्त्रस्तु ।—"श्रीं नमः अमुकस्य बलपराक्रमं कुरु कुरु स्वाहा" ।
अष्टोत्तरशतजपात् सिद्धिः ॥ ७ ॥

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे वाजीकरणं नाम द्वाविंशः पटलः ।

अथ स्त्रीद्रावणम् ।

शिलाकाश्मीरतगरं कुसुम्भक्षौद्रलेपनात् ।
द्रावणं कुरुते स्त्रीणां विना मन्त्रेण सिध्यति ॥ १ ॥
बृहतीफलमूलानि पिप्पली मरिचानि च ।
रोचना मधुना सार्द्धं लिङ्गलेपाद् द्रवः स्त्रियाः ॥ २ ॥
क्षौद्रगन्धकलेपेन शिलायुक्तेन तत्फलम् ।
यस्मै कस्मै न दातव्यं नान्यथा शङ्करोदितम् ॥ ३ ॥
शशिटङ्कणपिप्पल्यः शूरणं मदनं फलम् ।
एतेन लिङ्गलेपेन शीघ्रं द्रवति कामिनी ॥ ४ ॥

मातुलुङ्गरसैर्लिप्तं स्त्रीणान्तु द्रवकारकम्।
सिद्धियोगमिदं ख्यातं सुलभं मानुषैर्मुने ! ॥ ५ ॥

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे स्त्रीद्रावणं नाम त्रयोविंशः पटलः।

अथ वीर्य्यस्तम्भनम्।

कर्पूरं टङ्कणं युक्तं तुल्यं स्नान रसं मधु।
लिम्पेल्लिङ्गं मर्दयित्वा स्थित्वा यामं तथैव च॥
ततः प्रक्षालयेल्लिङ्गं रमेद्रामां यथोचितम्।
वीर्य्यस्तम्भकरं पुंसां सम्यङ् नागार्जुनोदितम् ॥ १ ॥
कृकलासस्य पुच्छाग्रं मूषिकाप्रियतन्तुभिः।
धार्य्यं कनिष्ठिकां वेष्ट्य नरो वीर्य्यं न मुञ्चति ॥ २ ॥
मधुना पद्मवीजानि पिष्ट्वा नाभिं प्रलेपयेत्।
यावत्तिष्ठत्यसौ लेपस्तावद्वीर्य्यं न मुञ्चति ॥ ३ ॥
चटिकातन्तुमुद्गृह्य नवनीतेन वेष्टयेत्।
तेन लेपयते पादौ शुक्रस्तम्भः प्रजायते॥
यावन्न स्पृशते भूमिं तावद्वीर्य्यं न मुञ्चति।
यस्मै कस्मै न दातव्यं नारीगर्वहरं परम् ॥ ४ ॥
शशिसूतकटङ्कणमागधकं घृतशूरणक्षौद्रकशङ्खयुतम्।
मुनिपत्ररसे यदि लिङ्गमयं वनितामदगर्वहरं कथितम् ॥५॥
स्थूलं मीनं समादाय सम्यक् स्वर्णेन वेष्टयेत्।
लिङ्गे चोद्घटिते किञ्चिदग्रे वीर्य्यं न मुञ्चति ॥ ६ ॥
शूकरस्य तु दंष्ट्राग्रं दक्षिणञ्च समाहरेत्।
कटिदेशे च बध्नीयात् शुक्रस्तम्भः प्रजायते ॥ ७ ॥
कट्फलं शुण्ठिकाक्काथं विनामूलेन भक्षति।
वीर्य्यं द्रावयते पुंसां सिद्धियोग उदाहृतः ॥ ८ ॥

शूरणं तुलसीवीजं ताम्बूलैः सह भक्षयेत्।
न मुञ्चति नरो वीर्य्यं नान्यथा शङ्करोदितम्॥ ९॥
डुण्डुभो नाम यः सर्पः कृष्णवर्णं तमाहरेत्।
तस्यास्थि धारयेत् कट्यां नरो वीर्य्यं न मुञ्चति॥ १०॥
रक्तापामार्गमूलन्तु सोमवारेऽभिमन्त्रितम्।
भौमे प्रातः समुद्धृत्य कट्यां बद्ध्वा तु वीर्य्यधृक्॥ ११॥

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे वीर्य्यस्तम्भनं नाम चतुर्विंशः पटलः।

अथ लिङ्गवर्द्धनादियोगः।

वराहवसया लिङ्गं मधुना सह लेपयेत्।
स्थूलं दृढं दीर्घलिङ्गं जायते मुषलोपमम्॥ १॥
...मवर्द्धनम्।— निशासङ्गन्तु चूर्णञ्च भावितं नागवारिणा।
खाने पाने प्रयुक्तेन षण्डत्वं* जायते नृणाम्॥२॥
...त्वविनाशनम्।—तिलगोक्षुरयोश्चूर्णं छागीदुग्धेन पाचितम्।
शीतलं मधुना युक्तं षण्डत्वनाशनं ध्रुवम्॥३॥
...मिनीमोहनम्।—आर्द्रकं गन्धकञ्चैव राजवृक्षञ्च टङ्कणम्।
संपेष्य सममात्राणि निक्षिपेन्निरुपद्रवे।
स्थापयेद्दक्षिणे हस्ते शीघ्रं द्रावयति स्त्रियः॥४॥
मधुसैन्धवसंयुक्तं पारावतमलान्वितम्।
एतल्लिप्ते द्रवेन्नारी दासीवत् कुरुते रतिम्।
सिद्धियोगमिदं ख्यातं नान्यथा शङ्करोदितम्॥५॥
...नसङ्कोचनम्।— प्रक्षालनं भगे नित्यं कृत्वाऽऽमलककल्ककैः।
वृद्धाऽपि कामिनी कामं बालावत् कुरुते रतिम्॥६

---

* षण्डत्वम्—उद्रिक्तवीर्य्यवृषत्वं, न तु क्लीवत्वमिति दिक्।

लोमशातनम्।—लिम्पेद् योनावारकं तु छागोदुग्धेन पेषितम्।
लोमशान्तमिदं ज्ञेयम् उष्णतोयेन चालयेत् ॥७॥
स्तनोत्थानम्।—पद्मवीजञ्च सितया भक्षयेत् पद्मवारिणा।
हठात् स्त्रियः स्तनद्वन्द्वं मासेन कुरुते दृढ़म् ॥ ८ ॥
मुण्डीचूर्णकषायेण युक्तं तैलेन पाचितम्।
पतितं यौवनं तस्माद् दृढ़ं लेपात् स्तनद्वयम् ॥ ९ ॥
इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे लिङ्गवर्द्धनस्तनोत्थानादि-
नाम पञ्चविंशः पटलः।

अथ केशरञ्जनम्।

काकोलीपत्रमूलं सहचरसहितं केतकीनाञ्च कन्दम्।
छायाशुष्कञ्च भृङ्गं त्रिफलरसयुतं तैलमध्ये निधाय॥
तत् क्षिप्तं लौहपात्रे क्षितितलनिहितं मासमेकञ्च यावत्।
केशाः काशप्रकाशा अलिकुलसदृशा यान्ति वै पक्षमात्रात्॥१॥
विष्णुक्रान्तानि पुष्पाणि तैलैरण्डे च पाचयेत्।
केशान् लेपयते तेषां कृष्णवर्णञ्च जायते ॥ २ ॥
त्रिफला लौहचूर्णन्तु वारिणा पेषयेत् समम्।
द्वयं तुल्येन तैलेन पाचयेन्मृदुवह्निना॥
तैलतुल्यैर्भृङ्गरसैर्यावत् तैलञ्च पाचयेत्।
स्निग्धभाण्डगतं भूमौ स्थितं मासात् समुद्धरेत्॥
सप्ताहं लेपयेत् पेष्य कदलीरससंयुतम्।
रुद्रजटायुतश्चापि त्रिफलेन समन्वितम्॥
सप्ताहलेपः कर्त्तव्यः केशाः स्युर्भ्रमरोपमाः।
यावज्जीवं न सन्देहो नान्यथा शङ्करोदितम् ॥ ३ ॥
इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे केशरञ्जनं नाम षड्विंशः पटलः।

अथ केशपातनम्।

ोशातकीबीजसमुद्भवेन तैलेन केशा न पुनर्भवन्ति ॥ १ ॥
ात्राख्यपालाशविड़ङ्गवह्निशतावरीगोक्षुरकाऽमृतञ्च।
ष्ठीप्रयुक्तं मधुशर्कराभ्यां निशि प्रलेह्येन घृतेन मिश्रम् ॥
वृद्धस्य कुष्ठजीर्णस्य बलहीनोऽपराक्रमः।
भक्षयेत् प्रातरुत्थाय तरुणो जायते नरः ॥ २ ॥

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे केशपातनं नाम सप्तविंशः पटलः।

अथ भूतग्रहनिवारणम।

शिरीषपत्रपुष्पञ्च रवौ वारे समुद्धरेत्।
उलूविष्ठां गृहीत्वा तु उष्ट्ररोमन्तु संयुतम् ॥
शुनोविष्ठासमायुक्तं मार्जारस्यैव संयुतम्।
गोमयञ्चैव संयुक्तं गन्धकं संयुतं ततः ॥
श्वेतगुञ्जासमायुक्तं कटुतैलेन पाचयेत्।
धूपं दत्त्वा जपेन्मन्त्रं भूतबाधा विनश्यति ॥
राक्षसा भूतवेताला देवमानवखेचराः।
डाकिनी प्रेतनी चैव धूपं दृष्ट्वा पलायते ॥

मन्त्रस्तु।—"ओं नमः श्मशानवासिने भूतादिपलायनं कुरु कुरु स्वाहा"। अष्टोत्तरशतजपात् सिद्धिः ॥ १ ॥

ति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे भूतग्रहनिवारणं नाम अष्टाविंशः पटलः।

अथ ग्रहदोषपीड़ानिवारणम्।

श्वर उवाच।—अर्कमूलञ्च धुस्तूरं अपामार्गस्य मूलकम्।
वटदूर्विकयोर्मूलं आश्वत्थं मूलमेव च ॥
शमीपत्रमाम्रपत्रं पत्रमौडुम्बरं तथा।
पात्रस्थन्मयमध्यस्थं दुग्धं घृतसमन्वितम् ॥

तण्डुलं चणकं मुद्गं गोधूमं तिलसंयुतम्।
गोमूत्रं सर्षपाः श्वेताः कुशाश्चन्दनसंयुताः॥
मधु संमिश्रयेत् तत्र सन्ध्याकाले शनौ दिने।
अश्वत्थमूले खननं ग्रहोपद्रवनाशनम्॥
महादारिद्र्यहरणं महापातकनाशनम्।
चिरं जीवति लोके च ग्रहपीड़ा न बाधयेत्॥

मन्त्रस्तु।—"ओं नमो भास्कराय अमुकस्य सर्वग्रहाणां पीड़ा-नाशनं कुरु कुरु स्वाहा"। अष्टोत्तरशतजपेन सिद्धिः॥ १॥

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे ग्रहदोषपीड़ानिवारणं नाम एकोनत्रिंशः पटलः।

अथ सिंहव्याघ्रसर्पवृश्चिकादिभयनाशनम्।

ईश्वर उवाच।—सिंहं दृष्ट्वा नमस्कारं मन्त्रं ज्याप्य पुनः पुनः।
सर्वे सिंहाः पलायन्ते नान्यथा शङ्करोदितम्॥१॥

मन्त्रस्तु।—"ओं नमः अग्निरूपाय क्रीं नमः"।

पुष्यार्के च गृहीत्वा तु श्वेतार्कस्य तु मूलकम्।
धारयेद्दक्षिणे हस्ते सिंहबाधाभयं न हि॥२॥

अथ सर्पनिवारणम्।

आस्तीकं मुनिराजञ्च नमस्कृत्य पुनः पुनः।
स्वप्ने सर्पभयं नास्ति नान्यथा शङ्करोदितम्॥ ३॥
गृहीत्वा पुष्यनक्षत्रे अमृतामूलकं हरेत्।
तन्मालां धारयेत् कण्ठे सर्पबाधाभयं न हि॥४॥

अथ व्याघ्रभयनिवारणम्।

गृहीत्वा शुभनक्षत्रे धुस्तरमूलकं तथा।
धारयेद्दक्षिणे बाहौ व्याघ्रबाधाभयं न हि॥५॥

अथ वृश्चिकभयनिवारणम्।

गृहीत्वा शुभनक्षत्रे ह्यपामार्गस्य मूलकम्।
धारयेद्दक्षिणे कर्णे वृश्चिकानां भयं न हि॥ ६॥

अथ अग्निभयनिवारणम्।

उत्तरस्मिंश्च दिग्भागे मारीचो नाम राक्षसः।
तस्य मूत्रपुरीषाभ्यां हुतोऽग्निः स्तम्भितो भवेत्॥

इति मन्त्रेण सप्ताञ्जलिसलिलं अग्निमध्ये निक्षिपेत्। अग्निः शाम्यति॥ ७॥

गृहीत्वा रविवारे तु हयमारकमूलकम्।
धारयेद्दक्षिणे हस्ते अग्निबाधाभयं न हि॥८॥

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे सिंहव्याघ्रसर्पवृश्चिकाग्निभयनाशनं नाम विंशः पटलः।

षट्कर्मदीपिका।

कृत्या देवीं नमस्कृत्य तथा त्रिपुरसुन्दरीम्।
भद्रकालीञ्च देवेशीं तथा षट्कर्मदेवताम्॥
श्रीकृष्णविद्यावागीश-भट्टाचार्य्येण धीमता।
क्रियते विदुषां प्रीत्यै कृत्या पल्लवदीपिका॥१॥

क्रोधाज्ज्वलन्तीं ज्वलनं वमन्तीम्
सृष्टिं दहन्तीं दितिजं ग्रसन्तीम्।
भीमं नदन्तीं प्रणमामि कृत्यां
रोरूयमाणां क्षुधयोग्रकालीम्॥ २॥

उन्मत्तभैरवीतन्त्रात् फेत्कारीडामरात्तथा।
तथा च मालिनीतन्त्रात्तथा कालोत्तरादपि॥
सिद्धयोगीश्वरीतन्त्रात् योगिनीजालसंवरात्।
सर्वतन्त्रात् समाकृष्य षट्कर्मविधिरुच्यते॥

पुस्तके लिखिता विद्या येन सुन्दरि ! जप्यते ।
सिद्धिर्न जायते देवि ! कल्पकोटिशतैरपि ॥
गुरुं विनाऽपि शास्त्रेऽस्मिन्नाधिकारः कथञ्चन ।
अथाभिधास्ये शास्त्रेऽस्मिन् सम्यक् षट्कर्मलक्षणम् ।
सर्वतन्त्रानुसारेण प्रयोगफलसिद्धिम् ॥ ३ ॥

अथ षट्कर्मणां सार्वकालिकत्वम् ।

षट्कर्मणां सार्वकालिकत्वमाह यथा स्मृतिः ।
नैमित्तिकानि काम्यानि निपतन्ति यथा तथा ॥४

तथाह मनुः ।— स्ववीर्य्याद्राजवीर्य्याच्च स्ववीर्य्यं बलवत्तरम् ।
तस्मात् स्वेनैव वीर्य्येण निगृह्णीयादरीन् द्विजः ॥५

अथ षट्कर्माणि ।

शान्तिवश्यस्तम्भनानि विद्वेषोच्चाटने तथा ।
मारणान्तानि शंसन्ति षट्कर्माणि मनीषिणः ॥६॥

अथ षट्कर्मणां लक्षणम् ।

रोगकृत्याग्रहादीनां निरासः शान्तिरीरिता ।
वश्यं जनानां सर्वेषां विधेयत्वमुदीरितम् ॥ ७ ॥
प्रवृत्तिरोधः सर्वेषां स्तम्भनं समुदाहृतम् ।
स्निग्धानां * द्वेषजननं मिथो विद्वेषणं मतम् ॥८॥
उच्चाटनं स्वदेशादेर्भ्रंशनं परिकीर्त्तितम् ।
प्राणिनां प्राणहरणं मारणं समुदाहृतम् ॥
स्वदेवतादिक्कालादीन् ज्ञात्वा कर्माणि साधयेत् ॥९

अथ षट्कर्मणां देवताः ।

रतिर्वाणी रमा ज्येष्ठा दुर्गा काली † यथा क्रमात्
षट्कर्मदेवताः प्रोक्ताः कर्मादौ ताः प्रपूजयेत् ॥१०॥

---

* स्निग्धानां—परस्परमित्रभावापन्नानाम् ।

† कालीति—भद्रकाली ।

अथ षट्कर्मणां दिङ्नियमः।

ईशचन्द्रेन्द्रनिर्ऋतिवाय्वग्नीनां दिशो मताः।
क्रमेण कर्मषट्केषु प्रशस्ताः ककुभः स्मृताः ॥११॥

अथ षट्कर्मणां ऋतुकालादिनिर्णयः।

सूर्य्योदयात् समारभ्य घटिका * दशकं क्रमात्।
ऋतवः स्युर्वसन्ताद्या अहोरात्रे दिने दिने ॥
वसन्तग्रीष्मवर्षाश्च शरद्धेमन्तशैशिराः ॥ १२ ॥

प्रकारान्तरम्।

वसन्तश्चैव पूर्वाह्णे ग्रीष्मो मध्याह्न उच्यते।
वर्षा ज्ञेया पराह्णे तु प्रदोषे शिशिरः स्मृतः ॥
अर्द्धरात्रौ शरत्काल ऊषा हेमन्त उच्यते।
अन्ये च ऋतवः सर्वे सायाह्नादौ प्रकीर्त्तिताः ॥ १३ ॥
हेमन्तः शान्तिके प्रोक्तो वसन्तो वश्यकर्मणि।
शिशिरः स्तम्भने ज्ञेयो ग्रीष्मे विद्वेष ईरितः ॥
प्रावृडुच्चाटने ज्ञेया शरन्मारणकर्मणि ॥ १४ ॥

अथ षट्कर्मणां तिथिवारनियममाह।

प्रयोक्तव्यानि विधिना स च सम्प्रोच्यतेऽधुना।
द्वितीया च तृतीया च पञ्चमी सप्तमी तथा ॥
बुधेज्यकाव्यसोमाश्च शान्तिकर्मणि कीर्त्तिताः ॥ १५ ॥
गुरुचन्द्रयुता षष्ठी चतुर्थी च त्रयोदशी।
नवमी पौष्टिके शस्ता चाष्टमी दशमी तथा ॥
पुष्टिर्धनजनादीनां वर्द्धनं परिकीर्त्तितम् ॥ १६ ॥
दशम्येकादशी चैव भानुशुक्रदिने तथा।
आकर्षणे त्वमावास्या नवमी प्रतिपत्तथा ॥१७॥

---

* घटिका—अत्र दण्डरूपा।

पौर्णमासी मन्दभानुयुक्ता विद्वेषकर्मणि।
षष्ठी चतुर्दशी तद्वदष्टमी मन्दवारकाः॥
उच्चाटने तिथिः शस्ता प्रदोषेषु विशेषतः॥ १८॥
चतुर्दश्यष्टमी कृष्णा अमावास्या तथैव च।
मन्दारार्कदिनोपेता शस्ता मारणकर्मणि॥ १९॥
बुधचन्द्रदिनोपेता पञ्चमी दशमी तथा।
पौर्णमासी च विज्ञेया तिथिःस्तम्भनकर्मणि॥ २०॥
शुभग्रहोदये कुर्य्याद् शुभान्यशुभकोदये।
रौद्रकर्माणि रिक्तार्के मृत्युयोगे च मारणम्॥ २१॥

अथ षट्कर्मणां नक्षत्रनियममाह।

स्तम्भनं मोहनञ्चैव वशीकरणमुत्तमम्।
माहेन्द्रे वारुणे चैव कर्त्तव्यमिह सिद्धिदम्॥ २२॥
ज्येष्ठा चैवोत्तराषाढ़ा चानुराधा च रोहिणी।
माहेन्द्रमण्डलं ह्येतत् सर्वकर्मप्रसिद्धिदम्॥ २३॥
स्यादुत्तरभाद्रपदा मूला शतभिषा तथा।
पूर्वभाद्रपदाऽश्लेषा ज्ञेया वारुणमध्यगाः॥
पूर्वाषाढ़ा तु तत्कर्मसिद्धिदा शम्भुना स्मृता॥ २४॥
विद्वेषोच्चाटनं वह्निवायुयोगे च कारयेत्।
स्वाती हस्ता मृगशिरा चित्रा चोत्तरफल्गुनी॥
पुष्या पुनर्वसुर्वह्निमण्डलस्थाः प्रकीर्त्तिताः॥ २५॥
अश्विनी भरणी चार्द्रा धनिष्ठा श्रवणा मघा।
विशाखा कृत्तिका पूर्वफल्गुनी रेवती तथा॥
वायुमण्डलमध्यस्थास्तत्तत्कर्मप्रसिद्धिदाः॥ २६॥

कालविशेषश्च।

वश्यं पूर्वेऽह्नि मध्याह्ने विद्वेषोच्चाटनं तथा।
शान्तिपुष्टी दिनस्यान्ते सन्ध्याकाले च मारणम्॥२७॥

अथ षट्कर्मणां लग्ननियममाह।

कुर्य्याच्च स्तम्भनं कर्म हर्य्यत्ते वृश्चिकोदये।
द्वेषोच्चाटादिकं कर्म कुलीरे वा तुलोदये॥
मेषकन्याधनुर्मीने वश्यशान्तिकपौष्टिकम्।
मारणोच्चाटने चासौ रिपुभेदविनिग्रहे॥ २८॥

अथ भूतोदये षट्कर्मनियमो यथा।

जलं शान्तिविधौ शस्तं वश्ये वह्निरुदीरितः।
स्तम्भने पृथिवी शस्ता विद्वेषे व्योम कीर्त्तितम्॥
उच्चाटने स्मृतो वायुर्भूम्यग्नी मारणे मतौ।
तत्तद्भूतोदये सम्यक् तत्तन्मण्डलसंयुतम्।
तत्तत् कर्म विधातव्यं मन्त्रिणा निश्चितात्मना॥ २९॥
परचक्रभयादौ वा तीव्ररूपे महाभये।
न कालनियमो गम्यः प्रयोगाणां कदाचन॥३०॥

अथ षट्कर्मदिङ्नियमस्तु तन्त्रान्तरे।

इन्द्रे स्तम्भनमुच्चाटमग्नौ सर्वाभिचारकम्।
याम्ये रक्षसि विद्वेषः शान्तिर्वारुणवायवे॥
कुलोत्सादं मरुद्भागे यक्षे कलहविग्रहौ।
कुर्वीत नोदितं कर्म यच्चान्यद् ब्रह्मणः पदे *॥३१॥

अथ षट्कर्मणां वर्णभेदमाह।

वश्ये चाकर्षणे क्षोभे रक्तवर्णं विचिन्तयेत्।
निर्विषीकरणे शान्तौ पुष्टौ चाप्यायने सितम्॥
पीतं स्तम्भनकार्य्येषु धूम्रमुच्चाटने स्मृतम्।
उन्मादे शक्रगोपाभं † कृष्णवर्णन्तु मारणे॥ ३२॥

* ब्रह्मणः पदे—ऐशान्यामित्यर्थः।
† शक्रगोपः,—रक्तवर्णकीटविशेषः।

अथ उत्थितसुप्तोपविष्टादयः।

उत्थितं मारणे ध्यायेत् सुप्तमुच्चाटने प्रभुम्।
उपविष्टं सुरेशानि! सर्वत्रैवं विचिन्तयेत् ॥३३॥
आसीनं श्वेतरूपन्तु सात्त्विके समुदाहृतम्।
पीतवर्णं राजसे तु रक्तं श्याममुदाहृतम् ॥
यानमार्गस्थितं तूर्णं कृष्णं तामस उच्यते ॥३४॥
सात्त्विकं मोक्षकामानां राजसं राज्यमिच्छताम्।
तामसं शत्रुनाशार्थं सर्वव्याधिनिवारणम् ॥
सर्वोपद्रवशान्त्यर्थं तामसन्तु विचिन्तयेत् ॥३५॥

अथ मन्त्रस्याधिष्ठातृदेवतामाह।

रुद्रारतार्क्ष्यगन्धर्वयक्षरक्षोऽहिकिन्नराः।
पिशाचभूतदैत्येन्द्रसिद्धाः किंपुरुषासुराः ॥
सर्वेषामपि मन्त्राणाम् एते पञ्चदश स्मृताः।
केचिदष्टादशप्राहुः समाशाणां नृणां मताः ॥ ३६ ॥

अथ मन्त्राणां वर्णसंख्याभेदे संज्ञा, कार्य्यविशेषेषु च तेषां प्रयोगश्च।

क्रूरः शनिः पञ्चवर्णैः षड्भिर्वर्णैस्तु शृङ्खलः।
क्रकचः सप्तभिः शूलश्चाष्टाभिर्नवभिः पविः ॥
शक्तिश्च दशभिश्चैकादशभिः परशुः स्मृतः।
चक्रं द्वादशभिर्वर्णैः कुलिशः स्यात्त्रयोदशैः ॥
चतुर्दशैस्तु नाराचो भुषुण्डी पञ्चवर्णिका *।
पद्मं षोड़शभिर्वर्णैर्मन्त्रश्च्छेदे तु कर्त्तरी ॥
भेदे तु कथिता सूची भञ्जने मुद्गरः स्मृतः।
मुषलं क्षोभणे बन्धे शृङ्खलः क्रकचश्छिदि ॥
घाते शूलं पविं स्तम्भे शक्तिं बन्धे च कर्मणि।
विद्वेषे परशुश्चक्रं सर्वकर्मसु योजयेत् ॥

* पञ्चवर्णिका—पञ्चदशवर्णात्मिका।

उत्सादे * कुलिशः शस्तो नाराचः सैन्यभेदने।
भुषुण्डी मारणे पद्मं शान्तिपुष्ट्यादिकर्मणि॥
चक्रन्तु रञ्जकं कर्म सर्वत्रैवं प्रयोजयेत्।
क्वचिदेवं दर्शितन्तु वामाचारविरोधनम्॥
सहस्राक्षरमन्त्रादेः प्रयोगो विधिदर्शनात्॥३७॥

अथ कार्य्यविशेषे योजनपल्लवादिनिर्णयः।

पञ्चाशद्वर्णरूपात्मा मातृका परमेश्वरी।
तत्नोत्पन्ना महाकृत्या त्रैलोक्यभयदायिनी।
यथा कामो जपः कार्य्यो मन्त्रणामपि मे शृणु॥३८॥
मन्त्रादौ योजनं नाम्नः पल्लवः परिकीर्त्तितः।
मारणे विघ्नसंहारे ग्रहभूतनिवारणे॥
उच्चाटने च विद्वेषे पल्लवः परिकीर्त्तितः।
मन्त्रान्ते नामसंस्थानं योग इत्यभिधीयते॥
शान्तिके पौष्टिके वश्ये प्रायश्चित्तविशोधने।
मोहने दीपने योगान् प्रयुञ्जन्ति मनीषिणः॥
स्तम्भनोच्चाटनोच्छेदविद्वेषेषु स चोच्यते॥ ३९॥
नाम्न आद्यन्तमध्येषु मन्त्रः स्याद्रोध उच्यते †।
मन्त्राभिमुख्यकरणे सर्वव्याधिनिवारणे॥
ज्वरग्रहविषाद्यार्त्ति-शान्तिकेषु स चोच्यते।
सम्मोहने स एवाथ मन्त्राणामक्षराणि च॥ ४०॥
एकैकान्तरितं यत्तु ग्रथनं परिकीर्त्तितम्।
तच्छान्तिके विधातव्यं नामाद्यन्ते यथा मनुः॥

---

* उत्सादे—उच्चाटे।
† नाम्न आदौ—अनुलोमेन, अन्ते विलोमक्रमेण इति भावः।

तत् सम्पुटं भवेत्तत्तु कीलने परिभाषितम्।
स्तम्भे मृत्युञ्जये इच्छेद्रक्षादिषु च सम्पुटम्॥ ४१॥

पुनः सम्पुटमाह भट्टधृतम्।

मन्त्रमादौ वदेत्सर्वं साध्यसंज्ञामनन्तरम्।
विपरीतं पुनश्चान्ते सम्पुटं तत्स्मृतं बुधैः॥

इति वचनानुसारात् साध्यनामादौ अनुलोमेन तत्पश्चा
विलोमेन मन्त्राक्षराणि लिखितव्यानि इत्यर्थः॥ ४२॥

मन्त्रार्णद्वन्द्वमेकैकं साध्यनामाक्षरं क्रमात्।
कथ्यते सविदर्भस्तु वश्याकर्षणपौष्टिके॥ ४३॥

अथ कर्मविशेषे हुं फट् वषडादीनि।

बन्धनोच्चाटने द्वेषे सङ्कीर्णं हुं पदं जपेत्।
फट्कारं छेदने हुं फट् रिष्टिग्रहनिवारणे॥
पुष्टौ चाप्यायने वौषट् बोधने मलिनौ कृतौ।
अग्निकार्य्ये जपेत् स्वाहां नमः सर्वत्र चार्च्चने॥ ४४॥
शान्तिपुष्टिवशद्वेषाकृष्ट्युच्चाटनमारणे।
स्वाहा स्वधा वषट् हुं च वौषट् फट् योजयेत् क्रमात्॥
वश्याकर्षणसन्तापज्वरे स्वाहां प्रकीर्त्तयेत्।
क्रोधोपशमने शान्तौ प्रीतौ योज्यं नमो बुधैः॥
वौषट् सम्मोहनोद्दीप-पुष्टिमृत्युञ्जयेषु च।
हुंकारं प्रीतिनाशे च छेदने मारणे तथा॥
उच्चाटने च विद्वेषे वौषट् चान्धीकृतौ वषट्।
मन्त्रोद्दीपनकार्य्येषु लाभालाभे वषट् स्मृतम्॥४५॥

अथ स्त्रीपुंनपुंसकमन्त्रनियममाह।

स्त्रीपुंनपुंसकत्वेन त्रिधा स्युर्मन्त्रजातयः।
स्त्रीमन्त्रा वह्निजायान्ता नमोऽन्ताश्च नपुंसकाः॥
हुं फट् पुमांस इत्युक्ता वश्यशान्त्यभिचारके।
क्षुद्रक्रियाद्युपध्वंसे स्त्रियोऽन्यत्र नपुंसकाः॥ ४६॥

अथ आग्नेयसौम्यत्वादिमन्त्रधर्मः।

तारान्त्याग्निविषप्रायो मन्त्र आग्नेय उच्यते।
सौम्याश्च मनवः प्रोक्ता भूयिष्ठेन्द्वमृताक्षराः॥
आग्नेयमन्त्राः सौम्याः स्युः प्रायशोऽन्ते नमोऽन्विताः।
मन्त्रः शान्तोऽपि रौद्रत्वं हुं फट् पल्लवितो यदि॥ ४७॥

अथ मन्त्राणां सुप्तप्रबुद्धकालाः।

सुप्तः प्रबुध्यमानोऽपि मन्त्रः सिद्धिं न गच्छति।
स्वापकालो वामवहो जागरो दक्षिणावहः॥
स्वापकाले तु मन्त्रस्य जपो न च फलप्रदः।
आग्नेयाः सम्प्रबुध्यन्ते प्राणे चरति दक्षिणे॥
वामे चरति सौम्याश्च प्रबुद्धा मन्त्रिणां सदा।
नाड़ीद्वयगते प्राणे सर्वे बोधं प्रयान्ति च।
प्रयच्छन्ति फलं सर्वे प्रबुद्धा मन्त्रिणां सदा॥ ४८॥

अथ आसनानि।

आसनानि प्रवक्ष्यामि कर्मणां विहितान्यपि।
पद्मासनं पौष्टिके तु शान्तिके स्वस्तिकासनम्॥
आकृष्टे पौष्टिके तद्वद्विद्वेषे कुक्कुटासनम्।
अर्द्धस्वस्तिकमुच्चाटे अर्द्धस्थापनपार्ष्णिकम्॥
मारणे स्तम्भने तद्वद्विकटं परिकीर्त्तितम्।
वश्ये भद्रासनं तेषां कथ्यते चाथ भावना॥ ४९॥

अथ विकटकुक्कुटासनयोर्लक्षणं यथा।

जानुजङ्घान्तरालेषु भुजयुग्मं प्रवेशयेत्।
विकटासनमेतत् स्यादुपविश्योत्कटासने॥
कृत्वोत्कटासनञ्चैव समपादद्वयं ततः।
वश्ये मेषासनं प्रोक्तम् आकृष्टिर्व्याघ्रचर्मणि॥
उष्ट्रासनं तथोच्चाटे विद्वेषे तुरगासनम्।

मारणे माहिषं चर्म मोक्षे हस्त्यजिनं भवेत्।
अथवा कम्बलं रक्तं सर्वकर्मसु कारयेत्॥ ५० ॥

अथ षण्मुद्राः।

षण्मुद्राः क्रमशो ज्ञेयाः पद्मपाशगदाह्वयाः।
मुषलाशनिखड्गाख्याः शान्तिकादिषु कर्मसु ॥ ५१ ॥

अथ देवध्यानमाह।

शान्तिपौष्टिकवश्येषु सौन्दर्यातिशयान्विताः।
सर्वाभरणसन्दीप्ताः प्राप्तकालमनोरथाः।
ध्यातव्या देवताः सम्यक् सुप्रसन्नाननाम्बुजाः॥
आकर्षणेऽपि तद्वच्च वड़िशैरिव मत्स्यकान्।
साध्यमाकर्षणे द्वेषे भर्त्स्यमानं जनैरिव।
बध्यमानो जनैर्दण्डैर्दारितस्तस्करो यथा॥
उलूको वा यथा रिष्टैर्मन्तव्योच्चाटने रिपुः।
यत्किञ्चित् शवमारुह्य सन्दष्टौष्ठपुटः क्रुधा।
कर्म कुर्यात् ततो मन्त्री यथा क्रूरेषु कर्मसु॥ ५२ ॥

इति श्रीकृष्णानन्दविद्यावागीशभट्टाचार्य्यकृतायां षट्कर्मदीपिकायां सामान्यधर्मः प्रथमोद्देशः।

अथ रक्षार्थम्।

ग्रामे च निर्जने देशे विदध्यादभिचारकम्।
यत्राभिचारहोमन्तु कुर्य्याच्च भुवि साधकः॥
तत्राभितो भटैः रक्षां कारयेदात्मसिद्धये।
न चेच्चान्यः क्षितिपतिश्चारैर्ज्ञात्वा निहन्त्यमुम्॥ १ ॥ *

---

* अभितः,—चतुर्दिक्षु ; भटैः,—योद्धृभिः निकटे रक्षितव्यः। चारैः,—दूतैः।

अथ कुण्डम्।

विद्वेषे चाभिचारे च त्रिकोणं कुण्डमिष्यते।
द्विमेखलं कोणमुखं * हस्तमात्रन्तु सर्वतः॥
उच्चाटनन्तु नैर्ऋत्यां शत्रुपक्षस्य कारयेत्।
उत्पाटनन्तु वायव्यां देवानामपि कारयेत्॥
शत्रूणां तापने शस्तं योन्याख्यमग्निकोणगम्।
अर्द्धचन्द्रन्तु याम्यायां † शत्रूणां मारणे स्थितम्॥
त्रिकोणं नैर्ऋते कुण्डं रिपूणां व्याधिवर्द्धनम्।
दाहायाग्नौ च विद्वेषे कुण्डं पूर्णेन्दुसन्निभम्।
चतुरस्रञ्च कर्त्तव्यं द्वेषादौ तु विचक्षणैः॥
कुण्डं सुलक्षणं कृत्वा तत्र कर्माणि साधयेत्।
चतुरस्रे भवेद्वश्यमाकर्षः स्यात् त्रिकोणके॥
कर्षणस्तम्भने देवि! विद्वेषञ्च त्रिकोणके।
अथैवोच्चाटनं प्रोक्तं षट्कोणे मारणं स्मृतम्॥
उदीच्यां ‡ पौष्टिके कुण्डं वारुण्यां शान्तिकादिषु।
उच्चाटे चानिले कुण्डं याम्ये च मारणं भवेत्॥
मानहीनादिकं § दोषं नास्ति कुण्डेऽभिचारके।
शुभेषु स्युर्विवाहान्ताः क्रियास्ताः क्रूरकर्मणि।
मारणान्ताः समुद्दिष्टा वह्नेरागमवेदिभिः॥ २॥
ततो राज्ञातिविद्वांसमथर्वश्रुतिपारगम्।
बहुभिर्द्रविणैर्वस्त्रैर्नानारत्नैर्विभूषणैः।
पूजयित्वा ततः पश्चाद् विधिना वृणुयाद्द्विजम्॥

---

* कोणमुखं—नैर्ऋत्यादि।

† याम्यायां मण्डपस्य इति शेषः।

‡ उदीच्यां मण्डपस्य ग्रामस्य वा इति शेषः।

§ मानं—हस्तादिमानम्।

व्रतोऽप्युत्साहसंयुक्तः सर्वरक्षापरायणः ।
यत्नतो मारणं कर्म कुर्य्याद्राज्ञो हितेच्छया ॥
वित्तशाठ्यं परित्यज्य सर्वकर्माणि कारयेत् ।
वित्तशाठ्यं निहन्त्याशु पुत्रमायुर्यशोधनम् ।
देशरक्षणधर्मेण न स्वयं पापभाग् भवेत् ॥
तेजोनाशो भवेदादौ बलनाशस्ततो भवेत् ।
सपत्नस्य ततो नाशस्तिस्रश्चावृत्तयस्ततः ।
त्रिरावृत्तौ फलालाभे त्रिरावृत्तं पुनश्चरेत् ॥ ३ ॥

अथ यथोत्तरं प्रयोगोत्कर्षः ।

वश्यात् स्तम्भनमुत्कृष्टं स्तम्भनान्मोहनं महत् ।
मोहनाद्वेषणं श्रेष्ठं द्वेषादुच्चाटनं वरम् ॥
उच्चाटनादपि महन्मारणं सर्वतोमहत् ।
मारणादधिकं कर्म न भूतं न भविष्यति ॥
तत्रैव दक्षिणे चित्तं कृत्वा मारणमारभेत् ।
शान्तिपुष्टी दिनस्यान्ते सन्ध्याकाले तु मारणम् ॥ ४ ॥

अथ कुम्भस्थापनम् ।

आङ्गिरसे । शान्तिके स्वर्णकुम्भञ्च नवरत्नैर्विभूषितम् ।
तदभावे रौप्यकुम्भं ताम्रं वापि सुलक्षणम् ॥
अभिचारे लौहकुम्भं स्थापयेत् सुसमाहितः ।
उत्सादे काचकुम्भञ्च मोहने रैत्यकुम्भकम् ॥
उच्चाटने च मृत्कुम्भं कालमण्डलसंस्थितम् ।
सर्वकर्मणि वा कुर्य्यात् कुम्भं ताम्रमयं तथा ॥ ५ ॥
तत्तत्कुम्भञ्च संस्थाप्य रुद्रं देवीञ्च पूजयेत् ।
उपचारक्रमेणैव देवं ध्यायेद् यथाविधि ॥
शूलहस्तं महारौद्रं सर्ववैरिनिसूदनम् ।

पूर्णचन्द्रसमाभासं रुद्रं वृषभवाहनम्।
अथवान्यप्रकारेण ध्यानं कुर्य्यात् समाहितः॥ ६॥
काश्मीरस्फटिकप्रभं त्रिनयनं पञ्चाननं शूलिनम्
खट्वाङ्गासिवरप्रसादडमरुं चक्राब्जवीजाभयम्।
बिभ्राणं दशदोर्भिरुन्नजटिलं वीरासने संस्थितम्
गौरीश्रीसहितं सदैवमखिलं ध्यायेच्छिवं चर्म्मिणम्॥ ७॥
रुद्रमन्त्रेण कुर्य्याच्च उपचारान् पृथग्विधान्।
भद्रकालीञ्च सम्पूज्य नैवेद्यैश्च पृथग्विधैः।
पट्टवस्त्रैरलङ्कारैर्वलिदानैः पृथग्विधैः॥
यत्र न स्यादुपायोऽन्यः शत्रोर्भयनिवृत्तये।
तदाऽनन्यगतित्वेन मारणादीनि कारयेत्॥ ८॥
दीपादग्निं समानीय धूपाद्वा चान्त्यजादपि।
विद्वेषणाभिचारे च क्रव्यादंशं न सन्त्यजेत्॥
अत्र चैव विधायाग्निं परिस्तीर्य्य शरैस्तृणैः।
विभीतकपरिध्या च कल्पयेद् यस्य मारणम्॥
जुहुयान्निम्बतैलाक्तैः काकोलूकीयपक्षकैः।
दारयैनं शोषयैनं मारयेत्यभिधाय च।
अष्टोत्तरशतेनैव मनसा जुहुयादृचा॥
होमान्ते विधिवत् कृत्यामाराध्याग्नेश्च सन्निधौ।
यो मे च कण्टकं दूराद् दूरं वा चान्तिकेऽपि च॥
पिव ह्यस्य मसृक् तस्येत्युक्त्वा साधु निवेदयेत्।
संरक्ष्याग्निं विधानेन नवरात्रं समापयेत्॥
मृतस्तिष्ठति ज्ञात्वैवं तावदस्य रिपोर्मृतिः।
वसनं लोहितं प्रोक्तम् उष्णीशं लोहितं स्मृतम्।
सङ्कल्प्य जपहोमादौ तदावरणमारभेत्॥ ९॥
ईश्वरे।—स्वापकाले तु मन्त्रस्य जपो न च फलप्रदः।

स्वापकालो वामवहो जागरो दक्षिणावहः ।
शान्तिकर्मणि मिश्रं वा जपेन्मन्त्रं प्रसिद्धये ॥ १० ॥

अथ मालानिर्णयः ।

प्रवालवज्रमणिभिर्वश्यपौष्टिकयोर्जपेत् ।
मत्तेभदन्तमणिभिर्जपेदाकृष्टिकर्मणि ॥
साध्यकेशसूत्रयुक्तैस्तुरङ्गदशनोद्भवैः ।
अक्षमालां परिष्कृत्य विद्वेषोच्चाटने जपेत् ॥
मृतस्य युद्धशून्यस्य दशनैर्गर्दभस्य च ।
कृत्वाक्षमालां जप्तव्यं शत्रुमारणमिच्छता ॥
क्रियते शङ्खमणिभिर्धर्मकामार्थसिद्धये ।
पद्माक्षैः प्रजपेन्मन्त्रं सर्वकामार्थसिद्धये ॥
रुद्राक्षमालया जप्तो मन्त्रः सर्वफलप्रदः ।
स्फाटिकी मौक्तिकी वापि रौद्राक्षी वा प्रवालजा ॥
सारस्वताप्तये शस्ता पुत्रजीवैस्तथाप्तये ।
पद्मसूत्रकृता रज्जुः शस्ता शान्तिकपौष्टिके ॥
आकृष्युच्चाटयोर्वाजिपुच्छवालसमुद्भवा ।
नरस्नायुविशेषैस्तु मारणे रज्जुरुत्तमा ॥
अन्यासाञ्चाक्षमालानां रज्जुः कार्पासिकी मता ।
सप्तविंशतिसंख्याकैः कृता मुक्तिं प्रयच्छति ॥
अक्षैस्तु पञ्चदशभिरभिचारफलप्रदा ।
अक्षमाला विनिर्दिष्टा तन्त्रादौ तत्त्वदर्शिभिः ।
अष्टोत्तरशतेनैव सर्वकर्मसु पूजिता ॥ ११ ॥

अथ जपाङ्गुलिनियमः ।

शान्त्यादिस्तम्भवश्येषु वृद्धाग्रेण च चालयेत् ।
अङ्गुष्ठानामिकाभ्यान्तु जपेदाकर्षणे मनुम् ॥

अङ्गुष्ठतर्जनीभ्यान्तु विद्वेषोच्चाटयोर्जपेत्।
कनिष्ठाङ्गुष्ठयोगेन मारणे जप ईरितः॥ १२॥

अथ जपदिङ्नियमः।

जपेत् पूर्वमुखं वश्ये दक्षिणञ्चाभिचारके।
पश्चिमं धनदं विद्यादुत्तरं शान्तिकं भवेत्।
आयुष्यरक्षां शान्तिञ्च पुष्टिं वापि करिष्यति॥ १३॥

अथ जपलक्षणं वाचिकादिमन्त्राश्च।

श्रूयतेऽन्यैः स तु वाचिकः स्यादुपांशुसंज्ञो निजदेहवेद्यः।
ष्कम्पदन्तौष्ठमथाक्षराणां-यच्चिन्तनं स्यादिह मानसाख्यः॥
ाभिचारे किल वाचिकः स्यादुपांशुरुक्तोऽप्यथ शान्तिपुष्टौ।
क्षेषु जापः किल मानसाख्यः संज्ञा त्रिधा पापनुदे तयोक्ता॥१४॥

अथ कुण्डदिङ्नियमः।

शान्तिके पौष्टिके चैव होमः स्याद् योग्यसाधनैः।
कार्य्यं प्राग्वदनेनाथ सौम्येन वदनेन वा॥
आकृष्टौ वायुकुण्डे च कौवेरीदिङ्मुखेन तु।
नैरृतीदिङ्मुखस्तस्मिन् कुण्डे विद्वेषणे हुनेत्*॥
आग्नेयीदिङ्मुखस्त्वेतत् कुण्डे मारुतकेऽपि वा।
उच्चाटने हुनेन्मन्त्री मारणे याम्यदिङ्मुखः॥
जुहुयाद् याम्यकुण्डे तु मन्त्री तत्साधनैस्ततः।
वज्रलाञ्छितकुण्डे † वा ग्रहभूतनिवारणे॥
वायव्यदिङ्मुखो वश्ये कुण्डे योन्याकृतौ हुनेत्।
वज्रलाञ्छितकुण्डे वा स्तम्भे प्राग्वदनो हुनेत्॥ १५॥

अथ शान्त्यादौ द्रव्यनियमः।

द्रव्याण्यथ प्रवक्ष्यामि तत्तत्कर्मानुसारतः।

---

* जुहुयादित्यत्र हुनेदित्यागमप्रयोगः।

† वज्रलाञ्छितकुण्ड इति—वज्रं हीरकं षट्कोणं, तथा च षट्कोणकुण्डे।

शान्तिके तु पयःसर्पिस्तिलक्षीरद्रुमेण वा ॥
अमृताख्या लता चैव पायसं तत्र कीर्त्तितम्।
पौष्टिके तु प्रवक्ष्यामि होमद्रव्याण्यतः परम्॥
विल्वपत्रैश्च आज्यैः स्याज्जातीपुष्पैस्तथैव च।
कन्यार्थी जुहुयाल्लाजैः श्रीकामः कमलैस्तथा॥
दध्ना च श्रियमाप्नोति चान्नैश्चान्नं घृतप्लुतैः।
समृद्धौ जुहुयान्मन्त्री महादारिद्र्यशान्तये॥
लक्षहोमाल्लभेच्छान्तिं घृतविल्वतिलैर्भिधिम्।
आकर्षणे च हवनं प्रियङ्गुविल्वकं फलम्॥
जातीपलाशकुसुमैः सैन्धवैश्चैवमेव च।
राजिकालवणैर्वापि वश्यं वा पौष्टिकोदितैः॥
वश्यार्थी जातिकुसुमैराकृष्टौ करवीरजैः।
कार्पासनिम्बैस्तक्रान्तैः साध्यकेशैरथापि वा॥
उच्चाटने काकपक्षैरथवा मोहने पुनः।
उन्मत्तवीजैर्जुहुयाद्विषरक्तेन * मारणम्॥
अजापयस्तथा सर्पिः कार्पासास्थि नृणामपि।
तन्मांसञ्चापि साध्यस्य नखलोमगणैरपि॥ †
एकीकृत्य हुनेन्मन्त्री शत्रुमारणकाङ्क्षया।
जुहुयात् सार्षपैस्तैलैरथवा शत्रुमारणे॥
रोहीवीजैस्तिलोपेतैरुत्सादे जुहुयाद् यवैः।
तुषकण्टकसंयुक्तैर्वीजैः कार्पासिकैरपि॥
सर्षपैर्लवणोपेतैर्हुनेत् सर्वाभिचारके।

---

* विषरक्तेनेति—विषं रक्तमिश्रितं कृत्वा होमयेत्।

† कार्पासास्थि इति—कार्पासवीजम्। नृणामपीति—नरास्थि। तन्मां-
सिमिति—नरमांसम्।

काकोलूकच्छदैः क्रूरैः कारस्करविभीतकैः ॥ *
मरीचैः सर्षपैः सिक्थैरर्कक्षीरैः कटुत्रयैः।
कटुतैलैः स्नुहीक्षीरैः कुर्य्यान्मारणकर्मणि ॥ †
आयुष्कामो घृततिलैर्दूर्वाभिराम्रपर्णकैः।
प्रयोक्तैराम्रपर्णैश्च ज्वरं सद्यो विनाशयेत् ॥
गुडूची मृत्युञ्जयने तथा शान्तौ गजाख्ययोः।
गौरैस्तु सर्षपैर्हुत्वा सद्यो रोगं हरेन्नवाम् ॥
वृष्टिकामो वैतसीभिः समिद्भिः पत्रकैस्तथा।
हुत्वा पुष्टिमवाप्नोति पुत्रजीवैस्तु पुत्रकम् ॥
घृतगुग्गुलुहोमेन वाक्पतित्वं प्रजायते।
जातीविद्रुममल्लीभिः नागपुन्नागसम्भवैः ॥
पुष्पैः सरस्वतीसिद्धिस्तथा सर्वार्थसाधनम्।
पयसा लवणैर्वापि हुनेद्वृष्टिनिवारणे ॥ १६ ॥

अथ वह्नेर्जिह्वाः। यथा शारदायाम्।—

पद्मरागा सुवर्णाख्या तृतीया भद्रलोहिता।
लोहितानन्तरं श्वेता धूमिनी च करालिका ॥
राजस्यो रसना वह्नेर्विहिताः काम्यकर्मसु।
विश्वमूर्त्तिस्फुलिङ्गिन्यौ धूम्रवर्णा मनोजवा ॥
लोहिताख्या करालाख्या काली तामस्य ईरिताः।
एताः सप्त नियुज्यन्ते क्रूरकर्मसु मन्त्रिभिः ॥
स्वस्वनामसमाभाः स्युर्जिह्वाः कनकरेतसः।
हिरण्या गगना रक्ता कृष्णाऽन्या सुप्रभा मता।
बहुरूपाऽतिरक्ता च सात्त्विक्यो यागकर्मसु ॥ १७ ॥

---

* काकोलूकच्छदैः,—काकपेचकपक्षैः। कारस्कर इति—कुँचिला इति ख्यातः।

† कटुत्रयैरिति—मरीचपिप्पलीशुण्ठीभिः। कटुतैलैरिति—सार्षपतैलैः।

अन्यत्रापि वह्नेर्जिह्वा यथा—

मन्यस्या रुद्रभागे द्रुतकनकनिभा कर्षणादौ हिरण्या
वैदूर्य्या पूर्वभागे प्रभवति गगना स्तम्भनादौ रसज्ञा।
रक्ता बालार्कवर्णा हुतवहविदिशि द्वेषणादौ प्रशस्ता
कृष्णा नीलाम्बुजाभा दिशि दनुजपतेर्मारणे सुप्रशस्ता॥ *
वारुण्यां सुप्रभा सा प्रतिदिशि रसना शान्तिके शोणवर्णा
हेमाभा चातिरक्ता पवनदिशि गतोच्चाटने सम्प्रशस्ता।
मध्ये कुण्डस्य चान्तः प्रभवति बहुरूपा यथार्थाभिधाना
प्रोक्ता जिह्वा विभिन्नाः शिवनिगमपरैः तान्त्रिकैः कार्य्यसिद्धैर॥१८

अथ अग्नेर्नामानि यथा—

पूर्णाहुत्यां मृड़ो नाम शान्तिके वरदस्तथा।
पौष्टिके बलदश्चैव क्रोधोऽग्निश्चाभिचारके॥
वश्यार्थे कामदो नाम वरदाने च चूड़कः।
वह्निर्नाम लक्षहोमे कोटिहोमे हुताशनः॥ १९॥

अथ होमव्यवस्था।

द्रव्यासक्तौ घृतं होमे त्वशक्तौ सर्वतो जपेत्।
मूलमन्त्राद्दशांशा स्यादङ्गादीनां जपक्रिया॥
अशक्तावुक्तहोमस्य जपस्तु द्विगुणो मतः।
येषां जपे च होमे च संख्या नोक्ता मनीषिभिः॥
तेषामष्टसहस्राणि संख्योक्ता जपहोमयोः।
स्वाहान्तेनैव मन्त्रेण कुर्य्याद्धोमं बलिं तथा॥
नमोऽन्तेन नमस्कारमर्च्चनञ्च समाचरेत्।
मन्त्रान्ते नाम संयोज्य तर्पयामीति तर्पणम्।
संख्यानुक्तौ जपे होमे चाष्टोत्तरसहस्रकम्॥ २०॥

* सप्तस्या रसज्ञा च—जिह्वा। रुद्रभागे—ईशानकोणे। हुतवहविदिशि—अग्निकोणे।

अथ स्रुक्स्रुवनियमः।

षट्त्रिंशदङ्गुला स्रुक् स्याच्चतुर्विंशाङ्गुलः स्रुवः।
मुखं कण्ठं तथा वेदीं सप्त चैकाष्टभिः क्रमात्॥
आयामानाहतो * दण्डो विंशतिश्च षड़ङ्गुलः।
वेदरामाङ्गुलैः कुण्डो गर्त्तो हि चतुरङ्गुलः॥
खातं वेदाङ्गुलैर्वृत्तमङ्गुलत्रितयं खनेत्।
मेखला द्व्यङ्गुला तद्वत् शोभाशेषं † विचिन्तयेत्॥
वेदीचत्र्यंशेन विस्तारं कुर्य्यात् कुण्डमुखाग्रयोः।
कनिष्ठाग्रमितं रन्ध्रं स्रुचो घृतविनिर्गमे॥
कार्षिकद्व्यङ्गुलं खातं पङ्के मृगपदाकृतिः। ‡
द्वाविंशत्यङ्गुलो दण्ड आनाहश्च कृताङ्गुलः॥
दण्डमूलाग्रयोर्गण्डो स्रुवे कङ्कणवद्भवेत्।
सुवर्णरूप्यताम्रैर्वा स्रुक्स्रुवौ दारुजावपि॥
आयसीयौ स्रुक्स्रुवौ वा कारस्करमयावपि।
नागेन्द्रलतयोर्विद्यात् क्षुद्रकर्मणि संस्थितौ॥
चन्दनं खदिराश्वत्थ-प्लक्षचूतविकङ्कताः।
चम्पाऽऽमलकसारश्च पलाशाश्चेति दारवः॥ २१॥

अथ होममुद्राः।

न देवाः प्रतिगृह्णन्ति मुद्राहीनां यथाहुतिम्।
मुद्रयैवेति होतव्यं मुद्राहीनं न भुज्यते॥
मुद्राहीनञ्च यो मोहाद्धोममिच्छति मन्दधीः।
यजमानं स चात्मानं पातयेत् तेन निश्चितम्॥

---

* आयामानाहत इति—दैर्घ्यं विस्तारश्च।

† शोभाशेषमिति—मेखलावहिर्भागस्य शोभासंज्ञा।

‡ "कार्षिकद्व्यङ्गुलं दण्डोनाहतस्तस्य तेऽङ्गुलः" इति वा पाठः।

तिस्रो मुद्राः स्मृता होमे मृगी हंसी च शूकरी।
शूकरी करसङ्कोची हंसी मुक्तकनिष्ठिका॥
मृगी कनिष्ठा तर्जन्योर्होममुद्रात्रयोरिता।
आभिचारिककार्य्येषु शूकरी परिकीर्त्तिता॥
नमः स्वाहा वषट् वौषट् हुं फड़न्ताश्च जातयः।
शान्तौ वश्ये तथा स्तम्भे विद्वेषोच्चाटमारणे॥ २२॥

इति श्रीकृष्णानन्दविद्यावागीशभट्टाचार्य्यकृतायां षट्कर्मदीपिकायां कुण्डादिनियमो द्वितीयोद्देशः।

अथ शान्तिकर्म।

ऋषय ऊचुः।—नामत्रयस्य माहात्म्यं श्रोतुकामा वयं प्रभो!।
भगवन्! श्रोतुमिच्छामि वक्तुमर्हस्यशेषतः॥ १॥
ब्रह्मोवाच।—अतिगुह्यतरं मन्त्रं वर्षकोटिशतैरपि।
न शक्यं विस्तरं वक्तुं संक्षेपाच्छृणुत द्विजाः!॥ २॥

अथ अच्युतादौ पूजादिः।

अच्युतानन्तगोविन्दैश्चतुर्थ्यन्तैस्त्रिभिः पदैः।
नमोऽन्तैर्जपकाले तु मूलमन्त्र इतीरितः॥
अथवाऽपि समस्तैस्तु चतुर्थ्यन्तैकमन्त्रता।
तदृषिः शौनको ज्ञेयः पृथक् पक्षे पराशरः॥
व्यासश्च नारदश्चैव विराट्छन्द उदीरितः।
परं ब्रह्म तथा प्रोक्तं हरिर्वा देवतेत्यपि॥
जपकाले तु पूजायां नमःशब्दं प्रयोजयेत्।
तर्पणे तर्पयामीति द्वितीयान्तं प्रयोजयेत्॥
स्वाहान्तं होमकाले तु चतुर्थ्यन्तं तु योजयेत्।
षड़ङ्गमन्त्रैरेतैस्तु हृदयादिक्रमेण तु॥

नेत्रान्ताः स्वयमेवैते प्रयोज्या मन्त्रवित्तमैः।
अविदित्वा ऋषिं छन्दो देवताङ्गान्यपि द्विजः॥
केवलं स्वयमेवैतज्जप्तारं रचति ध्रुवम्।
साङ्गञ्च योजयेन्नित्यं सप्त सप्त च सप्त च॥
सप्तवारं कृते जापे न सिध्यति यदा पुनः।
सप्तवारं सप्तवारं तदा कुर्य्यात् प्रयोगकम्॥ ३॥

अथ हरिध्यानम्।

अथ ध्यानं प्रवक्ष्यामि सर्वपापप्रणाशनम्।
"शङ्खचक्रधरं देवं चतुर्बाहुं किरीटिनम्॥
सर्वायुधैरुपेतञ्च गरुड़ोपरि संस्थितम्।
शनकादिमुनीन्द्रैस्तु सर्वदेवैरुपासितम्॥
श्रीभूमिसहितं देवमुदयादित्यसन्निभम्।
प्रातरुद्यत्सहस्रांशु-मण्डलोपरिसंस्थितम्॥
सर्वलोकस्य रक्षार्थमनन्तं नित्यमेव च।
अभयं वरदञ्चैव प्रयच्छन्तं मुदान्वितम्"॥
एवं ध्यात्वा हरिं नित्यं परं ब्रह्मस्वरूपिणम्।
प्रातर्मध्यन्दिने चैव सायाह्ने च विशेषतः॥
अर्चयेद्देवदेवेशं घृतपुष्पजलादिभिः।
हविषाग्नौ जलैः पुष्पैर्मनसा हृदये हरिम्॥
अर्चयन्तं च यो नित्यं जपेन रविमण्डले।
किञ्चिद्ध्यानार्चनं कृत्वा जपेन्नित्यमतन्द्रितः॥
अशुचिश्चात्मनो वापि मनसा पापमाचरेत्।
शुचिरेव जपेन्नित्यं नामत्रयजपाद्द्विजाः!॥
विनियोगान् प्रवक्ष्यामि यथावद्द्विजसत्तमाः!।
नास्मात् परतरा रक्षा रोगार्त्तानां विधीयते॥
अष्टोत्तरसहस्रं वा शतं वा जपसंख्यया।

रविवारे तथाऽष्टम्यां रोगार्त्तान् मूर्द्ध्नि मार्जयेत्॥
नित्यमेव पिबेत् तोयमष्टाविंशतिसंख्यया।
हुनेद् घृतैस्तिलैर्दूर्वा-गुड़ूचीभिः पृथक् पृथक्॥
लक्षञ्चैव जपेन्मन्त्रं महारोगप्रशान्तये।
श्रीवृक्षाश्वत्थमूले वा रोगिणं संस्पृशन् जपेत्॥
स्पृशन् जप्त्वा निरीक्षेत चादित्यं मनसा स्मरन्।
एवं कृतवतः पुंसो रोगशान्तिर्भविष्यति॥
कन्यां वा लाजहोमेन स्त्रियं वा बिल्वपत्रकैः।
पुत्त्रार्थी घृतहोमेन चारोग्यञ्च तिलैर्घृतैः॥
गुड़ूचीघृतदूर्वाभिस्तिलैर्बिल्वैः कुशैः शरैः।
यथाकामो तु जुहुयात् तत्तत्कामस्य सिद्धये॥
ग्रहापस्मारकुष्माण्डाः पिशाचाः प्रेतसंस्थिताः।
लक्षे हुते च दूर्वाभिस्तेषां शान्तिर्भविष्यति॥
रविवारे जले स्थित्वा नाभिमात्रे जपेन्नरः।
अष्टोत्तरसहस्रन्तु ज्वरशान्तिर्भविष्यति॥
स्पृष्ट्वाऽश्वत्थं जपेद्वर्षं रविमण्डलमध्यगम्।
ध्यायन् कृष्णं लभेत् काममनुरूपं कुटुम्बिनाम्॥
अच्युतानन्तगोविन्द-नामोच्चारणभीषिताः।
नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम्॥
सत्यं सत्यं पुनः सत्यमुत्क्षिप्य भुजमुच्यते।
वेदशास्त्रात् परं नान्यत् न देवः केशवात् परः॥
ज्वरग्रहादिग्रस्तस्तु स्पृष्ट्वा लक्षं जपेज्जले।
असाध्योऽपि भवेत् सुस्थो भस्मना ताड़येद् बुधः॥
मूर्द्ध्नि चैव ललाटे च न्यसेन्मन्त्रत्रयं हृदि।
आरोग्यं सर्वजन्तूनां यथेच्छं गच्छति स्वयम्॥
मोक्षकामो जपेन्मन्त्रमष्टोत्तरसहस्रकम्।

यावज्जीवं करे तस्य स्थिता मुक्तिर्न संशयः॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च विविधास्तथा।
सर्वे भवन्ति वै मुक्ता नामत्रयजपाद् द्विजाः!॥
दूर्वाभवाश्च समिधो गोदुग्धेन समन्विताः।
होतव्याः शान्तिके देवि! शान्तिर्येन भवेत् स्फुटम्॥४॥

इति सनत्कुमारसंहितायां शान्तिकल्पो नाम कल्पत्रयं सम्पूर्णम्।

अथ आथर्वणोक्तज्वरशान्तिः।

अस्य मन्त्रस्य अगस्त्य ऋषिरनुष्टुप् छन्दः कालिका देवता ज्वरस्य सद्यः शान्त्यर्थे विनियोगः।—

"ओं कुवेरन्ते मुखं रौद्रं नन्दिमानन्दिमावहन्।
ज्वरं मृत्युभयं घोरं ज्वरं नाशयते ध्रुवम्॥१॥ *
सहस्रमयुतं वापि जपेत् शान्तिर्भवेद् ध्रुवम्।
आम्रपत्रस्य होमेन ज्वरशान्तिर्भवेन्नृणाम्॥२॥
प्रणवं पूर्वमुच्चार्य्य शान्ते युग्मं तथैव च।
सर्वारिष्टनाशिनी तु तदन्ते वह्निवल्लभा॥
"ओं शान्ते शान्ते सर्वारिष्टनाशिनि! स्वाहा"॥३॥
एकलक्षजपेनापि सर्वशान्तिर्भवेद् ध्रुवम्॥४॥

अयुतजपेन सिद्धिः। अस्य मन्त्रस्यायुतजपेन सिद्धिं कृत्वा प्रयोगः कार्य्यः।

समाहितमना भूत्वा मनसा चार्थचिन्तनात्।
विज्ञेया मानसी भक्तिः शान्तिकर्मणि योजयेत्॥५॥

---

* केचित्तु।—"ओं कुवेरन्तु मुखं रावं नन्दिकानन्दमावहन्।
ज्वरं मृत्युभयं घोरं ज्वरं नाशयते ज्वरम्॥" इति पठन्ति।

अथ तन्त्रोक्तज्वरशान्तिः।

कथयाम्यथ लोकानां हिताय सर्वशान्तिकम्।
विधानं यत्समादिष्टं तन्त्रराजे मयोत्तरे॥
शुद्धस्फटिकसङ्काशं देवदेवं त्रिलोचनम्।
चन्द्रमण्डलमध्यस्थं चन्द्रचूड़ं जटाधरम्॥
चतुर्भुजं वृषारूढ़ं भैरवं तुम्बुरुं * विभुम्।
शूलमालाधरं दक्षे वामे पुस्तं सुधाघटम्॥
सर्वावयवसंयुक्तं सर्वाभरणभूषितम्।
सितवस्त्रपरीधानं नागहारविराजितम्।
मानसे भावयेद्देवं सर्वशान्तिकरं शिवम्॥ ६॥

अथ तुम्बुरुभैरवमन्त्रः।

अस्य मन्त्रं प्रवक्ष्यामि देवानामपि दुर्लभम्।
येन विज्ञानमात्रेण जायन्ते सर्वसिद्धयः॥
आदौ तारं समुद्धृत्य ततः तुम्बुरुभैरव-
पदं दत्त्वा शिवं बीजम् अमुकस्य पदं वदेत्॥
सर्वशान्तिपदं दत्त्वा पदं देयं कुरुद्वयम्।
ईशानं वह्निमारूढ़ं द्वितीयस्वरभूषितम्॥
नादबिन्दुसमायुक्तं वह्निमायामनन्तरम्।
अनेन बलिमादद्यादन्नादिकसमन्वितम्॥

अथ मन्त्रः।—"ओं तुम्बुरुभैरव! ह्रौं अमुकस्य सर्वशान्तिं कुरु कुरु ह्रां रं ह्रीं"॥ ७॥

पूजयेत् श्वेतदूर्वाभिर्नानापुष्पैर्विशेषतः।
धूपदीपादिसंयुक्तैः सहस्रं प्रजपेन्मनुम्॥
यस्य नाम्ना भवेत् तस्य सर्वशान्तिरनुत्तमा।
साध्यमौलौ सुधाधारं तस्य मूर्ध्नि प्रवर्षिणम्॥

* तुम्बुरुं—तुम्बुरुसंज्ञकम्।

अहर्निशं स्मरेद्देवं शान्तिपुष्टिकरं शिवम्।
होमं वा कारयेदेभिर्दूर्वापुष्पाक्षतादिभिः॥
तिलक्षीरसमायुक्तैर्द्रव्यैश्च घृतसंयुतैः।
त्रिकोणके ततः कुण्डे वह्निं प्रज्वाल्य होमयेत्।
दशाङ्कस्य होमेन ततः शान्तिर्भवेदिति॥ ८॥

अथ सञ्जीवनी विद्या।

अथवापि महादेव्याः सञ्जीवन्याः क्रमादिह।
जपेन कारयेच्छान्तिं सर्वोपद्रवनाशिनीम्॥

"ओं नमो भगवति मृतसञ्जीवनि! अमुकस्य शान्तिं कुरु कुरु स्वाहा"॥ ९॥

अनेन मनुना मन्त्री भावयित्वा सुचेतसा।
गोक्षीरशशिमिश्राभामर्द्धेन्दुकृतशेखराम्॥
त्रिमुखीं षड्भुजां त्र्यक्षीं नृत्यन्तीं यमपृष्ठगाम्।
जटाजूटसमायुक्तां रक्तवस्त्रपरिच्छदाम्॥
खड्गं त्रिशूलं कर्त्रीञ्च दक्षिणे दिशि वामके।
खेटकं डमरुं चक्रं धारयन्तीं शवासनाम्॥
प्रत्यालीढपदाम्भोजां मुण्डमालावलम्बिनीम्।
काञ्चीमञ्जीरहाराद्यैर्भूषणैः परिभूषिताम्।
अस्याश्च ध्यानमात्रेण तन्नास्ति यन्न साधयेत्॥ १०॥

अथ मृत्तिकाशिवलिङ्गपूजाविधिः।

मृत्तिकया शिवलिङ्गपूजा कालोत्तरे नारदवाक्यम्।—

असारे खलु संसारे सारमेतच्चतुष्टयम्।
काश्यां वासः सतां सङ्गो गङ्गाम्भः शम्भुसेवनम्॥ ११॥

स्कान्दपुराणे।—

अग्निहोत्रं त्रिवेदाश्च यज्ञाश्च बहुदक्षिणाः।
शिवलिङ्गार्चनस्यैते कोट्यंशेनापि नो समाः॥
छित्त्वा भित्त्वा च भूतानि हत्वा सर्वमिदं जगत्।

यजेद्देवं विरूपाक्षं न स पापेन लिप्यते ॥
अनेकजन्मसाहस्रं भ्राम्यमाणस्तु योनिषु ।
कः समाप्नोति वै मुक्तिं लिङ्गार्चनमृते नरः ॥
प्रातरुत्थाय यो लिङ्गं भक्त्या सम्पूजयेत् सकृत् ।
कपिलाऽसंख्यदानस्य यत्फलं तदवाप्नुयात् ॥
मध्यं दिनकरे प्राप्ते यो लिङ्गं परिपूजयेत् ।
सम्पूर्णां पृथिवीं दत्त्वा यत्फलं तदवाप्नुयात् ॥
वारुणीमाश्रिते सूर्य्ये शिवं सम्यक् समर्चयेत् ।
गवां शतसहस्रस्य दत्तस्य फलमाप्नुयात् ॥ १२ ॥
आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका ।
प्रलये सर्वदेवानां लयनाल्लिङ्गमुच्यते ॥ १३ ॥

अथ लिङ्गप्रमाणम् ; यथा शिवतन्त्रे ।—

मृत्तिकातोलकं ग्राह्यमथवा तोलकद्वयम् ।
त्रिसूत्रस्य प्रमाणेन गठनं कारयेद् बुधः ।
स्वाङ्गुष्ठपर्वमानन्तु कृत्वा लिङ्गं प्रपूजयेत् ॥
मृदादिलिङ्गगठने प्रमाणं परिकीर्त्तितम् ।
फलं मुक्तिमवाप्नोति चान्यथा चेत् तथाऽन्यथा ॥ १४ ॥

तथा अन्यप्रमाणं कालोत्तरे ।—

लिङ्गे वेद्यां तथा पीठे सूत्रत्रयनिपातनात् ।
समानञ्चेद्विजानीयात्त्रिसूत्रीकरणन्त्विदम् ।
मारकतस्फाटिकादि पञ्चसूत्रीप्रमाणकम् ॥ १५ ॥

तथा अन्यप्रमाणं लिङ्गपुराणे ।—

शिवलिङ्गस्य यन्मानं तन्मानं दक्षसव्ययोः ।
योन्यग्रमपि यन्मानं तदधोऽपि तथा भवेत् ॥ १६ ॥

तथा प्रमाणमन्यत् तन्त्रान्तरे ।—

लिङ्गस्य यादृग्विस्तारः परिणाहोऽपि तादृशः ।

लिङ्गस्य द्विगुणा वेदी योनिस्यादर्द्धसम्मिता॥
सर्वतोऽङ्गुष्ठतो ह्रस्वं न कदाचिदपि क्वचित्।
रत्नादिषु च निर्माणे मानमिच्छावशाद्भवेत्॥ १७॥

प्रमाणान्तरं शिवधर्मे।—

ब्रह्मा पूजयते नित्यं शुभं लिङ्गं शिलामयम्।
तस्य सम्पूजनात्तेन प्राप्तं ब्रह्मत्वमुत्तमम्॥
इन्द्रनीलमयं लिङ्गं विष्णुरर्चयते सदा।
विष्णुत्वं प्राप्तवांस्तेन सोऽभूद् भूतैकशासनः॥
स्फाटिकं निर्मलं लिङ्गं वरुणोऽर्चयते सदा।
तेन तद्वरुणत्वं हि प्राप्तमूर्जबलान्वितम्॥ १८॥

तथाह लिङ्गपुराणे।—

मणिमुक्ताप्रवालैश्च रत्नैरप्यर्चनं मतम्।
न गृह्णामि विना देवि! विल्वपत्रैर्वरानने!॥ १९॥

अपि च मन्त्रतन्त्रप्रकाशे।—

लिङ्गद्वयं तथा नार्च्यं गणेशद्वयमेव च।
शक्तिद्वयं तथा सूर्य्यद्वयमेकत्र नार्चयेत्॥
द्वे चक्रे द्वारकायास्तु शालग्रामशिलाद्वयम्।
एतेषामर्चनान्नित्यमुद्वेगं प्राप्नुयाद् गृही॥ २०॥

अथ शिवपूजाविधानम्।

मृदाहरणसंघट्ट-प्रतिष्ठाह्वानमेव च।
स्नपनं पूजनञ्चैव विसर्जनमिति क्रमात्॥
हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक्।
शिवः पशुपतिश्चैव महादेव इतिक्रमात्॥ २१॥

तथा अग्निपुराणे।—

विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया।
विना मालूरपत्रेण शिवपूजा वृथा भवेत्।

पूजितोऽपि महारुद्रो न स्यात्तस्य फलप्रदः ॥ २२ ॥

तथा च शैवागमे ।—

ऊर्द्ध्वपुण्ड्रं त्रिपुण्ड्रं वा कृत्वा सन्ध्यां समाचरेत् ।
शिवपूजाविधौ मन्त्री त्रिपुण्ड्रमपि * धारयेत् ॥
अग्निहोत्रभवं भस्म शैवमन्त्रभवन्तु वा ।
शूद्रस्तु तेन मन्त्रेण भस्मान्यपि च धारयेत् ॥
न प्राचीमग्रतः शम्भोर्नोदीचीं शक्तिसंयुताम् ।
न प्रतीचीं यतः पश्चादतो दक्षं समाश्रयेत् ॥
सर्वो भवश्च रुद्रश्च तथैवोग्रः स्मृतः पुनः ।
भीमः पशुपतिश्चैव यजमानस्तथैव च ॥
ईशानसूर्य्य इति च महादेवस्तु सोमकः ।
मूर्त्तयोऽष्टौ शिवस्यैताः शिवसन्निधिकारिकाः ॥ २३ ॥

लैङ्गे ।—मूर्त्तयोऽष्टौ शिवस्यैताः पूर्वादिक्रमयोगतः ।
आग्नेय्यन्ताः प्रपूज्याश्च वेद्यां लिङ्गे शिवं यजेत् ॥ २४ ॥

अथ लिङ्गमुद्रा यथा ।—

दक्षाङ्गुष्ठं समुन्नम्य वामाङ्गुष्ठेन वेष्टयेत् ।
अङ्गुलीभिर्निपीड्यैव शिवस्याग्रे प्रचालयेत् ।
लिङ्गमुद्रेयमाख्याता शिवसान्निध्यकारिणी ॥ २५ ॥

अथ मुखवाद्यफलमाह ।

भूमिदानेन यत् पुण्यं कन्यादानेन यत् फलम् ।
मुखवाद्येन तत् पुण्यमुभयं लभते नरः ॥
तदेव पुण्यं गीतस्य नृत्यस्य च विशेषतः ॥ २६ ॥

तत्रैव । सहस्रमर्चयेल्लिङ्गं निरयं स न पश्यति ।
शिवदेहमवाप्नोति भुक्ता भोगाननुत्तमान् ॥
लक्षं सम्पूजयेद् यस्तु शिवत्वं लभते ध्रुवम् ।

* अत्र अपि एकार्थकः ।

आयुरारोग्यसम्पत्तियुक्तान् पुत्त्रानवाप्नुयात् ॥
अयत्नेन लभेत् पुत्त्रान् सर्वोत्कृष्टगुणान्वितान्।
लक्षैर्दशभिरिन्द्रत्वं ब्रह्मत्वं विंशतिः * स्मृतम्।
रुद्रत्वन्तु चतुर्भिस्तु कोट्या च शिवतां व्रजेत् ॥ २७ ॥

अथ लिङ्गस्तवः भविष्यपुराणे।—

सर्वज्ञानप्रविज्ञानप्रदायैकमहात्मने।
नमस्ते सर्वदेवेश! सर्वभूतहिते रत!॥
अनन्तभोगसम्पन्न! अनन्तासनसंस्थित!।
अनन्तकान्तिसम्भोग! परमेश! नमोऽस्तु ते॥
अनन्तकान्तिसम्पन्न! अनन्तासनसंस्थित †!।
परापरपरातीत! उत्पत्तिस्थितिकारक!॥
सर्वार्थसाधनोपाय! विश्वेश्वर! नमोऽस्तु ते।
सर्वार्थनिर्मलाभोग! सर्वव्याधिविनाशन!॥
योगियोगिमहायोगि-योगीश्वर! नमोऽस्तु ते।
कृत्वा लिङ्गप्रतिष्ठाञ्च ध्यात्वा देवं सदाशिवम्॥
पूजयित्वा विधानेन स्तवमेतदुदीरयेत्।
लिङ्गस्तवं महापुण्यं यः शृणोति सदा नरः॥
नोत्पद्यते च संसारे स्थानं प्राप्नोति शाश्वतम्।
पापकञ्चुकनिर्मुक्तः प्राप्नोति परमं पदम्॥ २८॥

इति भविष्यपुराणे लिङ्गस्तवः समाप्तः।

---

* विंशतिरित्यत्र विंशत्या इति बोद्धव्यम्।

† अनन्तासनसंस्थित! इत्यस्य द्विवारमुच्चारणमत्र भुजङ्गेशासनासंख्यासनार्थ-पर्य्यवसायकमिति न दोषावहम्।

अथ शैववर्जनीयानि ।

यथा शिवधर्मोत्तरे ।

हिंसां परकलत्रञ्च निष्ठुरामनृतां गिरम् ।
स्तेयं केशवनिन्दाञ्च शिवभक्तो विवर्जयेत् ॥ १ ॥

अथ शिवलिङ्गपूजाप्रयोगः ।

शुचौ देशे समुपविश्य दर्भपाणिराचान्तः कामनाभेदेन सङ्कल्पं कृत्वा पूजामारभेत् । "ओं हराय नमः" इति मृदाहरणम् । "ओं महेश्वराय नमः" इति सङ्घट्टनम् । "ओं शूलपाणे ! इह सुप्रतिष्ठितो भव" इति प्राणप्रतिष्ठा । ततो ध्यायेत् ।

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसम्
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानम्
विश्वाद्यं विश्ववीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥ २ ॥

ओं पिनाकधृक् ! इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इत्याद्यावाहनं कृत्वा । ओं पशुपतये नमः, इति स्नापनम् । ओं नमः शिवाय इति पाद्यादिभिः पूजयेत् । ततो वामावर्त्तेन पिण्डिकायां प्राच्याद्याग्नेय्यन्तं "ओं सर्वाय चितिमूर्त्तये नमः । ओं भवाय जलमूर्त्तये नमः । ओं रुद्राय अग्निमूर्त्तये नमः । ओं उग्राय वायुमूर्त्तये नमः । ओं भीमाय आकाशमूर्त्तये नमः । ओं पशुपतये यजमानमूर्त्तये नमः । ओं महादेवाय सोममूर्त्तये नमः । ओं ईशानाय सूर्य्यमूर्त्तये नमः" । इति गन्धपुष्पैः सम्पूजयेत् । "ओं महादेव ! क्षमस्व" इति विसर्जयेत् ।

तथाह लैङ्गे ।—

एकीकृत्य च लिङ्गानि दशपञ्चशतानि वा ।
प्रत्येकमथवा देवि ! विल्वपत्रैः प्रपूजयेत् ॥

एकं पाशुपतं लिङ्गं मृच्छिलादिविनिर्मितम्।
शालग्रामशिलामेकां गृहस्थश्चैव पूजयेत्॥ ३॥

अथ शिवनिर्माल्यभोजनम्। यथा शिवरहस्ये—

यथा यथा च स्वादूनि शुभानि सुरभीणि च।
निवेद्य पिष्टपानादि तत्फलानि तथा तथा।
भक्त्या निवेद्य भुञ्जानः फलमक्षयमाप्नुयात्॥ ४॥

अथ हारीतोक्तनक्षत्रदोषाज्ज्वरशान्तिर्लिख्यते।

नक्षत्रैस्तु ज्वरोऽसाध्यः साध्योऽपि स चिकित्सितः।
रिष्टिर्हारीतनिर्दिष्टा सा चात्र लिख्यते मया॥
जन्माधाने च निधने प्रत्यरौ च विपत्तते।
यदि व्याधिः समुत्पन्नः क्लेशाय मरणाय वा॥
ज्योतिश्चक्रे धनिष्ठादिनक्षत्राणां विचेष्टितम्।
दशरात्रं धनिष्ठासु ज्वरो भवति देहिनाम्॥
षड्रात्रं वा दशाहं वा भवेत् शतभिषाज्ज्वरः।
तथा भाद्रपदास्वेतत् पूर्वासु मरणं ध्रुवम्॥
उत्तरासु भवेन्मोक्षो दिवसेऽर्द्धचतुर्दशे।
षड्रात्रं पञ्चरात्रं वा रेवत्यां वर्त्तते ज्वरः॥
अश्विन्यामपि षड्रात्रात् सुखं सम्पद्यते ध्रुवम्।
भरण्याञ्च यमस्तिष्ठेत् मरणं पञ्चमेऽहनि॥
कृत्तिकायां गृहीतस्य सप्तरात्रं भवेज्ज्वरः।
न मुञ्चेद् यदि सप्ताहादेकविंशतिमे सुखम्॥
रोहिण्यामष्टरात्रेण सुखमेकादशेन वा।
मृगशीर्षे ज्वरोऽप्येतन्नवरात्रमथापि वा॥
आर्द्रायामुपसृष्टस्य पञ्चाहान्मृत्युमादिशेत्।
ऊर्द्धं यद्यपि वर्त्तेत त्रिपक्षान्मृत्युमादिशेत्॥
पुनर्वसूपसृष्टेन ज्वरेण परिपीड़ितम्।

त्रयोदशाहतो मुञ्चेत् सप्तविंशेऽथवाऽहनि ॥
पुष्ये त्रिरात्रं ज्वरितं सप्ताहान्नातिवर्त्तते ।
अश्लेषायां भवेन्मृत्युर्दीर्घकालक्रमादपि ॥
मघायां द्वादशाहेन मृत्युर्भवति देहिनाम् ।
ऊर्द्ध्वं ततो मघायान्तु पुनरेव सुखी नरः ॥
पूर्वासु चोपसृष्टस्य फल्गुनीषु भवेद् * यमः ।
उत्तरासु तथाष्टाहं नवरात्रमथापि वा ॥
एकविंशतिरात्राद्वा ज्वरशान्तिं समृच्छति ।
हस्तेषु सप्तमे मोक्षश्चित्रायामष्टमेऽह्नि च ॥
ऊर्द्ध्वं वियुज्यमानोऽसौ मुञ्चेच्चित्रागमे पुनः ।
स्वातीयोगे दशाहेन मुञ्चेत् पक्षत्रयेण वा ॥
विशाखासु भवेन्मृत्युरेकविंशतिमेऽहनि ।
ज्वरस्तु दिवसानष्टावनुराधासु वर्त्तते ॥
अत ऊर्द्ध्वं न मुक्तस्य नापि तस्य चिकित्सितम् ।
ज्येष्ठायां पञ्चमे मृत्युरूर्द्ध्वं वा द्वादशे सुखम् ॥
मूले समुपसृष्टस्य दशरात्रं भवेज्ज्वरः ।
अत ऊर्द्ध्वं न मुक्तस्य नापि तस्य चिकित्सितम् ॥
आषाढ़ायान्तु पूर्वायां नवरात्रात् प्रमुच्यते ।
अत ऊर्द्ध्वं न मुक्तस्य नापि तस्य चिकित्सितम् ॥
उत्तरासु आषाढ़ासु मासमेकं हि क्लिश्यते ।
अष्टौ वा नव मासान् वा ततोऽस्य सुखमादिशेत् ॥
श्रवणे त्वष्टरात्रं वा क्लिश्यते ज्वरपीड़ितः ।
एतद् भगवता प्रोक्तं नक्षत्राणां विचेष्टितम् ।
य एनं वेत्ति तत्त्वेन स राजार्हो भिषग्वरः ॥ १ ॥

---

* भवेद् इत्यनेन प्रभवेदिति बोधः ।

अथ हारीतोक्तज्वरशान्तिविधानम्।

हारीते ज्वरशान्त्यर्थं विधानं लिख्यतेऽधुना।
"अग्निर्मूर्द्धेति" वह्न्यार्क्षे दधि वै जुहुयादसौ॥
"हिरण्यगर्भः" रोहिण्यां सर्ववीजमयं हविः।
सर्पिर्मांसं मृगे "सोमं राजानम्" इति होमयेत्॥

अथ सर्वसिद्धिः।

"ओं इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे
तीः। यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मि-
नातुरम्"। (शु० य० ऋक् १६।४८) इति आर्द्रासु मधु जुहु-
त्। "ओं महीमूषु मातरम्" इति पुनर्वसौ तण्डुलान्।
न्तु।—"ओं महीमूषु मातरं सुव्रतानामृतस्य पत्नीमवसे हुवेम।
विचत्राम जरन्ती मुरूचीं सुशर्माणमदितिं सुप्रणीतिम्"
शु० य० ऋक् २१।५)। "ओं बृहस्पते अति यदर्य्यो अर्हाद्
मद्वि भाति क्रतुमज्जनेषु। यद्दीदयच्छवस ऋतप्रजात तद-
ासु द्रविणं धेहि चित्रम्। उपयामगृहीतोऽसि बृहस्पतये
ा। एष ते योनिर्बृहस्पतये त्वा" (शु० य० ऋक् २६।३)।
ति पुष्ये घृतपायसम्।

"ओं नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु। ये अन्तरीक्षे ये
दिवि तेभ्यः सर्पेभ्यो नमः" (शु० य० ऋक् १३।६) इति अश्लेषासु
वौषधिम्। "ओं इदं पितृभ्यः" इति मघासु शालितण्डुलान्।

"ओं इदं पितृभ्यो नमोऽस्त्वद्य ये पूर्वासो य उपरास ईयुः।
ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु विक्षु"।
(शु० य० ऋक् १९।६८)

"ओं प्रातर्जितम्" इति पूर्वफल्गुनीषु कङ्गु हुनेत्।

"ओं प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो
धर्त्ता। आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षी-

त्याह" (शु० य० ऋक् ३४।३५)। "ओं पुरो यमस्य स्वाहा"
इति "तत्सवितुर्वरेण्यम्" (शु० य० ऋक् ३।३५—२२।९) इति
च घृताहुतिम् उत्तरफल्गुनीषु जुहुयात्। तत्सवितुरिति हस्ते
दधि। "ओं द्यावा पृथिवी वरुणस्य धर्मणा विष्कभीते अजर
भूरिरेतसा" इति चित्रासु मधुपायसम्।

"ओं वायुरग्रेगा यज्ञप्रीः साकं गन्मनसा यज्ञम्। शिवो
नियुद्भिः शिवाभिः" (शु० य० ऋक् २७।३१) इति स्वातीषु
घृताक्तान् तिलान्।

"ओं इन्द्राग्नी आगतं सुतं गीर्भिर्नभो वरेण्यम्। अस्य
पातं धियेषिता उपयामगृहीतोऽसीन्द्राग्निभ्यां त्वा। एष ते
योनिरिन्द्राग्निभ्यां त्वा" (शु० य० ऋक् ७।३१) इति विशाखासु
नवौदनम्। "ओं महिभूपाम्" इति अनुराधासु लसुनम्। "ओं
फल्गुनाम्ने" इति ज्येष्ठे कलायम्।

"ओं अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः। तं
जानन्नग्न आरोहाथा नो वर्धयारयिम्" (शु० य० ऋक् ३।१४
—१२।५२) इति मूलेषु मूलकम्।

"ओं इदमापः प्रवहतावद्यञ्च मलञ्च यत्। तच्चाभिदुद्रोहा
नृतं यच्च शेपे अभीरुणम्। आपो मा तस्मादेनसः पवमानश्च
मुञ्चतु" (शु० य० ऋक् ६।१७)। इति पूर्वाषाढ़ासु शालिम्।
"ओं विश्वेभ्यो मारुत" इति उत्तरासु रजतम्; तदभावे कुन्द
पुष्पम्। "ओं इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढ़मस्य
पांसुरे स्वाहा" (शु० य० ऋक् ५।१५) इति श्रवणे सर्वं रत्नम्।

"ओं वायुरग्निर्वसुःश्रवाः अच्चतानद्यसुत्तमम्। रयिम्न
सनो बोधिसुधीहवं सुरस्यानो अच्चायतमस्मात्" इति धनिष्ठासु
वटशुङ्गम्।

"ओं तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो

र्ः। अहेडमानो वरुणेह बोध्युरु शंस मा न आयुः प्रमोषीः”
० ऋक् १८।४९—२१।२) इति शतभिषायां जलपुष्पाणि।
“ओं उत्तराहिव्रध्नः” इति पूर्वभाद्रपदे शाल्योदनम्।
ओं अहिरिव भोगैः पर्य्येति बाहुं ज्याया हेतिं परिबाध-
। हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमांसं परि-
विश्वतः” (शु० य० ऋक् २९।५१) इति उत्तरभाद्रपदे
दनम्।
ओं शस्तो तारस्व इह छासि” इति रेवत्यां फलान्यक्षतानि।
उभा पिबतमश्विनोभा नः शर्म यच्छतम्। अविद्रि-
ऊतिभिः” (शु० य० ऋक् ३४।२८) इति अश्विन्यां क्षीर-
मत्। “ओं मासं यमः” इति भरण्यां तण्डुलान् जुहु-
इति सर्वसिद्धिः ॥ १ ॥

अथ हारीतोक्तज्वरहरणबलिमन्त्रः।

ओं ह्रीं क्लीं ठः ठः भो भो ज्वर! शृणु शृणु हन हन गर्ज
एकाहिकं द्व्याहिकं त्र्याहिकं चातुराहिकं साप्ताहिकं
कं आर्द्धमासिकं वार्षिकं द्वैवार्षिकं मौहूर्त्तिकं नैमेषिकं
ट भट भट हुं फट् अमुकस्य ज्वरं हन हन मुञ्च मुञ्च
गच्छ गच्छ स्वाहा” ॥

ज्वरामयगृहीतस्य मुष्टिभिर्नवभिः कृतः।
तण्डुलैर्वर्णभेदेन कुर्य्यात् पुत्तलकं शुभम् ॥
तं हरिद्राविलिप्ताङ्गं चतुःपीतध्वजान्वितम्।
हरिद्रारसपूर्णाभिः पुटकाभिस्तु सप्तभिः ॥
मण्डितं गन्धपुष्पाद्यैरवताय्य विसर्जयेत्।
एतद्दिनत्रयं कुर्य्यात् ज्वररोगोपशान्तये ॥ २ ॥

अथ पुत्तलकविसर्जनम्।

ओं अद्येत्यादि अमुकगोत्रस्य अमुकस्य उत्पन्नज्वरक्षयाय

तन्नक्षत्राय एष रचितपुत्तलकवलिर्नमः" इत्युत्सृज्य नि
यित्वा उत्तरस्यां दिशि पुत्तलकविसर्जनं कर्त्तव्यम्॥ ३॥

अत्र पुत्तलकं गर्गोक्ततुल्यमिति। एतत्कृत्वा आचमन
नक्षत्राय दद्यात्। ज्वरहृदयं मार्जयिष्यामि। "भो भो
शृणु शृणु हन हन गर्ज गर्ज ऐकाहिकं द्याहिकं त्र्य
चातुराहिकं साप्ताहिकं मासिकं आर्द्धमासिकं वार्षिकं द्वैव
मौहूर्त्तिकं नैमेषिकं अट अट भट भट हुं फट् वज्रपाणी
ओं शिरो मुञ्च कण्ठं मुञ्च बाहुं मुञ्च उदरं मुञ्च कटिं
ऊरुं मुञ्च भूम्यां गच्छ शृणु शृणु अमुकस्य ज्वरं हन ह
फट्"। एतदलक्तरसेन पत्रिकायां लिखित्वा अन्त्यजाय
दानपूर्वकं शिरसि बन्धनीयम्॥ ४॥

अथ गर्गोक्तज्वरहरणवलिर्यथा।—

अश्विन्यां दशरात्रेण ज्वरितः कल्यतां व्रजेत्।
तदाश्विन्यै इमं दद्यात् पत्युर्जीवनहेतवे॥

तत्र हस्तप्रस्थं गृहीततण्डुलक्षतपिष्टकरचितं तुरगं
पात्रे चतुर्भिः पुरुषैर्गृहीतं प्रत्येकं कपर्दकैकक्रीतैर्गन्धपु
दीपैर्वेष्टयित्वा पताकाभिरलङ्कृत्य वास्तुप्रदेशे सन्ध्यायां
हरणवलिं दद्यात्। एवं सकलनक्षत्रे। एतेन सुस्थो
मानवः॥ ५॥

अथ गर्गोक्तज्वरहरणबलिमन्त्रः।

"ओं क्लीं क्लीं ठः ठः भो भो ज्वर! शृणु शृणु हन ह
गर्ज ऐकाहिकं द्याहिकं त्र्याहिकं चातुर्थिकं साप्त
मासिकं आर्द्धमासिकं वार्षिकं द्वैवार्षिकं मौहूर्त्तिकं नै
अट अट भट भट अमुकस्य ज्वरं हर हर हन हन मुञ्च
भूम्यां गच्छ गच्छ स्वाहा"।

गर्गप्रोक्तो मन्त्र एषः सर्वज्वरहरः स्मृतः॥ ६॥

अथ ज्वरहरणबलिमन्त्रस्तु प्रकारान्तरेण।

श्रीं नमश्चण्डवज्रपाणये महासुषेणाधिपतये श्रीं ज्वर!
ृणु हर्दं हर्दं शिरो मुञ्च मुञ्च हृदयं मुञ्च मुञ्च उदरं मुञ्च
टिं मुञ्च मुञ्च ऊरुं मुञ्च मुञ्च हस्तौ मुञ्च मुञ्च गात्राणि
ुञ्च श्रीं हुं हुं हुं फट् अमुकस्य सर्वज्वरं नाशय स्वाहा"।
ुमारीकल्पितसूत्रेण संवेष्ट्य पत्रिकां लेखयित्वा ज्वरिण:
बन्धयेत्॥ ७॥

अथ वाराहीमायातन्त्रयोश्चण्डीपाठफलम्।

उवाच। चण्डीपाठफलं देवि! शृणुष्व गदतो मम।
एकावृत्त्यादिपाठानां यथावत् कथयामि ते॥
सङ्कल्प्य पूर्वं सम्पूज्य न्यस्याङ्गे च मनुं सकृत्।
पाठाद्बलिप्रदानाद्धि सिद्धिमाप्नोति मानव:॥
उपसर्गोपशान्त्यर्थं त्रिरावृत्तं पठेन्नर:।
ग्रहोपशान्तौ कर्त्तव्यं पञ्चावृत्तं वरानने!॥
महाभये समुत्पन्ने सप्तावृत्तमुदीरयेत्।
नवावृत्ताद् भवेच्छान्तिर्वाजपेयफलं लभेत्॥
राजवश्याय भूत्यै च रुद्रावृत्तमुदीरितम्।
अर्कावृत्ते: काम्यसिद्धिर्वैरिहानिश्च जायते॥
मन्वावृत्तादिपूर्वस्य तथा स्त्रीवश्यतां नयेत्।
सौख्यं पञ्चदशावृत्ताच्छ्रियमाप्नोति मानव:॥
कलावृत्तात् पुत्त्रपौत्त्रधनधान्यागमं विदु:।
राज्ञां भीतिविमोचाय वैरस्योच्चाटनाय च॥
कुर्य्यात् सप्तदशावृत्तं तथाऽष्टादशकं प्रिये!।
महाव्रणविमोचाय विंशावृत्तं पठेन्नर:॥
पञ्चविंशावर्त्तनात्तु भवेद्बन्धविमोचणम्।
सङ्कटे समनुप्राप्ते दुश्चिकित्स्यामये तथा॥

जातिध्वंसे कुलोच्छेदे आयुषोनाश आगते ।
वैरिवृद्धौ व्याधिवृद्धौ पुरनाशे प्रजाक्षये ॥
तथैव त्रिविधोत्पाते महोत्पातोपपातके ।
कुर्य्याद् यत्नाच्छतावृत्तं ततः सम्पद्यते शुभम् ॥
नश्यन्ति विपदस्तस्य अन्ते याति परां गतिम् ।
श्रियो वृद्धिः शतावृत्ताद्राज्यवृद्धिस्तथाऽपरे ॥
मनसा चिन्तितं देवि ! सिध्येदष्टोत्तराच्छतात् ।
शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते ! ॥
सहस्रावर्त्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा ।
भुक्त्वा मनोरथं कामान् नरो मोक्षमवाप्नुयात् ॥
यथाश्वमेधः क्रतुराड् देवानाञ्च यथा हरिः ।
स्तवानामपि सर्वेषां तथा सप्तशती स्तवः ॥
अथवा बहुनोक्तेन किमेतेन वरानने ! ।
चण्ड्याः शतावृत्तिपाठात् सर्वाः सिध्यन्ति सिद्धयः ।
संस्कृत्य भूमिं संस्थाप्य कलसं तीर्थवारिणा ।
पूरयित्वा स्वर्णकुम्भं क्षिपेदष्टमृदस्तथा ॥
धर्मकामः क्षिपेद् भस्म धनकामस्तु मौक्तिकम् ।
श्रीकामः श्रीफलं न्यस्य कामात्मा रोचनं न्यसेत् ॥
मोक्षकामो न्यसेद्वस्त्रं जयकामोऽपराजिताम् ।
उच्चाटनार्थं व्याघ्रीञ्च वश्यार्थं शिखिमूलकम् * ॥
मारणाय मरीचञ्च कितवं † मोहनाय च ।
आकर्षणार्थं पावन्तीं ‡ प्रक्षिपेत् कलसोदरे ॥

* शिखिमूलकम्—अपामार्गम् ।
† कितवं—धुस्तूरम् ।
‡ पावन्ती—पिउली इति भाषा ।

जपेन्मन्त्रं महेशानि ! शृणुष्व गदतो मम।
क्षिप्तञ्च कलसे हस्तं तमादाय जपेन्मनुम्॥
नकुलीशंस्तथा वामकर्णमर्द्धेन्दुशेखरम्।
द्विर्वाग्भवं समुच्चार्य्य मायावीजं ततो वदेत्॥
चामुण्डायै पदं पश्चाद्द्विठान्तो मनुरीरितः।
जपित्वा दशलक्षन्तु स्नायात्तेनैव वारिणा॥
हुनेत् सर्पिः प्रलिप्तांश्च तिलधान्याक्षतण्डुलान्।
धर्मार्थकामसंसिद्ध्यै मोक्षाय पायसं हुनेत्॥
मारणे मोहने चैव तथोच्चाटनकर्मसु।
हुनेन्मांसं त्रिमध्वक्तं मोहने मधुपायसम्॥
स्तम्भने मातुलफलं वश्ये तु श्वेतसर्षपैः।
धर्मार्थकाममोक्षार्थी पूर्वाशाभिमुखं हुनेत्॥
एवं शतावृत्तफलं मयोक्तं ते विधानतः।
आधारे स्थापयित्वा च पुस्तकं वाचयेत् स्फुटम्॥
हस्तसंस्थापनादेव हरत्यर्द्धफलं यतः।
यावन्न पूर्य्यतेऽध्यायः तावन्न विरमेत् पठन्।
अनुक्रमं पठेद् देवि ! शिरःकम्पादिकं त्यजेत्॥
प्रमादतोऽध्यायमध्ये विरमेत्तु यदि प्रिये !।
पुनरध्यायमावृत्त्य पठेत् सर्वस्तवे विधिः॥
नातःपरतरं स्तोत्रं किञ्चिदस्ति वरानने !।
भुक्तिमुक्तिप्रदं पुण्यं पावनानाञ्च पावनम्॥ ८॥

अथ दाक्षिणात्यसम्प्रदायमते चण्डीपाठक्रमः।

वेदादिवाग्भवञ्चैव मायाकामस्तथैव च।
पृथ्वी शिवं वामनेत्रं नादबिन्दुविभूषितम्॥
मायाकामो नमः पश्चान्मूलमन्त्र इति स्मृतः।
लक्षं जपेन्मूलमन्त्रं सर्वकामार्थसिद्धये॥

एतन्मन्त्रं आदौ लक्षं जप्त्वा चण्डीपाठः कार्य्यः।

"ओं ऐं ह्रीं क्लीं ह्लीं ह्रीं क्लीं नमः"। सृष्टिस्थितिसंहार भेदा भवन्ति। सृष्टिक्रमस्तु।—"सावर्णिः सूर्य्यतनयः" इत्यादि।

"सूर्य्याज्जन्म समासाद्य सावर्णिर्भविता मनुः"।

इत्यन्तं शान्तिकर्मणि ज्ञेयम्। स्थितिक्रमस्तु।—

"ऋषिरुवाच।—पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेः" इत्यादि शक्रादिस्तवसमाप्तिपर्य्यन्तं स्थितिकर्मणि ज्ञेयम्। संहारक्रमस्तु।—एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः।

सूर्य्याज्जन्म समासाद्य सावर्णिर्भविता मनुः॥

इति श्लोकः संहारक्रमेण "सावर्णिः सूर्य्यतनयः" इत्यन्त पठनीयः। एवं संहारक्रमः स्त्रीवित्तपुत्त्रक्षेत्रापहारकर्मणि बोध्यम्॥ ८॥

तथा च वाराहीतन्त्रे।—

आदिमारभ्य प्रजपेत् सृष्टिक्रम इहोच्यते।
पुरा शुम्भनिशुम्भाभ्यामारभ्य प्रजपेत् सुधीः॥
आद्याच्छक्रादिपर्य्यन्तं स्थितिक्रम उदाहृतः।
शेषमारभ्य आद्यन्तं संहारोऽयं क्रमो भवेत्॥
स्थिति पाठः सर्वकामे मुक्तिकामे च संहृतिः।
स्त्रीकामे पुत्त्रकामे च सृष्टिक्रम उदाहृतः॥
शतमादौ शतञ्चान्ते जपेन्मन्त्रं नवाक्षरम्।
चण्डीसप्तशतीमध्ये सम्पुटोऽयमुदाहृतः।
सकामे सम्पुटो जाप्यो निष्कामे सम्पुटं विना॥ १०॥

अथ ध्यानम्।

या चण्डी मधुकैटभप्रदलनी या माहिषोन्मूलिनी
या धूम्रेक्षणचण्डमुण्डमथनी या रक्तबीजाशिनी।

शक्तिः शुम्भनिशुम्भदैत्यदमनी या सिद्धिलक्ष्मीः परा
सा देवी नवकोटिमूर्त्तिसहिता माम्पातु विश्वेश्वरी ॥ ११ ॥

अथ चण्डीपाठक्रमः।

"अस्य श्री सप्तशतीमहास्तोत्रस्य मेधातिथिऋषिर्गायत्र्यनुष्टुब्-
बृहतीपङ्क्तित्रिष्टुब्जगत्यश्छन्दांसि महाकाली महालक्ष्मी महा-
सरस्वती देवताः स्तवकं ऐं ह्रीं क्लीं बीजानि च्रौं शक्तिः अमुक-
कामना सिद्धये विनियोगः"। इत्यादिक्रमेण पठनीयम् ॥ १२ ॥

अथ त्र्यम्बकविधानम्।

अथात्र त्र्यम्बकं मन्त्रमभिधास्याम्यनुष्टुभा।
यं भजन्तं नरं कालः स्वयं वीक्षितुमक्षमः ॥
वशिष्ठोऽस्य ऋषिः प्रोक्तश्छन्दोऽनुष्टुबुदाहृतम्।
देवतास्य समुद्दिष्टा त्र्यम्बकः पार्वतीपतिः ॥
विभक्तैर्मन्त्रवर्णैः स्यात् षड़ङ्गानां प्रकल्पना।
हृदयं त्रिभिराख्यातं चतुर्भिः शिर ईरितम् ॥
शिखाष्टाभिः समुद्दिष्टा नवभिः कवचं मतम्।
पञ्चभिर्नेत्रमाख्यातमस्त्रं त्रिभिरुदाहृतम् ॥
पूर्वपश्चिमयाम्येन्दुवक्त्रेषु तदनन्तरम्।
उरो गलास्येषु पुनर्नाभिहृत्पृष्ठकुक्षिषु ॥
लिङ्गपायूरुमूलान्तर्जानुयुग्मं ततः परम्।
तद्वत्तयुग्मस्तनयोः पार्श्वयोः पादयोः पुनः ॥
पाण्योर्नासिकयोः शीर्षे मन्त्रवर्णान् न्यसेत् क्रमात्।
पदान्येकादश न्यसेत् शिरो भ्रूयुगलाक्षिषु ॥
वक्त्रे गण्डयुगे भूयो हृदये जठरे पुनः।
गुह्योरुजानुपादेषु न्यासमेवं समाचरेत् ॥ १३ ॥

अथ त्र्यम्बकप्रयोगः।

शनैश्चरदिने अन्यदिने वा अश्वत्थवृक्षं स्पृष्ट्वा जपेत्।

तथाच—शनैश्वरदिनेऽश्वत्थमूलं स्पृष्ट्वा तु संजपेत् ।
साक्षान्मृत्योर्विमुच्येत काश्चान्याः क्षुद्रिकाः क्रियाः ॥

तत्रादौ स्वस्तिवाचनपूर्वकं सङ्कल्पं कुर्य्यात् । यथा अद्ये-त्यादि अत्राश्वत्थमूले अमुकगोत्रस्य श्रीअमुकदेवशर्मणो झटि-त्युत्पन्नरोगप्रशमनपूर्वकदीर्घजीवित्वकामोऽहम् ।

"ओं त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात्" ॥
(शु० य० ऋक् ३।६०) ।

इति मन्त्रस्य इयत्संख्यकजपं करिष्ये । इति सङ्कल्पाश्वत्थ-मूले आसने शिवलिङ्गं यथाविधि स्थापयित्वा भूतशुद्ध्यादिकं कृत्वा अर्घ्यपात्रं संस्थाप्य कृताञ्जलिर्न्यसेत् । "त्र्यम्बकमन्त्रस्य वशिष्ठऋषिरनुष्टुप्छन्दस्त्र्यम्बको देवता अमुकस्योत्पन्नरोगप्रश-मने विनियोगः । शिरसि वशिष्ठ ऋषये नमः । मुखे अनुष्टुप् छन्दसे नमः । हृदि त्र्यम्बकाय देवतायै नमः" । अथ कराङ्गन्यासौ ।— "त्र्यम्बकं अङ्गुष्ठाभ्यां नमः । यजामहे तर्जनीभ्यां स्वाहा । सुगन्धिं पुष्टिवर्द्धनं मध्यमाभ्यां वषट् । उर्वारुकमिव बन्धनात् अनामि-काभ्यां हुं । मृत्योर्मुक्षीय कनिष्ठाभ्यां वौषट् । मामृतात् करतल-पृष्ठाभ्यां फट् । एवं हृदयादिषु । त्र्यम्बकं हृदयाय नमः । यजा-महे शिरसे स्वाहा । सुगन्धिं पुष्टिवर्द्धनं शिखायै वषट् । उर्वारु-कमिव बन्धनात् कवचाय हुं । मृत्योर्मुक्षीय नेत्रत्रयाय वौषट् । मामृतात् अस्त्राय फट्" । फड़ित्यूर्द्ध्वोर्द्ध्वतालत्रयं दत्त्वा छोटि-काभिर्दशदिशो बध्नीयात् । अथ मन्त्रवर्णन्यासः ।—"त्रं पूर्वमुखे । म्बं पश्चिममुखे । कं याम्यमुखे । यं उत्तरमुखे । जां वक्षसि । मं गले । हें ऊर्द्ध्वमुखे । सुं नाभौ । गं हृदि । न्धिं पृष्ठे । पुं कुक्षौ । ष्टिं लिङ्गे । वं वायौ । र्द्धं दक्षोरुमूले । नं वामोरु-मूले । उं दक्षोरुप्रान्ते । र्वां वामोरुप्रान्ते । रुं जक्षजानुनि ।

कं वामजानुनि। मिं दक्षगुल्फे। वं वामगुल्फे। वं दक्षस्तने। न्धं वामस्तने। नां दक्षिणपार्श्वे। मृं वामपार्श्वे। त्यों दक्ष-पादे। मुं वामपादे। क्षीं दक्षहस्ते। यं वामहस्ते। मां दक्षिणनासायाम्। मृं वामनासायाम्। तां शीर्षे। त्र्यम्बकं शिरसि। यजामहे भ्रूयुगले। सुगन्धिं अक्षियुगले। पुष्टिं वक्त्रे। वर्द्धनं गण्डयुगले। उर्वारुक हृदये। मिव जठरे। बन्धनात् गुह्ये। मृत्यो उरुद्वये। मुक्षीय जानुद्वये। मामृतात् पादयोः"। इति विन्यस्य ध्यायेत्॥

हस्ताभ्यां कलसद्वयामृतरसैराप्लावयन्तं शिरो
द्वाभ्यां तौ दधतं मृगाक्षवलये द्वाभ्यां वहन्तं परम्।
अङ्कन्यस्तकरद्वयामृतघटं कैलासकान्तं शिवं
स्वच्छाम्भोजगतं नवेन्दुमुकुटं देवं त्रिनेत्रं भजे॥

एवं ध्यात्वा शिवलिङ्गं संस्थाप्यावाह्य षोड़शोपचारैराराध्य अङ्गानि पूजयेत्।—"ओं अर्कमूर्त्तये नमः; एवं इन्दुमूर्त्तये; वसुधामूर्त्तये; तोयमूर्त्तये; वह्निमूर्त्तये; वायुमूर्त्तये; आकाशमूर्त्तये; यजमानमूर्त्तये। एवं रमायै राकायै प्रभायै ज्योत्स्नायै पूर्णायै उमायै पूषायै स्वधायै विश्वायै विद्यायै सितायै श्रद्धायै सारायै सन्ध्यायै शिवायै निशायै आर्य्यायै प्रज्ञायै मेधायै कान्त्यै काल्यै धृत्यै मत्यै उमायै पावन्यै पद्मायै शान्तायै मेधायै जयायै अमलायै" सर्वत्र प्रणवादिनमोऽन्तेन पूजयेत्।

एवं—"ओं इन्द्राय वज्रहस्ताय नमः। ओं अग्नये शक्ति-हस्ताय नमः। ओं यमाय दण्डहस्ताय नमः। ओं निर्ऋ-तये खड्गहस्ताय नमः। ओं वरुणाय पाशहस्ताय नमः। ओं वायवे ध्वजहस्ताय नमः। ओं सोमाय गदाहस्ताय नमः। ओं ईशानाय शूलहस्ताय नमः। (ऊर्द्ध्वे) ओं ब्रह्मणे पद्महस्ताय

नमः। (अधः) ओं अनन्ताय चक्रहस्ताय नमः"। एवं पूजयित्वा समापयेत्॥

एवं कृते प्रयोगार्हो जायतेऽसौ महामनुः।

ततः स्तुत्वा वामहस्तेन अश्वत्थमूलं संस्पृश्य "ओं तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्" इति गायत्रीं यथाशक्ति जप्त्वा ऋष्यादिकं स्मृत्वा यथाऽभिलषितं मूलमन्त्रं सहस्रं अयुतं लक्षं वा जपेत्। ततोऽर्घ्यजलेन "ओं गुह्याति" इत्यादिना जपं समर्प्य स्तुत्वा प्रणमेत्। ततो विसृज्य दक्षिणां दत्त्वा शान्त्याशीर्वादञ्च कृत्वा ब्राह्मणान् भोजयेत्।

तथाच—शनैश्वरदिनेऽश्वत्थमूलं संस्पृश्य संजपेत्।

साक्षान्मृत्योर्विमुच्येत किं पुनस्त्वपमृत्युतः?॥

स्नात्वा सहस्रं प्रजपेदादित्याभिमुखो मनुम्।

आधिव्याधिविनिर्मुक्तो दीर्घमायुरवाप्नुयात्॥

प्रत्यहं जुहुयान्मन्त्री दूर्वया अयुतावधि।

आमयान्निखिलान् जित्वा दीर्घमायुरवाप्नुयात्॥

वटवृक्षस्य समिधो जुहुयादयुतावधि।

धनधान्यसमृद्धः स्यादचिरेणैव साधकः॥ १४॥

अथ मृतसञ्जीवनी।

आदौ प्रासादबीजं तदनुमृतिहरं तारकं व्याहृतीश्च
प्रोच्चार्य्य त्र्यम्बकं यो जपति च सततं सम्पुटं चानुलोमम्।
सिध्येयुः तस्य सम्यक् स्वहृदयनिहिताः कामनाः शुद्धसत्त्वाः
देहं सन्त्यज्यसिद्धः हरिहरसहितं स्थाणुलोकं प्रयाति॥

मन्त्रस्तु—"ह्रौं ओं जुं सः ओं भूर्भुवः स्वः त्र्यम्बकं यजामहे। सुगन्धिं पुष्टिवर्द्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् ह्रौं ओं जुं सः"।

त्र—वेदादिभूरादिपदत्रयञ्च मध्ये जपेन्मृत्युहरं त्रियम्बम् *।
जपेत् फलार्थी विधिवत्प्रजप्य प्रासादमृत्युञ्जयसम्पुटेन॥
मन्त्रस्तु—"ओं भूर्भुवः स्वः ओं जुं सः त्र्यम्बकमित्यादि ह्रौं ओं
सः"॥ १५॥

अथ शुक्रोपासितमृतसञ्जीवनी विद्या।

गायत्री प्रथमं पादं त्र्यम्बकपादैकम्। गायत्री द्वितीयपादं
म्बकद्वितीयं पादम्। गायत्री तृतीयपादं त्र्यम्बकशेषपादम्।
मन्त्रो यथा—"ओं तत्सवितुर्वरेण्यं त्र्यम्बकं यजामहे भर्गो देवस्य
महि सुगन्धिं पुष्टिवर्द्धनं धियो यो नः प्रचोदयात् उर्वारुक-
व बन्धनान्मृत्योर्मुक्षीयमामृतात्"॥ १६॥

अथ अन्यप्रकारमृतसञ्जीवनीविद्या।

"ओं जुं सः मां जीवय पालय"।
तथाच कल्पसूत्रे—प्रणवकाष्टमं सदक्षश्रुतिबिन्दुभृगु षोड़श-
मापदाज्जीवय पालयेति दशार्णो मृत्योरपि मृत्युरेषा विद्या।
यां ध्यानम्—
"स्वच्छं स्वच्छारविन्दस्थितमुभयकरे संस्थितौ पूर्णकुम्भौ
द्वाभ्यामिणाक्षमाले निजकरकमले द्वौ घटौ नित्यपूर्णौ।
द्वाभ्यां तौ च श्रवन्तौ शिरसि शशिकला चामृतैः प्लावयन्तम्
देहं देवो दधानो विदिशतु विशदां कल्पकालं श्रियं नः"॥
एवं ध्यात्वा कल्पितमूर्त्तावावाह्य "ओं त्र्यम्बकाय महा-
द्राय नमः"। इत्यनेनोपचारैः पूजयेत्॥ १७॥

अथ मृत्युञ्जयप्रयोगः।—

तत्र प्रथमं स्वस्तिवाचनपूर्वकं सङ्कल्पं कुर्यात्। यथा—
अद्येत्यादि अमुकगोत्रस्य श्रीअमुकदेवशर्मणो जीवच्छरीरा-

* त्रियम्बमित्यत्र त्र्यम्बकम् इति बोद्धव्यम्।

विरोधेन झटिति उत्पन्नरोगोपशमनकामनया त्र्यक्षरमृ
ञ्जयमन्त्रलक्षत्रयजपमहं करिष्यामि"। ततो भूतापसार
सनादिशोधनं भूतशुद्धिप्राणायामं कृत्वा ऋष्यादिन्यासं कुर्य्या
"शिरसि कहोलऋषये नमः। मुखे गायत्रीच्छन्दसे नम
हृदि मृत्युञ्जयाय देवतायै नमः"। ततः कराङ्गन्यासौ। "सां अ
ष्ठाभ्यां नमः" इत्यादि। एवं "सां हृदयाय नमः" इत्या
ततो ध्यानम्।—

"चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तःस्थितम्
मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम्।
कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलम्
कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावये"॥

एवं ध्यात्वा स्वशिरसि पुष्पं दत्त्वा मानसपूजां कृत्वा वि
षार्घ्यस्थापनं शैवोक्तपीठपूजान्तं विधाय पुनर्ध्यात्वा आवा
यथाशक्त्युपचारैः सम्पूज्य आवरणदेवताः पूजयेत्। "सां हृदय
नमः" इत्यादि षड़ङ्गं सम्पूज्य इन्द्रादीन् वज्रादींश्च पूजयेत्
ततो जपेत्। मन्त्रस्तु—"ओं जुं सः"। अस्य पुरश्चरणं लक्षजपः
ततस्तद्दशांशक्रमेण होमादिकं कुर्य्यात्। होमद्रव्यन्तु—

"गुणलक्षं जपेन्मन्त्रं तद्दशांशं विशालधीः।
जुहुयादमृताखण्डैः * शुद्धदुग्धाज्यमिश्रितैः"॥ १८

अथ शूलरोगप्रतिकारः।—"ओमद्येत्यादि अमुकगोत्रस्य श्रीअमु
देवशर्मणः शूलरोगप्रतिकारकामनया 'ओं मीढुष्टम' इत्या
"पिनाकं बिभ्रदागहि" इत्यन्तं मन्त्रं "सहस्रम् अयुतं लक्षं
जपमहं करिष्यामि" इति सङ्कल्प्य शिवलिङ्गे त्र्यम्बकविधान
सम्पूज्य इमं मन्त्रं जपेत्।—"ओं मीढुष्टम शिवतम शिवो

---

* अमृता—गुडुचीति यस्य प्रसिद्धिः।

सुमना भव। परमे वृक्ष आयुधं निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि" (शु० य० ऋक् १६।५१)। इति जप्वा दक्षिणां कुर्य्यात्॥ १९॥

अथ गर्भजननोपायः। "ओं मुक्ताः पाशा विपाशाश्च मुक्ताः सूर्य्येण रश्मयः। मुक्तः सर्वभयाद्गर्भ एह्येहि मारीच मारीच स्वाहा"। अनेन मन्त्रेण जलमष्टवारमभिमन्त्र्य गर्भिण्यै देयम्। तदा सुखप्रसवो भवति। मन्त्रान्तरम्।—"ओं मन्मथ मन्मथ वाहि वाहि लम्बोदर मुञ्च मुञ्च स्वाहा"। एवं जपनात् सुखप्रसवो भवति॥ २०॥

अथ निगड़भञ्जनम्। "ओं नमः सु ते निर्ऋते तिग्मतेजोऽयस्मयं विचृता बन्धमेतम्। यमेन त्वं यम्या संविदानोत्तमे नाके अधिरोहयैनम्" (शु० य० ऋक् १२।६३)। अस्य निगड़भञ्जनमन्त्रस्य प्रजापतिर्ऋषिर्निर्ऋतिर्देवता त्रिष्टुप्छन्दो बन्धनादिव्यसनपरिहारार्थे विनियोगः। निगड़बन्धनोपरुद्धो व्यसनपतितो वा अयुतजपेन व्यसनान्मुच्यते, निगड़ादिस्खलनञ्च भवति।

"ओं उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते।
धनं सनिष्यन्ती नामात्मानं तव पूरुष"(शु०य०ऋक्१२।८२)।
बन्धनस्थो जपेदयुतं तदा मुक्तो भवति॥ २१॥

अथान्यप्रकारनिगड़भञ्जनम्। "ओं अद्येत्यादि अमुकगोत्रस्य झटिति निगड़भञ्जनकामनया 'ओं ह्रीं निगड़भञ्जनि महामाये! हुं' एतन्मन्त्रमद्यारभ्य निशायामष्टोत्तरसहस्रजपमहं करिष्यामि" इति सङ्कल्प्य प्रत्यहं निशायां एतन्मन्त्रं जपेत्ततो निगड़भञ्जनं भवति॥ २२॥

अथ वृष्टिकरणम्।

ओं पुष्करावर्त्तकैर्मेघैः प्लावयन्तं वसुन्धराम्।

विद्युद्गर्जितसन्नद्धतोयात्मानं नमाम्यहम् ॥
यस्य केशेषु जीमूतो नद्यः सर्वाङ्गसन्धिषु।
कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः॥

इति ध्यात्वा आवाह्य वरुणमुपचारैः पूजयित्वा मूलमन्त्रं जपेत्। प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो वरुणो देवता एतद्राज्यमभिव्याप्य सुवृष्ट्यर्थं जपे विनियोगः। मन्त्रस्तु—वं गुरुमुखाज्ज्ञेयः।

नाभिमात्रजले स्थित्वा जपेन्मन्त्रं प्रसन्नधीः।
जपेत् वसुसहस्रञ्च त्रिदिनं व्याप्य यत्नतः॥
अथवा—षट्सहस्रं जपेन्मन्त्रं तदा वृष्टिर्भवेद् ध्रुवम्॥ २३ ॥

अथ शीर्षादिरोगनिवारणम्। तत्र आथर्वणोक्तमन्त्राः।—

शीर्षामयं शीर्षशक्तिं कर्णशूलं तृतीयकम्।
सर्वशीर्षाण्यन्तरे तं वह्निर्निर्मन्त्रयामहे॥ १ ॥
कुर्पाण्यन्ते कङ्कशेभ्यः शक्तिवश्यं विलोहितम्।
सर्वशीर्षाण्यन्तरे तं वह्निर्निर्मन्त्रयामहे॥ २ ॥
यातं प्रमदबन्धञ्च कृणोति पुरुषञ्च यः।
सर्वशीर्षाण्यन्तरे तं वह्निर्निर्मन्त्रयामहे॥ ३ ॥
यस्य होतोः प्रच्यवते यक्ष्मा नासात आस्यतः।
सर्वशीर्षाण्यन्तरे तं वह्निर्निर्मन्त्रयामहे॥ ४ ॥
शीर्षरोगमङ्गरोगं विश्वाङ्गानं विसर्पकम्।
सर्वशीर्षाण्यन्तरे तं वह्निर्निर्मन्त्रयामहे॥ ५ ॥
यस्य भीमप्रतीकाशं तद्वपयन्ति पूरुषाः।
तत्नं शीतकवातञ्च वह्निर्निर्मन्त्रयामहे॥ ६ ॥
जातकेऽनुपसर्गीभूतेऽचेति गवीनिके।
वेलासमन्तरङ्गेभ्यो वह्निर्निर्मन्त्रयामहे॥ ७ ॥
यदि कामातुरः कामं हृदयार्थतयोपरि।
हृदो बलासमङ्गेभ्यो वह्निर्निर्मन्त्रयामहे॥ ८ ॥

आसो वलासो भवतु सूत्रे भवतु चामयम्।
यक्ष्मादीनां हि सर्वेषां सहन्तु च निशि विषम्॥ ८॥

इत्याथर्वणोक्तसर्वरोगप्रतीकारः।

इति श्रीकृष्णविद्यावागीशभट्टाचार्य्यकृतायां षट्कर्मदीपिकायां
नानाप्रकारशान्तिनियमतृतीयोद्देशः।

अथ वशीकरणम्।

अथ वक्ष्यामि मन्त्राभ्यां वशीकरणमुत्तमम्।
येन विज्ञानमात्रेण वशीकुर्य्यान्नरं स्त्रियम्॥
कृताञ्जलिः शिखिशिखा विभीता गिरिकर्णिका।
चाण्डालीसहिताः पिष्ट्वा पट्टे चौरपरिप्लुता॥
तेन संलिप्य पङ्केन पट्टवस्त्रस्य वर्त्तिकाम्।
कारयित्वाब्जसूत्रेण पूर्णगर्भां सुरचिताम्॥
एकवर्णागवोदुग्धकृताज्यदीपपूरितम्।
कज्जलं ऋजुके कार्य्यं कज्जलं नरसङ्कुले॥
सम्पूज्य भैरवं देवं चतुर्दश्यां निशागमे।
कज्जलं पातितं ग्राह्यं तेन वश्यं जगद्भवेत्॥
नरश्च वनिताश्चैव यमिच्छति नरोत्तमम्।
अतःपरतरं वश्यं न भूतं न भविष्यति॥
भाषितं भैरवे तन्त्रे गोपनीयं प्रयत्नतः।
क्रूरे च चुम्बके * दुष्टे निन्दके चपलेष्वपि।
अस्य वश्यप्रभावं हि वर्णितुं न च शक्यते॥
देवदेवेन देवेभ्यो वशीकरणमुत्तमम्।
एतद् योगप्रभावेण ब्रह्माद्या मुनयः सुराः॥ १॥

---

* चुम्बके इति पदेन तन्त्रचुम्बिनि हठकामुके इति वा निष्कर्षार्थः।

अन्यां वक्ष्ये महाविद्यां मोहिनीं वश्यकारिणीम्।
यस्याः प्रभावमात्रेण वशीकुर्य्याज्जनं नरः॥
तारं प्रथममुद्धृत्य मायाबीजमनन्तरम्।
मोहिनीपदमादाय शेषे पावकवल्लभाम्॥
ज्ञात्वा मन्त्रमिमं मन्त्री मन्त्रं पठति सिद्धिदम्।
अनेन मन्त्रराजेन संस्पृश्य जापितं यदा॥
दीयते च जलं पुष्पं दुकूलमुत्तमं फलम्।
अष्टोत्तरशतं जप्त्वा पाणौ येषां प्रदीयते।
ते सर्वे वशमायान्ति नात्र कार्य्या विचारणा॥ २॥
तारं चिटिद्वयं * पश्चाच्चाण्डालीं तदनन्तरम्।
महापदाभ्यां तां ब्रूयादमुकं मे ततःपरम्॥
वशमानय ठद्वन्द्वं चिटिमन्त्र उदाहृतः।
सप्तभिर्दिवसैर्भूपान् वशयेद्विधिनाऽमुना॥
विलिख्य तालपत्रे तं साध्यनामविगर्भितम्।
निक्षिप्य क्षीरसंमिश्रे जले तत् क्वाथयेन्निशि।
वश्यो भवति साध्यस्तु नात्र कार्य्या विचारणा॥ ३॥
तालपत्रे लिखित्वैनं भद्रकालीगृहे खनेत्।
वश्याय सर्वजन्तूनां प्रयोगोऽयमुदाहृतः॥ ४॥
मूर्ध्निभाले कामकलां जपतो बिन्दुधारणात्।
योनिमुद्राप्रयोगेण करोति वशगं जगत्॥ ५॥
रेफहुङ्कारयोर्मध्ये सर्वलोकं ततःपरम्।
वशमानय ठद्वन्द्वं जपन् सम्पूज्य साधकः॥ ६॥
राजमुखि पदाद्राजाभिमुखि वश्यपूर्विके † !

---

* "ओं चिटि चिटि चाण्डाली महाचाण्डाली अमुकं मे वशमानय ठः ठः स्वाहा" इति मन्त्रः।

† वश्यपूर्विके इति स्थाने मन्त्रयोजनायां वश्यमुखि ! इति पठनीयम्।

ततश्च भुवनेशानी-श्रीकामान् देवि देवि ! च।
तदन्ते च महादेवि ! पदं पदमतः परम्॥
देवाधिदेवि ! सर्वस्य * मुखं वश्यं कुरु द्विठः।
प्रणवादिरयं मन्त्रः श्रीवश्यसम्पदावहः॥

"श्रीं राजमुखि राजाभिमुखि वश्यमुखि ! ह्रीं श्रीं क्लीं देवि देवि महादेवि देवाधिदेवि ! सर्वजनस्य मुखं वश्यं कुरु ठः ठः स्वाहा"।

मायाहृदोरथान्ते च ब्रह्म श्रीराजिते ततः।
प्रोक्ता राजाञ्चितेऽर्णान् वै जये च विजये तथा।
गौरि गान्धारि त्रिभुवनवशङ्करि वै ततः॥
ततः परं प्रयोक्तव्यं सर्वलोकवशङ्करि !।
ततः प्रयोजयेत्सर्वस्त्रीपुरुषवशङ्करि !॥
वीप्सया योजनीयानि सुदुर्घोराक्षराणि वै।
मायाद्विठान्तकः प्रोक्त एकषष्ठ्यर्णको मनुः॥

मन्त्रो यथा—"ह्रीं नमो ब्रह्म श्रीराजिते राजपूजिते जये विजये गौरि गान्धारि त्रिभुवनवशङ्करि सर्वलोकवशङ्करि सर्वस्त्रीपुरुषवशङ्करि ! सुदुर्घोर सुदुर्घोर ह्रीं स्वाहा ठः ठः"। अयुतं प्रजपेत्।

जुहुयाद्घृतसंपृक्तैः पायसभागैर्दशांशकैर्विहितैः।
आराधयेत्तदङ्गैः दिशीऽधिपैर्मातृभिश्च निश्चितमनाः।
तिलतण्डुलकैर्लोमैः स्वादुयुतैः सत् फलैश्च मधुरतरैः॥
आज्यैररुणकुवलयैः त्रिदिनं हवनं वशङ्करीं विद्याम्।
नित्यं सूर्य्यगतां तां देवीं प्रतिपद्य तन्मुखो जपति॥
अष्टोत्तरशतसंख्यां सर्वमकस्माद्वशीकरोत्यचिरात्।
वर्णादर्वाङ्मन्त्रो यथानिगदितं प्रयोजयेत विधिम्॥
साध्याह्व कर्मयुक्तं प्रजपेद्वा मन्त्रकं सुहवनविधौ।

* सर्वस्य इति स्थाने मन्त्रयोजनायां सर्वजनस्य इति पठनीयम्।

वाञ्छितसिद्धिविधाता गिरिवरकन्ये ! तदा मन्त्रः ॥
ऋषिरस्त्यस्या योनिः प्रावृट्छन्दोऽस्ति देवता गौरी।
स चतुर्दशभिः दशभिः अष्टाभिः सादरं ततोऽष्टाभिः ॥
दशभिश्चैकादशभिः क्रमशः संयोजितैः सुमन्त्रिवरैः।
मन्त्राक्षरैश्च शुचिभिः सुषड़ङ्गविधिः समुच्यते क्रमशः ॥

ध्यानम्।

अमलशशिविराजन्मौलिराबद्धपाशा-
ङ्कुशरुचिरकराब्जा बन्धुजीवारुणाङ्गी।
अमरनिकरवन्द्या त्रीक्षणा शोणवर्णा-
ऽंशुककुसुमयुता स्यात् सम्पदे पार्वती वः ॥ ७ ॥
मद मद पदमादौ मादयेति द्विवारम्
तदनु च पठनीयं क्लींपदं तत्र पश्चात्।
वशय पदयुता स्यात् नामरूपादिसंज्ञा
भवति मदनमन्त्रः स्वाहया संयुतोऽयम् ॥
कनकरचितमूर्त्तिः कुण्डलाकृष्टचापो
युवतिहृदयमध्ये निश्चलारोपिताक्षः।
इति मनसि मनोजं चिन्तयन् यो जपस्थो
वशयति स समस्तं भूतलं मन्त्रसिद्धः ॥
शतशतपरिजापात् स्यादयं सिद्धिदाता
दशशतकुसुमानां लोहितानाञ्च दानात्।
इह तु सकलकार्य्यं वामहस्तेन कुर्य्यात्
उपदिशति समस्तं ज्योतिरीशः समन्तात् ॥

अत्र मन्त्रः—"मद मद मादय मादय क्लीं वशय अमुकं स्वाहा" ॥८॥

तथा मन्त्रः।

चामुण्डे प्रथमं जयेति कथितं सम्बोधने मोहय
ज्ञातव्यं वशमानयेत्यपि पदं साध्यं द्वितीयान्वितम्।

स्वाहान्तं प्रणवादिरेष कथितैस्तत्त्वैर्महामोहनः
सन्मन्त्रः कविराजसेवितपदो नास्माद्द्वितीयोत्तरः ॥

ध्यानम्।

दंष्ट्राकोटिविशङ्कटा सुवदना सान्द्राम्धकारे स्थिता
खट्वाङ्गासिनिगूढ़दक्षिणकरा वामेन पाशं शिरः।
श्यामा पिङ्गलमूर्द्धजा भयकरी शार्दूलचर्मावृता
चामुण्डा शववाहिनी जपविधौ धेया सदा साधकैः॥
ध्यात्वा तां मुक्तकेशीं हरिहरविधिभिः स्वर्चितां विश्ववन्द्याम्
पश्चादस्या विभूतीरतुलितविभवाः चिन्तयन्मन्त्रमुख्यम्।
लक्षं जप्त्वा दशांशं शुकतरुकुसुमैर्वह्निमध्ये च होमः
साध्येवं पूजिताम्बा स्ववहितविधिना सर्वसिद्धिं ददाति ॥

अत्र मन्त्रः।—"ॐ चामुण्डे जय चामुण्डे मोहय वशमानय अमुकं स्वाहा" ॥ ८ ॥

"ॐ नमः कामाय सर्वजनप्रियाय सर्वजनसम्मोहनाय ज्वल ज्वल प्रज्वालय प्रज्वालय सर्वजनस्य हृदयं मम वशं कुरु कुरु स्वाहा"।

एतन्मन्त्रजपादेव वशी भवति मानवः ॥ १० ॥

"ॐ नमो भगवति सूचिचाण्डालिनि! नमः स्वाहा"। एतन्मन्त्रेण मधूच्छिष्टस्य पुत्तलिकां कृताञ्जलिं कृतयुग्मपादाम् अङ्गप्रत्यङ्गसहितां कृत्वा तत्र साध्यस्य प्राणप्रतिष्ठां कृत्वा एतन्मन्त्रं जपन् अङ्गारेषु पुत्तलिकां प्रतापयेत्। ततः साध्यो वश्यो भवति ॥ ११ ॥

इति श्रीकृष्णानन्दविद्यावागीशभट्टाचार्य्यकृतायां षट्कर्मदीपिकायां
शान्तिकल्पे वश्यकर्म चतुर्थोद्देशः।

अथ स्तम्भनम् ।

श्रीदेव्युवाच । प्रभो ! त्वं भैरवश्रेष्ठः सर्वमन्त्रार्थजीवकः ।
नानारहस्यसारञ्च त्वद्दते न शृणोम्यहम् ॥
दिव्यतन्त्रं महातन्त्रं पूर्वपश्चिमसंज्ञकम् ।
दक्षिणोत्तरमूर्द्धञ्च उपायाः कथिताः प्रभो ! ॥
वश्याकर्षणदिव्यञ्च मारणोच्चाटनादिकम् ।
विद्वेषं मोहनं चान्यं विविधं कामनादिकम् ॥
विस्तारं कथितं पूर्वं ज्ञातव्यं सर्वसंज्ञया ।
इदानीं स्तम्भनं देव ! कथयस्व प्रसादतः ।
कथयस्व सुरश्रेष्ठ ! यद्यहं तव वल्लभा ॥ १ ॥

श्रीभैरव उवाच । साधु साधु त्वया प्राज्ञे ! सर्वमन्त्रार्थसाधिके ! ।
न कस्यचिन्मया ख्यातं शृणु सुन्दरि ! यत्नतः ॥
गुह्याद् गुह्यतरं देवि ! स्नेहात्ते प्रकटीकृतम् ।
अथातः सम्प्रवक्ष्यामि शृणु चैकाग्रमानसा ।
विद्या या परमा गुप्ता महास्तम्भनरूपिणी ॥ २ ॥
ओङ्कारं पूर्वमुच्चार्य्य स्थिरमायामथोच्चरेत् ।
सम्बोधनपदं चोक्त्वा ततः श्रीवगलामुखि ! ॥
तदग्रे सर्वदुष्टानां ततो वाचं मुखं पदम् ।
स्तम्भयेति पदं पश्चात् कीलयेति पदद्वयम् ॥
बुद्धिं विनाशय पश्चात् स्थिरमायां पुनर्लिखेत् ।
लिखेच्च पुनरोङ्कारं स्वाहेति पदमुत्तमम् ॥
षट्त्रिंशदक्षरा विद्या देवानामपि दुर्लभा ।
वह्निहीनेन्द्रयुङ्मायाा स्थिरमाया प्रकीर्त्तिता ॥
गजस्य च रथानाञ्च द्विजानां शीघ्रचेतसाम् ।
स्तम्भिताश्च महावाचां वृहस्पतिमुखोद्गताम् ॥

महापर्वतवृक्षाणां सरितां सागरस्य च।
स्तम्भयेत्तानि दिव्यानि मानुषेषु च का कथा ?॥
त्रैलोक्यमोहिनी विद्या तस्याश्च वगलामुखी।
शृणु देवि ! प्रवक्ष्यामि विविधं कामनागतम्।
न्यासं ध्यानं जपं होमं मन्त्रमेव पृथक् पृथक्॥ ३॥
अङ्गन्यासं प्रवक्ष्यामि कराङ्गविधिपूर्वकम्।
ओं स्थिरमायाञ्च हृदये मूर्ध्नि श्रीवगलामुखि॥
शिखायां सर्वदुष्टानां वाचं मुखञ्च स्तम्भय।
कवचे कीलयद्द्वन्द्वं नेत्रे बुद्धिं विनाशय॥
ह्लीं ओं स्वाहा तथा चास्त्रे षड़ङ्गविधिरीरितः।
युग्मकालेषु सप्तर्त्तुदशार्णैश्च मनूद्भवैः॥
करशाखासु तलयोः कराङ्गन्यासमाचरेत्।
नारायण ऋषिर्मूर्ध्नि त्रिष्टुप्छन्दस्तु तन्मुखे॥
श्रीवगलामुखीं देवीं हृदये विन्यसेत्ततः।
ह्लीं वीजं गुह्यदेशे तु स्वाहा शक्तिश्च पादयोः॥
इष्टार्थे विनियोगस्तु ऋष्यादिन्यास एव च।
मूर्ध्नि भाले दृशोः श्रुत्योर्गण्डयोर्नसयोः पुनः॥
ओष्ठयोर्मुखगण्डे च दक्षिणांशे च कूर्परे।
तथैव मणिबन्धे च तथा चाङ्गुलिमूलके॥
गलमूले स्तने दक्षे स्तने वामे तथा हृदि।
नाभौ कव्यां गुह्यदेशे वामांशे कूर्परे तथा॥
मणिबन्धेऽङ्गुलीमूले विन्यसेत्तु समाहितः।
दक्षोरुमूले जानौ च गुल्फे चाङ्गुलिमूलके॥
मूलमन्त्राक्षरैर्विद्वान् विन्यसेत् क्रमयोगतः।
एवं न्यासविधिं कृत्वा ततो ध्यानं शृणु प्रिये !॥ ४॥
[ध्]यानम्। गम्भीराञ्च मदोन्मत्तां स्वर्णकान्तिसमप्रभाम्।

चतुर्भुजां त्रिनयनां कमलासनसंस्थिताम् ॥
मुद्गरं दक्षिणे पाशं वामे जिह्वाञ्च वज्रकम् ।
पीताम्बरधरां देवीं दृढ़पीनपयोधराम् ॥
हेमकुण्डलभूषाञ्च पीतचन्द्रार्द्धशेखराम् ।
पीतभूषणभूषाञ्च स्वर्णसिंहासने स्थिताम् ॥
एवं ध्यात्वा तु देवेशीं शत्रुस्तम्भनकारिणीम् ।
महाविद्यां महामायां साधकस्य फलप्रदाम् ।
यस्याः स्मरणमात्रेण त्रैलोक्यं स्तम्भयेत् क्षणात् ॥ ५ ॥
साधनं सम्प्रवक्ष्यामि साधकानां हिताय वै ।
सर्वं पीतोपचारेण पीताम्बरधरो नरः ॥
जपमालाञ्च देवेशि ! हरिद्राग्रन्थिसम्भवाम् ।
पीतासनसमारूढ़ः पीतध्यानपरायणः ॥
पीतपुष्पार्च्चनं नित्यमयुतं जपमाचरेत् ।
दशांशैश्च कृतो होमः पीतद्रव्यैः सुशोभनैः ॥
संज्ञामुच्चारयेत्साध्यं स्तम्भनञ्च महाऽद्भुतम् ।
शृणु प्राज्ञे ! महागुह्यं प्रकटीकृतसाधनम् ।
एकान्ते निर्जने स्थाने शुचौ देशे गृहे पुरे ॥ ६ ॥

अथ कर्मविशेषे कुण्डलक्षणम् ।

कुण्डं सुलक्षणं कृत्वा मेखलात्रयशोभितम् ।
योनिवृत्तं त्रिमात्रैः स्यात् तत्र होमन्तु साधयेत् ॥
आकर्षणे त्रिकोणं स्यात् वश्ये तु चतुरस्रकम् ।
तथैवोच्चाटने प्रोक्तं षट्कोणं मारणे स्मृतम् ॥ ७ ॥

अथ आसनभेदाः ।

वश्ये मेषासनं प्रोक्तं कर्षणे व्याघ्रचर्मणि ।
शान्तौ मृगासनं प्रोक्तं गोचर्म स्तम्भने स्मृतम् ॥
उष्ट्रासनं तथोच्चाटे विद्वेषे तुरगासनम् ।

मारणे महिषीचर्म मोक्षञ्चैव गजाजिने।
नानाविधानि ते देवि! क्रमाद्द्रव्यं समाचरेत्॥ ८॥

अथ कर्मविशेषे यज्ञीयसामग्री।

मधुलाजतिलाज्येन वश्यलाभानि साधयेत्।
आकर्षणे तथा लोध्रं सतिलं मधुरान्वितम्॥
निम्बपत्रञ्च तैलाक्तं विद्वेषणकरं परम्।
हरितालं हरिद्राञ्च लवणेन च संयुताम्॥
स्तम्भयेच्चैव देवेशि! प्रज्ञाञ्चैव गतिं मतिम्।
वाजिनाथस्य सारेण रुधिरेणैव होमयेत्॥
मारणे तु रिपोर्देवि! श्मशानाग्नौ हुनेन्निशि।
क्षुद्राणां काकपक्षाणां गृहधूमेन संयुताम्॥
लाजां त्रिमधुसंयुक्तां सर्वरोगप्रशान्तये॥ ९॥
लक्षमेकं जपेन्मन्त्री ब्रह्मचारी दृढ़व्रतः।
पर्वताग्रे महारण्ये सिद्धिशैवालये गृहे॥
सङ्गमे च महानद्याः साधकः साधयेत् स्वयम्॥ १०॥
श्वेतब्रह्मतरोर्मूले पादुकाञ्चैव रञ्जयेत्।
अलक्तकेन रागेण रञ्जिता नवमुद्रया॥
षट्त्रिंशदक्षरा विद्या लक्षैकेन च मन्त्रिता।
शतयोजनमात्रन्तु मनश्चिन्तितमागता॥ ११॥
रसं मनःशिलां तैलं माक्षिकेण समन्वितम्।
इति मन्त्रं लक्षमेकं सर्वाङ्गे लेपनं कृतम्॥
अदृश्यकारकं देवि! लोके च महदद्भुतम्॥ १२॥
एकवर्णगवाञ्चैव धारोष्णं क्षीरमाहरेत्।
शर्करामधुसंयुक्तं त्रिशतैर्मन्त्रितं प्रिये!।
पीत्वा च हरते शीघ्रं विषं स्थावरजङ्गमम्॥ १३॥
दारिद्र्यमोचनं देवि! लक्षमेकं जपेन्नरः।

दशांशेन कृतो होमो द्रव्यैरेभिर्घृतप्लुतैः ॥
लक्ष्मीयुक्तो भवेद्देवि ! दारिद्र्यं नाशयेद् ध्रुवम् ॥ १४ ॥

अथ अन्यप्रकारस्तम्भनम्।

अथान्यं सम्प्रवक्ष्यामि कामना मन्त्रिकोपरि।
पत्रे वाप्यथ पाषाणे संज्ञानाम तु कारयेत् ॥
आद्यन्ते स्थिरमायाञ्च हरिद्रातालकैर्लिखेत्।
गर्भस्तम्भकरीं देवीं चमत्कारकरीं पराम् ॥
भूर्जपत्रे समालिख्य तालोन्मत्तरसैर्निशि !
षट्कोणमध्यमालिख्य विद्यां वलयतो लिखेत् ॥
मध्ये संज्ञाञ्च देवेशि ! पीतसूत्रेण वेष्टयेत्।
चक्रं भ्राम्यत्कुलालस्य विपरीतञ्च मृत्तिकाम् ॥
तन्मध्ये विलिखेद्वीजं त्रिवलीकारतः प्रिये !।
षष्ठ्यन्तं साध्यनामार्णं मुखं स्तम्भय चोच्यते ॥
वाह्ये वेष्ट्य महावीजं चतुःसाध्याख्यमालिखेत्।
साध्यनामाक्षरं देवि ! अभिमन्त्र्य च विद्यया ॥
षष्ठ्यन्तं चोच्चरेत् साध्यं ससम्बोधनदैवतम्।
मा सुतेति पदं पश्चात् वदेदाम्रेड़ितान्तरम् ॥
पीतोपचारैः सम्पूज्य मुखस्तम्भनमीरितम् ॥ १ ॥
एतन्मन्त्रं वरारोहे ! श्मशानाङ्गारके लिखेत्।
भेकस्य वदने क्षिप्त्वा पीतसूत्रेण वेष्टयेत् ॥
भूमिष्ठं मण्डलं कृत्वा पीतपुष्पैः समर्चयेत्।
उच्चारयेत् सर्वमन्त्रपदमुच्चार्य्य चालय ॥
वामपादेन सम्पूर्णां कुलालस्य च मृत्तिकाम्।
पूरकस्य प्रयोगेण प्रयोगं प्रतिपद्यते ॥ २ ॥
अन्योऽन्यं लिखितत्वेन कृतोन्नद्धं समन्ततः।
वामदक्षिणसम्बन्धात् द्वौ द्वौ पादौ प्रकल्पयेत् ॥

नाम साध्यस्य च शतं गतिञ्च स्तम्भयेति च।
पूर्ववत् पदमालिख्य पाषाणस्य च पट्टके॥
पूर्ववत् सम्मुखीकृत्य पीतसूत्रेण वेष्टयेत्।
शय्यां पातालसंस्थाञ्च खनेत् खातं प्रयत्नतः॥
वामहस्ते न्यसेत् खातं पीतपुष्पेण पूजयेत्।
महदाश्चर्य्यजनकं गतिस्तम्भनमुत्तमम्॥ ३॥
श्मशानेऽथ परिग्राह्यं श्मशानाङ्गारमाहरेत्।
मायावीजं त्रिधा लिख्य साध्यसंज्ञाञ्च मध्यतः॥
अपिमध्ये च ललना सा च त्रिवलयात्मिका।
वामहस्ते खनेत् खातं खर्परञ्च अधोमुखम्।
पूरयेद्वामपादेन पुरुषः सः तथोपरि।
स्तम्भनञ्चैव देवेशि! रिपूणां मुखबन्धनम्॥ ४॥
ताड़ङ्कपत्रमादाय लिखेत् साध्यं स्वनामतः।
आद्यन्ते विलिखेद्बीजं त्रिविधोच्चारकं लिखेत्॥
वामहस्ते पुटङ्कृत्वा करपीड़ितकण्टकान्।
सप्तसंख्यकण्टकानि भित्त्वा चैकं पुटीकृतम्॥
पृथग्विधं समुच्चार्य्य नाम साध्यञ्च साधकः।
भाण्डमध्ये क्षिपेत्तञ्च सौवीरेण च पूजयेत्॥
गतिमत्योः स्तम्भकरं प्रयोगं प्रत्ययावहम्।
दिव्यस्तम्भकरी देवी नानागुणमुदीरितम्॥
त्वत्प्रीत्या कथयिष्यामि शृणु तत् प्रियमुत्तमम्।
यत्र स्थाने भवेद्दिव्यं देवालयगृहेऽपि वा।
तत्रस्थां विलिखेद्दिव्यां साधकात् साध्यनामतः॥ ५॥
अटरूषस्य पत्रेण परिमार्ज्य तथोपरि।
स्तम्भयेत् सप्तदिव्यानि कृत्वा दोषविशुद्धये॥
उत्तरावारुणीमूलं सप्त विद्याऽभिमन्त्रितम्।

महाकृत्यादिदोषस्य कृतदिव्यो विशुद्धये॥
अथवा दीपमार्गे च रात्रौ कृत्वा तु मण्डलम्।
भूर्जपत्रे समालिख्य पूर्वोक्तद्रव्यमेव च॥
दीपं प्रज्वालयेद् यत्नात् कपिलाज्येन पूरितम्।
तावद्दीपो दहन् दोषं स्वयं दग्ध्वा प्रशाम्यति॥
समयाय साधकाय पुत्रिकां कुशिकां घटम्।
कन्याभिर्योगिनीनान्तु यथाशक्ति च तर्पयेत्॥
एवन्तु कथितं भद्रे! कामनाप्रत्ययावहम्।
इयन्तु परमा विद्या किमन्यत् परिपृच्छसि?॥

देव्युवाच। साधनं कथितं देव! महाश्चर्य्यप्रदायकम्।
अधुना श्रोतुमिच्छामि अर्च्चनां विधिपूर्व्विकाम्॥

भैरव उवाच। पूजनं शृणु देवेशि! साधके सिद्धिदायकम्।
नित्ये नैमित्तिके काम्ये त्रिविधं पूजनं स्मृतम्॥
भूप्रदेशे मनोरम्ये पुष्पामोदप्रपूरिते।
गोमयेनाथ संलिप्य पुष्पप्रकरशोभितम्॥
कामापेक्षावधिर्यत्र आसनञ्च समाचरेत्।
सौवर्णं राजतं ताम्रं पैत्तलं भूर्जपत्रकम्॥
कर्पूरागुरुकस्तूरी श्रीखण्डकुङ्कुमेन च।
लिखेत्तत्र प्रयत्नेन लेखन्या हैमया ततः॥
मध्ये योनिं समालिख्य तद्वाह्ये तु षड़स्रकम्।
तद्वाह्ये षोड़शदलं चतुर्द्वारोपशोभितम्॥
पूर्वद्वारे गणेशञ्च दक्षिणे वटुकं यजेत्।
पश्चिमे योगिनी पूज्या क्षेत्रपालं तथोत्तरे॥
ईशानादिषु सीमान्ते रुद्रपीठं प्रपूजयेत्।
वगला पूर्वपत्रे च स्तम्भिन्याद्यास्ततःपरम्॥
स्तम्भिनी मोहिनी वश्या अवनी कालिका तथा।

अधरा कम्पिता धीरा कम्पना कायदर्शिनी॥
भ्रामिका मन्दगमना भोगिनी चैव भोगिका।
भोगाः षोड़शपत्रेषु गन्धपुष्पाक्षतैर्यजेत्॥
षोड़शस्वरसंयुक्ताः सम्प्रदाय कुलागमे।
लिखेन्मध्येषु पीठेषु कल्पयेत् क्षेत्रपञ्चकम्॥
ब्राह्मयाद्याश्चैव पूर्वादौ भैरवाष्टकसंयुताः।
स्थिरमायादिकाः सर्वाः परिपूज्याः कुलोद्भवे॥
आदिक्षान्ताः षड़स्रेषु सप्तधातुषु मातृकाः।
योनिमध्ये मूलविद्यां त्रिभिरञ्जलिभिर्यजेत्॥
पुष्पधूपादिनैवेद्यैर्गन्धताम्बूलदीपकैः।
नीराज्य विधिना पश्चात् जपसंख्यां निवेदयेत्॥
पवित्रारोपणं देवि! वदनेषु यथाविधि।
बलित्रयं ततो दद्यात् पूजनादि महोत्सवैः॥
एवन्तु कथितं भद्रे! गुरोराज्ञाञ्च पालयेत्।
संसिद्धिर्लौकिकी तस्य यथा निगमसारतः।
अपरा चैव शाक्तेयी सा चाभयप्रदा भवेत्॥

अथ स्तुतिः।—अस्य श्रीवगलामुखीस्तोत्रमन्त्रस्य नारदऋषिः
ीवगलामुखी देवता मम सन्निहितानां दुष्टानां विरोधिनां
ाङ्मुखपदजिह्वावर्णानां स्तम्भनार्थे विनियोगः।

मध्ये सुधाब्धिमणिमण्डपरत्नवेदी-
सिंहासनोपरिगतां परिपीतवर्णाम्।
पीताम्बराभरणमाल्यविभूषिताङ्गीम्
देवीं स्मरामि धृतमुद्गरवैरिजिह्वाम्॥

जिह्वाग्रमादाय करेण देवीं वामेन शत्रून् परिपीड़यन्तीम्।
गदाऽभिघातेन च दक्षिणेन पीताम्बराढ्यां द्विभुजां नमामि॥
त्रिशूलधारिणीमम्बां सर्वसौभाग्यदायिनीम्।

सर्वाभरणवेशाढ्यां देवीं ध्यात्वा प्रपूजयेत् ॥

चलत्कनककुण्डलोल्लसितचारुगण्डस्थलाम्
लसत्कनकचम्पकद्युतिमदिन्दुविम्बाननाम् ।
गदाहतविपक्षकां कलितलोलजिह्वाञ्चलाम्
स्मरामि वगलामुखीं विमुखवाङ्मुखस्तम्भिनीम् ॥

पीयूषोदधिचारुमध्यविलसद्रत्नोज्ज्वले मण्डपे
तत्सिंहासनमौलिपातितरिपुप्रेतासनाध्यासिनीम् ।
स्वर्णाभां करपीड़िताररसनां भ्राम्यद्गदाविभ्रमा-
मित्थं पश्यति* यान्ति तस्य विलयं सद्योऽथ सर्वापदः ॥
देवि ! त्वच्चरणाम्बुजे वितनुते यः पीतपुष्पाञ्जलिम्
मुद्रां वामकरे विधाय च पुनर्मन्त्री मनोज्ञाक्षरम् ।
पीठध्यानपरोऽपि कुम्भकवशाद्बीजं स्मरेत् पार्थिवम्
तस्यामित्रमुखस्य वाचि हृदये स्तम्भो भवेत्तत्क्षणात् ॥
मन्त्रस्तावदलं विपक्षदलने स्तोत्रं पवित्रञ्च ते
यन्त्रं वादिनियन्त्रणं त्रिजगतां जैत्रं न चित्रं भवेत् ।
मातः ! श्रीवगलेति नाम ललितं यस्यास्ति जन्तोर्मुखे
तन्नामग्रहणेषु संसदि मुखस्तम्भो भवेद्वादिनाम् ॥
वादी मूकति रङ्कति क्षितिपतिर्वैश्वानरः शीतति
क्रोधी शाम्यति दुर्जनः सुजनति क्षिप्रानुगः खञ्जति ।
गर्वी खर्वति सर्वविच्च जड़ति त्वन्मन्त्रिणा यन्त्रितः
श्रीनित्ये ! वगलामुखि ! प्रतिदिनं कल्याणि ! तुभ्यं नमः
दुष्टस्तम्भनमुग्रविघ्नशमनं दारिद्र्यविद्रावणं
भूभृत्स्तम्भनकारणं मृगदृशां चेतःसमाकर्षणम् ।
सौभाग्यैकनिकेतनं मम दृशोः कारुण्यपूर्णामृतम्

---

* कुत्रचिद्ध्यायति इति पाठो दृश्यते ।

शत्रोर्मारणमाविरस्तु पुरतो मातस्त्वदीयं वपुः॥
मातर्भञ्जय मे विपक्षवदनं जिह्वाञ्चलां कीलय
ब्राह्मीं मुद्रय नाशयाशु धिषणामुग्रां गतिं स्तम्भय।
शत्रूंश्चूर्णय देवि! तीक्ष्णगदया गौराङ्गि! पीताम्बरे!
विघ्नौघं वगले! हर प्रतिदिनं कारुण्यपूर्णेक्षणे!॥
मातर्भैरवि! भद्रकालि! विजये! वाराहि! विश्वाश्रये!
श्रीनित्ये! समये! महेशि! वगले! कामेशि! रामे! रमे!।
मातङ्गि! त्रिपुरे! परात्परतरे! स्वर्गापवर्गप्रदे!
दासोऽहं शरणागतं करुणया विश्वेश्वरि! त्राहि माम्॥
संरम्भे चौरसङ्घे प्रहरणसमये बन्धने वारिमध्ये
वह्नौ वादे विवादे प्रकुपितनृपतौ दिव्यकाले निशायाम्।
वश्ये वा स्तम्भने वा रिपुबधसमये निर्जने वा बने वा
गच्छंस्तिष्ठंस्त्रिकालं यदि पठति शिवं प्राप्नुयादाशु धीरः॥
नित्यं स्तोत्रमिदं पवित्रमिह यो देव्याः पठत्यादरात्
धृत्वा यन्त्रमिमं तथैव समरे बाहौ करे वा गले।
राजानो हरयो मदान्धकरिणः सर्पा मृगेन्द्रादिका
एते यान्ति विमोहिता रिपुगणा लक्ष्मीः स्थिरा सिद्धयः॥

विद्या लक्ष्मीः सर्वसौभाग्यभाजः
पुत्त्राः सम्पद्राज्यमिष्टार्थसिद्धिः।
मानं स्त्रीणां सर्वसौभाग्यभोगम्
प्राप्तं तत्तद्भूतले तत्क्षणेन॥

यत् कृतं जपसन्धानं चिन्तितं परमेश्वरि!।
रिपूणां स्तम्भनार्थं हि तद्गृहाण नमोऽस्तु ते॥
ब्रह्मास्त्रमिति विख्यातं त्रिषु लोकेषु विश्रुतम्।
गुरुभक्ताय दातव्यं न देयं यस्य कस्यचित्॥
पीताम्बरां द्विहस्ताञ्च त्रिनेत्रां गात्रकोज्ज्वलाम्।

शिलामुद्गरहस्ताञ्च स्मरेत् तां वगलामुखीम् ॥
सिद्धिं साध्येऽवगन्तुं गुरुवरवचनेष्वार्हविश्वासभाजाम्
स्वान्तः पद्मासनस्थां वररुचिवगलां ध्यायतां तारताराम्।
गायत्रीपूतवाचां हरिहरमनने तत्पराणां नराणाम्
प्रातर्मध्याह्नकाले स्तवपठनमिदं कार्य्यसिद्धिप्रदं स्यात् ॥ १ ॥

इति षट्कर्मदीपिकायां शान्तिकल्पे स्तम्भनकर्मणि पञ्चमोद्देशः।

अथवान्यप्रकारेण स्तम्भनं कारयेत् सुधीः।
सर्वविघ्नप्रशमनं सर्वशान्तिकरं परम् ॥
देवगन्धर्व्वयक्षाणां पिशाचानां तथैव च।
भूतानाञ्च तथा नृणां मृगाणां पक्षिणां तथा ॥
चित्तप्रमोहनकरं जीवाकर्षणकारकम्।
सर्व्वेषां स्तम्भनकरं वृष्टिमारुतयोस्तथा ॥
सेनायाः स्तम्भनञ्चैव व्यवहारगणैस्तथा।
अग्निस्तम्भं जलस्तम्भं विविधायुधकस्य च ॥
वाक्स्तम्भं सर्व्वविद्यानामहितानाञ्च सर्व्वशः।
गवामप्याखुसर्पाणां गतिस्तम्भनमेव च ॥
रिपूणां क्रोधसंस्तम्भं रतिशुक्रमनन्तरम्।
युवतीनां मनःस्तम्भं यूनाञ्च हृदयं तथा ॥
स्तम्भनं राजकोपस्य अमात्यस्य विशेषतः।
अन्यासां जीवजातीनां क्षिप्रं स्तम्भनकारकम् ॥
रिपूणां द्वेषकरणं विश्लिष्टं श्लिष्टयोर्भवेत्।
उच्चाटकरणं तेषामुन्मादकरणं तथा ॥
सर्व्वभूतवशीकारं सर्व्वभूतमनोहरम्।
आयुष्करं धनकरं श्रीसौभाग्यकरं परम् ॥

तत्तत्कर्मोक्तमन्त्राणां भेदांश्च विविधांस्तथा ।
प्रयोगाणि च सर्व्वाणि शृणु संक्षेपतो मुने ! ॥ १ ॥

मन्त्रोद्धारं प्रवक्ष्यामि शृणुष्वावहितो मुने ! ।
वेदादि प्रथमं प्रोक्तं हुङ्कारं तदनन्तरम् ॥
कामान्तं विन्दुसंयुक्तं तृतीयं वीजमुच्चरेत् ।
पुनश्च वीजं भूवीजं द्विसप्तस्वरभूषितम् ॥
एवं वीजं समुद्धृत्य तदन्ते मुनिसत्तम ! ।
हरिद्रागणशब्दान्ते पतये च पदं स्मृतम् ॥
वरशब्दयुगं पश्चाद्दकारेण समन्वितम् ।
सर्व्वशब्दं जनपदं हृदयं स्तम्भयद्वयम् ॥
स्वाहान्तं मन्त्रमेवं स्याद्द्वात्रिंशद्वर्णसंयुतम् ।
स्तम्भयद्वयकस्थाने आकर्षयपदद्वयम् ॥ * इत्यादि ।

मन्त्रो यथा—"ॐ हुं गं ग्लौं हरिद्रागणपतये वरवरद सर्व्वजन-हृदयं स्तम्भय स्तम्भय स्वाहा" ॥ २ ॥

मदनोऽस्य ऋषिः प्रोक्तश्छन्दोऽनुष्टुब् निगद्यते ।
देवो हरिद्रागणपः सर्व्वलोकविमोहनः ॥
वीजेन दीर्घयुक्तेन जातियुक्तेन वुद्धिमान् ।
षडङ्गमाचरेद्भक्त्या सर्व्वकामार्थसिद्धये ॥ ३ ॥ †

ध्यानमस्य प्रवक्ष्यामि सर्व्वसिद्धिप्रदायकम् ।
रत्नमण्डलमध्यस्थं रत्नसिंहासनोपरि ॥

---

* आकर्षणे कार्य्ये "स्तम्भय स्तम्भय" इत्यादिवत् "आकर्षय आकर्षय" इति, उच्चाटने च "उच्चाटय उच्चाटय" इति आवृत्त्या पठनीयमिति वोध्यम् ।

† कराङ्गन्यासौ यथा,—गां अङ्गुष्ठाभ्यां नमः, गीं तर्जनीभ्यां स्वाहा, गूं मध्यमाभ्यां वषट्, गैं अनामिकाभ्यां हुं, गौं कनिष्ठाभ्यां वौषट्, गः करतलपृष्ठाभ्यां फट् । एवं,—गां हृदयाय नमः, गीं शिरसे स्वाहा, गूं शिखायै वषट्, गैं कवचाय हुं, गौं, नेत्रत्रयाय वौषट्, गः अस्त्राय फट् ।

पीतवर्णांशुकालेपमाल्याभरणभास्वरम्।
वीरं वा विदितं देवं गजवक्त्रं त्रिलोचनम्॥
पाशाङ्कुशक्रोधमुद्रां परशुञ्चाभयं वरम्।
दधानं देवदेवेशं ध्यायेद्देवमनन्यधीः॥
चतुर्थ्यां शुक्लपक्षे तु कन्यका पेषयेन्निशाम्।
तामालिप्य स्वयं स्नात्वा निजदेहं प्रसन्नधीः॥
भक्त्या गुरून् प्रणम्याथ पूजयित्वा यथा बलम्।
वस्त्रहेमाङ्गुरीयाद्यैर्भूषणाद्यैर्विशेषतः॥
तत्प्रसादादधीयीत हरिद्रानुष्टुभं मनुम्।
रूपेण पूजयेद्देवं गन्धपुष्पाक्षतादिभिः॥
अष्टाधिकसहस्रन्तु जप्त्वा तस्य दशांशतः।
हुनेद्गुड़घृताभ्यक्तैरपूपैश्च समाहितः॥
तन्मानं तर्पयेद्भक्त्या सदाऽऽकर्षति कन्यकाम्।
ततः काम्यानि कर्माणि कुर्याद्वै कर्मसिद्धये॥ ४॥

अथ चक्रं प्रवक्ष्यामि गणेशस्य महात्मनः।
स्तम्भनाकर्षणञ्चैव वश्यं विद्वेषणं तथा॥
उच्चाटनं मारणञ्च यन्त्रः षड्विध उच्यते।
हुङ्कारं विलिखेत् पर्व्वं गं गणेशं हृदि स्थितम्॥
तद्बहिः प्रणवं लिख्य * तन्मध्ये नाम कर्म च।
तद्बहिश्चन्द्रभूवृत्तं तस्मादष्टदलं लिखेत्॥
चतुर्दलेषु हुङ्कारं भूवीजस्योदरे लिखेत्।
चतुष्कोणदलेष्वन्ते चतुर्थवीजमालिखेत्॥
भूपूरस्याष्टकोणेषु भूवीजान्तस्थ हुं लिखेत्।
कोणाग्रादग्रपर्य्यन्तं गजमस्तकमालिखेत्॥

* अत्र लिखित्वा इति स्थाने लिख्येत्यार्षं पदं ज्ञेयम्।

दन्तकाष्टकमध्येषु गणान्तं बीजमालिखेत्।
विलिख्य भूपुरस्याग्रे वर्णान्तं चोच्चरेत् क्रमात्॥
भूपुरेण च संवेष्ट्य तस्य कोण चतुष्टये।
भूबीजे विलिखेदेतत् स्तम्भयान्तमुदाहृतम्॥
शुक्रसौम्यदिने सोमवारे वाऽन्यतमेऽपि च।
रात्रौ विविक्तदेशे तु गोमयेनोपलिप्य च॥
देवमारोपयेत् तत्र दृषदं स्थाप्य यत्नतः।
यथा बलं तथा लब्धो हरिद्रां चालयेत् ततः॥
निस्त्वग् दृशदि निक्षिप्य पेषयित्वाऽथ कन्यका।
स्वरूपस्य चतुर्भागमष्टविघ्नसमन्वितम्॥
मृद्वा पिष्ट्वाऽथ संयोज्य पञ्चविंशतिवारकम्।
मनुना शोधयेत् तान्तु सूक्ष्मवस्त्रे विलेखयेत्॥
स्तम्भयन्त्रं विलिख्याऽथ कुर्य्यात् प्राणनिवेशनम्।
हारिद्रेण गणेशानं सर्व्वावयवसंयुतम्॥
कृत्वा कुक्षौ निवेश्याथ यन्त्रं सन्धाय यत्नतः।
पुनः प्राणान् प्रतिष्ठाप्य गन्धपुष्पोपहारकैः॥
यश्च भक्त्या गणेशानं शरीरान्तः प्रणिक्षिपेत्।
जपेदष्टसहस्रन्तु हेमपुष्पैः समर्च्चयेत्॥
सिद्धार्थञ्च निवेद्याऽथ बलिं तत्रैव निक्षिपेत्।
सुशालितण्डुलप्रस्थं तदर्द्धं मुद्गतिन्दुकम्॥
चतुःपलं गुड़ञ्चैव तन्मानं नारिकेलकम्।
मुष्टिमात्रं मरीचं स्यात् तदर्द्धं सैन्धवं रजः॥
तस्यार्द्धं जीरकं दद्यात् गुड़स्यार्द्धं घृतं विदुः।
गोक्षीरेणाढ़केनैव शृतं मन्दाग्निना यतः॥
सिद्धौदनमिति ज्ञेयं विघ्नेशस्य प्रियावहम्।
एतेन हविषा पूपमोदकाद्यैर्विशेषतः॥

चन्दनाऽगुरुकर्पूरताम्बूलैः कृशरादिभिः।
प्रीणयित्वा गणेशानं बलिं दत्त्वा समाहितः॥
शरावेण पिधायात्र स्तोत्रैः स्तुत्वा गणेश्वरम्।
एवमेव दिनैकं वा द्विवारं वा त्रिवारकम्॥
पञ्चाहं वाऽथ सप्ताहं पूजयेद्विघ्ननायकम्।
स्तम्भयेत् सकलान् लोकान् नात्र कार्य्या विचारणा॥५॥
अथवा स्थापयेद्रात्रौ रणभूमौ गणेश्वरम्।
सेनास्तम्भनमायाति चतुरङ्गबलान्विता॥
नगरे नगरान्तःस्थान् राष्ट्रे राष्ट्रान्तरस्थितान्।
चतुष्पथे ग्राम्यजनान् सभामध्येऽथ वादिनः॥
वृक्षाग्रे वृष्टिसंस्तम्भं जलमध्ये जलस्य च।
सीमायाञ्च महारात्रे मार्गे चौरं गृहे तथा॥
गजाश्वयोश्च शालायां वल्मीके पन्नगादिकान्।
वने सिंहवराहाणां क्रोधे च जलमध्यगे॥
आयुधानां शालमध्ये व्यवहारे तथैव च।
अग्नौ तु सर्व्वविद्यानां गीतानाञ्च तथा स्मृतम्॥
खट्वायां शत्रुसंस्तम्भं भक्ष्यभोज्येषु योषिताम्।
स्थानेष्वेतेषु संस्थाप्य बलिं दद्यात् समाहितः॥
स्तम्भयेदचिरादेव त्रैलोक्यं सचराचरम्।
अमोघमेतत् कर्म स्यात् रहस्यं न प्रकाशयेत्॥ ६ ॥
अथाकर्षणमन्त्राख्यं प्रवक्ष्यामि समाहितः।
यन्त्रे हरिद्रासंस्कारं कुर्य्यात् पूर्व्वोक्तवर्त्मना॥
पूर्व्ववच्च समालिख्य मायावीजं गणेश्वरम्।
मध्ये वहिःस्थितान् सर्व्वान् मायावीजेन वेष्टयेत्॥
भूपूरद्वयकोणेषु चतुर्ष्वेवं महात्मना।
वाणवीजं न्यसेन्मूर्ध्नि द्रां द्रीं क्लीं व्लूं सरुत्तमः॥

इतराष्टसु कोणेषु आं क्रों वर्णद्वयं लिखेत्।
मस्तकेषु प्रतिदिनं वकारञ्च ठकारकम्॥
विलिखेद्बिन्दुनादान्तं मन्त्री संयतमानसः।
भूकोणाग्रेष्वष्टशूलं हुङ्कारान्तस्थमालिखेत्॥
मण्डलद्वितयेनैव वारुणेन पुटीकृतम्।
मायावीजं लिखेत् तत्र कोणेष्वपि चतुर्ष्वपि॥
पिष्टसारे लिखेन्मन्त्री यन्त्रं पूर्व्वोक्तवर्त्मना।
प्राणसंस्थापनं कृत्वा मध्ये विघ्नेशमर्चयेत्॥
हारिद्रेण गणेशानं कृत्वा तत् कुक्षिमध्यगम्।
यन्त्रं विधाय संस्थाप्य पुनः प्राणान् प्रतिष्ठयेत् *॥
विघ्नेशयन्त्रमुद्वाह्य सुकौलालिकया मृदा।
शरावद्वितयं कृत्वा तयोरन्यतरे शुभे॥
निधाय विघ्नकर्त्तारं रक्तपुष्पैः समर्चयेत्।
सिद्धौदनाद्यैः पूर्व्वोक्तप्रकारेण च पूजयेत्॥
मन्त्रे सर्व्वजनस्थाने साध्यनाम प्रयोजयेत्।
संस्तम्भयद्वयस्थाने आकर्षयपदद्वयम्॥
योजयित्वाऽष्टसाहस्रं जपेद्वै साध्यदिङ्मुखः।
बलिं दद्याद्गणेशस्य गन्धपुष्पाक्षतादिभिः॥
इतरेण शरावेण छादयेत् तदनन्तरम्।
एकत्रिपञ्चसप्ताहपर्य्यन्तं पूजयेद्विभुम्॥
शीघ्रं साध्यः समायाति नात्र कार्य्या विचारणा।
पुरुषोऽप्यथवा नारी वेश्या वाप्सरसां गणाः॥
अचिरेण समायाति हारिद्रस्य प्रसादतः।
राजा वा राजनारी वा राजपुत्त्रोऽथवा मुने !॥ ७॥
तालपत्रे विलिख्यैनं यन्त्रमाकर्षणाह्वयम्।

* प्राणप्रतिष्ठां कुर्य्यात् इत्यर्थः।

गुड़ेनैव यथा पूर्व्वं प्राणान् संस्थाप्य यत्नतः ॥
अर्चयित्वा त्वजाक्षीरे निक्षिप्य साध्यदिङ्मुखः ।
क्वाथयेन्मन्त्रजाप्येन नारी पुण्याङ्गना तथा ।
अर्चिता वशमायाति विवशा मदनातुरा ॥ ८ ॥
तप्ताङ्गारे श्रृतं हव्यं लवणं हिङ्गुसंयुतम् ।
स्वरूपेण च संयुक्तं मधूच्छिष्टेन मेलयेत् ॥
साध्यप्रतिकृतिं कृत्वा तस्य प्राणान् प्रतिष्ठयेत् ।
श्वेतार्कपत्रयुग्मेन पुटीकृत्य तनुं शुभम् ॥
जपेद्दीपशिखाग्रे च तथा चाष्टसहस्रकम् ।
शीघ्रमायाति युवती मदनाकुलचेतना ॥ ९ ॥
श्वेतार्कदुग्धं ताम्बूले लिम्पेत् पिष्ट्वा च सर्षपान् ।
तत्क्षीरेण च संयुक्तं तैलयन्त्रं समालिखेत् ॥
प्राणसंस्थापनं कृत्वा मधुनाऽभ्यज्य संयुतम् ।
कृत्वैव तत्प्रदीपस्य मूले संस्थाप्य बुद्धिमान् ।
दीपाय चार्पयेत् शीघ्रं समायान्ति बधूजनाः ॥ १० ॥
ताम्बूलं मधुनाऽभ्यज्य मध्ये यन्त्रं प्रविन्यसेत् ।
जप्त्वा तु भक्षयेत् साध्यं शीघ्रमायाति सा च तम् ॥ ११ ॥
गन्धपुष्पेऽथवा भौमे भक्ष्ये यन्त्रं प्रविन्यसेत् ।
प्राणसंस्थापनं कृत्वा सा तदायाति तत्क्षणात् ॥ १२ ॥
अथवा तर्पयेद्दिव्यां नद्यां वा सिन्धुसङ्गमे ।
आगम्य च जलस्याऽभिमुखेनाष्टसहस्रकम् ॥
आकर्षयेन्न सन्देहो योजनानां शतोपरि ।
किमत्र बहुनोक्तेन ध्यात्वा देवं मनुं जपेत् ॥
सर्वे सत्त्वाः समायान्ति मूर्च्छिता विहगोरगाः ॥ १३ ॥

इति श्रीकृष्णविद्यावागीशभट्टाचार्य्यकृतायां षट्कर्म्मदीपिकायां
शान्तिकल्पे स्तम्भनकर्मणि षष्ठोद्देशः ।

अथ आकर्षणम्।

आकर्षणविधानानि कथयामि समासतः।
यदृष्टं त्रैपुरे तन्त्रे यदृष्टं भूतडामरे॥ १॥
श्रीवीजं मान्मथं वीजं लज्जावीजं समुद्धरेत्।
प्रथमे प्रणवं दत्त्वा त्रिपुरेति पदं ततः॥
अमुकीति पदं दत्त्वा आकर्षय द्विधा पदम्।
स्वाहान्तं मन्त्रमुद्धृत्य जपेद्दशसहस्रकम्॥ २॥
षट्कोणचक्रमालिख्य रक्तचन्दनकुङ्कुमैः।
षडङ्गं कारयेन्मन्त्री लज्जावीजसमन्वितैः॥
षड्दीर्घस्वरसंयुक्तैर्नादबिन्दुविभूषितैः।
रक्तपुष्पाक्षतैर्धूपनैवेद्यैः परिपूज्य ताम्॥
भावयन् चेतसा देवीं त्रिनेत्रां चन्द्रशेखराम्।
बालार्ककिरणप्रख्यां सिन्दूरारुणविग्रहाम्॥
पद्मञ्च दक्षिणे पाणौ जपमालाञ्च वामके।
मन्त्रस्यास्य प्रसादेन रम्भामपि तथोर्वशीम्।
आकर्षयेन्न सन्देहः किं पुनर्मानुषीमिह॥ ३॥
भूर्जपत्रे समालिख्य कुङ्कुमालक्तवारिणा।
कुङ्कुमागुरुकस्तूरीरोचनामिलितञ्च यत्॥
अनामारक्तमिश्रेण कमलाक्षीमनुं लिखेत्।
"श्रीं ह्रीं कमलाक्षि अमुकीमाकर्षय श्रीं फट्"।
इमं मन्त्रं जपेदादौ सहस्रैकं ततः पुनः॥
भूर्जपत्रं समादाय गुलिकां कारयेत्ततः।
तेनैव साध्यपादोत्थ-मृत्तिकापङ्कवेष्टिताम्॥
शोषितां तेजसा भानोर्वेष्टयेत् कटुकैः पुनः।
प्रतिमां स्त्रीनिभां कृत्वा क्षिपेत्तस्यास्तथोदरे॥

गुलिकां पातयेत् पात्रे प्रतिमां साध्यरूपिणीम् ।
तादृशाभिमुखो भूत्वा निर्जने निशि साधकः ॥
ततस्तद्गतचित्तश्च तावद्रूपं जपेन्मनुम् ।
यावदायाति सन्त्रस्ता मदनालसविग्रहा ॥ ४ ॥
अथाऽन्यं कथयाम्यत्र नृपाकर्षणहेतवे ।
देवस्यापि नरस्यापि मोहिनीमन्त्रजापतः ॥ ५ ॥
अथ मन्त्रं महेशानि ! तारमादौ ततस्त्रपाम् ।
पञ्चशायकवीजञ्च दत्त्वा तु भुवनेश्वरीम् ॥
मोहिनीति च नामान्ते फट्कारं पुनरालिखेत् ।
स्वाहान्तं मन्त्रमुद्धृत्य मध्यवीजेन कारयेत् ॥
षडङ्गं दीर्घयुक्तेन चक्रेऽष्टदलके यजेत् ।
प्रथमं साध्यनामानि लेख्यानि च कर्णोदरे ॥
माहिषाश्वेन रक्तेन पूर्व्वमन्त्रेण संयुतम् ।
मोहिनीं पद्मकिञ्जल्के जृम्भिणीं स्तम्भिनीं तथा ॥
वशङ्करीं कुलेशीञ्च ततो वै विश्ववासिनीम् ।
आकर्षिणीं ततः क्लिन्नामर्चयेदष्टपत्रके ॥
गन्धपुष्पादिधूपाद्यैर्भक्तियुक्तेन चेतसा ।
लक्षजापेन सर्वेषां शीघ्रमाकर्षणं भवेत् ॥ ६ ॥

"क्लीं कालिकायै विद्महे आकर्षिण्यै धीमहि तन्नः कालिका प्रचोदयात् । श्रीं आकर्षिणि वज्रकपालधारिणि हुं फट् स्वाहा अमुकीमाकर्षय" ॥

प्रणवं पूर्वमुद्धृत्य उग्रसेनि ततः परम् ।
नितम्बिनि वह्निजाया विद्या परमदुर्लभा ॥ ७ ॥

सिन्दूरपुत्तलीं कृत्वा तस्या नाम हृदि विलिख्य पणमूल्येन ताम्बूलं समानीय शरावद्वये नैवेद्यं दत्त्वा अष्टोत्तरशतं कृष्ण-

तस्या मूलं मन्त्रं पठित्वा पुत्तल्या हृदि नामस्थाने ताड़िते
ति सा समायाति ॥ ८ ॥

अथ विद्वेषणम्।

अथ विद्वेषणं वक्ष्ये मिथो विद्वेषणं रिपोः।
करणीयं महेशानि! यदुक्तं मालिनीमते।
अन्योऽन्ययुद्धसंरम्भे रोषितौ समरेषु तौ ॥ १ ॥
तदीयनखरोड्डीनधूलिमादाय साधकः।
धूलिना तेनै विद्वेषस्ताड़नादभिजायते ॥ २ ॥
परस्परं रिपोर्वैरं मित्रेण सह निश्चितम्।
महिषाश्वपुरीषाभ्यां गोमूत्रेण समालिखेत् ॥ ३ ॥
ययोर्नाम तयोः शीघ्रं विद्वेषश्च परस्परम्।
रक्तेन माहिषाश्वेन श्मशानवस्त्रके लिखेत् ॥ ४ ॥
यस्य नाम भवेत्तस्य काकपक्षेण लेखितम्।
वेष्टयेद्विजचाण्डालकेशैरेकतरैस्ततः।
गर्त्ते आमशरावस्थे पितृकाननमध्यतः ॥ ५ ॥
षट्कोणचक्रमध्ये तु रिपोर्नामसमन्वितम्।
मन्त्रराजं प्रवक्ष्यामि महाभैरवसंज्ञकम् ॥

"ओं नमो महाभैरवाय रुद्ररूपाय श्मशानवासिने अमुका-
कयोर्विद्वेषं कुरु कुरु सुरु सुरु हुं फट् फट्"।

एतन्मन्त्रं लिखेत्तत्र विद्वेषो जायते ध्रुवम् ॥ ६ ॥
अन्ययोगमहं वक्ष्ये दुर्लभं वसुधातले।
येन जातेन शत्रूणां विद्वेषं कुरुते ध्रुवम् ॥ ७ ॥

"ओं नमो भगवति श्मशानकालिके अमुकं विद्वेषय विद्वेषय
न हन पच पच मथ मथ हुं फट् स्वाहा"।

अमुना मन्त्रराजेन होमयेत् प्रयतः सुधीः।
वह्निकुण्डे निम्बपत्रैः कटुतैलान्वितैस्तथा ॥

प्रज्वाल्य खादिरैर्वह्निं श्मशानोत्थं ततः पुनः ।
दशसाहस्रसंयुक्तं यवाक्षततिलान्वितम् ॥
भावयेत् कालिकां देवीमिन्द्रनीलसमप्रभाम् ।
महोज्ज्वलां व्योमनीलां सुरासुरविमर्द्दिनीम् ॥
त्रिलोचनां महारावां सर्व्वाभरणभूषिताम् ।
कपालकर्त्तृकाहस्तां चन्द्रसूर्य्योपरि स्थिताम् ॥
शवजालगताञ्चैव प्रेतभैरववेष्टिताम् ।
वसन्तीं पितृकान्तारे सर्व्वसिद्धिप्रदायिकाम् ॥
लौहस्रुवेण संयुक्तं पूर्व्वोक्तं द्रव्यसञ्चयम् ।
होमयेद्विविधैः पुष्पैर्बलिच्छागोपहारकैः ॥
पूजयित्वा महेशानीं भक्तियुक्तेन चेतसा ।
तद्भस्म च समादाय धारयेदतियत्नतः ॥
भस्मना तेन यं हन्याद्विद्वेषो जायते नृणाम् * ।
वह्निः शीतलतां याति पतेद्भूमौ यदा रविः ॥
यदि शुष्यति पाथोधिश्चन्द्रमाः यदि वै पतेत् ।
तदा मिथ्या भवेदेष योगराजः सुदुर्ल्लभः ॥
महायोगोऽयमुद्दिष्टः शम्भुना त्रिपुरान्तते ।
गोपितव्यं प्रयत्नेन यदीच्छेच्चिरजीवितम् ॥ ८ ॥
श्मशानसम्भवं वस्त्रमानीय लेखयेदथ ।
तालकेन शिलायोगाद्विषाभ्यासुक्तमीदृशम् ॥
षट्कोणं चक्रराजञ्च शत्रूणां नामटङ्कितम् ।
पूर्व्वद्रव्येण विद्वेषं कारयेदथ साधकः ॥

"ओं क्लीं विद्वेषिणि अमुकामुकयोः परस्परं विद्वेषं कुरु कुरु स्वाहा" ॥ ९ ॥

---

* अस्मिन् तवेति शेषोऽन्वये योजनीयः ।

चक्रवाह्ये लिखेदेनं मन्त्रं पूर्व्वोक्तवस्तुभिः।
परस्परं भवेद्द्वेषः कथितः कुब्जिकामते॥
पूर्व्वं घुर्घुटिके युग्मं ततो मर्कटिके युगम्।
पश्चात्तु विलिखेद्घोरे विद्वेषोद्वेगकारिणि॥
अथ घोराघोरयोः स्यादमुकामुकयोस्ततः।
विद्वेषय युगं हुं फट् विद्या घुर्घुटिकेरिता॥ १०॥

इति षट्कर्मदीपिकायां शान्तिकल्पे विद्वेषः सप्तमोद्देशः।

अथ उच्चाटनम्।

उच्चाटनविधिं वक्ष्ये यथोक्तं श्रीमतोत्तरे।
निम्बपत्रे लिखेन्नाम महिषाश्वपुरीषकैः।
काकपक्षस्य लेखन्या लेखनीयमनन्तरम्॥
"ओं नमः काकतुण्डि धवलमुखि देवि! अमुकमुच्चाटय
च्चाटय हुं फट्"॥ १॥
एतन्मन्त्रं महादेवि! लिखित्वा पूर्व्ववस्तुभिः।
निम्बवृक्षस्थितं सर्व्वं हुनेत् काकालयं सुधीः॥
श्मशानवह्निमानीय धुस्तूरकाष्ठदीपितम्।
होमं कृत्वा महातैलैरथवा कटुवस्तुभिः॥
पूर्व्वोक्तमनुना तस्य पत्रं राजीकटुप्लुतम्।
सम्पूज्य धवलमुखीं पञ्चोपचारपूजया॥
तद्भस्म प्रक्षिपेच्छत्रोर्मन्दिरोपरि मन्त्रवित्।
ध्यानयुक्तेन चित्तेन शत्रूच्चाटकरं भवेत्॥
धूम्रवर्णां महादेवीं त्रिनेत्रां शशिशेखराम्।
जटाजूटसमायुक्तां व्याघ्रचर्मपरिच्छदाम्॥
कृशाङ्गीमस्थिमालाञ्च कर्त्तृकाञ्च तथाऽम्बुजम्।

कोटराक्षीं भीमदंष्ट्रां पातालसदृशोदरीम् ॥
एवंविधाञ्च तां ध्यात्वा कुर्य्यादुच्चाटनं रिपोः।
एवं योगविधिः ख्यातो वीरतन्त्रे महेश्वरि !।
सङ्गोप्योऽयं प्रयत्नेन न प्रकाश्यः कदाचन ॥ २ ॥
प्रणवं पूर्वमुच्चार्य्य नमो भगवते पदम्।
रुद्राय दीर्घकवचं तथा दंष्ट्राकरालाय ॥
अमुकञ्च ततः प्रोच्य सपुत्त्रबान्धवैः सह।
हनयुग्मं दहयुग्मं पचयुग्मं समुच्चरेत् ॥
शीघ्रमुच्चाटय द्वन्द्वं हुं फट् स्वाहाञ्च ठद्वयम्।
ततो वै पञ्चवर्गाणां पञ्चमं बिन्दुसंयुतम्।
वीजपञ्चकमेतद्धि ज्ञातव्यं तन्त्रकोविदैः ॥

"ओं नमो भगवते रुद्राय हुं दंष्ट्राकरालाय अमुकं सपु[illegible] बान्धवैः सह हन हन दह दह पच पच शीघ्रमुच्चाटय उच्चा[illegible] हुं फट् स्वाहा ङं ञं णं नं मं" ॥ ३ ॥

उद्यन्मार्त्तण्डकोटिप्रतिमतनुरुचिं सोमसूर्य्याग्निनेत्रम्
विद्युज्ज्वालाकलापोज्ज्वलविपुलजटाजूटबद्धेन्दुखण्डम्।
घण्टाटङ्काभयेष्टान्यपि च निजभुजैर्बिभ्रतं भीषणाङ्गम्
श्रीमत्कालाग्निरुद्रं प्रणतभयहरं साट्टहासं भजामि ॥

एवं ध्यात्वा प्राणप्रतिष्ठां कुर्य्यात्। "आं ह्रीं क्रों कालाग्निरु[illegible] प्राणा इह प्राणाः" इत्यादि ॥ ४ ॥

श्मशानभस्म चादाय तेनैवोच्चाटनं मतम्।
काकोलूकस्य पक्षांस्तु हुनेदष्टोत्तरं शतम्।
यन्नाम्ना मन्त्रयोगेन तस्य चोच्चाटनं भवेत् ॥ ५ ॥

इति श्रीकृष्णानन्दविद्यावागीशभट्टाचार्य्यकृतायां षट्कर्मदीपिकायां शान्तिकल्पे उच्चाटनविधिरष्टमोद्देशः।

अथ मारणम् ।

वराजे। अभिचारस्य विषयानाकर्णय वदामि ते ।
सक्रूरे क्रूरवर्गस्थे चन्द्रे बलिनि शोधने ॥
विष्टियोगे च कर्त्तव्योऽभिचारोऽप्यरिनैधने ॥ १ ॥
पापिष्ठान्नास्तिकांश्चैव देवब्राह्मणनिन्दकान् ।
अज्ञांश्च घातकान् सर्वान् क्लेशकर्मसु संस्थितान् ॥
क्षेत्रवृत्तिधनस्त्रीणामाहर्त्तारं कुलान्तकम् ।
निन्दकं समयानाञ्च पिशुनं राजघातकम् ॥
विषाग्निक्रूरशस्त्राद्यैर्हिंसकं प्राणिनां मुदा ।
योजयेन्मारणे कर्मण्येतान्न पातकी भवेत् ॥ २ ॥
दशास्थितिञ्च संवीक्ष्य कुर्य्यान्मारणमात्मवान् ।
अनवेक्ष्य कृतं कर्म आत्मानं हन्ति तत्क्षणात् ॥ ३ ॥
ब्राह्मणं धार्मिकं भूपं वनितामैष्टिकं नरम् ।
वदान्यं सदयं नित्यमभिचारे न योजयेत् ।
योजयेद् यदि वैरेण प्रत्यासत्य निहन्ति तम् ॥ ४ ॥
इदानीं स्थूलहोमन्तु कथयाम्यरिमर्दनम् ।
तत्तत्कर्मोदिते कुण्डे कुर्य्याद्धोममुदीरितम् ।
विधानं द्वेषनिधनरोगोच्चाटनविग्रहे ॥ ५ ॥
आयुर्दायं रिपोर्ज्ञात्वा लग्नोत्कर्षाणि वीक्ष्य च ।
तदात्मकग्रहाणाञ्च संस्थितिञ्चाष्टवर्गकम् ॥
त्रयाणामानुकूल्येन कुर्य्यात्तदाऽभिचारकम् ।
अन्यथा क्रूरकर्माणि कुर्वाणं नाशयन्ति हि ।
तान्येव कर्माणि ततस्तत्र च प्रातिकूल्यताम् ॥ ६ ॥
कुर्य्यात् तद्देवताभक्तिमास्तिक्यं वचनाद् गुरोः ।
तत्पार्श्ववर्त्तिमन्त्रज्ञो नालोच्य रिपुनिग्रहम् ।

विदध्यादन्यथा शक्त्या न फलं चात्मनाशनम् ॥ ७ ॥
रिपोरष्टमलग्ने च क्रूरे त्वष्टमराशिगे ।
स्थाने कुर्य्यादनिष्टानि तद्विनाशाय साधनम् ॥ ८ ॥
प्राच्यां मेषवृषौ वह्नौ मिथुनं दक्षिणे तथा ।
कुलीरसिंहमिथुनं निर्ऋत्यां कन्यका स्थिता ॥
तुलाकोटौ पश्चिमतो धनुर्वायौ तु संस्थितः ।
नक्रकुम्भावुत्तरतो मीनो ह्यैशे च संस्थितः ॥
एवं राशिक्रमं ज्ञात्वा कुर्य्यात् कर्म विशेषतः ।
काले तु पञ्च पञ्च स्युर्घटिका क्रमयोगतः ॥ ९ ॥
चैत्रादिकेषु मासेषु द्वादशेष्वपि भास्करः ।
मेषादिराशिं यो याति तथाऽन्यैर्ग्रहमण्डलैः ।
अशुभात्मकहोमन्तु कुर्य्यात्त्रासे समीरिते ॥ १० ॥
तन्त्रान्तरे। विद्वेषणाभिचारे च त्रिकोणं कुण्डमिष्यते ।
द्विमेखले कोणमुखं हस्तमात्रन्तु सर्वतः ।
मानहीनादिकं दोषं नास्ति कुण्डेऽभिचारके ॥ ११ ॥
दक्षिणास्येऽभिचारन्तु गदं वह्निमुखो द्विषाम् ।
उच्चाटनं वायुमुखो विद्वेषो राक्षसी मुखः ।
विदध्यात् पश्चिमायान्तु क्रूराण्यन्यानि कृत्स्नशः ॥ १२ ॥
स्वदेशे ग्रामगेहादौ तानि कर्माणि तद्दिशि ।
विदध्यादपि विध्युक्तमन्यथानर्थमावहेत् ॥ १३ ॥
कुण्डादिकरणाशक्तौ स्थण्डिले होममाचरेत् ।
गोमयैः परिमृष्टे च सुषमे भूतले समे ॥
बालुकाहस्तविस्तारे चतुरङ्गुलमुच्छ्रिते ।
मध्ये विदध्याद्धोमन्तु प्रोक्तमेवमशेषतः ॥ १४ ॥
व्याघातयोगे हर्षाख्ये विषयोगे च मृत्युजे ।
नाशयोगे दीनजे च मृत्यौ क्रकचयोगके ।

चण्डीशचण्डायुधके महाकाले च कालके ॥ १५ ॥
वृक्षमूले कण्टकाख्ये स्थूले पञ्चार्चके पुनः।
कुर्य्यात् प्रयोगं प्रत्यर्थिभङ्गाय निधनाय च।
निग्रहाय निरीक्ष्यैनं कुर्य्यात् सिद्धिमवाप्नुयात् ॥ १६ ॥
वश्याकर्षणविद्वेषस्तम्भोच्चाटनमारणे।
विदध्यात् पुत्तलीं सम्यक् चतस्रः प्रोक्तयोगतः ॥
पिष्टेन सिक्थेन तथा वल्मिकस्तम्भदापि च।
साध्यनक्षत्रवृक्षेणाप्युक्तनक्षत्रसंयुतः ॥
आसने पादयोः स्थाने कुण्डमध्ये च साधकः।
पिष्टमुत्तरतः कृत्वा स्थापयेत् सिक्थमन्तरे।
एवं साधारणं कृत्वा कुर्य्यात् कर्म समीरितम् ॥
सर्पशीर्षस्रुचा होमं कुर्य्यादशुभकर्मणि।
वैरिनाम्ना स्रुचा कृत्वा चरुं तज्जुहुयात्तदा।
त्रिकोणकुण्डे यमदिङ्मुखो हुत्वार्द्धरात्रके ॥ १७ ॥
श्मशाने निर्जने देशे विदध्यादभिचारकम्।
यत्राभिचारिहोमन्तु करोति भुवि साधकः ॥
तत्राभितो नृपो रक्षां कारयेदात्मसिद्धये।
न चेदरातिनृपतिश्चारैर्ज्ञात्वा निहन्त्यमुम् ॥ १८ ॥
स्वराष्ट्रे तु न कुर्वीत न कुर्वीत स्वमण्डले।
यदि कुर्य्यात् प्रमादेन मान्त्रिकोऽज्ञानमोहितः।
तद्राज्यं पीड़यन्त्येव शनकैररिभृत्यकाः ॥ १९ ॥
अक्षद्रुमसमिन्धेऽग्नौ तत्फलैश्च करञ्जकैः।
हैमोदलरसाक्तैश्च होमाच्छत्रून् विनाशयेत् ॥ २० ॥
नक्तमालसमिन्धेऽग्नौ तत्समिद्भिश्च तत्फलैः।
वितस्तिमात्रैस्तैलाक्तैर्हवनाद्वैरिणो मृतिः ॥ २१ ॥
अरुष्करसमिन्धेऽग्नौ तद्बीजैस्तदृष्टतप्लुतैः।

होमादरातिस्तीव्रेण ज्वरेण स्यान्मृतिर्ध्रुवम्॥ २२॥
सौवीराक्तैस्तु कार्पासवीजैर्होमात्तु मण्डलात्।
अरातीनामयान्योऽन्यं कलहान्निधनं भवेत्॥ २३॥
सर्षपाज्यप्लुतैः शुण्ठीमागधीमरिचैर्हुतात्।
वैरिकर्म्मर्चवृच्चाग्नौ मण्डलात्तु मृतिज्वरात्॥ २४॥

अथ लवणमन्त्रस्य विधानमभिधीयते।

ऋगाद्या कथिता पूर्व्वं लवणाम्भसि पूर्व्विका॥
लवणादिर्द्दितीयान्या दहाद्या परिकीर्त्तिता।
संदग्धाद्या चतुर्थी स्यात् याते पूर्व्वा तु पञ्चमी॥
लवणमन्त्रः ऋग्वेद-सिद्धसमभिधीयते।
लवणाम्भसि तीक्ष्णोऽसि उग्रोऽसि हृदयं तव॥
पृथ्वी लवणमाताऽस्ति तथैव वरुणः पिता।
तत्पचति पाचयति तच्च * छिन्दति भिन्दति॥
लवणे दह्यमाने तु कुतो निद्रा कुतो रतिः।
अमुकस्य दहाङ्गानि दह मांसं दह त्वचम्॥
दह त्वगस्थिलोमानि अस्थिभ्यो मज्जिकां दह।
वसतिर्योजनशते † नदीनाञ्च शतान्तरे॥
नगरे लौहप्राकारे कृष्णसर्पाकृतिर्गले।
सन्दग्ध्वानय से शीघ्रं लवणस्य च तेजसा॥
तत्रैव च समायाति तद्धि ‡ छिन्दति भिन्दति।
या ते रात्रिर्महारात्रिः सा ते रात्रिर्महानिशा॥
या रात्रिः शल्यविद्धस्य शूलाग्रारोपितस्य च।

---

* अत्र लवणम् इति स्थाने छन्दोऽनुरोधात् तत्पदद्वयं प्रपठितम्।

† अत्र वसतिर्योजनशतेत्यत्र प्रयोगे प्रथमतः "यदि" योजनीयम्।

‡ अत्रापि तत्पदेन लवणं बोध्यम्।

अङ्गिरामुनिराख्यातश्छन्दोऽनुष्टुबुदाहृतम् ॥
अग्नीरात्रिः पुनर्दुर्गा भद्रकाली च देवता।
चिटिमन्त्राक्षरैः कुर्य्यात् षड़ङ्गानि समाहितः ॥
पञ्चभिर्हृदयं प्रोक्तं त्रिभिर्वर्णैः शिरः स्मृतम्।
पञ्चवर्णैः शिखा प्रोक्ता कवचं करणाक्षरैः ॥
पञ्चभिर्नेत्रमुद्दिष्टं युगलेनास्त्रमीरितम्।
तारं चिटिद्वयं पश्चाच्चाण्डालि तदनन्तरम् ॥
महापदाख्यां तां ब्रूयादमुकं मे ततः परम्।
वशमानय ठद्वन्द्वं चिटिमन्त्र उदाहृतः।
चतुर्विंशत्यक्षरात्मा सर्व्वकामफलप्रदः ॥

अत्र मन्त्रः।—ओं चिटि चिटि हृदयाय नमः। चाण्डालि शिरसे स्वाहा। महाचाण्डालि शिखायै वषट्। अमुकं मे कवचाय हुं। वशमानय नेत्रत्रयाय वौषट्। स्वाहा अस्त्राय फट्"।

इति षड़ङ्गं विन्यस्य ध्यायेत्।

नवकुङ्कुमनिभमग्निं रुचिराकल्पशतमाश्रये त्र्यक्षम्।
स्रुवशक्तीवरमभयं दोर्भिर्दधतं स्थितञ्च रक्तेऽब्जे ॥
कालाम्बुवाहद्युतिमिन्दुवक्त्रां तालावलीशोभिपयोधराढ्याम्।
कपालपाशाङ्कुशनागहस्तां नीलाम्बराढ्यां युवतीं नमामि ॥
कालाम्बुदाभामरिशङ्खशूलखड्गाढ्यहस्तां वरुणेन्दुचूड़ाम्।
भीमां त्रिनेत्रां जितशत्रुवर्गां दुर्गां स्मरेद्दुर्गतिभङ्गदक्षाम् ॥
टङ्कं कपालं डमरुं त्रिशूलं संबिभ्रती चन्द्रकलाऽवतंसा।
पिङ्गोर्द्ध्वकेशी शितभीमदंष्ट्रा भूयाद्विभूत्यै मम भद्रकाली ॥
ऋटक् पञ्चकं यजेत् सम्यग्युतं स्यात्तद्दशांशतः।
हविषा घृतसिक्तेन जुहुयादर्चितेऽनले ॥
एवं कृते पुरश्चर्य्याप्रयोगे कुशलो भवेत्।
अग्निः यामवती ध्येया वश्याकर्षणकर्म्मणोः ॥

स्मरेद् दुर्गां भद्रकालीं मन्त्री मारणकर्म्मणि ।
जानुप्रमाणे सलिले स्थित्वा निशि जपेन्मनुम् ।
अनेन वाञ्छितः साध्यः किङ्करो जायते क्षणात् ॥ २५ ॥
नाभिमात्रोदके स्थित्वा जपेन्मन्त्रमिमं सुधीः ।
अष्टोत्तरसहस्रं यस्तस्य साध्यो वशो भवेत् ॥ २६ ॥
ऋक्पञ्चकं जपेन्मन्त्री कण्ठमात्राम्भसि स्थितः ।
सप्तभिर्दिवसैर्भूपान् वशयेद्विधिनाऽमुना ॥ २७ ॥
विलिख्य तालपत्रे तं साध्यनाम्ना विदर्भितम् ।
निक्षिप्य क्षीरसंमिश्रे जले तत् क्वाथयेन्निशि ।
वश्यो भवति साध्योऽसौ नात्र कार्य्या विचारणा ॥ २८ ॥
तालपत्रे लिखित्वैनं भद्रकालीगृहे खनेत् ।
वश्याय सर्वजन्तूनां प्रयोगोऽयमुदाहृतः ॥ २९ ॥
ताम्रपात्रे समालिख्य मन्त्रं साध्यविदर्भितम् ।
तापयेत् खादिरे वह्नौ मासाद्वश्यो भवेन्नरः ॥ ३० ॥
त्रिकोणं कुण्डमासाद्य सम्यक् शास्त्रोक्तलक्षणम् ।
तस्मिन् होमं प्रकुर्वीत संस्कृते हव्यवाहने ।
प्रक्षाल्य गव्यदुग्धेन संशोध्य लवणं सुधीः ।
सुचूर्णितं प्रजुहुयात् सप्ताहाद्वशयेज्जनान् ॥ ३१ ॥
दधिमध्वाज्यसंसिक्तैः सैन्धवैर्जुहुयात्तथा ।
वशयेदखिलान् देवान् चिरात् किमुत पार्थिवान्?॥३२॥
विशुद्धं लवणप्रस्थं विभक्तं पञ्चधा पृथक् ।
एकैकया प्रजुहुयात् पञ्चपञ्चाहमादरात् ।
यस्य नाम स वश्यः स्यादनेन विधिना चिरात् ॥ ३३ ॥
शुद्धं लवणमादाय जुहुयान्मधुरान्वितम् ।
ऊनपञ्चाशदाहुत्या वशं नयति वाञ्छितम् ॥ ३४ ॥
मधुरत्रयसंयुक्तैर्लवणत्रयसंयुतैः ।

जुहुयाद्वशयेन्नारीं नरान्नरपतीनपि।
मन्त्रं कृष्णचतीयादि प्रजपेद् यावदष्टमीम्॥ ३५॥
पुत्तलीः पञ्चकुर्वीत साङ्गोपाङ्गाः समाः शुभाः।
एका साध्यद्रुमेण स्यादन्या पिष्टमयी तथा।
चक्रिहस्तमृदान्या स्यादन्या सिक्थमयी स्मृता।
लवणप्रोक्तसम्भूतं चूर्णितं परिशोधितम्।
कुड़वं प्रोक्षयेत् चीरदध्याज्यमधुभिः सह॥
गुड़ाज्यमधुभिः सम्यक् मिश्रितेनाऽमुना ततः।
कुर्वीत पुत्तलीं सौम्यां सर्वावयवशोभिताम्॥
प्राणमन्त्रकृतं यन्त्रमासां हृदि विनिर्क्षिपेत्।
अस्यां प्राणान् प्रतिष्ठाप्य पूजयेत् कुसुमादिभिः॥
पश्चात् कृष्णाष्टमीरात्रौ याममात्रे गते सति।
विधाय मातृकान्यासं मन्त्रन्यासमनन्तरम्॥
चिटिमन्त्रसमुद्भूतान् चतुर्विंशतिसंख्यकान्।
ताराद्यान् विन्यसेद्वर्णान् स्थानेष्वेषु समाहितः॥
मूर्ध्नि भाले दृशोः श्रुत्योर्नासायां चिबुके तथा।
कण्ठहृत्स्तनयुग्मेषु कुक्षौ नाभौ कटिद्वये॥
मेढ्रे पायौ प्रविन्यस्य शिष्यं वर्णचतुष्टयम्।
ऊरुद्वये जानुयुगे जङ्घायुग्मे पदद्वये॥
एवं विन्यस्तसर्वाङ्गो रक्तमाल्यानुलेपनम्।
रक्तवस्त्रधरः शुद्धः पुत्तलीं दारुणा कृताम्॥
अधोमुखीं खनेत् कुण्डे पिष्टजामासनादधः।
मृन्मयीं प्रतिमां पाददेशे न्यस्येत् तथाऽऽत्मनः।
मधूच्छिष्टमयीं व्योम्नि कुण्डस्योर्द्ध प्रलम्बयेत्॥
लवणेन कृतां पश्चात् प्रतिमां संस्पृशन् जपेत्।
ऋक्पञ्चकं यथा न्यायम् अष्टोत्तरसहस्रकम्॥

संहृत्य चिटिमन्त्रार्णान् पुनस्तस्यास्तनौ न्यसेत् ।
अङ्गुष्ठसन्धिप्रपदजङ्घाजानूरुपायुषु ।
लिङ्गदेशे पुनर्नाभौ जठरे हृदयाम्बुजे ॥
स्तनद्वये कन्धरायां चिबुके वदने पुनः ।
घ्राणयोः कर्णयोरक्ष्णोर्ललाटे मूर्द्धनि क्रमात् ॥
अग्निमादाय सन्दीप्य साध्यलक्षप्रदारुभिः ।
अस्मिन्नभ्यर्च्य मन्त्रोक्तदेवतां रूप्यपावके ॥
कुशोदजातीपुष्पैश्च दत्त्वार्घ्यं प्रणमेत् सुधीः ।
मन्त्रैरेतैः प्रयोगादावन्ते संयतमानसः ॥
ओं त्वमनेनाज्यसिक्ताग्ने ! निशायां हव्यवाहन ! ।
हविषा मन्त्रजप्तेन तृप्तो भव तया सह ॥
ओं जातवेदो महादेव तप्तजाम्बूनदप्रभ ! ।
स्वाहापते विश्वभक्ष्य लवणं दह शत्रुहन् ! ॥
ओं सर्व्वेश्वरीशि ! सर्व्वाणि ! ग्रस्तं मुक्तं त्वया जगत् ।
महादेवि ! नमस्तुभ्यं वरदे ! कामदा भव ॥
ओं तमोमयि महादेवि ! महादेवस्य सुव्रते ! ।
क्रियया पुरुषं हत्वा वशमानय सुव्रते ! ॥
ओं दुर्गे ! दुर्गादिरहिते ! दुर्गसम्बोधनाकुले ! ।
शङ्खचक्रधरे देवि ! दुष्टशत्रुभयङ्करि ! ॥
नमस्ते दह शत्रुं मे वशमानय चण्डिके ! ।
शाकम्भरि ! महादेवि ! शरणं मे भवानघे ! ॥
ओं भद्रकाली भवाभीष्टभद्रसिद्धप्रदायिनी ।
सपत्नान् मे हन हन दह * शोषय तापय ॥
ओं शूलासिशक्तिवज्राद्यैरुत्कृत्योत्कृत्य मारय ।

* "दह" इत्यत्र जपप्रयोगे "दह दह" एवं पठनीयम् ।

महादेवि ! महाकालि ! रक्षास्मानक्षतात्मिके ! ॥
साध्यं संस्कृत्य निर्भिद्य पुत्तलीं सप्तधातुतः।
लवणं चूर्णयित्वा तु मधुगव्यसमन्वितम् ॥
समां पुत्तलिकां कृत्वा प्राणमन्त्रेण मन्त्रिताम्।
अष्टाविंशतिकृत्तन्तु अष्टोत्तरशतन्तु वा ॥
वृहद्बीजसमायुक्तं वायुबीजसमन्वितम्।
हृदये स्थापयित्वा तु साध्यप्राणं विसर्जयेत्।
ऋक्पञ्चकं समुच्चार्य्य जुहुयादेधितेऽनले ॥

ऋक्पञ्चकौ यथा।—लवणमन्त्रस्य वरुणऋषिरनुष्टुप्छन्दो महारात्रिर्भद्रकाली देवता क्लीं बीजं ह्रीं शक्तिः लुं कीलकं श्रीं ह्रां ह्रीं श्रीं क्लीं श्रां क्रीं सर्व्वसिद्धये विनियोगः।

लवणाम्भसि तीक्ष्णोऽसि उग्रोऽसि हृदयं तव।
पृथ्वी लवणमाताऽस्ति तथैव वरुणः पिता ॥
तत्पचति पाचयति तच्च छिन्दति भिन्दति *।
लवणे हूयमाने तु कुतो निद्रा कुतो रतिः ॥
अमुकस्य दहाङ्गानि दह मांसं दह त्वचम्।
दह त्वगस्थिरोमाणि अस्थिभ्यो मज्जिकां दह ॥
वसतिर्योजनशते नदीनाञ्च शतान्तरे।
नगरे लौहप्राकारे कृष्णसर्पाकृतिर्गले ॥
सन्दग्ध्वानय मे शीघ्रं लवणस्य च तेजसा।
या ते रात्रिर्महारात्रिः सा ते रात्रिर्महानिशा ॥
या रात्रिः शल्यविद्धस्य शूलाग्रारोपितस्य च।
प्रथमे दक्षिणः पादस्तत्करस्तदनन्तरम् ॥
शिरस्तृतीयमाख्यातं वामहस्तमतःपरम्।

* अत्रापि कथितोभयतत्पदस्थाने लवणं पठनीयं, प्रयोगसमये इति सङ्क्षेपः।

मध्यादूर्द्धं पञ्चमं स्यादधोऽंशः षष्ठ ईरितः॥
सप्तमो वामपादः स्यादयं भागक्रमः स्मृतः।
सप्तसप्तविभागे वा प्रोक्तेष्वेषु यथाविधि॥
हुत्वैवमर्चयित्वैनं प्रणमेद्दण्डवत् ततः।
यजमानो धनैर्धान्यैः प्रणमेद् गुरुमात्मनः॥
प्रदद्याद्दक्षिणां तस्मै सहस्रं शतमेव वा।
गवां सुवर्णनिष्काणां भूमिं वा शस्यशालिनीम्।
सर्वशान्तिमवाप्नोति सर्वरक्षाकृतं भवेत्॥

इति श्रीकृष्णविद्यावागीशभट्टाचार्य्यविरचितायां षट्कर्मदीपिकायां नवमोद्देशः समाप्तः।

सिद्धनागार्जुनकक्षपुटम्।

यः शान्तः परमालयः परशिवः कङ्कालकालान्तको
ध्यानातीत अनादिनित्यनिचयः सङ्कल्पसङ्कोचकः।
आभासान्तरभासकः समरसः सर्वात्मना बोधकः
सोऽयं शर्म ददातु नित्यजगतां विद्यादिसिद्धष्टकम्॥
या नित्या कुलकेलिशोभितवपुर्बोधोदिता जृम्भते
पूर्णाभामृतकुण्डला परपरा मन्त्रात्मिका सिद्धिदा।
मालापुस्तकधारिणीं त्रिनयनां कुन्देन्दुवर्णोज्ज्वलाम्
नित्यानन्दकुलप्रकाशजननीं वाग्देवतामाश्रये॥
येषां वक्त्राच्छ्रुतं किञ्चिन्मणिमन्त्रौषधादिकम्।
तत्कर्मणि रतान् पूर्वं प्रणमामि महात्मनः॥

संसारे बहुविस्तीर्णे विद्यासिद्धिरनेकधा।
प्रोक्तवाञ्छङ्करः पूर्वं यदि पृच्छति पार्वती * ॥
अन्यैर्देवगणैः सिद्धैर्मुनिदेशिकसाधकैः।
यद् यदुक्तं हि शास्त्रेषु तत्सर्वमवलोकितम् ॥
शाम्भवे यामले शास्त्रे मौले कौलिय डामरे।
स्वच्छन्दे काकुले शौचे राजतन्त्रे मृतेश्वरे ॥
उड्डीशे वातुले तन्त्रे उच्छिष्टे सिद्धिशावरे।
किङ्किणी मेरुतन्त्रे च कालचण्डेश्वरे मते ॥
शाकिनी-डाकिनीतन्त्रे रौद्रेऽनुग्रहनिग्रहे।
कौतुके शाल्यतन्त्रे च क्रियाकालगुणोत्तरे ॥
हरमेखलके ग्रन्थे इन्द्रजाले रसार्णवे।
आथर्वणे महावेदे चार्वाके गारुड़ेऽपि च ॥
इत्येवमागमोक्तञ्च वक्त्राद्वक्त्रेण यच्छ्रुतम्।
एतत् सर्वं समुद्धृत्य दध्नोघृतमिवादरात् ॥
साधकानां हितार्थाय मन्त्रखण्डमिहोच्यते।
...ध्यप्रयोगाः। वश्यमाकर्षणं स्तम्भं मोहमुच्चाटमारणम् ॥
विद्वेषव्याधिकरणं पशुशस्यार्थनाशनम्।
कौतुकञ्चेन्द्रजालञ्च यक्षिणीमन्त्रसाधनम् ॥
चेटकञ्चाञ्जनं दिव्यमदृश्यं पादुकागतिम्।
गुटिका खेचरत्वञ्च मृतसञ्जीवनादिकम् ॥
तथा कच्चपुटोसिद्धाः साङ्गोपाङ्गमनेकधा।
सुसाध्यं प्रत्ययोपेतं साधकानां हितं प्रियम् ॥
तत्तन्मन्त्रमुखं ज्ञात्वा कर्त्तव्या सिद्धिमिच्छता।
मन्त्रसाधनकं पूर्वं सिद्धयर्थं साधकोत्तमैः ॥

---

* अत्र यदि इत्यत्र यत्, एवं पृच्छति इत्यत्र अपृच्छदित्यन्वये बोध्यम्।

विना मन्त्रविधानेन स सिद्धिं लब्धवान् भवेत्।

अथ कूर्मचक्रम्।

अथ मन्त्रांऽशकं वच्ये मेरुतन्त्रे शिवोदिते॥
मन्त्रसाधकयोर्वर्णान् स्वरांश्च क्रमतः पृथक्।
विधाय सिद्धसाध्याद्यैर्गणयेन्मन्त्रवित्तमः॥
अनुस्वारं विसर्गञ्च जिह्वामूलीयसंज्ञकम्।
सहितोच्चारणात् प्राप्तं केवलाच्चरसंयुतम्॥
अपभ्रंशाच्चरं त्यक्त्वा साधकस्यात्र शोधयेत्।
व्यञ्जनैर्व्यञ्जनं शोध्यं स्वरैर्नाम स्वरास्तथा॥
आद्यमाद्येन संशोध्यं द्वितीयेन द्वितीयकम्।
अनेनैव प्रकारेण शेषा शोध्या यथाक्रमम्॥
आद्यं यदच्चरं नाम्ना गोपनेन तदादितः।
एवं मन्त्राच्चरं स्थानं मात्राङ्कायामयं क्रमः॥
चतुष्कञ्च चतुष्कञ्च परित्यज्यं पुनः पुनः।
सिद्धसाध्यसुसिद्धारिसंज्ञयैव यथाक्रमम्॥
एवं क्रमेण सर्वेषां मन्त्राणां गणने कृते।
कियत् सिद्धं कियत् साध्यमित्याद्यपि विचिन्तयेत्॥
यन्त्रमन्त्रे भवेदेतत् सिद्धादीनां चतुष्टयम्।
स मन्त्रसिद्ध इत्युक्तः साध्यो वै सिद्धिवर्जितः॥
रिपुवर्जं मन्त्रयन्त्रं सा सुसिद्धिरिहोच्यते।
सुसिद्धिमविहीनञ्च यन्त्रं यच्छत्रुभूपितम्॥
आदिसिद्धान्तसिद्धोऽयं मध्यसिद्धोऽथवा भवेत्।
सुसिद्धः स तु विज्ञेयः साधकानां फलप्रदः॥
आदावन्ते सुसिद्धोऽयं त्रैलोक्यमपि दास्यति।
आदावन्ते च साध्यो यः सोऽतिकालेन सिध्यति॥
आदावन्ते च यः शत्रुः साधकं मारयत्यलम्।

सिद्धः सिध्यति कालेन साध्योऽथ जपहोमतः ॥
सुसिद्धः स्मरणाद्देवि ! रिपुसाधकमारकः।
एवं मन्त्रांऽशकं ज्ञात्वा सुसिद्धं सिद्धमेव च ॥
साध्यञ्चापि क्वचिद् ग्राह्यं सिद्धयर्थं मन्त्रमुत्तमम्।
शास्त्राद्वा गुरुवक्त्राद्वा ग्राहयेत् साधयेत् पुनः ॥
पुरे वा पत्तने ग्रामे कटके सिन्धुसङ्गमे।
वने चोपवने तीर्थे महापीठे च सागरे ॥
पर्वते सिद्धवृक्षे च मूले वृक्षे श्मशानके।
गुहामात्टगृहे पुण्यक्षेत्रे वाऽथ महानदे ॥
सिद्धमन्त्रे शिवस्थाने गृहे वाऽथ यथोदिते।
दीपस्थानं सुनिश्चित्य कूर्मचक्रे सुसिद्धिदम् ॥
अपवर्गं लिखेद्धीमान् मध्यतो यावदुत्तरम्।
क्षमीशानपदे क्षेत्रे वेदास्ते नेत्रकोष्टके।
हृदास्ये भुजकुक्ष्यङ्घ्रिपुष्ठवर्गक्रमात् स्थिताः।
यदादि दीपसंज्ञानि तेषु क्षेत्राधिपालकः ॥
अमृतं वृषभञ्चैव शूलराजञ्च वासुकिम्।
अमरं अजरञ्चैव पूज्यं शक्तियुतं तथा ॥
यद् यद् योनिमहाशङ्को ज्ञेयस्तत्रानुक्रमात्।
मध्यात् पूर्वादितः पूज्या मन्त्रमत्रैव कथ्यते ॥

"ओं अमुकक्षेत्रपाल अमृतदेवीपुत्र अवतार ! सुवह्निं निपितं गृह्ण ओं ख ख ल ल ख ख ल ल क्षेत्रपाल ! सर्वविघ्नान् हन हन स्वाहा"। अनेन मन्त्रेण सर्वक्षेत्रपाला अमृतादयः पूज्याः।

यत्र यत्र भवेद्वर्गे क्षेत्राणामाद्यमक्षरम्।
तन्मुखं शेषवर्गेषु करकुक्ष्यङ्घ्रिकल्पना ॥
मुखस्थः क्षोभयेन्मन्त्री करस्थः स्वल्पभोगभाक्।
कुक्षिस्थितो ह्युदासीनः पादस्थो दुःखमाप्नुयात् ॥

पुच्छस्थितो बधं बन्धं तत्तदाप्नोति निश्चितम्।
दीपस्थानमतः चेत्रं ज्ञात्वा मन्त्रं शुचिर्जपेत्॥
चेत्रसाधनमन्त्राणामेकमेवाद्यमक्षरम्।
यदि स्यात् तद् ध्रुवं मन्त्रं चिप्रमेव सुसिध्यति॥

जपमाला भेदाः।

जपमालादिसिद्धान्ता मन्त्राणां साधनोच्यते।
अष्टोत्तरशतञ्चैव चतुःपञ्चाशदेवताः॥
सप्तविंशमणिर्वाऽथ कर्त्तव्या जपमालिका।
उत्तमा मध्यमा हीना त्रिधा प्रोक्ता क्रमेण तु॥
ब्रह्मग्रन्थ्यरन्विता प्रोक्ता मेरुतन्त्रे शिवोदिता।
मन्त्रप्रत्यच्चता सिद्धैर शान्तिके वाऽथ पौष्टिके॥
स्फाटिकी मौक्तिकी वाऽपि प्रोतव्या सितसूत्रकैः।
सर्वकामप्रसिद्ध्यर्थं जपेद्रुद्राक्षमालया॥
धर्मार्थकाममोक्षार्थी जपेत् पद्माक्षमालया।
सारस्वते प्रवालोत्था वश्ये सैव प्रकीर्त्तिता॥
पद्मरागमयी वाऽपि समस्ते पुत्रजीविका।
वेगादुच्चाटयेच्छत्रून् महादेवेन भाषितम्॥
गर्दभस्य ह्यधोदन्तैर्मणिं कृत्वा च बालकैः।
जपमाला प्रकर्त्तव्या शत्रूणां मारकर्मणि॥
नाम्ना पुल्यस्य सूत्रेण प्रोतव्या कार्य्यसिद्धिदा।
प्रेतदन्तैरथोद्भूता कर्त्तव्या जपमालिका॥
साध्यदेहनखैः केशैः ग्रथिता द्वेषकर्मणि।
मणिभिः शङ्खसम्भूतैरक्षमालार्थसाधने।
निधानयक्षिणीसिद्धैर प्रोतव्या सितसूत्रकैः॥

जपप्रकाराः। अङ्गुष्ठाऽनामिकाभ्यान्तु जपेदुत्तमकर्मणि।
अङ्गुष्ठमध्यमाभ्यान्तु जपेदाकृष्टकर्मणि॥

तर्जन्यङ्गुष्ठयोगेन विद्वेषोच्चाटने जपः।
कनिष्ठाङ्गुष्ठकाभ्यान्तु जपेन्मारणकर्मणि॥

जपसमयनियमः।

उदयाद् यामपर्य्यन्तं हेमन्ते पौष्टिके जपेत्।
यामद्वयं पूर्वरात्रे शिशिरे मारणं जपेत्।
वसन्ते प्रहरादूर्द्ध्वं यामद्वयमिते जपेत्॥
कार्य्यमाकर्षणं तत्र मन्त्रैरिष्टस्य वस्तुनः।
ग्रीष्मे तृतीयके यामेऽभिहितो द्वेषकर्मणि॥
ततोऽस्तमयपर्य्यन्तमुच्चाटे तोयदागमे।
अर्द्धरात्रे निशान्ते च जपेच्छरदि शान्तिके।
षमतम्। यस्मिन् कस्मिन्नृतौ कार्य्यं मन्त्राणां साधनं शुभम्।
पूर्वाह्ने वश्यपुष्ट्यर्थं मध्याह्ने प्रीतिनाशनम्॥
उच्चाटमपराह्ने तु सन्ध्यायां मारणं तथा।
सोमदेवगुरूपेता पौष्टिकेऽभिहिता बुधैः॥
अष्टमी नवमी चैव दशम्येकादशी तथा।
शुक्रभानुसुतोपेता प्रशस्ताऽऽकृष्टकर्मणि॥
अष्टमी पौर्णमासी च प्रतिपन्नवमी तथा।
शुक्रभानुसुतोपेता प्रशस्ता द्वेषकर्मणि॥
ततश्चतुर्दशी कृष्णा शनिवारे तथाऽष्टमी।
उच्चाटनेऽतिशस्तेयं जपे शङ्करभाषिता॥
अमावास्याष्टमी कृष्णा तादृशी च चतुर्दशी।
भानुना तत्सुतोपेता भूसुतेनाथ संयुता॥
मारयेदद्भुतं होमाद्रक्षितं शम्भुनाऽपि वा।
एवं सिध्यन्ति कर्माणि तिथिवारानुसारतः॥

जपासनस्थानानि।

यथोक्तासनमारूढो जपं मन्त्रे समाचरेत्।

कुशाजिनाम्बरे रक्ते चतुरङ्गुलमूर्द्धतः॥
चतुरस्रं द्विहस्तञ्च सुदृढ़ं मृदुनिर्मितम्।
तत्रोपरि नियुञ्जीत योगमन्त्रस्य सिद्धये॥
वदन्नश्नन् स्वपन् वाऽन्यमाश्रयन् किमपि स्मरन्।
क्षुत्तृड्जृम्भणहिक्कादिविकलीकृतमानसः॥
मन्त्रसिद्धिं न चाप्नोति यस्माद् यत्नपरो भवेत्।
व्याघ्रचर्मासनं वश्ये मोक्षे च धनसाधने॥
आकृष्टौ यद् यदिष्टं स्याद्वारणं शान्तिपौष्टिके।
उच्चाटे माहिषं चर्म मारणे नरकेशजम्॥
शान्तिके स्वस्तिके प्रोक्तं पौष्टिके पद्मजासनम्।
आकृष्टौ पार्ष्णिकं ज्ञेयं विद्वेषे कुक्कुटासनम्॥
अर्द्धस्वस्तिकमुच्चाटे अर्द्धोत्थानन्तु मारणे।
महाकाल्याश्च दुर्गाया वश्ये उक्तं शिवालये॥
आकृष्टौ नियमो नास्ति विद्वेषस्य श्मशानके।
उच्चाटनं कुत्सिते च शून्ये देवालयोपरि॥
श्मशाने कालिकाक्षेत्रे प्रेतमारुह्य मन्त्रवित्।
दक्षिणाभिमुखो भूत्वा दन्तैः सम्पीड्य चाधरम्।
रिपुं स्मृत्वा जपं कुर्वन् सप्तरात्रेण मारयेत्॥

वासनास्थानध्यानादयः।

वासनाऽत्र यथा प्रोक्ता कर्मषट्कानुरूपिणी।
शान्तिके सौम्यरूपा सा पौष्टिके वश्यकर्मणि।
काकोलूकादिभिः शत्रुं भक्ष्यमाणं मृतं स्मरेत्॥
इत्येवं वासना कार्य्या स्थानध्यानमथोच्यते।
चतुष्पत्राम्बुजे गुह्ये कुर्य्यान्मूले मनः स्थिरम्॥
रससिद्धिं तथा वश्यमाकृष्टिं कालवञ्चनम्।
जपनाद्विषभूतादि-कार्य्यारम्भं गमागमौ॥

सारस्वतं स्तम्भनञ्च वामवाहेन साधयेत्।
हृत्पद्मकर्णिकां ध्यायन् स्थिरचित्तेन योजयेत्॥
लभते पौष्टिकीं सिद्धिं शत्रूच्चाटनमारणे।
विद्वेषे रविवाहेण वरनारीविमोहनम्॥
शान्तिकं पौष्टिकं वश्यं साधयेच्छङ्करोदितम्।
भ्रुवोर्मध्ये द्विपत्रे च दक्षवाहेण साधयेत्॥
क्षुद्रविद्या महाविद्या मोक्षकौतूहलानि च।
यस्य मन्त्रस्य यद्ध्यानं ध्यायेत् स्थानगतं बुधः॥
अथवा सर्वमन्त्राणां ध्यानं सिद्धिकरं शृणु।
कक्षं विन्दुगतं ध्यात्वा प्राणशक्तिसमुत्थितम्॥
शुद्धस्फटिकसङ्काशं शान्तिके पौष्टिके शुभे।
सारस्वते रसे मोक्षे खेचरत्वे रसातले॥
सा रक्ता सर्ववश्येषु स्तम्भने मोहनेऽपि च।
आकर्षणे व्रह्मवादे कौतुके सिद्धिदायिनी॥
पीता तूच्चाटने द्वेषे कृष्णा मारणकर्मणि।
एवं ध्यात्वा जपं कुर्य्यान्मानसोपांशुवाचिकम्॥

जपहोमादिभेदाः।

शान्तिके पौष्टिके मोक्षे मानसं जपमाचरेत्।
वश्याकृष्टावुपांशु स्याद्वाचिकं क्षुद्रकर्मणि॥
शनैः शनैः सुविस्पष्टं न द्रुतं न विलम्बितम्।
जपं सप्रणवं कुर्य्यात् सर्वकर्मार्थसिद्धये॥
जपप्रारम्भकाले तु मन्त्रायार्घ्यं प्रदापयेत्।
नातिरिक्तञ्च न्यूनञ्च जपं कुर्य्यात् सुनिश्चितम्।
जप्तस्य च दशांशेन होमं कुर्य्याद्दिने दिने।
अथवा लक्षपर्य्यन्तं होमः कार्य्यो विपश्चिता॥
गव्यक्षीराज्यमधुभिर्वश्यपौष्टिककर्मणि।

त्रिकोणे वृत्तकुण्डे वा वायव्याभिमुखो हुनेत् ॥
लवङ्गं श्रीफलं जाती प्रियङ्गुं किंशुकं तथा।
पञ्चद्रव्यैर्मितं होमं कुर्य्यादाकृष्टकर्मणि ॥
लवङ्गैकेन वा कुर्य्यात् तथा तिर्य्यगुदङ्मुखः।
कार्य्या समस्ततन्त्रोक्ता तथा वाराटबीजकम् ॥
विद्वेषे जुहुयान्मन्त्री राक्षसीदिक्कृताननः।
औडुम्बरवटाश्वत्थप्लक्षबीजैर्घृतप्लुतैः ॥
उच्चाटने मत्स्यकुण्डे जुहुयात् पावकाननः।
अजासर्पिश्च तत्क्षीरं बीजं कार्पाससम्भवम् ॥
दग्धास्थिनरमांसञ्च साध्यरोमनखास्तथा।
अष्टोत्तरसहस्रञ्च वज्रकुण्डेऽनलोत्थिते।
दक्षिणास्यस्तु पञ्चत्वे जुहुयान्मारयेद्रिपून् ॥
अथवा यत्र यद् द्रव्यं प्रोक्तं मन्त्रस्य सिद्धये।
तथा होमः प्रकर्त्तव्यः शास्त्रदृष्टेन कर्मणा ॥
पूजयित्वाऽथ हुत्वाऽथ जप्त्वा ध्यात्वाऽथ देवताम्।
मृदु सोष्णं सुपक्वञ्च भुञ्जीत लघुभोजनम् ॥
यद्वा तद्वा परित्यज्य दुष्टानां कुत्सितोदनम्।
शस्तमन्नन्तु भुञ्जीयाज्जितात्मा सिद्धिभाग् भवेत् ॥
अन्यथा भोजने दोषः सिद्धिहानिश्च जायते।
इति सर्वं शिवेनोक्तं मन्त्राणां साधनं शुभम् ॥
अनुष्ठितो यथा न्यायं यदि मन्त्रो न सिध्यति।
पुनस्तावदनुष्ठेयं ततः सिद्धो भवत्यलम् ॥
पुनस्त्वनुष्ठितो मन्त्रो यदि सिद्धो न जायते।
उपायास्तत्र कर्त्तव्याः सप्त शङ्करभाषिताः ॥

शिवोक्तोपायान्तराणि।

द्रावणं बोधनं वश्यं पीड़नं शोषपोषणम्।

दहनान्तं क्रमं कुर्वन्नतः सिद्धो भवेद् ध्रुवम् ॥
द्रावणं वारुणे वीजे ग्रथनं क्रमपोषतः।
तन्मात्राद्यन्तमालिख्य शिलाकर्पूरकुङ्कमैः॥
उशीररोचनाभ्याञ्च मन्त्रं संग्रथितं लिखेत्।
क्षीराज्यतोयमधुभिर्मध्ये तं लिखितं क्षिपेत्॥
पूजनाज्जपनाद्धोमाद्रोचितः सिद्धिदो ध्रुवम्।
द्रावितोऽपि न सिद्धश्चेद् वोधनात्तन्तु कारयेत्॥
सारस्वतेन वीजेन सम्पुटीकृत्य सञ्जपेत्।
एवं बुद्धो भवेत् सिद्धो नो चेत्तर्हि वशीकुरु॥
आरक्तचन्दनं कुष्ठं हरिद्रां मदनं शिलाम्।
एतैस्तु मन्त्रमालिख्य भूर्जपत्रे सुशोभने!॥
धार्य्यं कण्ठे भवेत् सिद्धिर्वश्यमेतत् प्रकीर्त्तितम्।
वशीकृतो न सिद्धश्चेत् पीड़नं तस्य कारयेत्॥
अधरोत्तरयोगेन यदा तु परिजप्यते॥
ध्यायी तदैव तं तद्वदधरोत्तररूपिणी॥
विद्यामादित्यमुग्धे तु लिखित्वा कस्य वाऽङ्घ्रिणा॥
तया भूतेन मन्त्रेण होमः कार्य्यो दिने दिने।
पीड़िते लज्जयाविष्टः सिद्धः स्याद्वाथ पोषयेत्॥
नित्यायास्त्रैपुरं वीजमाद्यन्ते तस्य योजयेत्।
गोक्षीरैर्मधुना लिख्य * विद्यां पाणौ विधारयेत्॥
पोषितोऽतो भवेत् सिद्धो नो चेत् कार्य्यस्य शोषणा।
द्वाभ्यां द्वाभ्याञ्च वीजाभ्यां मन्त्रैः कुर्य्याद्विदर्भणम्॥
एषा विद्या गले धार्य्या लिखित्वा वटभस्मना।
शोषितोऽपि न सिद्धश्चेद्दहनीयोऽग्निवीजतः॥

---

* अत्र लिखित्वा स्थाने लिखेत्यार्षं पदं बोध्यम्।

आग्नेयेन च वीजेन मन्त्रस्यैकैकमक्षरम् ।
आद्यन्तमध ऊर्द्धन्तु योजयेद्दाहकर्मणि ॥
ब्रह्मवृक्षस्य तैलेन मन्त्रमालिख्य धारयेत् ।
कण्ठदेशे ततो मन्त्रसिद्धिः स्याच्छङ्करोदितम् ।
इत्येवं सर्वमन्त्राणामुपायः शम्भुनोदितः ॥
इति श्रीसिद्धनागार्जुनविरचिते कक्षपुटे मन्त्रसाधनं नाम प्रथमः पटलः ।

सर्ववशीकरणम् ।

एकचित्तस्थितो मन्त्री मन्त्रं जप्त्वाऽयुतद्वयम् ।
ततः क्षोभयते लोकान् दर्शनादेव साधकः ॥ १ ॥
विदारीवटमूलन्तु जलेन सह घर्षयेत् ।
विभूत्या संयुतं मन्त्री तिलकं लोकवश्यकृत् ॥ २ ॥
पुष्ये पुनर्नवामूलं रुद्रदन्तीयमूलिका ।
यववीजं तथा बद्धा करे सप्ताभिमन्त्रितम् ।
पूज्यो भवति सर्वत्र मन्त्रमत्रैव कथ्यते ॥
"श्रीं ऐं पुरं क्षोभय भगवति ! गम्भीरय ब्लुं स्वाहा" ।
जप्त्वा सिद्धिमवाप्नोतीमम्मन्त्रमयुतद्वयम् ॥ ३ ॥
उद्भ्रान्तपत्रं मञ्जिष्ठां ककुभं तगरं समम् ।
स्नाने पाने तथा स्पर्शे दत्ते वश्यं भवत्यलम् ॥ ४ ॥
सिंहीमूलं हरेत् पुष्ये कट्यां बद्धा जगत्प्रियः ।
निशि कृष्णचतुर्दश्यां महानीलीं श्मशानतः ।
उद्धृत्य नरतैलेन अञ्जने लोकवश्यकृत् ॥ ५ ॥
तन्मूलं स्वस्य शुक्रेण अञ्जने लोकवश्यकृत् ।
तन्मूलं बन्धयेद्धस्ते सर्वलोकप्रियो भवेत् ॥ ६ ॥
चन्द्रपुष्ये समुद्धृत्य ब्रह्मदण्डीयमूलकम् ।
भोजयेत् सर्वसत्त्वानां वशीकरणमद्भुतम् ॥ ७ ॥

उलूकहृदयं तुल्यं कुमारीरोचनं सुधीः।
अञ्जनं लोचने वश्यमानयेद्भुवनत्रयम्।
"ओं नमो महायक्षिणि अमुकं मे वश्यमानय स्वाहा।"

मन्त्रस्य पूर्वं ह्ययुतं सुबोधः
जप्त्वैव शान्तासनशुद्धचित्तः।
उद्भ्रान्तपत्रादि सुयोगसङ्घान्
शताभिमन्त्रात्मफलान् करोति॥ ८॥

सर्वेषामेव मन्त्राणां मन्त्रध्यानं पृथक् पृथक्।
उक्तस्थाने यथासंख्यमनुक्ते त्वयुतं जपेत्॥ ९॥
मृगशीर्षे तु संग्राह्यं सुरक्तकरवीरकम्।
नवाङ्गुलं कीलकन्तु सप्तवाराभिमन्त्रितम्।
यस्य नाम्ना खनेद्भूमौ स वश्यो भवति ध्रुवम्।
"ओं ऐं स्वाहा" प्रथममयुतजपः॥ १०॥
अपामार्गस्य कीलन्तु मूलमुत्पाट्य त्र्यङ्गुलम्।
सप्ताभिमन्त्रितं यस्मिन् गृहे क्षिप्ते वशी भवेत्॥
"ओं मदनकामदेवाय फट् स्वाहा।"
शतमष्टोत्तरं जप्त्वा पूर्वमेवाभवन्नरः।
सिद्धो भवति तत्सत्यं तिलकं कुरुते वशम्॥ ११॥
स्वयम्भूकुसुमं वस्त्रे गृहीत्वा त्रिपथे दहेत्।
शनिर्भौमस्य वारे वा तद्भस्म तिलकं कृतम्।
वशं नयति राजानमन्यलोकेषु का कथा॥

"ओं नमो भैरवीतरे आज्ञाकाले कमलमुखे राजमोहने प्रजावशीकरणे स्त्रीपुरुषरञ्जनि लोकवश्यमोहनि! मे सोऽहं ओं गुरुप्रसादेन"॥ १२॥

रात्रौ कृष्णचतुर्दश्यां लाङ्गलीमूलमुद्धरेत्।
श्वेतच्छगलिकागर्भे शय्यायां नरतैलकम्।

क्षौद्रतालकसंयुक्तं तिलकं सर्ववश्यकृत् ॥ १३ ॥
अजमोदस्य मूलेन तुरगीगर्भशय्यया।
हरितालञ्च सम्पिष्य गुटिका मुखमध्यगा।
यद् यस्माद् याचते वस्तु तत्तदेव ददात्यसौ ॥

"ओं अस्मकर्णेश्वरि दुर्बले आइकेशिकजटाकलापे। ढक्कार फेत्कारिणि! स्वाहा" ॥ १४ ॥

वटपत्रं वह्निशिखातुल्यं स्याल्लोकवश्यकृत् ॥ *
विष्णुक्रान्तां भृङ्गराजं रोचनं सहदेविकाम्।
श्वेतापराजितामूलं कन्याहस्ते प्रलेपयेत्।
वारिणा तिलकं कुर्य्यात् सर्वलोकवशङ्करम् ॥ १५ ॥
रक्ताश्वमारपुष्पञ्च कुष्ठञ्च श्वेतसर्षपम्।
श्वेतार्कमूलं तगरं श्वेतगुञ्जाञ्च वारुणीम् ॥
पुष्ययुक्ताऽसिताष्टम्यां चतुर्दश्यां तथाविधम्।
पेषयेत् कन्यकाहस्ते † तिलकं सर्ववश्यकृत् ॥ १६ ॥
अपामार्गस्य मूलन्तु पेषयेद्रोचनेन तु।
ललाटे तिलकं कृत्वा वशीकुर्य्याज्जगत्त्रयम् ॥

"ओं नमो वरजालिनी सर्वलोकवशङ्करी स्वाहा"। अयं मन्त्र उक्तयोगानाम्। अष्टोत्तरसहस्रजपात् सिद्धिः ॥ १७ ॥

उलूकचक्षुरादाय गोरोचनसमन्वितम्।
वारिणा सह दातव्यं पानाद्वश्यकरं परम् ॥ १८ ॥
उलूकस्य तु कर्णौ द्वौ चटकस्य विलोचनम्।
तच्चूर्णं तिलके पाने भक्षणे गन्धपुष्पयोः।
क्षिपेद्वा मस्तके यस्य स वश्यो जायतेऽचिरात् ॥ १९ ॥

* अत्र अन्वये तिलकमिति योजनीयम्।

† कन्यकाहस्ते इत्यत्र कन्यकाहस्तेनेति पदम् अन्वये योज्यम्।

मांसं ग्राह्यमुलूकस्य कुङ्कुमागुरुचन्दनम्।
गोरोचनसमं पिष्टं भक्षे पाने जगद्वशम्।
स्त्रियो वा पुरुषो वाऽपि सहस्रजपनाद्भवेत्॥
"श्रों क्रीं क्रीं क्रः क्लः क्रेः फट् नमः" ॥ २० ॥
कृतोपवासो गृह्णीयात् समूलाञ्चेन्द्रवारुणीम्।
उत्तराभिमुखेनैव कुट्टयेत् तदुदूखले॥
तत्कल्कं त्रिकटुं तुल्यमजामूत्रेण पेषयेत्।
छायाशुष्कां वटीं कुर्य्यात् सा वटी रक्तचन्दनम्।
घृष्ट्वाऽथ स्वाङ्गुलीं लिप्त्वा तया स्पृष्टे जगद्वशम्॥ २१ ॥
सा वटी देवदारुञ्च तुल्यञ्च सितचन्दनम्।
जले घृष्ट्वा विलिप्याय दत्तं यस्य भवेद्वशः॥ २२ ॥
सा वटी रोचनं तुल्यं कृत्वा तोयेन पेषयेत्।
अनेन तिलकं कृत्वा सर्वत्र विजयी भवेत्॥
मन्त्रन्तु।—"श्रों नमः शची इन्द्राणी सर्ववशङ्करी सर्वार्थ-साधिनी स्वाहा"। अस्य सहस्रे जप्ते पूर्वयोगसिद्धिः॥ २३ ॥
कृष्णपक्षचतुर्दश्यामष्टम्यां वा उपोषितः।
बलिं दत्त्वा समुद्धृत्य सहदेवीं सुचूर्णयेत्।
ताम्बूलेन तु तच्चूर्णं योज्यं वश्यकरं परम्॥ २४ ॥
रोचना सहदेवीभ्यां तिलको वश्यकारकः।
मनःशिला च तन्मूलमञ्जयेत् सर्ववश्यकृत्॥ २५ ॥
ताम्बूलान्तस्थ सप्ताहं सहदेवीं प्रयोजयेत्।
राजा वशमवाप्नोति सर्वलोकेषु का कथा॥ २६ ॥
शिरसा धारयेत्तच्च चूर्णं सर्वत्र वश्यकृत्।
मुखे क्षिप्त्वाऽथ तन्मूलं कण्ठ्यां बद्ध्वा च कामयेत्।
या नारी सा भवेद्वश्या मन्त्रयोगेन नान्यथा॥
मन्त्रस्तु।—"श्रों नमो भगवति मातङ्गेश्वरि सर्वमुखरञ्जनि

सर्वेषां महामाये मातङ्गिकुमारिके ! लेपे लघु लघु वशं कुरु कुरु स्वाहा"। सहस्रजप्ते उक्तयोगानां सिद्धिः॥ २७॥

सुनिर्वातचिताऽङ्गारं शृगालरुधिरैः सह।
यस्यैव शिरसि क्षिप्तं स वश्यो भवति ध्रुवम्॥ २८॥
शिखिपित्तञ्च गोरम्भा मोहिनी रोचनी शिखा।
पेषयेत् कन्यकाहस्तैः स्पर्शे पाने जगद्वशम्॥ २९॥
श्वेतापराजितामूलं चन्द्रग्रहण उद्धृतम्।
अञ्जिताक्षो नरस्तेन त्रिलोकीलोकवश्यकृत्॥ ३०॥
मेघनादस्य मूलन्तु वक्त्रस्थं वश्यकारकम्।
परवादी भवेन्मूकोऽथवा याति दिगन्तरम्॥ ३१॥
ग्राह्यं कृष्णचतुर्दश्यां श्वेतगुञ्जीयमूलकम्।
ताम्बूलेन प्रदातव्यं सर्वलोकवशङ्करम्॥ ३२॥
शिलारोचनतन्मूलं वारिणा तिलके कृते।
सम्भाषणेन सर्वेषां वशीकरणमुत्तमम्॥ ३३॥
स्वर्णवेष्टिततन्मूलं समुद्रं कारयेद्बुधः।
तद्वाक्याद्वशमायाति प्राणैरपि धनैरपि॥ ३४॥
चर्वयित्वा तु तन्मूलं तेनैव तिलकं कृतम्।
दृष्टमात्रे वशं याति नारी वा पुरुषोऽपि वा॥

मन्त्रस्तु।—"ओं वज्रकिरणे शिवे रक्ष रक्ष भगवति ममादि अमृतं कुरु कुरु स्वाहा"। उक्तयोगानां सहस्रजपे सिद्धिः॥ ३५॥

कृतोपवासो मन्त्री तु पुष्ये कृष्णाष्टमीयुते।
पुष्पधूपबलिं दत्त्वा घृतेनैव तु दीपयेत्।
दत्त्वा मन्त्रं जपेत्तत्र अष्टाधिकसहस्रकम्॥

अत्र मन्त्रः।—"ओं श्वेतवर्णे सितपर्वतवासिनि अप्रतिहते मम कार्य्यं कुरु कुरु ठः ठः स्वाहा"।

श्वेतगुञ्जाफलं ग्राह्यं तत् स्थानात् मृत्तिकायुतम्।

घृतेन लेपयेत् सर्वं नवपात्रे तु शोभने ॥
क्षिप्त्वा कृष्णचतुर्दश्यामष्टम्यां भुवि विक्षिपेत्।
समन्त्रेणोदकेनैव सिञ्चेन्नित्यं फलावधि ॥

अत्र मन्त्रः।—"ओं श्वेतवर्णे सितवासिनि श्वेतपर्वतनिवासिनि सर्वकार्य्याणि कुरु कुरु अप्रतिहिते नमो नमः स्वाहा"।

इति सेचनमन्त्रः।

पुनः पुष्ये शुचिर्भूत्वा सोपवासो जितेन्द्रियः।
धूपदीपोपहाराद्यैर्न्यासं कृत्वा समुद्धरेत् ॥

मन्त्रस्तु।—ओं श्वेते हृदयाय नमः। ओं पद्ममुखे शिरसे स्वाहा। ओं नमः सर्वज्ञानमये शिखायै वषट्। ओं नमः सर्वशक्तिमत्यै कवचाय हुं। ओं नमः नेत्रत्रयाय वौषट्। ओं परमन्त्रभेदने अस्त्राय फट्। सर्वाण्यङ्गानि नमोऽन्तादीनि। इति न्यासं कृत्वा ततो मूलमन्त्रेणोत्पाटयेत्। "ओं नमो भगवति क्लीं श्वेतवासे नमो नमः स्वाहा"।

अस्य च मूलमन्त्रस्य पूर्वमेवायुतं जपेत्।
दशांशं हवनं कुर्य्यात् तिलदूर्वाघृतप्लुतम् ॥
एवं कृत्वा समुद्धृत्य गुञ्जामूलं सुसिद्धिदम्।
तन्मूलं चन्दनं श्वेतं लेपः स्याद्वश्यकारकः।
तन्मूलं मधुना युक्तं लेपः सर्वत्र वश्यकृत् ॥ ३६ ॥
मनःशिलाञ्च तन्मूलं वारिणा श्वेतचन्दनम्।
घृष्ट्वा तत्तिलकं कुर्य्यात् सर्वलोकवशङ्करम् ॥ ३७ ॥
तन्मूलं सर्षपं श्वेतं प्रियङ्गुञ्च समं समम्।
चूर्णितं मस्तके यस्य क्षिपेत् तद्वश्यकृद्भवेत् ॥

मन्त्रस्तु।—"ओं नमः श्वेतगात्रे सर्वलोकवशङ्करि दुष्टान् वशं कुरु कुरु मे वशमानय स्वाहा"। उक्तयोगानामष्टोत्तरशतजप्ते सिद्धिः ॥ ३८ ॥

वासामूलं प्रियङ्गुश्च कुष्ठैले नागकेशरम्।

श्वेतसर्षपसंयुक्तो धूपः सर्व्ववशङ्करः ॥

"ओं कामिनि माधाव नमः" । अनेन धूपमभिमन्त्रयेत् । अथानेन मन्त्रेण शतमभिमन्त्रितं पुष्पं यस्य दीयते, यस्य च नाम्ना नित्यं सप्तग्रासमन्नं भुज्यते, सप्तदिनेन स वश्यो भवति । मन्त्रस्तु।—"ओं कटंकटे घोररूपिणि ! ठः ठः" । अस्य मन्त्रस्य उक्तसिद्धस्य * पूर्व्वमन्त्रवत् ॥ ३९ ॥

"ओं घण्टाकर्णाय नमः" । अस्य पूर्व्वमेवायुतं जप्वा ततोऽनेन मन्त्रेण पाषाणं सप्ताभिमन्त्रितं कृत्वा पत्तने वा ग्रामे क्षिपेत्, वा तेन पाषाणेन वृक्षं ताड़येत् । ग्राममध्ये अप्रार्थितं सुखभोगं प्राप्नोति ॥ ४० ॥

कन्दवाधो जपेल्लक्षद्वयं मन्त्रस्य साधकः ।
घृताक्तैर्गुग्गुलैर्होमैर्देवी सौभाग्यदायिनी ।
त्रैलोक्यं वशमायाति स्पृष्टमात्रे न संशयः ॥

"क्लीं जनके स्वाहा" ॥ ४१ ॥

यक्षमन्त्रेण संताड्यः सप्तधा चौरभूरुहः ।
तत्काष्ठञ्चैव संग्राह्यमेकविंशतिमन्त्रितम् ।
धारयेद्दक्षिणे कर्णे अन्नमप्रार्थितं लभेत् ॥

"ओं महायक्षसेनाऽधिपतये माणिभद्राय अप्रार्थितमन्नं देहि मे देहि स्वाहा" ॥ ४२ ॥

अश्वत्थवृक्षमारूढ़ः पूर्व्वमेवायुतं जपेत् ।
करवीरकपुष्पञ्च सप्तमन्त्राभिमन्त्रितम् ।
तत्पुष्पं दीयते यस्य स वश्यस्तत्क्षणाद्भवेत् ॥

"ओं नमो भगवते रुद्राय सिद्धरूपिणे शिखिबन्ध सर्व्वेषां शिवमस्तु शिवमस्तु हन हन रक्ष रक्ष सर्वभूतेभ्यश्च नमः" ॥४३॥

* उक्तसिद्धस्येत्यतः परं अन्वये प्रयोगः योज्यः ।

वासो पिधाय कौसुम्भं रात्रौ मन्त्रायुतं जपेत्।
नरनारीनरेन्द्राणां सततं क्षोभकारकः॥

"ओं नमो भूतनाथाय यं भूपालं वशं कुरु कुरु भुवनक्षोभक सर्व्वलोकान् क्षोभय क्षोभय स्फें व्लीं व्लीं लुं स्वाहा"॥ ४४॥

रात्रौ दशसहस्राणि जप्तव्यं पद्मकेशरैः।
सितामधुपयो मिश्रैः कृतहोमो दशांशतः।
रञ्जकश्चेष्टते लोकान् दर्शनात् तृप्तिकारकः॥

"ओं ऐं अमुकं रञ्जय क्लीं स्वाहा"॥ ४५॥

भुक्तोच्छिष्टो जपेन्मन्त्री पूर्व्वमेवायुतं ततः।
एकान्ते स्मरणान्मन्त्री तत्रैवायाति भोजनम्॥

"ओं उच्छिष्टचाण्डालि वाग्वादिनि राजमोहनि प्रजामोहनि स्त्रीमोहनि आन् आन् वे वे वायु वायु उच्छिष्टचाण्डालि सत्यवादिनि की शक्ति फुरै"॥ ४६॥

मन्त्रलक्षमिदं जप्त्वा भूतनाथः प्रसाध्यते।
खं भूपातालभूतानि वशानि कुरुते स्मरन्॥

"ओं नमो भूतनाथाय समस्तभुवनभूतानि साधय हुं"॥ ४७॥

इति श्रीसिद्धनागार्जुनविरचिते कक्षपुटे सर्व्ववशीकरणं नाम द्वितीयः पटलः।

अथ राजवश्यमाह।

कुङ्कुमं चन्दनञ्चैव रोचनं शशिमिश्रितम्।
गवां क्षीरेण तिलकं राजवश्यकरं परम्॥

"ओं क्लीं सः अमुकं मे वशं कुरु कुरु स्वाहा"॥ पूर्व्वमेव सहस्रं जप्त्वा ततोऽनेन मन्त्रेण सप्ताभिमन्त्रितपूर्व्वं तिलकं कुर्य्यात्॥ १॥

चक्रमर्दस्य मूलन्तु हस्तर्क्षे हि समुद्धरेत्।
राजद्वारे भवेत् पूज्यो हस्ते बद्धा च वादजित्॥
"ओं सुदर्शनाय हुं फट् स्वाहा" पूर्व्वमेव सहस्रजपे सिद्धिः ॥२॥
पूर्वमेवायुतं जप्ता चण्डमन्त्रस्य सिद्धये।
ततो ह्यौषधयोगाय कुरु सप्ताभिमन्त्रितम्।
सिध्यन्ति सर्वकर्माणि पूर्वमेव प्रभावतः॥
"ओं क्लीं रक्तचामुण्डे कुरु कुरु अमुकं मे वशमानय स्वाहा"।
अयं चण्डमन्त्रः सर्व्वसिद्धौ भवति ॥ ३ ॥
मञ्जिष्ठा कुङ्कुमञ्चैव अजमोदा कुमारिका।
चितिभस्म स्वरक्तञ्च मारयेत् स्वीयरेतसा॥
पुष्ये च वटिकां कृत्वा भक्ष्ये पाने च दापयेत्।
स्पृष्टे वा राजवश्यं स्याच्चण्डमन्त्रप्रभावतः ॥ ४ ॥
श्वेतापराजितामूलं चन्द्रग्रहण उद्धृतम्।
प्रभूणां भोजने देयं चण्डमन्त्राद्वशङ्करम् ॥ ५ ॥
उत्तरायां समादाय प्रातरश्वत्थवन्धकम्।
करे बद्धं तु सर्व्वत्र राजद्वारे जयावहम् ॥ ६ ॥
धात्रीवन्धं भरण्यान्तु विशाखामाम्रवन्धकम्।
पूर्व्वफल्गुनीनक्षत्रे ग्राह्यं दाड़िम्बवन्धकम्।
करे बद्धा भवेद्वश्यो यदि राजा पुरन्दरः * ॥ ७ ॥
अश्लेषायां गृहीत्वा तु नागकेशरवन्धकम्।
करे बद्धा भवेद्वश्यो यो राजा पृथिवीपतिः ॥ ८ ॥
निघृष्याङ्कोलतैलेन रक्तमण्डलमूलकम्।
सप्ताभिमन्त्रितं कृत्वा तिलकं राजवश्यकृत्।
उक्तयोगानां चण्डमन्त्रेण सिद्धिः ॥ ९ ॥

---

* इतोऽग्रतश्चास्मिंश्च प्रयोगद्वये "करे बद्धा" इति पदात्परं वर्त्तमानस्येतिपदम् अन्वये योजनीयम्।

होमयेत् कटुतैलेन रक्तचन्दनराजिकाम्।
सहस्राहुतिमात्रेण राजानं वशमानयेत्॥ १०॥
सर्षपं छागरक्तेन हुत्वा रात्रौ स्वके गृहे।
सङ्ख्या च पूर्व्ववद्वश्यो राजा भवति नान्यथा॥ ११॥
मधुना तस्य पुष्पन्तु रात्रौ हुत्वा च पूर्व्ववत्।
चक्रवर्त्ती भवेद्वश्यश्चण्डमन्त्रप्रभावतः॥ १२॥

अथ परवादिजयः।

गोजिह्वा शिखिमूलं वा मुखे शिरसि संस्थितम्।
कुरुते सर्व्ववादेषु जयं पुष्ये समुद्धृताम्॥ १॥
मार्गशीर्षे तु पूर्णायां शिखिमूलं समुद्धरेत्।
बाह्यौ शिरसि वा धार्य्यं विवादे विजयो भवेत्।
बन्धनान्मुच्यते तस्मिन् शिखाबद्धे न संशयः॥ २॥
मेघनादस्य मूलन्तु वक्त्रस्थं तारवेष्टितम्।
परवादी भवेन्मूकोऽथवा याति दिगन्तरम्॥ ३॥
निशि कृष्णचतुर्दश्यां महानीलीं श्मशानतः।
आदाय बन्धयेद्धस्ते विवादे विजयो भवेत्।
श्वेतगुञ्जान्वितं मूलं मुखस्थं दुष्टतुण्डजित्।
उक्तयोगानां चण्डमन्त्रेण सिद्धिः॥ ४॥

त्रिसन्ध्यं त्रिदिनं न्यस्तं यस्य मूर्ध्नि करस्थितम्।
भस्मचेटकनामाख्यं स जयं लभते नरः।
"ओं नमो भस्मि जय धूलि धूसरि अर रणि जय वाग्ध्यं यन्तु स्वाहा"॥ ५॥

अथ दुष्टदमनप्रयोगः।

शुक्लपक्षयुते पुष्ये गुञ्जामूलं समुद्धरेत्।
बद्धं शिरसि शय्यायां चौरबाधाहरं परम्॥ १॥
धात्रयन्तु ब्रध्नकं ग्राह्यमश्लेषायां प्रयत्नतः।

हस्ते बद्धं भयं हन्ति चौरव्याघ्रादिराजकम्॥ २॥
आर्द्रायामाहृतं वंशब्रध्नकं कर्णधारितम्।
विजयं प्रापयेद् युद्धे शत्रुमध्ये न संशयः॥ ३॥
अङ्कोलतैलसम्भिन्नं कुर्य्यादाम्रातचूर्णकम्।
अनेन स्पृष्टमात्रेण महाहस्ती वशो भवेत्॥ ४॥
गृहीत्वा हस्तनक्षत्रे चूर्णयेत्तु छुछुन्दरीम्।
तल्लेपेन गजा यान्ति दूरतो नतसम्मुखाः॥ ५॥
विल्वपुष्पस्य चूर्णन्तु छुछुन्दर्य्याश्च तत्समम्।
तल्लिप्ताङ्गं नरं दृष्ट्वा दूरे गच्छन्ति कुञ्जराः॥ ६॥
मूलं मर्कटवल्याश्च बाहौ बद्धञ्च मूर्द्धनि।
दुष्टदन्तिभयं न स्याद् युद्धादिभयनाशनम्॥ ७॥
श्वेतापराजितामूलं हस्तस्थं वारयेद् गजान्।
श्वेतं बृहतिमूलञ्च हस्तस्थं व्याघ्रभीतिनुत्॥ ८॥

इति श्रीसिद्धनागार्जुनविरचिते कक्षपुटे राजवशीकरणादि तृतीयः पटलः।

अथ स्त्रीवश्यमाह।

पारावतस्य हृच्चक्षुः स्वरक्तं रोचनं तथा।
जिह्वामलसमायुक्तमञ्जने स्त्री वशीभवेत्॥ १॥
रोचनं चितिभस्मापि नरतैलं स्वशुक्रकम्।
पिष्टे पिष्ट्वा प्रदातव्यं सद्यो वश्याः परस्त्रियः॥ २॥
चितिभस्म वसा कुष्ठं तगरं कुङ्कुमं समम्।
चूर्णं स्त्रीशिरसि क्षिप्त्वा पुरुषस्य तु पादयोः।
स्वदासदासतां याति यावज्जीवं न संशयः॥ ३॥
उन्मत्तं मातुलुङ्गञ्च स्वरक्तं मलपञ्चकम्।
चेटिका हृदयञ्चैव भक्षे पाने स्त्रियो वशाः॥ ४॥

त्रिंशत् चणकबीजानि षोड़शेन्द्रयवास्तथा।
गोदन्तं नरदन्तञ्च पिष्ट्वा तैलेन लेपयेत्।
ललाटे तिलकं कृत्वा वशीकुर्य्यात् तिलोत्तमाम्॥ ५॥
टङ्कणं मधुयष्टी च रोचनं चितिभस्म च।
काकजिह्वासमं चौद्रं तिलके स्त्री वशीभवेत्॥ ६॥
पुष्ये पुष्पञ्च संग्राह्यं भरण्यान्तु फलं तथा।
शाखाञ्चैव विशाखायां हस्ते पत्रं तथैव च॥
मूले मूलं समुद्धृत्य कृष्णोन्मत्तस्य च क्रमात्।
पिष्ट्वा कर्पूरसंयुक्तं कुङ्कुमं रोचनं समम्।
तिलके स्त्री वशं याति यदि साक्षादरुन्धती॥ ७॥
काकजङ्घां वचां कुष्ठं बिल्वपत्रञ्च कुङ्कुमम्।
स्वरक्तसंयुतं भाले तिलकं दारवश्यकृत्॥ ८॥
काकजङ्घां वचां कुष्ठं शुक्रशोणितसंयुतम्।
श्मशाने रोदिति सदा बाला दत्तोक्तभोजना॥ ९॥
कलविङ्कशिरस्तुल्यं श्वेतार्कस्य च मूलकम्।
मञ्जिष्ठा खदिरं पाने दत्ते कान्तां वशं नयेत्॥ १०॥
सर्पत्वग्बीजपूरञ्च तैलमेरण्डजं समम्।
योषितां मोहकृद्रूपो रतिकाले प्रयोजयेत्॥ ११॥
अश्विन्यां ग्राहयेद्धीमान् पलाशस्य च ब्रध्नकम्।
करे बद्ध्वा भजेद् यान्तु नायिका वशगा भवेत्॥ १२॥
ओडुम्बरस्य ब्रध्नन्तु मृगशीर्षे समाहरेत्।
हस्ते बद्ध्वा स्पृशेत् कन्यां सा वश्या भवति क्षणात्॥ १३॥
शिरीषस्य धनिष्ठायां ब्रध्नमादाय बन्धयेत्।
करे वा धातकीब्रध्नं स्वातौ रामां वशं नयेत्॥ १४॥
अश्विन्यां ग्राहयेद्धीमान् पलाशस्य च ब्रध्नकम्।
करे बद्ध्वा स्पृशेद् यान्तु नायिका सा वशा भवेत्॥ १५॥

रेवत्यां वटशृङ्गञ्च हस्ते बद्धा वशं नयेत्।
मूले वा बदरीब्रध्नं भोजने स्त्री वशा भवेत्॥ १६॥
स्वर्णे तारपुष्पमूलं घृष्ट्वा स्पृष्टे * स्त्रियो वशाः।
एतान् सर्व्वप्रयोगांश्च चण्डमन्त्रेण योजयेत्।
शतमष्टोत्तरं जप्त्वा ततः सिद्धो भवत्यलम्॥ १७॥
मार्गशीर्षे तु पूर्णायां शिखिमूलं समुद्धरेत्।
मन्त्रेण † दापयेत् स्त्रीणां खाद्येष्वासां वशङ्करम्॥१८॥
श्वेतगुञ्जाभवं मन्त्रे मूलं पञ्चमलान्वितम्।
भक्ष्ये पाने च दातव्यं वश्ये वामावशङ्करम्॥ १९॥
प्रातः स्वदन्तं प्रक्षाल्य सप्तवाराभिमन्त्रितम्।
यस्य नाम्ना पिबेत्तोयं सा वामा वशगा भवेत्।

"श्रीं नमः क्षिप्रं कामिनीं अमुकीं मे वशमानय हुं फट् स्वाहा"॥ २०॥

अन्योऽन्यं मेलयेल्लिङ्गं या नारी वीक्षते चिरम्।
हकारान्तं जपेत्तावत् सा नारी वशगा भवेत्॥
नागपुष्पं प्रियङ्गुञ्च तगरं पद्मकेशरम्।
वचां मांसीं समानीय चूर्णयेन्मन्त्रवित्तमः।
स्वाङ्गन्तु धूपयेत्तेन भजन्ते कामवत् स्त्रियः।

"श्रीं मूलि मूलि महामूलि! रक्ष रक्ष सर्व्वासां चेत्रेभ्यः परेभ्यः स्वाहा"॥ २१॥

जिह्वामलं दन्तमलं नासाकर्णमलं तथा।
सुरापाने प्रदातव्यं वशीकरणमद्भुतम्।

"श्रीं नमः सवायै नमः सवान्यै च अमुकीं मे वशमानय स्वाहा"॥ २२॥

---

* अवान्वयशीजनायां पृष्ठे प्रदातव्यम् एवं बोध्यम्।

† मन्त्रेण चण्डमन्त्रेण।

वाग्वालकस्य मन्त्रेण पुष्पं सप्ताभिमन्त्रितम्।
फलं वा दीयतेऽवश्यं सम्यग्वश्यकरं परम्॥
"ओं नमो वाचाट पथ पथ हिटि द्रावहि स्वाहा"॥ २३॥
अपामार्गस्य मध्ये तु चतुरङ्गुलकीलकम्।
सप्ताभिमन्त्रितं ग्राह्यं क्षिपेद्वेश्यागृहे वशा।
"ओं द्राविणी स्वाहा" "ओं हमिले स्वाहा"॥ २४॥
उलूकनेत्रमांसञ्च चन्दनञ्चैव रोचनम्।
कुङ्कुमं मत्स्यतैलञ्च देहाभ्यङ्गाद्वशाः स्त्रियः॥
"ओं क्रीं क्रीं प्लं प्लं फट् नमः"॥ २५॥
विधिना कृकलासस्य पादं संगृह्य दक्षिणम्।
संवेष्ट्य रतिकाले तु मुखस्थे नायिका वशाः॥
तस्यैव वामनेत्रेण मधुतैलेन चाञ्जयेत्।
यां पश्यति नरो मत्ता वामा सा तत्क्षणाद्वशा॥
"ओं आनन्द ब्रह्मा स्वाहा" "ओं क्रीं क्लीं प्लां कालि
पालि! स्वाहा"॥ २६॥
तस्यैव दक्षनेत्रञ्च सौवीरं मधुना सह।
अञ्जिताक्षस्य सा वश्या या स्त्री रूपातिगर्विता॥
"ओं पूजिताय स्वाहा"॥ २७॥
त्रिसन्ध्यन्तु जपेन्मन्त्रं मन्मथस्य शतं शतम्।
सन्मन्त्रात् कामिनी मासान्मोहयत्येव दर्शनात्॥
"ओं नमः कामदेवाय सहकल सहदश सहयम सहालिमे
ङ्गे धुनन जनं मम दर्शनम् उत्कण्ठितं कुरु कुरु दक्षदण्डधर
कुसुमं बाणेन हन हन स्वाहा"॥ २८॥
कामाक्रान्तेन चित्तेन नाम्ना मन्त्रं जपेन्निशि।
अवश्यं कुरुते वश्यं प्रसन्नो विश्वचेटकः॥
"ओं सहवल्लीं वल्लीं करवल्लीं कामपिशाच अमुकीं कामं

ग्राहय स्वप्नेन मम रूपेण नखैर्विदारय द्रावय स्वेदेन बन्ध स्त्री फट् ॥ २९ ॥

चण्डमन्त्रेण होमानि वश्यार्थे कारयेत् सुधीः ।
पूर्वमेवायुते जप्ते सिद्धिः स्याद्वश्यकारकः ॥ ३० ॥
लवणं तिलसंयुक्तं चीरमध्वाज्यसंयुतम् ।
सप्ताहाद्रूपहीनोऽपि वशीकुर्य्यात्तिलोत्तमाम् ॥ ३१ ॥
राजिका लवणं चीरमध्वाज्यैर्मिश्रितं हुतम् ।
सप्ताहेन वशं याति या रामा रूपगर्विता ॥ ३२ ॥
अष्टोत्तरशतं काष्ठमेरण्डं चतुरङ्गुलम् ।
लवणं कटुतैलञ्च त्रिभिरेकत्र होमयेत् ।
अष्टोत्तरशतं जुह्वन् यन्नाम्ना सा वशा भवेत् ॥ ३३ ॥
महानिम्बस्य पुष्पाणि घृतेन सह होमयेत् ।
सप्तरात्रे वशं याति यदि रामा मनोरमा ॥

मन्त्रस्तु ।—"ओं क्रीं रक्तचामुण्डे तुरु तुरु अमुकीं मे वशमानय स्वाहा" ॥ ३४ ॥

गोमुण्डत्रितये चुल्लीं कृत्वा पश्चान्नृमुण्डके ।
पात्रे शालीन्तु तन्नाजांश्चूर्णयेत्तद्बहिर्गतान् ॥
पात्रस्थन्तु पृथक् चूर्णं मूर्द्ध्नि चिप्ते वशाः स्त्रियः ।
अन्तर्गतेन चूर्णेन चिप्तं वश्यं निवर्त्तते ।
सिद्धियोगो ह्यसंख्यातो विना मन्त्रेण सिद्धिदः ॥ ३५ ॥
गर्दभस्य शिरो मज्जां पूरयेन्नरपात्रके ।
भृङ्गराजरसैर्भाव्या वर्त्तिः कार्पाससम्भवा ॥
सप्तवारन्तु सा शुष्का मज्जा पात्रे प्रदीयते ।
कज्जलं नरपात्रे तु शनिवारे समुद्धरेत् ।
तेनाञ्जयेद्वशीकुर्य्यात् कामिनीन्तु विलोकनात् ॥ ३६ ॥
शिला तालं स्ववीर्य्यञ्च अङ्कोलतैलमिश्रितम् ।

गजगण्डमदोन्मिश्रं तिलकं स्त्रीवशङ्करम् ॥ ३७ ॥
मनःशिला प्रियङ्गुश्च नागकेशररोचनम्।
अञ्जिताक्षो नरो रामां वशीकुर्य्यान्मनोरमाम् ॥ ३८ ॥
प्रियङ्गुश्च वचा पत्रं रोचनाऽञ्जनचन्दनम्।
अञ्जिताक्षो नरो रामां दृष्ट्वा मोहयति ध्रुवम् ॥ ३९ ॥
सोमराजी रवेर्मूलं मूलं वा चक्रमर्दजम्।
कटिस्थं नरनार्य्यो र्वा परस्परवशङ्करम् ॥ ४० ॥
कृष्णाष्टम्यां चतुर्दश्यां पीतधुस्तूरमूलकम्।
हेमतारं पुटं कुष्ठं देवदारु समं समम्।
चूर्णं स्त्रीणां शिरःक्षिप्तं पुंसो वाऽथ वशङ्करम् ॥ ४१ ॥
जलेन सह घृष्ट्वा तु सौधामलकमञ्जयेत्।
तिलके वा कृते वश्यं कुर्य्यात् स्त्रीमण्डलं क्षणात् ॥४२॥
इन्द्रवारुणिकामूलं पुष्ये नग्नः समुद्धरेत्।
कटुत्रयैर्गवां क्षीरैः पिष्ट्वा तद्वटकीकृतम्।
चन्दनेन समायुक्तं तिलकं स्त्रीवशङ्करम् ॥ ४३ ॥
वर्बूरबन्धकं स्वात्यां वदर्य्यास्त्वनुराधया *।
बध्नं वा धारयेद्धस्ते पृथक् स्त्रीवश्यकारकौ ॥ ४४ ॥
ऊर्द्ध्वपुष्पी अधःपुष्पी लज्जालुगिरिकर्णिके।
सप्ताहं भावयेच्छुक्रे पञ्चाङ्गमलसंयुते।
खाने पाने प्रदातव्यं नारीवश्यकरं परम् ॥ ४५ ॥
शुक्लपक्षयुते पुष्ये संग्राह्यं रतिसङ्गमे।
योनिस्थमुभयोर्वीर्य्यं यत्नतो वामपाणिना।
तेन स्पृष्टाः स्त्रियो वश्या वामपाणितले किल।
कृष्णपक्षयुते पुष्ये पूर्ववत् स्त्रीवशा भवेत् ॥ ४६ ॥

* अत्र क्रमभङ्गस्त्वार्षः छन्दोनुरोधात्, अन्वये तु अनुराधायां ज्ञेयम्।

वचा श्वेतार्कलाङ्गल्यौ लज्जालो विषमुष्टिका।
तुल्यं तुल्यं प्रचूर्ण्याथ सूक्ष्मं स्नानपयःस्नुतम्॥
धुस्तूरफलमध्यस्थमेकीकृत्य प्रयोजयेत्।
कामबाणमिदं ख्यातं भोजने स्त्रीवशङ्करम्॥
उक्तानां सर्वयोगाणां चण्डमन्त्रेण मन्त्रणम्।
सिध्यन्ति नात्र सन्देहः पूर्वमेवायुते किल॥ ४७॥
पानीयस्याञ्जलीन् सप्त दत्त्वा विद्यामिमां जपेत्।
सालङ्कारां नरः कन्यां लभते माससात्रतः।

मन्त्रस्तु।—"ओं विश्वावसुर्नाम गन्धर्वः कन्यकानामधिपति सुरूपां सालङ्कारां देहि मे नमस्तस्मै विश्वावसवे स्वाहा"॥४८

सुषेणं लाङ्गलीकन्दं मधुपिष्टं विलेपयेत्।
नाभौ योनौ च कन्याया बाला भवति कामिनी॥
"ओं द्राविकासय स्वाहा"॥ ४६॥

अथ द्रावणम्।

अर्कमूलं सकर्पूरं हरिद्रा कनकं मधु।
मेषीपित्तेन लेपोऽयं लिङ्गे स्त्रीद्रावकारकः॥ १॥
कर्पूरोन्मत्तमूलं वाऽलक्तकं नृकपालके।
घृष्ट्वा समधुलेपोऽयं लिङ्गे स्त्रीद्रावकारकः॥ २॥
शैवालपुष्पं कर्पूरं मुण्डिपुष्पञ्च पेषितम्।
लिङ्गलेपे वशं यान्ति द्रवन्ति रतिसङ्गमे॥ ३॥
कपिलिङ्गं समानीय कर्पूरं कनकं मधु।
गृध्रविष्ठा नरस्यास्थि घृष्ट्वा लिङ्गे प्रलेपयेत्।
एष हालाहलो योगो द्रावको वश्यकृत् स्त्रियः॥ ४॥
शैवालं मालतीपुष्पं मुण्डीपुष्पं समं मधु।
लिङ्गलेपात् स्त्रियो वश्या द्रावणं भवति ध्रुवम्॥ ५॥
टङ्कणं मधु कर्पूरं पारदं मर्दयेत् समम्।

तेन लेपः परं लिङ्गे वश्यकृद्वरयोषिताम् ॥ ६ ॥
वृहतीफलमूलानि पिप्पलीमरिचानि च।
मधुरोचनया सार्द्धं लिङ्गलेपोऽतिवश्यकृत् ॥ ७ ॥
नराजोलूकगृध्राणां सममस्थीनि पेषयेत्।
स्वशुक्रेण सहालेपो लिङ्गे स्त्रीद्रावकारकः ॥ ८ ॥
श्वेतार्कचन्दनालेपो लिङ्गे स्यात् पूर्ववत् फलम्।
विष्ठालेपश्च गुल्यश्च लिङ्गे स्त्रीद्रावकारकः ॥ ९ ॥
क्षौद्रगन्धकलेपेन शिलायुक्तेन तत्फलम्।
शशिटङ्कणपिप्पल्यः सूरणं मदनं फलम्।
मातुलुङ्गफलैः पिष्टं लिङ्गलेपे स्त्रियो वशाः ॥ १० ॥
मल्लीकाद्रवकर्पूरमधुलेपे च यत् फलम्।
पक्वविल्वफलैर्द्रावैर्र्द्धसूतञ्च टङ्कणम्।
रक्तकङ्गुप्रसूनञ्च लिङ्गलेपेन वश्यकृत् ॥ ११ ॥
जातीकुसुमपत्राणि मञ्जिष्ठा श्वेतसर्षपाः।
आलेपो ध्वजदण्डे तु रात्रौ स्त्रीद्राववश्यकृत् ॥ १२ ॥
शिलाकाशीशतारैश्च कुङ्कुमक्षौद्रलेपनात्।
सौभाग्यगर्विता वामा सङ्गे भवति किङ्करी ॥ १३ ॥
कर्पूरं टङ्कणं सूतं पिप्पल्युन्मत्तवीजकं।
मल्लीकाञ्चनपत्राणां रसं क्षौद्रञ्च पूरयेत् ॥
लिङ्गलेपे कृते वामा रात्रौ भवति किङ्करी।
पञ्चगन्धं चतुःसूतं नवटङ्कणमानयेत् ॥

मन्त्रस्तु।—"ओं कं दं लं वें क्रीं रसाधिका स्रवतु अमुकीं
तिकाले देवदूर्णीं स्वाहा" ॥ १४ ॥

सूतटङ्कणकर्पूरकनकं मूलिपत्रकम्।
घृतेन लिङ्गलेपोऽयं कामिनी दर्पनाशनः ॥ १५ ॥
उपहाय पशोः रक्तं गृह्णीयादन्तरीक्षतः।

तच्छुष्कं चूर्णितं स्थाप्यं पुष्पे रक्ताश्वमारजे ॥
तत्पुष्पं धारयेद्धस्ते तर्जन्यङ्गुष्ठयोगतः।
आवर्त्त्य स्वमुखं स्त्रीणां दृष्टमात्रे द्रवन्ति ताः ॥
कृष्णगर्दभलिङ्गस्य शलाकां मध्यतः क्षिपेत्।
तामानीय विशोध्याऽथ तां हि मध्यत उद्धरेत् ॥
तच्छिद्रे निक्षिपेत् सूतं कर्षमात्रन्तु रञ्जयेत्।
वह्निर्विचित्रयेल्लेपैर्लाक्षादिं गुणकादिभिः ॥
ऊर्द्धाग्रं धारयेद्धस्ते कामिनीनाञ्च सन्निधौ।
कृतं त्वधोमुखे तस्मिन् दृष्टमात्रे द्रवन्ति ताः ॥ १६ ॥
जम्बीरमूलमध्ये तु सूतं वृश्चिककण्टकम्।
क्षिप्त्वा रुद्ध्वा स्त्रियै दद्याद् घ्राणमात्रे द्रवत्यलम् ॥ १७ ॥
आहारे वामजङ्घा च टिट्टिभस्य तु पक्षिणः।
तन्मध्ये निक्षिपेद्भूर्जपत्रं कुङ्कुमलेखितम्।
रक्ताश्वमारपुष्पे वा मुखं तस्य निरोधयेत्।
कर्णोपरि स्थितं तच्च दृष्ट्वा स्त्री द्रवति ध्रुवम् ॥ १८ ॥
जलेन लाङ्गलीकन्दं घृष्ट्वा हस्तं प्रलेपयेत्।
हस्ते स्त्रियः करस्पृष्टे द्रवत्यग्नौ घृतं यथा ॥ १९ ॥
सर्वेषां द्रावयोगाणां मन्त्रराजं शिवोदितम्।
अष्टोत्तरशतं जप्त्वा तत्तद् योगस्य सिद्धये ॥

"ओं नमो भगवते उड्डामरेश्वराय द्रावय द्राव[य] स्त्रीणां मदं पातय पातय स्वाहा" ॥ २० ॥

इति श्रीसिद्धनागार्जुनविरचिते कक्षपुटे स्त्रीवश्यादि द्रावणं नाम चतुर्थः पटलः।

अथ पतिवश्यम्।

मालतीपुष्पसंयुक्तं कटुतैलं सुपाचितम्।
एतल्लिप्तभगा नारी रतौ मोहयते पतिम्॥ १॥
खञ्जरीटस्य मांसञ्च मधुना सह पेषयेत्।
अनेन योनिलेपेन पतिर्दासो भवत्यलम्॥
कर्पूरं देवदारुञ्च सक्षौद्रं पूर्ववत् फलम्॥ २॥
सैन्धवेन तिलान् भाव्य सप्तवारं पुनः पुनः।
तद्दृष्ट्वा लेपयेद् योनिं पतिर्दासो रतौ भवेत्॥ ३॥
सौवर्चलं वचा सिन्धु मीनपित्तं वसा घृतम्।
सौवीरञ्च समं पिष्ट्वा योनिलेपे पतिर्वशः॥ ४॥
पञ्चाङ्गं दाड़िमं पिष्ट्वा श्वेतसर्षपसंयुतम्।
योनिलेपे पतिं दासं करोत्यपि च दुर्भगा॥
मन्त्रस्तु।—"ओं काममालिनि ठः ठः"।
सप्ताभिमन्त्रिते सिद्धिः प्रोक्तयोगेषु सम्मता॥ ५॥
रोचनं मत्स्यपित्तञ्च पिष्ट्वा तु तिलके कृते।
वामहस्तकनिष्ठायां * पतिर्दासो भवत्यलम्॥ ६॥
स्वयोनावृतुकाले तु रोचनं निक्षिपेत् पुनः।
स्वपुष्पं भावयेत् तेन तिलकं पतिवश्यकृत्॥ ७॥
धुस्तूरबीजचूर्णन्तु सप्ताहं भावयेन्मलैः।
सर्वद्वारोद्भवैस्तेन खाने पाने पतिर्वशः॥ ८॥
पुत्त्रजीवश्च रक्ता च मोहिनी गिरिकर्णिका।
श्वेतापराजितामूलं समांऽशं चूर्णमध्यतः।
दीयते पश्चिमे रात्रौ सताम्बूलेऽतिवश्यकृत्॥ ९॥
सुश्वेतं कण्टकार्य्याश्च मूलञ्च गिरिकर्णिका।

* कनिष्ठायामित्यार्षं पदम्; अत्रान्वयार्थबोधे कनिष्ठयेति पठनीयम्।

ताम्बूलेन प्रदातव्यं दासवत् कुरुते पतिम् ॥ १० ॥
समूलचूर्णां भूधात्रीं वस्त्रे बद्ध्वा निवेशयेत् ।
नवनीते विनिक्षिप्तं तच्चूर्णं पाचयेद् घृते ।
तद्घृतं भोजने देयं पतिर्दासो भवत्यलम् ॥ ११ ॥
पुंबिन्दुं ग्राह्य * कार्पासाद्रतावन्ते स्वयोनिगम् ।
सजीवमण्डूकमुखे कार्पासं तं विनिक्षिपेत् ॥
कन्यावर्त्तितसूत्रेण पुंपादान्तं शिरो मिलेत् ।
खट्वाङ्गं वेष्टयेत् सूत्रे चतुष्पादं ततः पुनः ।
तेन सूत्रेण मण्डूकं बद्धाऽऽस्यं हण्डिकान्तरे ॥
रुद्ध्वा तन्निखनेद्भूमौ पतिर्वश्यो भवत्यलम् ।
अन्यत्र षण्डो मदनो भवत्यत्र तया सह ॥ १२ ॥
यत्र मूत्रयते भर्त्ता तत्र मृद्वामपाणिना ।
यत्नाद् ग्राह्या समन्त्रेण प्रजपन् पञ्चभिर्नखैः ॥ १३ ॥
मृदं कुलालचक्रस्थां विपरीतगतां हरेत् ।
उभाभ्यां वृषभं कृत्वा नासां सूत्रेण प्रोतयेत् ॥
द्वारदेशे स्थितं तन्तुं यावद्भर्त्ता तु लङ्घयेत् ।
तथा तु निखनेच्चैव पतिर्वश्यो भवत्यलम् ।
तद्गृहे कामदेवोऽसौ ह्यन्यत्र षण्डतां व्रजेत् ॥

मन्त्रस्तु ।—"श्रीं ह्रीं नाथं तुच्छं मन्त्रयती ह्रौं पञ्चनखे उच्च पनी ह्रौं सामोहि नीलद्रति सौं सां योगिनी कामि यालो बन्धो सुखेन सां जवेन जाम्रय सं रां सास्था" अनेन मूत्रस्थानमृत्तिका ग्राह्या । इति सिद्धियोगः ॥ १४ ॥

कार्पासधूनकस्यैव यन्त्रतः शेषमाहरेत् ।
तं कार्पासं स्वपुंशुक्रे भावयेत्तच्च शुक्रकम् ॥

---

* ग्राह्येत्यार्षम्पदम्, अन्वये गृहीत्वा इति पठनीयम् ।

विवस्त्राकन्यकाहस्तैर्विपरीतेन कर्त्तयेत्। *
धनुर्दर्भमयं कुर्य्यात् सूत्रैश्च त्रिगुणैर्गुणम्॥
पत्यु: पुंस्त्वं भवेत्तावद् यावदारोपितं धनु:।
अवतीर्णे गुणे षण्डो जायते च वशी भवेत्॥ १५॥
देवदारु समं कुष्ठं पाययेद्दशयेत् पतिम्।
"ओं नमो भगवते उष्णीशाय ओं दिग्बन्धाय स्वाहा"।
अनेन मन्त्रेण सप्ताभिमन्त्रितं कृत्वा सिद्धि:॥ १६॥
पतिशुक्रञ्च कर्पूरं वटपत्ररसं तथा।
रोचनञ्च पिबेद् या स्त्री पतिमिच्छति तत्क्षणात्॥१७॥
सनालानि तु पद्मानि क्षीरेणाज्येन पेषयेत्।
गुटिकां छायया शुष्कां नाभौ योनौ प्रलेपयेत्।
दशवारप्रसूताया: कन्यावज्जायते भगम्॥ १८॥
वेतसो मूलमादाय सप्त वा खदिरं समम्।
पेषयेच्छीततोयेन पीतं सङ्कोचयेद्भगम्॥ १९॥
कोकिलाक्षस्य वीजानि अजाक्षीरञ्च लाङ्गली।
छाययेल्लेपयेत्तेन योनिं प्रक्षालयेत् पुन:॥ २०॥
जले कार्पासमूलञ्च घृष्ट्वा मृदग्निना पचेत्।
अनेन क्षालनं कुर्य्याद्विस्तीर्णं कोचयेद्भगम् †।
वृद्धानामपि नारीणां योनिसङ्कोचनं भवेत्॥ २१॥

इति श्रीसिद्धनागार्जुनविरचिते कक्षपुटे पतिवश्यं नाम
पञ्चम: पटल:।

---

* अत्र हस्तै: पदं, हस्ताभ्यामित्यस्य वाचकम्।

† कोचयेदिति सङ्कोचयेत् स्थाने छन्दोऽनुरोधात् पठितम्।

अथ आकर्षणम् ।

ओङ्कारे मन्त्रयेत् पाशं क्रोङ्कारे चाङ्कुशं तथा ।
त्रिगुणं वामगं पाशं दक्षिणे ज्वलिताङ्कुशम् ।
सन्ध्यायेत् स्वकरे मन्त्री ततो मन्त्रमिमं जपेत् ।

"ओं ह्रीं रक्तचामुण्डे ! तुरु तुरु अमुकीम् आकर्षय ह्रीं स्वाहा" । अस्य मन्त्रस्य पूर्वमेवायुतजपे सिद्धिः ॥ १ ॥

अथवा निजमन्त्रन्तु गुरुवक्त्रात् समागतम् ।
पूर्वमेवायुतं जप्त्वा तेनैवाकर्षणं भवेत् ॥
ध्यात्वा साध्यञ्च मलिनमात्मानं देवतानिभम् ।
ध्यायेत् साध्यगले पाशं शिरोज्वलितमङ्कुशम् ॥
त्रिसन्ध्यन्तु जपादेव दिनानामेकविंशतिम् ।
ध्याने मन्त्रे तथा यन्त्रे त्रैलोक्याकर्षणं भवेत् ॥ २ ॥
रक्तवस्त्रे लिखेद् यन्त्रं लाक्षया रक्तचन्दनैः ।
पूज्यं तद्धि तरोर्मूले निखनेद्वरणीतले ॥
त्रिसप्ताहं सदा सिञ्चेत् प्रातस्तत्तण्डुलोदकैः ।
दूरादाकर्षयेन्नारीं यदि सा निगड़ान्विता ॥ ३ ॥
पूर्वोक्तैरौषधैर्यन्त्रं रक्तवस्त्रे लिखेत् सदा ।
वेष्टयेद्रक्तसूत्रेण जपेद्ध्यायेच्च पूर्ववत् ।
तद्यन्त्रं पूजयेन्मन्त्री निगले स्वान्तरे ततः ।
बद्धमाकर्षयेद्यन्तु निगड़ैः प्रतिपीड़ितम् ॥ ४ ॥
पूर्वोक्तैरौषधैर्यन्त्रं पूजयित्वा तथा क्षिपेत् ।
नागवल्लीदले यत्नाज्जपेद्ध्यायेच्च पूर्ववत् ।
त्रिसप्ताहे दिने प्राप्ते सम्यगाकर्षणं भवेत् ॥ ५ ॥
पूर्वोक्तैरौषधैर्यन्त्रं पूजयेन्मन्त्रसंयुतम् ।
वेष्टयेत् पद्मसूत्रैश्च निक्षिपेत् कलसान्तरे ॥

तत्रैव पूजयेन्नित्यं मासादाकर्षणं भवेत्।
पूर्ववद्ध्यानमन्त्रेण शम्भुदेवेन भाषितम्॥ ६॥
अश्लेषायां समादाय अर्जुनस्याथ वल्कलम्।
अजामूत्रेण सम्पेष्य स्त्रीणां शिरसि निक्षिपेत्।
पुरुषस्य पशूनाञ्च क्षिपेदाकर्षणं भवेत्॥ ७॥
जलौकां नीलसर्पञ्च शोषयित्वा हरेत् क्षितौ।
जम्बीरकाष्ठैस्तच्चूर्णं धूपादाकर्षणं भवेत्॥ ८॥
साध्याया वामपादस्थां मृत्तिकामाहरेत् क्षितौ।
कृकलासस्य रक्तेन प्रतिमां कारयेत् सुधीः॥
साध्या नामाक्षरं तस्यास्तद्रक्तैर्विलिखेद्धृदि।
मूत्रस्थाने च निखनेत् सदा तत्रैव मूत्रयेत्॥
आकर्षयेत्तु तां नारीं शतयोजनसंस्थिताम्।
चतुर्लक्षमिते जप्ते घुं घुन्तो नाम चेटकः।
यत्र पुष्पफलादीनां करोत्याकर्षणं ध्रुवम्॥

मन्त्रस्तु।—"ओं घुं घुन्ता आकृष्टिकर्त्ता सृष्टिपुरी अमुकीं वशे क्रीं क्रीं"॥ ९॥

रतिकामौ रतौ ग्राह्यौ भ्रमरौ यत्नतो बुधैः।
भिन्नौ कृत्वा दहेत्तौ तु चितिकाष्ठैस्तयोः पुनः॥
वस्त्रेण वेष्टयेद्भस्म पृथक् तत्पोटलीद्वयम्।
तयोरेकमजाशृङ्गे दृढं बद्धा परिक्षिपेत्॥
अपरं रक्षयेद्धस्ते यदि नायाति कामिनी।
यदाऽऽयाति तु सा मेषी तत् पृथग् बन्धयेद् बुधः।
तद्भस्म शिरसि न्यस्तं क्षणादाकर्षयेत् स्त्रियम्॥

"ओं कृष्णवर्त्ताय स्वाहा"। इमं मन्त्रं पूर्व्वमेवायुतं जप्त्वा उक्तयोगेनाभिमन्त्रणेन सिद्धिः॥ १०॥

"ओं क्रीं विलि विलि छिन्धि छिन्धि हन हन पच पच

शोषय शोषय सर्व्वविद्याऽधिपतये नमः”। अनेन मन्त्रेण स्नुहीकीलकमष्टोत्तरशताभिमन्त्रितं कृत्वा तथा प्रतिरोपयेत्। यन्नाम्ना तमाकर्षयति॥ ११॥

“ओं आं च्यं चाटुं चाटुं फट्।”

लक्षमेकं जपेदस्य पूर्व्वमेव समाहितः।
दूरादाकर्षयेन्नारीं तत्रत्यां क्षोभयत्यपि॥ १२॥

“ओं अलमृत्यु जय मे मे।” अनेन मन्त्रेण कुम्भकारमृत्तिकया प्रतिमां कृत्वा मनुष्यास्थिकीलेनाष्टोत्तरसहस्राभिमन्त्रितेन स्वहस्तेन निखनेत्, सा रुधिरं स्रवति। अथ प्रतिमाकृतिं त्रिकटुकेनालिप्य मधूच्छिष्टेन वेष्टयेत्। अस्या अङ्गं सूचिकयाऽऽविध्यललाटे तस्याः नामाक्षरम् अनामिकाया रुधिरेण लिखेत्; प्रतिकृतिं खदिराङ्गारे स्थापयेत्। ततः पूर्व्वं मन्त्रं जपेत् यावत्तस्यास्थिके लगति तावदाकर्षणं भवति॥ १३॥

इति श्रीसिद्धनागार्जुनविरचिते कक्षपुटे आकर्षणं नाम षष्ठः पटलः।

अथ स्तम्भनम्।

गमनोत्थानवाग्बाणखड्गादिशस्त्रकेषु च।
शत्रुसैन्याशनीनाञ्च स्तम्भनं शम्भुनोदितम्॥ १॥
रजन्या हरितालैर्वा भूर्ज्जपत्रे समालिखेत्।
यन्त्रं हरितसूत्रेण वेष्टयित्वा ततः पुनः।
शिलायां बन्धयेत्तच्च गतिस्तम्भकरं भवेत्॥ २॥
चर्म्मकारस्य कुण्डाच्च रजकस्य तथैव च।
कुण्डान्मलं समुद्धृत्य चाण्डालीऋतुवाससा* ॥

---

* अत्रासन्धिरार्षः।

बन्धयेत् पोटलीं प्राज्ञो यस्याग्रे तां विनिक्षिपेत् ।
तस्योत्थाने भवेत् स्तम्भः सिद्धयोग उदाहृतः ॥ ३ ॥
उष्ट्रस्यास्थि चतुर्दिक्षु निखनेद्भूतले ध्रुवम् ।
गोमिषमहिषीवाजीन् स्तम्भयेत् करिणोऽपि च ॥ ४ ॥
सितगुञ्जाफलं व्याप्यं नृपात्रे पीतमृद्युतम् ।
निशि कृष्णचतुर्दश्यां त्रिदिनं तत्र जागरेत् ॥
नित्यं सिञ्चेज्जलेनैव मन्त्रं पूजाञ्च कारयेत् ।
तस्याः शाखा लता ग्राह्या शुभर्क्षे च सुमन्त्रिता ॥
क्षिपेद् यस्यासने तन्तु स्तम्भयत्येव सा ध्रुवम् ।

"ओं गुरुभ्यो नमः । ओं वज्ररूपाय नमः । ओं वज्रकिरणे शिवे ! रक्ष रक्ष भवेद् गाधि अमृतं कुरु कुरु स्वाहा" । अयं गुञ्जामन्त्रः ॥ ५ ॥

हरिद्राकारितं पद्मं तालपत्रे सुपूजितम् ।
चत्वरे साध्यमन्त्राङ्कं मुखस्तम्भकरं रिपोः !

"ओं सहचखदशायि अमुकस्य मुखं स्तम्भय स्वाहा" ॥ ६ ॥

अकारः पन्नगाकारः साध्यकर्णे विचिन्तितः ।
करोति वचनस्तम्भं चित्रं देवगुरोरपि ।

"ओं मूकस्तु सुकर्णाय स्वाहा" ॥ ७ ॥

शतजप्तेन कीलेन खादिरेणास्य बन्धनम् ।
जायते वैरिणां स्तम्भो दुर्गाग्रे कीलितं ध्रुवम् ॥

"ओं स इति मूर्त्तिरुद्राय स्वाहा" ॥ ८ ॥

कुङ्कुमोल्लिखितं पद्मं भूर्जे नामाङ्कितं रिपोः ।
वेष्टितं नीलसूत्रेण सम्यक् स्तम्भकरं भवेत् ॥

"ओं सह धनेशाय स्वाहा" ॥ ८ ॥

लिखित्वा प्रेतवस्त्रे च साध्यनामपुटीकृतम् ।
वेष्टितं नीलसूत्रेण श्मशाने प्रोथितं भवेत् ॥

"ओं सहश्वेताय अमुकस्य वाक् स्तम्भय स्तम्भय स्वाहा" ॥१०॥

यस्याभिधानमुच्चार्य्य सप्ताहं जपते रिपोः ।
मनो वाचो गतिस्तम्भं चेटकः कुरुते ध्रुवम् ॥

"ओं नमो हुण्डने अमुकस्य मुखं गतिं स्तम्भय ज्वाला गर्द्द भाग्नि मुल्काधिक बन्ध बन्ध स्तम्भय कुरु च ममेप्सितानि ठः ठः हुं फट् स्वाहा" ॥ ११ ॥

हरिद्रया लिखेद् यन्त्रं भूर्जपत्रे समाहितः ।
वेष्टयेत् पीतसूत्रैश्च पीतपुष्पैश्च पूजयेत् ।
स्थापयेत् शिलयोर्मध्ये वाक्स्तम्भं जायते ध्रुवम् ॥ १२ ॥

भृङ्गराजोऽप्यपामार्गः सिद्धार्थः सहदेविका ।
तुल्यं तुल्यं वचा श्वेता द्रवमेषां समाहरेत् ॥
लौहपात्रे विनिक्षिप्य द्विदिनान्ते समुद्धरेत् ।
तिलके सर्वशत्रूणां बुद्धिस्तम्भकरं भवेत् ॥ १३ ॥

"ओं नमो भगवते विश्वामित्राय नमः सर्वमुखिभ्यां विश्वामित्राय विश्वामित्रोद्दापयति शक्त्या आगच्छतु"। अनेन मन्त्रेण नदीं प्रविश्य अष्टोत्तरशताम्बुभिस्तर्पयेत् शत्रूणां मुखस्तम्भो भवति ॥ १४ ॥

"ओं नमो ब्रह्मवेसरि रक्ष रक्ष ठः ठः"। अनेन मन्त्रेण सप्तपाषाणान् गृहीत्वा त्रीन् कक्ष्यां बद्ध्वा अपरे मुष्टिकाभ्यां धारणीयाः चौराणां गतिस्तम्भो भवति ॥ १५ ॥

अङ्कुली लक्ष्मणा पुंसी सर्पाक्षी शिखिमूलिका ।
विष्णुक्रान्ता जटा नीला पाठा श्वेतापराजिता ॥
पाटली सहदेवी च मूलञ्च सहदेविका ।
पुष्यार्के तु समुद्धृत्य मुखे शिरसि संस्थिता ॥
एकैकं वारयत्येव शस्त्रसन्धारणं नृणाम् ।
वज्राखुव्याघ्रभूपालचौरशत्रुभयं त्यजेत् ॥ १६ ॥

श्वेतगुञ्जीयमूलन्तु नक्षत्रोत्तरभाद्रके।
उत्तराभिमुखं ग्राह्यं बाणस्तम्भकरं मुखे ॥ १७ ॥
मूलं शुक्लत्रयोदश्यां ग्राह्यं शिखरिकन्ययोः।
बलामूलं तथा ग्राह्यं पिष्टा तद्गोलकीकृतम्।
धार्य्यं मूर्ध्नि करे बाहौ सर्वशत्रुनिवारणम् ॥ १८ ॥
गोजिह्वा च हठी द्राक्षा वचा श्वेतापराजिता।
विष्णुक्रान्ता हस्तिकर्णी सुश्वेता कण्टकारिका ॥
मूलान्यादाय पुष्यार्के रम्भासूत्रेण वेष्टयेत्।
स्वहस्ते कङ्कणं धार्य्यं शत्रुस्तम्भकरं रणे ॥ १९ ॥
पाठा रुद्रजटा वाऽथ श्वेता च शरपुङ्खिका।
श्वेतगुञ्जीयकं मूलं पुष्यार्के तु समुद्धृतम्।
प्रत्येकं मुखमध्यस्थं रणेषु स्तम्भकृद्रिपोः ॥ २० ॥
गाम्भारी चैव कुम्भी च पुष्यार्के च समुद्धरेत्।
मूलं तण्डुलतोयेन पिष्टा पीत्वा दिनत्रयम्।
प्रत्येकं वारयत्येव शस्त्रसङ्घं नरो नृणाम् ॥ २१ ॥
केतकी मस्तके नेत्रे तालमूली मुखे स्थिता।
खर्जुरे चरणे हृत्स्थे खड्गस्तम्भः प्रजायते ॥
एतानि त्रीणि मूलानि चूर्णीकृत्य घृतैः पिबेत्।
अहोरात्रौ ततः शस्त्रैर्यावज्जीवं न बाध्यते ॥ २२ ॥
शिरीषमूलं पुष्यार्के ग्राहयेत् पेषयेज्जलैः।
अर्द्धाहारे कृते पश्चात्तज्जलं चार्द्धकं पिबेत्।
यावद्दिनानि तत् पीतं तावत् शस्त्रैर्न बाध्यते।
तन्मूले तु गले बद्धे खड्गैर्मेषो न छिद्यते ॥ २३ ॥
पुच्छीमूलन्तु पुष्यर्क्षे वराटस्योदरे क्षिपेत्।
तं वराटं समानीय फलमध्ये विनिक्षिपेत्।
तत् फलं मुखमध्यस्थं शस्त्रस्तम्भकरं परम् ॥ २४ ॥

ग्रस्ते रवौ समुद्धृत्य शरपुङ्खं समन्त्रकम्।
वक्त्रे यो धारयेन्मौनी शत्रुखड्गैर्न बाध्यते ॥ २५ ॥
समूलपत्रशाखान्तु विष्णुक्रान्तां विचूर्णयेत्।
तैलपक्वं * ततः कृत्वा तेनैवाङ्गानि मर्दयेत्।
खड्गादिसर्वशस्त्राणां भवेद् युद्धे निवारणम् ॥
"ओं तुरु रुरु चेतालि ! स्वाहा" ॥ २६ ॥
कृकलासस्य वामाङ्घ्रिं हरितालेन वेष्टयेत्।
ताम्रपत्रैः पुनर्वेष्ट्य मुखस्थं सर्वशत्रुजित् ॥
"ओं चामुण्डे भयचारिणि ! स्वाहा" ॥ २७ ॥
वज्रहेमाभ्रकं ताप्यं कान्तं सूतं समं समम्।
सद्यो जम्बीरजैर्द्रावैर्दिनं खल्ले ततः पुनः ॥
ब्रह्मवृक्षस्य वीजानि कार्पासास्थीनि राजिकाम्।
बन्ध्या च जनयित्री च पिष्ट्वा तन्मध्यगं क्रियात् ॥
पूर्वं यन्मर्दितं गोलं लघु सप्तपुटैः पचेत्।
ततो गजपुटं दद्यान्मुखं रुद्ध्वा धमेद् घटात् ॥
तद्गोलं धारयेद्वक्त्रे शस्त्रस्तम्भकरो भवेत्।
हन्ति रोगं जरामृत्युं गुटिका सुरसुन्दरि ! ॥
सर्वेषामुक्तयोगानां कुम्भकर्णं स्मरेद् यदि।
आयान्तं सम्मुखं शत्रुसमूहं सन्निवारयेत् ॥
"ओं अहो कुम्भकर्ण महाराक्षस कैशीगर्भसम्भूत परसैन्य-भञ्जन ! महारुद्रो भगवान् रुद्र आज्ञा अग्निं स्तम्भय ठः ठः"।
एवं मन्त्रद्वयं पूर्वमेवायुतजप्ते सिद्धिः ॥ २८ ॥
अथ मन्त्रं महेशस्य अपि चैवं हनूमतः।
नारायणस्य सूर्य्यस्य जपेद्वा ब्रह्मणोऽपि च ॥
अयुतं पूर्वमेवैतत् ततोऽङ्गारैर्न दह्यते ॥ २९ ॥

* तैलपक्वं पदात्परं तच्चूर्णमध्याहार्य्यम्।

कुमारीं शूरणं पिष्ट्वा लिप्तहस्तो नरो भवेत् ।
दीप्ताङ्गारैस्तप्तलोहैर्मन्त्रयुक्तो न दह्यते ॥ ३० ॥
पाठामूलं घृतैः पिष्टं लोहपिण्डं सुधारितम् ।
लिप्तहस्ता न दह्यन्ते मन्त्रराजप्रभावतः ॥ ३१ ॥
उलूकमेषमण्डूकवसामादाय लेपयेत् ।
अनया लिप्तगात्रस्तु नाग्निना दह्यते नरः ॥

मन्त्रस्तु ।—"ओं नमो भगवति चन्द्रकान्ते शुभे व्याघ्रचर्म्म-निवासिनि चलमाणि ! स्वाहा" । उक्तयोगद्वयेऽसौ मन्त्रः ॥ ३२ ॥

मण्डूकवसया पिष्ट्वा निम्बवृक्षत्वचं ततः ।
लिप्तगात्रो नरो वह्निं स्तम्भयत्येव च ध्रुवम् ॥ ३३ ॥
स्त्रीपुष्पं खरमूत्रञ्च पचेद्दकवसायुतम् ।
तेनैव लिप्तहस्तस्तु तप्ततैलैर्न दह्यते ॥ ३४ ॥
विद्युद्धतस्य काष्ठस्य कीलेन विहगस्य वा ।
विड़ालस्यास्थिगो वह्निर्न दहेदतिकौतुकम् ॥ ३५ ॥
कुमारीतैललिप्तस्तु हस्तो लौहैर्न दह्यते ।
जलौका पाटलीमूलं शैवालकुसुमं शुभम् ।
मण्डूकवसया पिष्टं लिप्तगात्रो न दह्यते ॥

मन्त्रस्तु ।—"ओं अग्निवलन्ती मैधरी मलीये हनुमैवेश्वन रथमिजी गौरी महेश्वर साधु" । उक्तयोगानामयं मन्त्रः ॥ ३६ ॥

मण्डूकपित्तमादाय मेषस्य वसया सह ।
सजलौकाप्रलेपेन वह्निस्तम्भनमुत्तमम् ॥

मन्त्रस्तु ।—"ओं नमो भगवति चन्द्रकान्ते शतव्याघ्रचर्म्मपरि-खण्डवसने चमालय स्वाहा" ॥ ३७ ॥

उद्भ्रान्तपत्रनिर्म्माल्यमैरण्डपारिभद्रकम् ।
मण्डूकवसया सार्द्धं पिष्ट्वा मृदग्निना पचेत् ।
तेन पादविलेपेन भ्रमेदङ्गारपर्व्वते ॥ ३८ ॥

यवकाण्डं समाहृत्य मण्डूकवसया सह।
गुटिकां कारयेत् क्षिप्ते तया वह्नौ ततो भ्रमेत्॥

मन्त्रस्तु।—"ओं नमो भगवते चन्द्ररूपाय विकलां त्विहन्ति तत् क्रमस्तम्भत्वनचन्द्ररूपेण अग्निपुच्छवरं कट्ट ठः ठः"। उक्तयोगद्वयाणामयं मन्त्रः॥ ३९॥

वामपादं वामहस्तं कृकलासस्य पूर्व्ववत्।
संग्राह्य सिक्थकैर्वेष्ट्य वह्निस्तम्भो मुखे स्थिते॥
तस्यैव वामहस्तञ्च पारदेन विमर्दयेत्।
वेष्टयेन्नागपत्रेण वह्निस्तम्भो मुखे स्थिते॥

"ओं अमृताय ईड़पिङ्गले! स्वाहा"॥ कृकलासस्य योगानामयं मन्त्रः॥ ४०॥

भृङ्गराट् कदलीकन्दं मण्डूकवसया पचेत्।
मृद्वग्निना ततो लेपात् पादयोर्वह्निसञ्चरः॥ ४१॥
श्वेतगुञ्जारसेनैव सर्व्वाङ्गे लेपमाचरेत्।
अङ्गारराशिमध्ये तु भ्राम्यमाणो न दह्यते॥

"ओं वज्रकिरणे अमृतं कुरु कुरु स्वाहा"॥ उक्तयोगानामयं मन्त्रः॥ ४२॥

सप्तधा हिमवन्मन्त्रं जपित्वा येन ताड़ितः।
वह्निः शाम्यति रौद्रोऽपि दह्यमाने गृहे सति॥

"ओं हिमालयोत्तरे भागे मारिचो नाम राक्षसः।
तस्य मूत्रपुरीषाभ्यां हुताशं स्तम्भयाम्यहं स्वाहा"॥४३॥

गोवालं जलशूकञ्च मण्डूकवसया त्रिभिः।
लिप्ते वस्त्रे धृते वह्निर्न दहेद्वस्त्रमद्भुतम्॥ ४४॥
रसमेरण्डपत्रस्य शिरीषपत्रकस्य च।
तुल्यं तुल्यं पचेच्छीर्षं नरतैलेन कम्बलम्।
लिप्त्वा प्रज्वलितं धार्य्यं शिरःस्थोऽग्निर्न दह्यते॥ ४५॥

तिलतैलाक्तसूत्रेण विलम्बा कांस्यभाजनम्।
अधः प्रज्वालयेद्वह्निं सक्षीरं पायसं पचेत्।
न सूत्रं दह्यते चित्रं पायसं कामलापहम्॥ ४६॥
भूर्जपत्रपुटे तैलं कदलीपत्रके * तथा।
क्षिप्त्वा वाह्ये लिपेत्तैलं छिन्नभाण्डं मुखे पुनः॥
संस्थाप्य लेपयेत् सार्द्रं गोमयेन तु तत् पुनः।
स्थितं चुल्लग्रामधो वह्निं प्रज्वाल्य वटकं पचेत्।
लौहपात्र इवाश्चर्य्यं पुटं तत्र न दह्यते॥ ४७॥
वार्त्ताकुं काञ्जिकैर्लिप्तं वेष्ट्य तैलाक्ततन्तुभिः।
तत् पुनः पचते वह्नौ न सूत्रं दह्यतेऽद्भुतम्॥ ४८॥
सप्तधा भावयेत् सूत्रं कन्यकासम्भवैर्द्रवैः।
योगपट्टं कृतं तेन क्षिप्तं वह्नौ न दह्यते॥ ४९॥
सूत्रं वराहपयसा लिप्तं कुर्य्यात् ततः पुनः।
यज्ञोपवीतकं तत्तु क्षिप्तं वह्नौ न दह्यते॥ ५०॥
दग्ध्वाऽऽदौ तुलसीकाष्ठं शाल्मलीं वाऽथ सेचयेत्।
खरमूत्रैस्तदङ्गारैर्ज्वालचुल्लगां निवेशयेत्।
काष्ठभारशतेनापि अन्तःपाको न जायते॥ ५१॥
मूलन्तु श्वेतगुञ्जोत्थं वह्नौ मन्त्रयुतं क्षिपेत्।
तस्योपरि स्थितं चान्नं मासेनापि न पच्यते॥ ५२॥
पिप्पली मारिचं चूर्णं चर्वयित्वा ततः पुनः।
दीप्ताङ्गारे नरैर्भुक्ते न वक्त्रं दह्यते क्वचित्।
"ओं नमो महामाये वह्निं रक्ष स्वाहा"। अयं मन्त्र उक्तयोगानां योज्यः॥ ५३॥

अथ जलस्तम्भनम्।

पद्मकं नाम यद्द्रव्यं सूक्ष्मचूर्णन्तु कारयेत्।

---

* अत्र पत्रकेत्यत्र पत्रपुटके शेषमन्वययोजनायाम्बोध्यम्।

वापीकूपतड़ागेषु निक्षिपेद् बध्यते जलम् ॥

"ओं नमो भगवते जलं स्तम्भय वः पः"। अयं मन्त्रः सर्वजले सिद्धः ॥ १ ॥

अगस्त्यपुष्पनिर्य्यासं महिषीपयसा पिबेत्।
खादेत्तन्नवनीतञ्च जलाग्नौ नावसीदति ॥

मन्त्रस्तु।—"ओं नमो भगवते रुद्राय बलस्य विद्रव कलहप्रिये कलहंसध्वनि एह्येहि स्वाहा" ॥ २ ॥

त्रिलौहवेष्टितं हस्तं कृकलासस्य दक्षिणम्।
समन्त्रं धारयेद्दक्षो स्वेच्छया सञ्चरेज्जले ॥
समुद्रेऽपि न सन्देहो नरस्तोयैर्न बाध्यते।

"ओं अन्नये उदस्वाहा" ॥ ३ ॥

मूलं पुष्ये तु गुञ्जायाः कुसुम्भरसपेषितम्।
तेनैव रञ्जयेद्दस्त्रं तद्दस्त्रस्वाङ्गवेष्टितम् ॥
गम्भीरजलमध्ये तु यावदिच्छति तिष्ठति।
जलस्तम्भमिदं ख्यातं गुञ्जामन्त्रेण सिध्यति ॥ ४ ॥

अलाबुफलचूर्णन्तु पक्वं श्लेष्मान्तजं फलम्।
पिष्ट्वा तेनाजिनं लिप्त्वा नरो ह्यङ्गुलमात्रकम् ॥
तच्छुष्कं निक्षिपेत्तोये तड़ागे वा नदे ह्रदे।
तस्योपरि स्थितो योऽसौ कदाचिन्न निमज्जति ॥ ५ ॥

श्लेष्मान्तालाबुपिष्टेन कर्त्तव्यं पादुकाद्वयम्।
गोधाचर्म्ममयं बद्धं कृत्वारूढ़श्चरेज्जले ॥ ६ ॥

श्लेष्मान्तफलचूर्णन्तु वापीकूपतड़ागके।
क्षिपेद्रात्रौ भवेद् बन्धो मुक्त्यर्थे लवणं क्षिपेत् ॥ ७ ॥

श्लेष्मान्तफलचूर्णन्तु लेप्यं शुष्कन्तु मृद्घटे।
घनमङ्गुलमात्रं स्याच्छोषयेत् पूरयेज्जलैः।
क्षणार्द्धं भिद्यते कुम्भो जलं बद्धन्तु तिष्ठति ॥

मन्त्रस्तु।—"ओं नमो भगवते रुद्राय जलं स्तम्भय स्तम्भय वः वः वः ठः ठः ठः"। पूर्वोक्तयोगानामयं मन्त्रः ॥ ८ ॥

मकरस्य शृगालस्य नकुलस्य वसायुतम्।
जलसर्पशिरोपेतमैणतैलेन पाचयेत्।
तेन नासाकर्णलेपं कृत्वा संस्तम्भयेज्जलम्॥

"ओं नमो भगवते रुद्राय व्याघ्रचर्म्मपरिधानाय जलं स्तम्भय स्तम्भय ठः ठः" ॥ ९ ॥

चतुर्दिनं नक्तभोजी लिङ्गपूजाकृते जपेत्।
अयुतैकेन जप्तेन सिद्धिभाग्भवति ध्रुवम्॥ १० ॥

इति श्रीसिद्धनागार्जुनविरचिते कक्षपुटे गतिस्तम्भनं नाम सप्तमः पटलः।

अथ सैन्यस्तम्भनम्।

लक्षमेकं जपेन्मन्त्री पलाशतरुजैस्तथा।
मध्वाज्यसंयुतैर्होमात् कालकर्णी प्रसीदति॥
सैन्यखड्गादिधाराम्बुगतिस्तम्भकरो भवेत्।
सततं स्मरणान्मन्त्री विविधाश्चर्य्यकारकः॥

"ओं णां कालकर्णिके ठः ठः" ॥ १ ॥

गजेन्द्रदन्तमध्यस्थं परसैन्यं विचिन्तयेत्।
तत्क्षणाद्भङ्गमायाति स्तम्भितं वावतिष्ठति॥

"ओं स्तं द्विरण्डाय स्वाहा" ॥ २ ॥

रक्तधुस्तूरमूलं वा पूर्ववज्जायते फलम्।
गुञ्जामूलं समानीय मर्कटीं गृहगोधिकाम्॥
छुच्छुन्दरीसमायुक्तं पिष्ट्वा शस्त्राणि लेपयेत्।

तत्फले छिद्यमानेऽपि म्रियते च न संशयः॥ *

"ओं नमो भगवते उड्डामरेश्वराय दह दह पच प
घातय घातय हिलि हिलि स्वाहा"। शस्त्रदूषणविधौ अयं मन्त्रः॥ ३

षड्बिन्दुर्मक्षिका नीला चूर्णं खर्जूरमूलकम्।
लेपयेत् सर्वशस्त्राणि तद्घाते क्रिमिरुद्भवेत्।
निर्घात्यते कृमेर्कोपात् विष्णुना यदि रक्षितम्॥ ४॥
जलौकामक्षिकानीलाषड्बिन्दूनां प्रलेपनात्।
तच्छस्त्रछिद्यमानेन म्रियते ह्यमरोऽपि सः॥

"ओं नमो भगवते उड्डामरेश्वराय दह दह भिन्न भि
ख ख गृह्ण गृह्ण स्वाहा ठः ठः"। उक्तयोगद्वये अयं मन्त्रः॥ ५॥

हालाहलं वत्सनाभं वृश्चिका गृहगोधिका।
छुच्छुन्दरी कृष्णसर्पः गृहगोधाशिरांसि च॥
षड्बिन्दु करवीरोत्थं मदनस्य फलं तथा।
एतानि सर्वचूर्णानि उष्ट्रीक्षीरेण पेषयेत्।
एष शस्त्रप्रलेपस्तु राजशत्रुविनाशकृत्॥ ६॥
कृष्णसर्पशिरांस्यष्टौ तत्तुल्यं चित्रमूलकम्।
हालाहलञ्च तत्तुल्यं हरितालं चतुःपलम्॥
त्रिपलं पद्मकाष्ठञ्च पलाशफलषोड़शः †।
लाङ्गली करवीरञ्च नागकेशरकं तथा॥
प्रत्येकं त्रिपलं चूर्णं गर्दभीवसया सह।
एकीकृत्य पेषयेच्च सर्वशस्त्रेषु लेपयेत्॥
परसैन्यारिवर्गेषु स्पृष्टे स्यान्मरणं ध्रुवम्॥

---

* तत्फले इत्यत्र रक्तधुस्तूरफले, एवं म्रियते इत्यत्र शत्रुसैनापदं संयोज्यान्वय
बोध्यः।

† पलाशफलषोड़शः अत्र षोड़शपल इत्यन्वये योजना।

वापीकूपतड़ागानां जलमेतेन दूषयेत्।
पिबन्ति तज्जलं ये तु ते म्रियन्ते शिवोदितम्॥
"ॐ नमो भगवते उड्डामरेश्वराय दह दह पच पच
य मारय ठः ठः स्वाहा"॥ ७॥
कृकलासस्य रक्तेन मांसेन वसयाऽथवा।
लेपयेत् सर्वशस्त्राणि लेपनान्मारयेद्रिपुम्॥
"ॐ नमो भगवते रुद्राय घातय घातय ठः ठः"॥ ८॥
पूजा पूर्वमघोरस्य पञ्चलक्षमिदं जपेत्।
ब्रह्मचारी जितक्रोधः पशुसम्बन्धवर्जितः।
कुलाचाररतो वीरः सदाचारः सुदीक्षितः॥
दिनान्ते नक्तभुक् शुद्धो भूमिशय्यो जितेन्द्रियः।
अञ्जलीन् तर्पयेत् सप्त जपेद्रुद्राक्षमालया॥
पञ्चलक्षे कृते जापे होमं कुर्य्याद्दशांशतः।
शिवशक्तिसमुद्भूते षट्कोणे मेखलाऽन्विते॥
हस्तमात्रप्रमाणेन खनयेत् कुण्डमुत्तमम्।
महास्यमहिकर्णञ्च चन्द्रसूर्य्याग्निलोचनम्॥
सदंष्ट्रं तं महाजिह्वमूर्द्धवक्त्रं विचिन्तयेत्।
घृताक्तं हविरादाय मृगमुख्याद्यमुद्रया॥
भैरवास्ये महारौद्रे जुहुयान्मन्त्रसिद्धये।
एवं सन्तोष्य देवेशं मन्त्रश्चैवात्र कथ्यते॥
"ॐ अघोरे एष अघोरे क्लीं घोर घोर ओञ्च सूर्य्ये तु सर्व
फे रुद्ररूपे स्त्रौ नमस्ते"।
एषा विद्या अघोराख्या सर्वशास्त्रेषु गोपिता।
प्रस्फुरा पश्चिमाम्नाये पञ्चप्रणवसंयुता॥
प्रस्फुरा शम्भुदेवेन मेरुतन्त्रे प्रकाशिता।
पूजनाज्जपनाद्धोमात् सर्वसिद्धिमवाप्नुयात्॥

यथा सम्प्राप्यते वीरस्तथेदानीं निगद्यते।
विलिप्य सर्षपान्मन्त्री ब्रह्मपुष्पाणि होमयेत् ॥ ८ ॥
अष्टोत्तरसहस्रन्तु संख्या सर्व्वत्र सिद्धिदा।
ब्राह्मी सन्तोषमायाति ब्रह्मास्त्रं सा प्रयच्छति ॥
कल्पान्ते क्रुद्धकालाग्निसदृशं कुण्डमध्यतः।
उत्तिष्ठत्यस्त्रमत्युग्रं देवासुरभयङ्करम्।
गृहीत्वा पाणिनास्त्रञ्च सर्व्वैश्वर्य्यमवाप्नुयात् ॥

"ओं अघोररूपे श्रीब्राह्मि! अवतर अवतर ब्रह्मास्त्रं दे[illegible]
देहि स्वाहा" ॥ १० ॥

मेषरक्तेन संलिप्तलाङ्गलीपुष्पहोमतः।
अष्टोत्तरसहस्रेण माहेशी मन्त्रदा भवेत् ॥
कालानलसमप्रख्यं दुर्जयं निर्जरैरपि।
तदादाय करे मन्त्री खर्द्दयेद्विद्विषां श्रियम् ॥

"ओं अघोररूपे श्रीमाहेश्वरि! अवतर अवतर पाव[illegible]
देहि मे देहि स्वाहा" ॥ ११ ॥

महिषोत्थेन रक्तेन संयुक्तकुङ्कुमाहुतिम्।
अष्टोत्तरसहस्रन्तु कौमारी शक्तिदा भवेत् ॥
तया करस्थया मन्त्री साधयेदवनीतलम्।
सर्व्वराजकमाक्रम्य महेन्द्र इव राजते ॥

"ओं अघोररूपे श्रीकौमारि! शक्तिं शस्त्रं देहि मे
स्वाहा" ॥ १२ ॥

उलूकशोणिताभ्यक्त-विभीतपत्रहोमतः।
अष्टोत्तरसहस्रन्तु हुत्वा * तुष्यति वैष्णवी ॥
चन्द्रहासञ्च सा दत्ते करस्थश्चक्रवर्त्तिजित्।

---

* हुत्वा इत्यत्र हुत्वा वर्त्तमानस्येत्यध्याहारोऽन्वये बोध्यः।

अवत्यसौ महावीरो राजते वरुणो यथा ॥
'ओं श्रीवैष्णवि अवतर अवतर खड्गं देहि मे देहि
ा" ॥ १३ ॥
मीनस्नेहसमायुक्त-वरुणेन्धनहोमतः।
अष्टोत्तरसहस्रेण वरुणास्त्रं लभेन्नरः ॥
मन्त्रिपाणिगतं दृष्ट्वा तदस्त्रं वसुधातलम्।
प्लावयन्ति जलौघेन मेघा दर्दुरगर्जिताः ॥
"ओं अघोररूपे श्रीवाराहि! अवतर अवतर वरुणास्त्रं देहि
हि स्वाहा" ॥ १४ ॥
वज्रपल्लवदुग्धाभ्यां होमादेव प्रसीदति।
अष्टोत्तरसहस्रेण कुण्डमध्ये हुताशनम् ॥
गृहीत्वा पाणिना मन्त्री मारयेद्दृष्टभूभुजः।
तदीयं राज्यमासाद्य कुर्य्याद्धर्म्ममनेकधा ॥
"ओं अघोररूपे श्रीइन्द्राणि! अवतर अवतर वज्रं देहि मे
स्वाहा" ॥ १५ ॥
अष्टोत्तरसहस्रन्तु साज्यश्रीफलहोमतः।
त्रिशूलं कुण्डमध्योत्थं महालक्ष्मीः प्रयच्छति।
दुर्जयो देवदैत्यानां कैलासमनुगच्छति ॥
"ओं अघोररूपे श्रीमहालक्ष्मि! अवतर अवतर शूलं देहि
हि स्वाहा" ॥ १६ ॥
अश्वरक्तेन संलिप्तदेवदार्व्विन्धने हुते।
चतुर्दशसहस्राणि विपरीतप्रयोगतः ॥
देहि मे रथ उच्चार्य्य मन्त्रान्ते साधकोत्तमः।
लभते नन्दिगोपाख्यं रथं ब्राह्मीप्रसादतः ॥
श्वेताश्वकिङ्किणीजालमण्डितं श्वेतकेतनम्।
तमारुह्य महावीरो विचरेद्भुवनत्रये ॥

मन्त्रस्तु।—"स्वाहाह्री देहि मे देहि अवतर अवतर ल
ब्राह्मी परघोर आद हि मे रथं पूजां वक्ष्ये अघोरस्य अस्त्र
सिद्धिदायिनीम्" ॥ १७ ॥

शुद्धे शुभे गृहे कुर्य्याद्रक्षापूर्वं शिवोदितम्।
अश्वत्थं खदिरोत्थञ्च देवदारु विभीतजम् ॥
औडुम्बरोत्थं चिञ्चोत्थं वटोत्थं वृक्षसम्भवम्।
कीलकं पूर्वमारभ्य रुद्रान्तं निखनेत् क्रमात् ॥
सुकीलकात् हस्तमात्रात् ब्राह्मी धनुषमन्वितात्।
कृत्वैवं भस्मना स्नात्वा रक्तकृष्णाम्बरः शुचिः ॥
केशजं वाऽथ दर्भोत्थं धार्य्यं यज्ञोपवीतकम्।
पञ्चमुद्राधरो भूत्वा मृगचर्मकृतासनः ॥
करशुद्धिं प्रकुर्वन्ति पञ्चभिः प्रणवैः क्रमात्।
हृच्छिरस्तालुकावक्त्रनेत्रैकैकशो गतः।
पञ्चभिः प्रणवैश्चास्त्रं स्वस्वनामान्वितं न्यसेत् ॥

"श्रीं क्लीं श्रीं प्रिं ऐं पञ्च प्रणवाः" ॥

रोचना मधुकर्पूरं कुङ्कुमं चन्दनं तथा।
एतैर्मण्डलमालिख्य चतुरस्रं समं शुभम् ॥
तन्मध्येऽष्टदलं पद्मं मद्यपात्रञ्च कारयेत्।
सशक्तिपरमेशानं यत्ते तत्क्रम उच्यते ॥

तद् यथा—"पूर्वस्यां "श्रीं अघोरे ऐं ब्राह्मि! अवतर अव
नमः"। आग्नेय्यां "श्रीं अघोरे क्लीं कामेश्वरि! अवतर अव
नमः"। दक्षिणे "श्रीं घोर घोर कौमारि! अवतर अव
नमः"। नैर्ऋत्यां "गं श्रीं वैष्णवि! अवतर अवतर नम
पश्चिमस्यां "सर्वतः श्वेतवाराहि! अवतर अवतर नमः"। वा
"सर्वे फें द्रं इन्द्राणि! अवतर अवतर नमः"। उत्तरस्यां "
रूपे चामुण्डे! अवतर अवतर नमः"। ईशाने "च्चौं नम

ालक्ष्मि! अवतर अवतर नमः"। मध्ये मूलविद्यया देवं
ेयेत्। "ओं श्रीं कठादिगुरुभ्यो नमः" ॥ १८ ॥

अथ क्षेत्रपालपूजा। "क्षां क्षीं क्षूं क्षौं क्षेत्रपालाय नमः। बलिं
ह स्वाहा"।

अङ्गुष्ठौ गर्भकौ कृत्वा कमले कर्णिकाविव।
अङ्गुल्यष्टार्कपत्राष्टौ पद्ममुद्रा त्वियं भवेत्॥
मुष्टिद्वयकनिष्ठाभ्यां विदार्य्य सृक्कणीद्वयम्।
करालीयं भवेन्मुद्रा लोलजिह्वाप्रचालनात्॥
कनिष्ठाऽन्योऽन्यमाक्रम्य सङ्कुच्याङ्गुलकं द्वयम्।
मध्यमाभ्यां समाक्रम्य तर्ज्जन्यग्रौ धृतौ स्मृतौ॥
नीत्वा पराङ्मुखेऽनामे * पृष्ठलोले विचिन्तयेत्।
स्वाहा हुं फें कृतैः कायचालनाद्भैरवी मता॥
मुखस्य विकृताकारकरणाद्विकृतानना।
मुद्रा भवति सामर्थ्यदायिका शङ्करोदिता।
एषा पूजा समाख्याता कर्त्तव्या मन्त्रसिद्धये॥ १९॥
रविवारे मृताया गोः कीलानस्थिसमुद्भवान्।
चतुर्दिक्षु चतुःकीलान् गृहीत्वा चिह्नयेत् स्वयम्॥
रक्षयेत्तान् प्रयत्नेन रुद्रमन्त्रेण मन्त्रितान्।
चतुर्णां दापयेद्धस्ते ते धावन्ति सुवेगतः॥
पूर्व्वदिक् पूर्व्वकं कीलं दक्षिणे दक्षिणं तथा।
पश्चिमे पश्चिमं कीलम् उत्तरे उत्तरं नयेत्॥
अश्वारूढ़स्तु वा गच्छेत् पद्भ्यां वातसुवेगतः।
अशनिः शलभा मेघा यान्ति वर्षोपलाः क्षयम्॥
यावद्गच्छन्ति ते दूरं तावद्बाधा न विद्यते।
गत्यन्ते संस्थितस्तत्र याममात्रं जपेन्मनुम्॥

* पराङ्मुखे इत्यस्य नीचैरित्यर्थः।

कीलकान्निखनेत्तत्र प्रत्यागच्छेत् सुमन्त्रितान् ।
कीलकान् प्रातरादाय रक्षयेत् स्वगृहे सदा ॥
विद्युत्पातो न तत्रास्ति ग्रामे वा नगरेऽपि वा ।
एवं यदा यदा बाधा तदा कार्य्यं पुनश्च तैः ॥
"ओं नमो भगवते उड्डामरेश्वराय सर्व्वदुष्टमेघाशनी
सञ्जय सञ्जय नाशय नाशय स्वाहा ठः ठः" ॥ २० ॥
चन्द्रसूर्य्योपरागे तु वामलूरसमुद्भवाम् ।
तरणीं * ग्राहयेच्छुद्धो रक्षासूत्रेण वेष्टिताम् ॥
खड्गमुष्टौ तु संस्थाप्य पुनस्तं बन्धयेद्दृढ़म् ।
वीरासिस्पर्शमात्रेण त्रिधाऽस्त्रं खण्डितं भवेत् † ॥ २

इति श्रीसिद्धनागार्जुनविरचिते कचपुटे सैन्यस्तम्भनं नाम
अष्टमः पटलः ।

अथ मोहनम् ।

महिष्याः कृष्णसर्पस्य रक्ते चूर्णन्तु ‡ भावयेत् ।
कृष्णधुस्तूरपञ्चाङ्गं तद्रूपो मोहकृन्नृणाम् ॥ १ ॥
गुड़ं करञ्जवीजञ्च घुणचूर्णेन संयुतम् ।
समं पानेऽथवा धूपे मोहं प्रकुरुते नृणाम् ॥ २ ॥
हस्तिनीमहिषीणाञ्च ग्राह्यं क्षुरमलं मुदा ।
मयूरस्य § फलैः सार्द्धं धूमो ह्यत्यन्तमोहकृत् ।
वृश्चिकोद्भवचूर्णेन धूपो मोहकरो नृणाम् ॥ ३ ॥
गरलं धूर्त्तपञ्चाङ्गं महिषीशोणितं कणा ।

---

* अत्र हृतकुमार्य्यर्थे तरणीपदप्रयोगोऽवगन्तव्यः ।

† अत्र विपक्षस्येति शेषः योजनीयः अन्वयबोधे ।

‡ अत्र चूर्णपदेन प्रायोगिकसामञ्जस्येन घुणचूर्णं बोध्यम् ।

§ अत्र मयूरशब्देनापामार्गो ग्राह्यः ।

निशायां कुरुते मोहं धूपो गुग्गुलुसंयुतः ॥ ४ ॥
कुक्कुटाण्डकपालानि फलिनी तालकं वचा।
कनकाग्नियुतो धूपः स्वस्थस्यावेशकारकः ॥ ५ ॥
तृणान्तरजलौकाया विष्ठा वाऽजगरोद्भवा।
तच्चूर्णैर्धूपिता रात्रौ मुह्यन्ति प्राणिनो ध्रुवम् ॥ ६ ॥
हलिनीविषधुस्तूरशिखिविष्ठाभिरन्वितः।
समभागस्तथा धूपो मोहयत्येव निश्चितम् ॥ ७ ॥
विशालाऽग्निशिलाचूर्णं लाङ्गली शिखरी जटा।
महिषाक्षञ्च तुल्यं स्याद्धूपो मोहयते नरम् ॥ ८ ॥
तालकोन्मत्तबीजानां पानं मोहयते नरम्।
समं क्षीरसिताऽङ्कोलपानात् स्वस्थः भवेन्नरः ॥ ९ ॥
कुच्छुन्दरी सर्पमुण्डं वृश्चिकस्य तु कण्टकम्।
हरितालं समं धूपो मोहावेशकरो नृणाम् ॥ १० ॥
घुणचूर्णं विषं विम्बं मोहिनी अङ्गुलिः * कणा।
विशाला स्वर्णबीजानि सर्षपा मादनं फलम् ॥
रक्ताश्वमारचूर्णन्तु समभागन्तु भावयेत्।
आदित्यफलतूलञ्च तन्तुवर्त्तिं विधाय च ॥
कुसुम्भ तन्तुभिर्गाढ़ं मायाबीजेन वेष्टितम्।
सप्तधा कनकद्रावैर्भावयेच्छोषयेत् पुनः ॥
डुण्डुभो जलसर्पो वा वसां तस्य समाहरेत्।
वसालिप्तां पूर्व्ववर्त्तिं प्रज्वाल्य धारयेद् गृहे।
ये पश्यन्ति गृहे वाह्ये मुह्यन्ति न पतन्ति च ॥ ११ ॥
मदनोडुम्बरश्चिञ्चा प्रियङ्गु श्चामलीफलम्।
वदरी च फलान्येषां प्रतिसप्त समाहरेत् ॥

---

* अङ्गुलिरत्र त्रिपुरमल्लिकाबोधिका।

पुष्यार्के नरमूत्रेण कुमार्य्युत्थरसेन च।
सम्पेष्य गुटिका कार्य्या तिलको मोहकारकः॥
"ओं जं जम्भायै नमः। चुं स्तम्भायै नमः। ओं सम्मोहा नमः। ओं ह्रां शोषायै नमः। ओं महाभैरवाय नमः ओं श्रीभैरवानन्द आज्ञापय श्रीवीरभद्र! आज्ञापय"
एवं स्तम्भादिमन्त्रैर्मोहनप्रयोगा अष्टोत्तरशतमभिमन्त्र्य प्रयोज्याः॥ १२॥

प्रत्यानयनकं वक्ष्ये येन मोहो विनश्यति।
शतपुष्पं घृतं क्षीरं श्वेतार्कञ्च पिवेत् सुधीः।
गोसर्पिःसुरधूपेन मोहात् सुस्थो भविष्यति॥ १३॥

अथ उच्चाटनम्।

अथातः सम्प्रवक्ष्यामि शत्रूणां दुष्टचेतसाम्।
उच्चाटघातविस्फोट-व्याध्युन्मादादिकारणम्॥
पशुशस्यार्थनाशञ्च प्रवक्ष्यामि समासतः।
वेदशास्त्रागमाद्येषु ब्रह्मविष्णुमहेश्वरैः॥
कथितं सर्वदा सर्वैर्दुष्टदण्डो विधीयते॥ १॥
येनाहृतं गृहं क्षेत्रं कलत्रं धनधान्यकम्।
मानं वा खण्डितं येन तस्य दण्डो विधीयते॥ २॥
उड्डीशं यो न जानाति सन्तुष्टः किं करिष्यति!
तस्मात् सर्वप्रयत्नेन दुष्टदण्डो विधीयते।
हतो यो नाऽतिकोपेन सोऽतिशोकेन सिध्यति॥ ३॥
पञ्चाङ्गुलं चित्रकस्य मूलं ग्राह्यं पुनर्वसौ।
सप्ताभिमन्त्रितं गेहे निखन्योच्चाटनं भवेत्॥
"ओं लोहितमुखि! स्वाहा"॥ ४॥
स्वात्यामौडुम्बरं ब्रध्नं मन्त्रितं चतुरङ्गुलम्।
तं यस्य निखनेद् गेहे तस्यैवोच्चाटनं भवेत्॥
"ओं गिलि स्वाहा"॥ ५॥

भरण्यामङ्गुलीमात्रमुलूकास्थि च कीलकम्।
सप्ताभिमन्त्रितं गेहे निखन्योच्चाटनं भवेत्॥
"ओं दह दह दल दल स्वाहा"॥ ६॥
काकोलूकस्य पक्षन्तु हुत्वा ह्यष्टाधिकं शतम्।
यन्नाम्ना मन्त्रयोगेन तस्य चोच्चाटनं भवेत्॥
"ओं नमो भगवते रुद्राय दंष्ट्राकरालाय अमुकं सपुत्रपशुबान्धवैः सह हन हन दह दह पच पच शीघ्रमुच्चाटय हुं फट् स्वाहा ठः ठः"॥ ७॥
पारावतवसा ग्राह्या यस्य नाम्ना तु तां क्षिपेत्।
गृहे तूच्चाटयेच्छीघ्रं कोपान्मन्त्रं समुच्चरेत्॥ ८॥
नरास्थिकीलकं धीरः निखन्याच्चतुरङ्गुलम्।
मन्त्रयुक्तमरिद्वारे सत्यमुच्चाटनं भवेत्॥
"ओं नमो भगवते रुद्राय अमुकं गृह्ण गृह्ण पच पच त्रासय त्रासय त्रोटय त्रोटय नाशय नाशय पशुपतिराज्ञापयति ठः ठः"। उक्तयोगद्वये अयं मन्त्रः॥ ९॥
मध्याह्ने लुठते भूमौ गर्दभो यत्र धूलिकाम्।
उदङ्मुख उदीच्यान्तु गृह्णीयाद्वामपाणिना।
यद्गृहे क्षिप्यते धूलिस्तस्यैवोच्चाटनं भवेत्॥ १०॥
काकस्य मस्तकं ग्राह्यं तिलतैलेन पाचयेत्।
तत्तैलाभ्यङ्गमात्रेण शत्रोरुच्चाटनं भवेत्॥
"ओं नमो भगवते रुद्राय ज्वालाग्निसंख्यादंष्ट्राद्रावणाय स्वाहा"। उक्तयोगद्वये अयं मन्त्रः॥ ११॥
अश्वत्थकीलमश्विन्यां निखनेत् सप्तमन्त्रितम्।
यस्य गेहे भवेत् सत्यं * शीघ्रमुच्चाटकारकम्॥

* अत्र तस्येति शेषः योजनीयः।

"ओं खं गुः खः खाखाविनी स्वाहा" ॥ १२ ॥

कृत्तिकायां सर्जकीलं निखनेत् सप्तमन्त्रितम्।
यस्य गेहे च तं शत्रुं शीघ्रमुच्चाटयेद् गृहात्॥

"ओं नमो भगवति द्रुत द्रुत स्वाहा" ॥ १३ ॥

निम्बकीलकमार्द्रायां निखनेत् सप्तमन्त्रितम्।
यस्य गेहे च तं शत्रुं शीघ्रमुच्चाटयेद् गृहात्॥

"ओं नमो भगवति कामरूपिणि स्वाहा" ॥ १४ ॥

शिवालयाद्भौमवारे आदाय चतुरिष्टकाः।
प्रत्येकं प्रतिकोणे तु निखनेच्छत्रुमन्दिरे।
निखनेत् तद्गृहद्वारि अधःपुष्पं सचन्दनम्॥
सप्तरात्रे न सन्देहो महदुच्चाटनं भवेत्।

"ओं नमो भगवते उड्डामरेश्वराय वायुरूपाय चुनु चुनु ठः ठः" ॥ १५ ॥

गुञ्जामूलं गृहद्वारे निखन्योच्चाटनं भवेत्।
अथवा मूलनक्षत्रे न्यस्तं खदिरव्रध्नकम्॥ १६ ॥
धात्रीफलस्य चूर्णन्तु अङ्कोलतैलभावितम्।
उच्चाटितो भवेन्मूर्ध्नि स्नानाद्गोचौरतः सुखी॥ १७ ॥
ब्रह्मदण्डीं चिताभस्म विड़ालस्यास्थि वाऽऽहरेत्।
समं शूकरमांसञ्च कच्छपस्य शिरस्तथा॥
नृकपाले विनिक्षिप्य निखनेच्छत्रुमन्दिरे।
सकुटुम्बं समूलञ्च सत्यमुच्चाटयेत् क्षणात्॥ १८ ॥
नरवाराहमांसञ्च गृध्रस्यास्थि विषं समम्।
गोपादं महिषीपादं निखनेच्छत्रुमन्दिरे।
उलूकपक्षाण्यथवा महदुच्चाटनं भवेत्॥ १९ ॥
ब्रह्मदण्डी चिताभस्म चित्रकं रुधिरं विषम्।
शूकरस्य तु रोमाणि वीजतिक्तं सनिम्बकम्।

सप्ताहं शत्रुनाम्ना तु हुत्वा चोच्चाटनं भवेत्॥

"ओं नमो भगवते उड्डामरेश्वराय उच्छादय उच्छादय
ाटय उच्चाटय हन हन ठः ठः"। गुञ्जादीनामुक्तानामयं
॥ २०॥

कृष्णपक्षे शनौ भौमे भरण्यार्द्राऽथ कृत्तिका।
चितिकाष्ठाग्रमादाय कीलकं चतुरङ्गुलम्॥
वेष्टयेच्छवकेशैस्तु आग्नेय्यां दिशि मन्त्रयेत्।
अष्टोत्तरशतं जप्त्वा सूर्य्यं दृष्ट्वाऽतिकोपतः।
तं यस्य निखनेद्द्वारे शीघ्रमुच्चाटनं भवेत्॥

"ओं क्रीं यम यम उल्लूककराले विद्युज्जिह्वे! अमुक-
ाटय हुं फट्"॥ २१॥

छागरक्तं विषं राजी चिताऽङ्गारैः सहैकतः।
नामग्रस्तं लिखेन्मन्त्रं काकपक्षेऽतिरोषतः।
श्मशाने निखनेत्तञ्च दशाहादेव साधयेत्॥

"ओं द्रीं देद्रां दद्रां तद्रां उच्चाटय द्रां ठः" "ओं क्रीं रेद्रां द्रां
तद्रां अमुकं उच्चाटय द्रां ठः"॥ २२॥

उष्ट्रारूढं रिपुं ध्यात्वा हन्याद्दण्डेन मन्त्रितः।
दक्षिणादिक् त्रिसप्ताहं देशादुच्चाटयेद्रिपुम्॥

"ओं क्रीं यम यम उल्लूककराले विद्युज्जिह्वे! अमुकमुच्चाटय
फट्"॥ २३॥

काकपक्षं रवौ ग्राह्यं वेष्टयेदहिकञ्चुकैः।
कुसुम्भसूत्रैस्तद्बाह्ये वेष्टितव्यं ततः पुनः॥
निम्बपत्रे रिपोर्नाम लिखित्वा वेष्टयेच्च तम्।
तद्बहिश्चितिभस्मेन मृतवस्त्रेण वेष्टयेत्।
तं यस्य निखनेद्द्वारे तस्यैवोच्चाटनं भवेत्॥ २४॥
अधःपुष्पीसुरामांसी-चितिभस्मसमन्वितम्।

कूर्ममुण्डञ्च पत्रस्थं निखनेच्छत्रुवेश्मनि।
उच्चाटितो भवेच्छत्रुः सप्तरात्रान्न संशयः॥

"ओं नमो भगवते उड्डामरेश्वराय उच्छादय उच्छा
विद्वेषय विद्वेषय हन हन ठः ठः"। उक्तयोगद्वये अयं मन्त्रः॥ २

रवौ गृध्रालयो ग्राह्यः पुनः काकालयो रवौ।
चितिकाष्ठं रवौ पश्चात् सर्षपन्तु रवौ दहेत्॥
ग्रामाद्वहिश्च तद्भस्म स्थापयेन्निक्षिपेद्रिपोः।
मूर्द्धन्युच्चाटितो गच्छेद्गोमयस्नानतः सुखी॥ २६॥
कृकलासं निहन्यादौ स्नापयेत् पूजयेत् पुनः।
श्वेतवस्त्रेण संवेष्ट्य किञ्चित् कुर्य्याच्च रोदनम्॥
ततः काकालयोः ग्राह्यः चाण्डालानां गृहान्तिके।
श्मशानवह्निना चैव दहनीयौ चतुष्पथे॥
उच्चाटनं भवेत् तस्य स्त्रीपुत्त्रपशुबान्धवैः।
तद्भस्म वस्त्रसम्बद्धं क्षिपेद् यस्य गृहोपरि॥ २७॥
निम्बात् काकालयं दग्ध्वा ब्रह्मदण्डीञ्च भस्म तत्।
म्लेच्छचाण्डालविप्राणां त्रयाणां चितिभस्म च॥
भूमधूच्छिष्टसंयुक्तां गुटिकां कारयेद् दृढ़ाम्।
शत्रोः शिरसि नद्याञ्च क्षिपेदुच्चाटयेद्रिपुम्॥

"ओं नमो भगवते उड्डामरेश्वराय दंष्ट्राकरालाय का
रूपाय अमुकं सपुत्त्रपशुबान्धवं हन हन दह दह मय
शीघ्रमुच्चाटय हुं फट् ठः ठः"। उक्तयोगत्रयाणामयं मन्त्रः॥ २८

चतुर्दिङ्मृत्तिका ग्राह्या ग्रामस्य नगरस्य वा।
वृषभस्य मलैः सार्द्धं पञ्चपुत्तलिकाः क्रमात्॥
ताः ग्रामस्य चतुर्दिक्षु एकैकं निखनेत् पुनः।
पञ्चमीं ग्राममध्ये तु कुण्डे वा निखनेद्भुवि॥
हुनेदष्टसहस्रन्तु तत्रैव कनकानले।

तद्भस्ममुष्टिमादाय तस्मिन् ग्रामे विनिक्षिपेत्।
सप्ताभिमन्त्रितं कृत्वा ग्रामस्योच्चाटनं भवेत्॥

"ओं नमो भगवते महाकालाय दह दह भञ्जय भञ्जय मोहय मोहय स्मर निग्रह ठः ठः हुं फट्"॥ २९॥

ब्रह्मदण्डीं चिताभस्म शिवलिङ्गेषु लेपयेत्।
गृध्रास्थि च मनुष्यास्थि केशैश्चण्डालविप्रयोः।
सूत्रेण च दिशो बद्धा देशस्योच्चाटनं भवेत्॥

ओं नमः कालरात्रि शूलहस्ते महिषवाहिनि रुद्रकालकृतशेखरे आगच्छ आगच्छ भगवति! अतुलवीर्य्ये सर्वकर्माणि मे वशं कुरु कुरु महेश्वर आज्ञापयति ओं ओं ओं स्वाहा"॥ ३०॥

इति श्रीसिद्धनागार्जुनविरचिते कक्षपुटे मोहनोच्चाटनं नाम
नवमः पटलः।

अथ मारणम्।

नरास्थिकीलं पुष्ये तु गृह्णीयाच्चतुरङ्गुलम्।
निखनेत्तं गृहे यस्य भवेत् तस्य कुलक्षयः॥

"ओं वुं वुं भूं भूं वुं फट् स्वाहा"॥ १॥

अश्वास्थिकीलमश्विन्यां निखनेच्चतुरङ्गुलम्।
शत्रोर्गेहे निहन्त्याशु कुटुम्बं वैरिणां कुलम्॥

"ओं सुर सुरे स्वाहा"॥ २॥

सर्पास्थ्यङ्गुलमात्रन्तु ह्यश्लेषायां रिपोर्गृहे।
निखनेत् सप्तधा जप्तं मारयेद्रिपुसन्ततिम्॥

"ओं जयविजयति स्वाहा"॥ ३॥

भूते काकालयो ग्राह्यः देयश्चाग्नौ सचेतसा।

अङ्गुल्येकेन तद्भस्म शत्रुमूर्द्धनि निक्षिपेत्।
म्रियते नात्र सन्देहो गृहे क्षिप्ते कुलक्षयः॥
"ओं नमो भगवते रुद्राय मारय मारय नमः स्वाहा" ॥४॥
षड्बिन्दुवृश्चिकौ ग्राह्यौ विषं तद्वानरीफलम्।
एतच्चूर्णं प्रदातव्यं शत्रुशय्याऽऽसनादिषु।
जायते स्फोटको तीव्रा दशाहान्मारणं ध्रुवम्॥ ५॥
मातुलुङ्गस्य बीजानि कीटं षड्बिन्दुसंज्ञकम्।
कपिकच्छुकरोमाणि हिङ्गु वैभीतकं फलम्।
एतानि समचूर्णानि तथा मण्डलकारिका।
पूर्व्ववत् प्रक्षिपेत् शत्रोर्मारणं भवति ध्रुवम्॥ ६॥
तिलै पलं सकुसुदैः समाऽशं रक्तचन्दनम्।
कुष्ठकुक्कुटपित्तञ्च लेपनेन सुखावहम्॥ ७॥
स्वर्णकेशञ्च सङ्ग्राह्य तदास्ये शत्रुजं मलम्।
क्षिप्त्वा तद्रक्तसूत्रेण वेष्टयित्वा ततः पुनः॥
भल्लातकफलैः सार्द्धं रुद्ध्वा तन्मारयेद्रिपुम्।
प्रक्षालयेच्छनैरद्भिस्तज्जीवात् तस्य जीवनम्॥ ८॥
स्नानभूमूत्रभूमृत्तां सर्पवक्त्रे विनिक्षिपेत्।
वेष्टयेत् कृष्णसूत्रेण मार्गमध्ये अधोमुखम्।
निखनेन्म्रियते शत्रुस्तस्योत्पाटे सुखं भवेत्॥ ९॥
गर्दभस्यास्थि चादाय कृष्णाऽजगरकं शिरः।
निखनेद् यस्य तद्द्वारे मारणोच्चाटनं भवेत्॥
"ओं नमो भगवते उड्डामरेश्वराय अमुकं मारय मारय"।
उक्तयोगानामयं मन्त्रः॥ १०॥

ग्राह्या कृष्णचतुर्दश्यां शाखा भूततरोः स्थिता।
मृतकस्य हृदिस्थैश्च भूतकाष्ठैश्च तां दहेत्।
तदङ्गारैर्लिखेन्मन्त्रं तदा शत्रुर्मृतो भवेत्॥

"ओं नमो भगवते उड्डामरेश्वराय अमुकं हर हर रक्ष रक्ष कालरूपेण स्वाहा" ॥ ११ ॥

वामदन्तं कुलीरस्य अधोभागस्थमाहरेत्।
शराग्रे तत्फलं कुर्य्याद् धनुश्च विजितेन्द्रियः॥
गवां शिरागुणं कृत्वा शतुं कुर्य्याच्च मृन्मयम्।
तं हन्यात् तेन बाणेन म्रियते तत्क्षणाद्रिपुः॥

"ओं नमो भगवते रुद्राय यमरूपिणे कालं संशयावर्त्ते संहारे शत्रुम् अमुकं हन हन धुन धुन पाचय घातय हुं फट ठः ठः ठः" ॥ १२ ॥

गोधालाङ्गूलमूलञ्च कृकलासशिरस्तथा।
इन्द्रगोपं वंशशिखा अस्थि मूत्रं गजस्य च॥
हालाहलं नृमूत्रेण समभागं सुपेषितम्।
तेन स्पर्शनमात्रेण स्फोटकैर्म्रियते रिपुः॥ १३ ॥
ऊर्णनाभञ्च शङ्विन्दुं समांऽशं कृष्णवृश्चिकम्।
यस्याङ्गे निक्षिपेच्चूर्णं सप्ताहात् स्फोटकैर्मृतिः।
मयूरपिच्छनीलाञ्जं पिष्ट्वा लेपो सुखावहः॥ १४ ॥
रिपुविष्ठां वृश्चिकञ्च खनित्वा भुवि निक्षिपेत्।
आच्छाद्याच्छादनेनाथ तत्पृष्ठे मृत्तिकां क्षिपेत्।
म्रियते मलरोधेन उद्धरेत् स सुखी भवेत्॥ १५ ॥
यो मृतो भरणी भौमे तद्भस्मादाय रक्षयेत्।
रिपुविष्ठासमायुक्तं शरावसम्पुटोदरे॥
मृतकेशैस्तदा वेष्ट्य शून्याऽऽगारेषु लम्बयेत्।
यावच्छुष्यति तद्विष्ठा तावच्छत्रुर्मृतो भवेत्॥ १६ ॥
मुण्डमादाय गोश्चैव तद्वक्त्रे सर्षपान् क्षिपेत्।
मृदालिप्य पचेदग्नौ गृहीत्वा सर्षपांस्ततः।
यस्याङ्गे प्रक्षिपेत् तस्मात् स्फोटकैर्म्रियते रिपुः॥

"ओं नमो भगवते उड्डामरेश्वराय अमुकं कालरूपेण ठः ठः ठः"। उक्तयोगानामयं मन्त्रः ॥ १७ ॥

श्वेतापराजितामूलं कुष्ठं लवणकं विषम्।
शशवाराहमायूरगोधानां पित्तकं तथा॥
महानिम्बस्य पत्राणि समं सप्तदिनं हुनेत्।
मारयेदद्भुतं शत्रुं यदि साक्षान्महासुरम्॥

"ओं नमो भगवते उड्डामरेश्वराय मम शत्रुं गृह्ण गृह्ण स्वाहा"॥ १८॥

स्थानभ्रष्टस्य लिङ्गस्य मूर्ध्नि पत्रं समालिखेत्।
सपुष्पं छागरक्तेन चित्यङ्गारविषेण च॥
लिखित्वा रोषचित्तेन तच्छेषं लेखयेत् करी।
अश्वचर्म्मासने स्थित्वा ततो मन्त्रमिमं जपेत्॥

"ओं नमो भगवते रक्तवर्णे चतुर्भुजे ऊर्द्धकेशे विकृतानने कालरात्रिमानुषाणां वसारुधिरभोजने अमुकस्य प्राप्तकालस्य मृत्युप्रदे हुं फट् हन हन दह दह मांसं रुधिरं पिब पिब पच पच हुं फट्"।

अमुं मन्त्रं जपेद्रात्रौ रोषचित्तो रिपुं स्मरेत्।
अर्द्धरात्रौ तु हस्ताभ्यां मार्जयेल्लिङ्गमस्तके॥
भ्रष्टे पत्रे मस्तकस्थे तत्क्षणान्म्रियते रिपुः।
दृष्टः प्रत्यय एवायं सिद्धयोग उदाहृतः॥ १९॥
रक्ताश्वमारजं बाणं शुनोऽस्थिनिर्म्मितं धनुः।
मृतकेशैर्गुणं कुर्य्यादुत्तरादक्षिणामुखः॥
वकारसदृशान् कुर्य्यात् सिन्दूरैः सप्तमण्डलान्।
कुक्कुटं शत्रुनाम्ना तु सप्तमे मण्डले स्थिते॥
प्रत्येकमण्डले पूज्यं धनुर्बाणञ्च मन्त्रतः।

क्रमात् षण्मण्डले प्राप्ते ततो हन्याच्च कुक्कुटम्।
मन्त्रेण म्रियते सोऽपि दूरस्थोऽपि रिपुः क्षणात्॥ २०॥

इति श्रीसिद्धनागार्जुनविरचिते कक्षपुटे मारणं
नाम दशमः पटलः।

अथ विद्वेषणम्।

काकोलूकस्य पक्षांस्तु ययोर्नाम्ना तु होमयेत्।
उभयोर्नश्यति प्रीतिः कुरुपाण्डवयोरिव॥ १॥
काकोलूकखराश्वानां चतुर्णां ग्राहयेच्छिरः।
निखनेद् द्वारदेशे तु तद्गृहे कलहः सदा॥ २॥
ब्रह्मदण्ड्यास्तु मूलानि काकमस्तकमेव च।
जातीपुष्परसैर्भाव्यं सप्तरात्रं ततः पुनः।
विद्वेषकारको धूपः शिखिपिच्छाहिकञ्चुकः॥ ३॥
मूषमार्जाररोमाणि विप्रस्य क्षपणस्य च।
एष विद्वेषको धूपः पत्योः पित्रोः सुतस्य च॥ ४॥
उलूकजिह्वामादाय विदारीरसभाविताम्।
सोदराणामयं धूपो भवेद्विद्वेषकारकः॥ ५॥
अधःपुष्पीं सोमवारे सूत्रेणावेष्ट्य मन्त्रयेत्।
भौमवारे समुद्धृत्य पाटयेत् तां द्विधा समम्।
यस्य नाम्ना क्षिपेन्नद्यां सा स्त्री सत्यं पतिं त्यजेत्॥ ६॥
काकोलूकस्य पक्षांस्तु मार्जारस्य नखानि च।
पादपांशु तयोर्ग्राह्यं कटुतैलेन होमयेत्।
एकविंशदिने तेषां विद्वेषो जायते ध्रुवम्॥ ७॥
आर्द्रायां विप्रमार्जार-मूषकक्षपणस्य च।
केशरोमाणि संगृह्य सम्यक् चूर्णं प्रकल्पयेत्।

तल्लिप्तदर्पणं दृष्ट्वा विद्विषन्ति परस्परम् ॥ ८ ॥
महिषीच्छागयोर्मेदोघृतदीपस्य कज्जलैः।
अञ्जिताक्षो नरः पश्येद्विद्विषन्ति परस्परम् * ॥ ९ ॥
ब्रह्मवृक्षस्य शुष्कस्य काष्ठमेकं समाहरेत्।
तत् छिन्द्यात् क्रकचेनैव तच्चूर्णं चान्तरीक्षतः।
गृहीत्वा तद्द्वयोर्मध्ये निक्षिपेद् द्वेषकृत् ततः ॥ १० ॥
चिल्लमार्जारवाराहरोमाणि मूषकस्य च।
अनेन धूपमात्रेण विद्विषन्ति परस्परम् ॥

"ओं नमो महाकपालिनि! वृश्चिकोदरे दण्डपाशधरे अमुकस्यामुकेन सह विद्वेषं कुरु कुरु स्वाहा" ॥ ११ ॥

धुस्तूरकरसैर्लिप्ता चित्यङ्गारं ततो लिखेत्।
नाममन्त्रयुतौ यन्त्रौ स्थापयेत् तौ पृथक् पृथक् ॥
नद्यामुभयतीरस्थे निखनेद्वृक्षमूलके।
यन्नाम्ना लिखितौ यन्त्रौ तयोर्द्वेषः प्रजायते ॥
चतुरस्रे द्वयोः कुण्डे नाम वै मन्त्रगर्भितम्।
साधको मन्त्रसिद्धात्मा लिखन् सिद्धिमवाप्नुयात् ॥ १२ ॥
एकहस्ते काकपक्षमुलूकस्यापरे करे।
दर्भवत् धारयेद् यत्नात् त्रिसप्ताहं जलाञ्जलिम् ॥
नित्यं नद्यां प्रदातव्यमष्टोत्तरसहस्रकम्।
परस्परं भवेद् द्वेषः सिद्धयोग उदाहृतः ॥

"ओं आमोदकि प्रमोदकि गौरि मे गौरि! अमुकस्य अमुकेन सह काकोलूकादिवत् कुरु कुरु स्फ्रों स्फ्रों स्वाहा" ॥ १३ ॥

अथ व्याधिजननम्।

विल्ववृक्षोद्भवैः काष्ठैः करण्डं कारयेद् बुधः।

---

* नरः इत्यस्याग्रे यान् यान्, एवं पश्येद पदात् परं त ते शेषांशत्वेन योजनीये

पिचुमर्द्दोद्भवैः काष्ठैः पिधानं कारयेद् ततः॥
तत्र मध्ये क्षिपेन्मूर्त्तिमुत्तानां जीवितान्विताम् *।
वर्त्तिमुच्छिष्टसिक्तां वा शत्रोस्तस्योदरे क्षिपेत्॥
कीलयेत् कण्टकेनैव निखनेत् सम्पुटे क्षिपेत्।
व्याधिस्तस्य भवेच्छत्रोः पुनस्तत् चालनात् सुखी॥ १॥
भल्लातकरसो गुञ्जा ऊर्णनाभिः सुचूर्णितम्।
क्षिपेद्रात्रौ भवेत् कुष्ठं सिताक्षीरं पिबेत् सुखी॥ २॥
वानरीफलरोमाणि विषभल्लातचित्रकम्।
गुञ्जायुतं क्षिपेद्रात्रौ स्याल्लूता वेदनान्विता॥
उशीरं चन्दनञ्चैव प्रियङ्गुं रक्तचन्दनम्।
तगरं पेषयेत् तोयैर्लेपाल्लूतां विनाशयेत्॥ ३॥
कृष्णसर्पशिरो ग्राह्यं तद्वक्त्रे सर्षपान् क्षिपेत्।
कृष्णभल्लाततैलाभ्यां कृष्णसूत्रेण वेष्टयेत्॥
वल्मीकमृत्तिकालिप्तं श्मशाने तु विपाचयेत्।
सुपक्वसर्षपाः ग्राह्याः वानरीरोमसंयुतः॥
शरद्ग्रीष्मवसन्तेषु गात्रे वा मूर्ध्नि निक्षिपेत्।
प्रक्षेपाज्जायते लूता शत्रूणां वेदनान्विता॥
प्रियङ्गुशर्कराकुष्ठ-रक्तपङ्कजकेशरैः।
गिरिकर्णी निशा निम्बस्त्वजाक्षीरेण लेपयेत्।
सप्ताहाज्जायते स्वस्थः कृपा चेद्रक्षयेद्रिपुम्॥
"ओं नमो भगवते उड्डामरेश्वराय भूवाहने उन्मने [स्वा]हा"। उक्तयोगानामयं मन्त्रः॥ ४॥
बहुरूपधरो यस्तु सञ्चूर्ण्य कृकलासकम्।
रक्तसर्षपमूलञ्च निष्कैकं भोजने † क्षिपेत्।

---

* जीवितान्वितामित्यनेन प्राणप्रतिष्ठया कृतां सञ्जीवनसंस्काराम्।

† भोजने द्रव्यत्र साध्यस्येति सम्बन्धयोजनयाऽन्वयो ज्ञेयः।

गलत्कुष्ठी भवेच्छत्रुः स्वस्थो वा जायते क्वचित् ॥ ५ ॥
कृकलासं ग्रामचिल्लीं शाकं रक्तञ्च सार्षपम्।
पिष्ट्वा तद्भक्षणादेव ह्यङ्गस्फोटकरं रिपोः ॥ ६ ॥
श्वेतापराजिता गुञ्जा सुश्वेता च जयन्तिका।
पिष्ट्वा तद्भक्षणादेव समन्त्रेण निवर्त्तते।
बालकं चन्दने द्वे च लेपोऽप्यत्र सुखावहः ॥

"ओं नमो भगवते उड्डामरेश्वराय कम्पने धूनने मु मुञ्च दुर्गो सः" ॥ ७ ॥

कृकलासोद्भवं चर्म रिपुमूत्रेण पूरयेत्।
मुखं बद्ध्वाऽश्ववालेन खनेद्भूमावधोमुखम्।
मूत्ररोधी भवेत् तच्चोद्धृत्य चालनतः सुखम् ॥ ८ ॥
उलूकमस्तकं ग्राह्यं लवणेन प्रपूरयेत्।
सप्ताहं ताम्रपात्रस्थमक्षकाष्ठेन चाञ्जयेत् ॥
दृष्टिस्तम्भकरं तत् स्यान्मरिचाक्षफलं तथा ॥ ९ ॥
त्र्यङ्गुलं त्वनुराधायामङ्कुलीमूलमाहरेत्।
चक्षूरोगकरं गेहे निखनेद्वैरिणां ध्रुवम् ॥

"ओं अन्धे रहः अन्धे रहः स्वाहा" ॥ १० ॥

धुस्तूरकाष्ठैर्दग्ध्वादौ भ्रमरं मधुपूरितम्।
जलकुम्भे क्षिपेत् तत्तु तत्पानाद्बधिरो रिपुः।
जातीपुष्परसं पीत्वा स्वस्थो भवति तत्क्षणात् ॥ ११
स्नुहीक्षीरं यवक्षारं मृद्वनं पादपांशुकम्।
सममेतत्प्रलेपेन शत्रुः खञ्जो भवत्यलम् ॥

"ओं नमो भगवते उड्डामरेश्वराय रुद्रशेखराय खच सङ्कोचने ठः ठः" ॥ १२ ॥

तण्डुलीं पिप्पलीं शिग्रुमारणालेन पेषयेत्।
लेपे पाने खाञ्जनाशः शत्रूणां नात्र संशयः ॥ १३ ॥

कृष्णसर्पस्य रक्तेन नीलमक्षीकपोतविट्।
विष्ठां * विलेपयेद् यस्य खञ्जो भवति तत्क्षणात्।
तिलतैलैर्वलायुग्मं पिष्ट्वा लिप्त्वा सुखी भवेत्॥ १४॥
सर्षपञ्च शिलां तालं रौद्रतैलेन पाचयेत्।
अभ्यङ्गे पादसङ्कोचं स्वस्थस्तैलाक्तरञ्जनात्॥

"ओं नमो भगवते रुद्रशेखराय उड्डामरेश्वराय चल-मालिने स्वाहा"॥ १५॥

रक्तेन कृकलासस्य सर्पस्य हरितस्य वा।
रञ्जिते लङ्घिते सूत्रे योषिद्रक्तं स्रवत्यलम्।
उल्लङ्घने पुनः स्वस्था जायन्ते वरयोषितः॥ १६॥
स्त्रीमूत्रभूमौ सार्द्रायां निखनेत् कृष्णवृश्चिकम्।
वराङ्गे जायते दुःखमुद्धृते तु पुनः सुखम्॥ १७॥
जम्बीरवृक्षं हस्तर्क्षे दत्ते स्त्री दुर्भगा भवेत्।

"ओं नमो भगवते उड्डामरेश्वराय अमुकं गृह्ण गृह्ण ठः ठः"। उक्तयोगानामयं मन्त्रः॥ १८॥

भृङ्गीमूलं समुद्धृत्य कृष्णाष्टम्याञ्च चूर्णयेत्।
भक्ष्ये पाने क्षिपेन्मूर्ध्नि ज्वरातीसारकृद्भवेत्।
वाजिकर्णीयमूलेन स्वास्थ्यमुत्पद्यते पुनः॥ १९॥
मुण्डमांसमुलूकस्य समञ्च खरकाकयोः।
संगृह्य दासमुच्चार्य सोपवासो जपेदमुम्॥
ज्वरेण दह्यते शत्रुरहोरात्रे कृते जपे।
शुचिर्भूत्वा समाविष्टः सम्मुखः स्नानमाचरेत्।
आतुरस्य स्वयञ्चैव देवाग्रे जायते सुखी॥ २०॥
कलुलीवदने † क्षिप्तं ताम्बूलं वैरिणां मुखात्।

---

* अत्र विष्ठाम् इति शर्वोर्विष्ठां गृहीतुर्मेढ्रां समन्वयबोधे सन्दिहानः।

† कलुलीवदनपदेन तान्त्रिकपारिभाषिकं निष्ठीवनपात्रं बोध्यम्।

दन्तकाष्ठं च वा तेषां गोनासवदने क्षिपेत्।
आस्यरोधो भवेत् तस्य दुष्टानां दण्ड ईदृशः॥ २१॥
कृष्णसर्पमुखे न्यस्तां शत्रूणां मूत्रमृत्तिकाम्।
वेष्टयेत् कृष्णसूत्रेण मूत्ररोगेण बाध्यते॥ २२॥
श्वेतस्य करवीरस्य मूलं पुष्पञ्च चूर्णयेत्।
विल्वमज्जा तु तद्भक्ष्ये दत्तं स्याच्छर्दिकृद्रिपोः॥ २३॥
भावयेत् पूगखण्डानि वज्रीक्षीरेण सप्तधा।
ताम्बूले तस्य तद्दत्तं तस्योष्ठे श्वेतकुष्ठकृत्॥ २४॥
ताम्बूले इन्द्रगोपञ्च दत्त्वास्ये श्वेतकुष्ठकृत्।
प्रत्यायनं यथापूर्वं भक्ष्या वा सोमराजिका॥

"ओं नमो भगवते रुद्राय उड्डामरेश्वराय अमुकं रोगेण गृह्ण गृह्ण पच पच ताड़य छेदय हुं फट् ठः ठः"। उक्तयोगानामयं मन्त्रः॥ २५॥

अजा-गो-घृतधूपेन सुखं सञ्जायते ध्रुवम्।
धुस्तूरबीजेन्द्रयवं पारावतमलं समम्।
ग्रहावेशकरो धूपो वामानां नात्र संशयः॥

"ओं गृह्ण गृह्ण सुभगे ठः ठः"। उक्तयोगानामयं मन्त्रः॥ २६॥

लिखेन्नामाङ्कितं मन्त्रं श्मशानोद्धृतभस्मना।
हस्तार्द्धं त्वङ्गुलं कीलं करवीरककाष्ठजम्॥
निखनेत् कुम्भकारस्य शालायां भाण्डनाशकृत्।
गोक्षुरं शृङ्गवेरञ्च वीजं वा कोकिलाक्षजम्॥ २७॥
शूकरस्य मलं वाऽथ मूलं वा श्वेतगुञ्जकम्।
पाकस्थाने तु भाण्डानां क्षिप्ता स्फोटयते ध्रुवम्॥ २८॥
लताकरञ्जवीजं वा टङ्कणेन सहैव तु।
कृत्वा भाण्डं स्फुटत्येव उक्तानां मन्त्र उच्यते॥

"ओं मदन मदन स्वाहा"॥ २९॥

मधूककाष्ठकीलन्तु चित्रायां चतुरङ्गुलम्।
निखनेत् तैलशालायां तैलं तत्र विनश्यति ॥ ३० ॥
कोकिलाक्षस्य बीजानि तैलयन्त्रस्य मध्यतः।
निक्षिपेत् तैलभाण्डे वा न तैलं निःसरेत् ततः ॥
"ओं दह दह स्वाहा" ॥ ३१ ॥
रजकस्थानमृद्ग्राह्या वज्राकारान्तु कारयेत्।
पण्यागारेऽथवा क्षेत्रे क्षिप्ते तत्र विनश्यति ॥
"ओं नमो भगवते वज्रिणे पातय वज्रं सुरपतिराज्ञापयति फट् स्वाहा" ॥ ३२ ॥
यत्रेन्द्रचाप उत्तिष्ठेत् तत्र वल्मीकमृत्तिकाम्।
आदाय कारयेद्वज्रं षट्कोणं दृढमद्भुतम् ॥
क्षेत्रमध्ये क्षिपत्येव शस्यनाशो भवेद् ध्रुवम्।
सुराभाण्डे विनिक्षेपात् तद्भाण्डञ्च विनश्यति ॥
"ओं नमो भगवते वज्रकिरणे वज्रं पातय पातय एह्येहि [भग]वन्! सुरपतिराज्ञापयति स्वाहा" ॥ ३३ ॥
गन्धकं चूर्णितं क्षेप्यं जलकुल्यान्तु तेन वै।
नाशयेत् सर्व्वशाकानि सेकादुपवनानि च ॥ ३४ ॥
वालुकां श्वेतसिद्धार्थान् प्रक्षिपेत् क्षेत्रमध्यतः।
शलभाः सरसाः कीटा वराहा मृगमूषिकाः।
शशका तत्र नायान्ति मन्त्रविद्याप्रभावतः ॥
"ओं नमः सुरेहो वलजः परि परि शिलि स्वाहा"।
सुरासुरान् नमस्कृत्य इमां विद्यां प्रयोजयेत्।
एषा प्रयोगमात्रेण विद्या मे सिध्यते शिवा ॥ ३५ ॥
"जम्बुकानां मूषिकाणां मृगाणां वकानां शशकानामन्येषां [प्रा]णिनां दुष्टानां बन्धं करोति"।
"आर्द्रपाणी कृतघ्नस्य तेन पापेन लिप्यते।

"यदि मन्त्रो न व्यतिक्रमेति स्वाहा"। एतन्मन्त्रद्द वालुकाभिः सह श्वेतसर्षपान् सप्तवारमभिमन्त्र्य चेत्रम निक्षिपेत्, सर्व्वोपद्रवा नश्यन्ति ॥ ३६ ॥

मूषजम्बुककीटानां कुरुते तुण्डबन्धनम्।
विद्यामङ्गदनाथस्य मन्त्रं वा भैरवस्य च * ॥

"ओं नमो जगन्नाथाय हर हर श्लिलि सर्व्वेषां त्वं प्राणि तुण्डबन्धनं कुरु कुरु मूकमूषककीटपतङ्गादिप्राणिनां तु बन्धनं कुरु कुरु हुं फट् स्वाहा"। अनेन मन्त्रेण यवं स वाराभिमन्त्रितं वाटिकामध्ये निक्षिपेत्, पुष्पं फलं सम निरुपद्रवं भवति ॥ ३७ ॥

अथ षण्डीकरणम्।

नरो मूत्रयते यत्र कृष्णवृश्चिककण्टकम्।
निखनेज्जायते षण्ड उद्धृते च पुनः सुखी ॥ १ ॥
अजामूत्रेण सम्भाव्या निशा षड्बिन्दुचूर्णकम्।
पानाशनप्रयोगेण षण्डत्वं जायते नृणाम् ॥ २ ॥
तिलगोक्षुरयोश्चूर्णं छागीदुग्धेन पाचितम्।
शोलितं मधुना युक्तं पिबेत् षण्डत्वशान्तये ॥ ३ ॥
जलौकादग्धचूर्णन्तु नवनीतेन भक्षितम्।
यावज्जीवं न सन्देहो यूनां षण्डत्वकारकम्।
धुस्तूरपुष्पभक्ष्येण पुनः सम्पद्यते सुखम् ॥ ४ ॥
अमायान्तु रवौ ग्राह्यं करञ्जस्य तु मूलकम्।
सगुड़ं भक्षणात् सद्यः षण्डत्वं जायते नृणाम् ॥ ५ ॥
वृषोवृषाणां सङ्ग्राह्यमन्तरीक्षेण गोमयम्।
साध्यस्य प्रतिमा तेन कृत्वाण्डे तस्य षण्डयेत्।

* अङ्गदनाथस्य विद्याम् अथवा भैरवस्य मन्त्रञ्च अतः परमेव कथयामि इत्य योजना।

तत्क्षणाज्जायते षण्डो मन्त्रेणानेन मन्त्रितः ॥

"ओं नमो भगवते उड्डामरेश्वराय कामप्रचण्डाय हन हन वैनतेय मुखेन खण्डय खण्डय स्वाहा"। अयं मन्त्रः सर्वषण्डीकरणे प्रयोज्यः ॥ ६ ॥

नक्षत्रे ह्यनुराधायां लाङ्गलीमूलमुद्धरेत्।
निशामूत्रस्थले पुंसो निखनेत् षण्डतां व्रजेत्।
समुद्धृत्य पुनः स्वास्थ्यं पूर्वमन्त्रेण योजयेत् ॥ ७ ॥

अथ भगबन्धनम्।

स्वदाररक्षणार्थाय विश्वामित्रप्रकाशितम्।
यथा—पूर्वोक्तं लाङ्गलीमूलं वामपादस्य पांशुकम् ॥
शुक्तिसम्पुटकं द्वाभ्यां लेपयेद्भगबन्धनम्।
नारीणां युवतीनां स्यात् तक्रैः क्षाल्यं विमुक्तये ॥ १ ॥
श्मशानभस्म चादाय वामपादस्य पांशुकम्।
सन्ध्यायां बन्धयेत् तेन पोटली भगबन्धनी ॥
सशोणितं स्फुरद्रन्ध्रं बध्नामि ह्यमुकीभगम्।
मत्कृत्या भगबन्धायाः नास्ति तस्याः चिकित्सितम् ॥
पतिर्वा तस्य भ्राता वा ये चान्ये भगमर्दकाः।
सर्वे चैतद्विधा यान्ति वर्ज्यते कामुकैस्तथा ॥

"ओं चिटि चिटि खचिटि खचिटि ठः ठः"। उक्तयोगद्वये अयमेव मन्त्रः ॥ २ ॥

तच्चैलं चन्दनं क्षीरैः क्षाल्यमर्थो भवेद्भगः।
यन्त्रे मन्त्रादितन्त्रेण * स सिद्धो मन्त्र उच्यते ॥
सप्ताभिमन्त्रितं तोयं शुद्धं प्रातः पिबेन्नरः।
तस्य शत्रुकृतो दोषः शत्रोरेव भविष्यति ॥ ३ ॥

---

* मन्त्रादितन्त्रेणेति पदात्परं युक्तिविद्येन इति शेषांशं संयोज्यान्वयः कार्यः।

अथ गृहक्लेशनिवारणम्।

तक्रपिष्टेन तालेन क्षिपेत् पुत्तलिकां कृताम्।
तामाघ्राय गृहाद् यान्ति मक्षिका नात्र संशयः॥ १॥
गुड़ार्कदुग्धगुञ्जोत्थं तिलचूर्णसमन्वितम्।
अर्कपत्रेषु विन्यस्तं मूषिकं संहरेत् गृहे॥ २॥
धुस्तूरवीजचूर्णञ्च विषञ्च पेषितं तिलम्।
तैरेव विषपाषाणं मीनतैलेन पेषितम्॥
वटिकां स्थापयेद् गेहे जलं रात्रौ निरुन्धयेत्।
भक्षणात् पञ्चतां यान्ति तृष्णार्त्ता मूषिका ध्रुवम्॥३॥
तालकं छागविण्मूत्रं सपलाण्डु सुपेषितम्।
आलिप्य मूषिकं तेन सजीवन्तु विसर्जयेत्॥
तद् दृष्ट्वैव गृहं त्यक्त्वा पलायन्ते हि मूषिकाः॥ ४॥
मार्जारस्य मलं तालं पिष्ट्वाऽऽलिम्पेच्च मूषिकाम्।
तमाघ्राय गृहं त्यक्त्वा सद्यो निर्यान्ति मूषिकाः॥ ५॥
गन्धकं हरितालञ्च ब्राह्मी त्रिकटुकं समम्।
रवौ नृमूत्रे तत् पिष्ट्वा लिप्ते मूषे तु पूर्ववत्॥ ६॥
मघायां व्रभ्रकं चैत्रे स्थापयेन्मधुकोद्भवम्।
पक्षिणां मूषिकाणाञ्च जायते तुण्डबन्धनम्॥ ७॥
मूषिकाकर्षकं यावत् साम्बरी गुड़तैलतः।
कुलीरवसया चूर्णं कृतं तस्यैव कर्पटे।
दीपो मत्कुणसङ्घातं रात्रौ वा कर्षयेद् ध्रुवम्॥ ८॥
कट्यां कुम्भीजटां बद्ध्वा शयनाद् यान्ति मत्कुणाः।
रोहिषतृणपुष्पाणि वह्निमध्ये निवेशयेत्।
तद्दीपदर्शनादेव क्षिप्रं नश्यन्ति मत्कुणाः॥ ९॥
अर्कतूलमयीं वर्त्तिं भावयेद् यावकेन च।
दीप्तां तां कटुतैलेन निःशेषा यान्ति मत्कुणाः॥ १०॥

अर्ज्जुनस्य फलं पुष्पं लाक्षा श्रीवासगुग्गुलुः।
श्वेतापराजितामूलं भल्लातकविकङ्कते॥
धूपः सर्जरसोपेतः प्रदेयो गृहमध्यतः।
सर्पाश्च मत्कुणा मूषा गन्धाद् यान्ति दिशो दश॥ ११॥
गुड़श्रीवासभल्लात-विड़ङ्गत्रिफलायुतम्।
लाक्षारसोऽर्कपत्रञ्च धूपे मशकमत्कुणान्।
नाशयेन्नात्र सन्देहः सर्पमूषकवृश्चिकान्॥ १२॥
मुस्तसिद्धार्थभल्लात-कपिकच्छुफलं गुड़म्।
चूर्णं भानुफलोपेतं दहेत् सर्जरसान्वितम्॥
मत्कुणा मशकाः सर्पा मूषका विषकीटकाः।
पलायन्ते गृहं त्यक्त्वा यथा युद्धेषु कातराः।
राजवृक्षफलं बद्धं खट्वायां मत्कुणापहम्॥ १३॥
लाक्षा सर्जरसोशीर-सर्षपाः पत्रकं पुरम्।
भल्लातकविड़ङ्गानि रेणुकं पुष्करं तथा॥
अर्जुनस्य तु पुष्पाणि समचूर्णानि लेपयेत्।
सर्पकीटकलूतानि पलायन्ते न संशयः।
दर्दुरान् मशकान् हन्ति धूपाद्वा गृहधारणात्॥ १४॥

इति श्रीसिद्धनागार्जुनविरचिते कक्षपुटे
एकादशः पटलः।

अथ कौतुकम्।

नासारन्ध्रद्वयं लिप्त्वा गोघृतेन ततो मुखे।
क्षिपेद्बिम्बीफलं यस्य कुयोगैः स न बाध्यते॥ १॥
तगराञ्जितनेत्रो वा तगरेणाऽथ धूपितः।
पूर्व्वं रक्षाविधिं कृत्वा पश्चात् कौतुकमावहेत्।

विना रक्षाविधानेन यः करोति स सीदति ॥ २ ॥
श्मशानतरुमूलेन कीटोत्पाताङ्गुलीयकम् ।
मृतनिर्माल्यसंयुक्तं रक्तसूत्रेण वेष्टयेत् ।
तेन निःशेषलोकस्य जायते दृष्टिबन्धनम् ॥ ३ ॥
घुणतालकपञ्चाङ्गं कनकेन युताऽथवा ।
मुद्रिका सर्वलोकस्य पाणिस्था दृष्टिबन्धकृत् ।
स्वपादे धारयेदेनां पश्चात् सिध्यति कौतुकम् ॥ ४ ॥
भौमपुष्ये तु सङ्गृह्य कृकलासं मनोहरम् ।
स्थापयेन्नवभाण्डे तु रक्तपुष्पैश्च पूजयेत् ॥
धूपदीपाक्षतैर्गन्धैर्नैवेद्यं मन्त्रसंयुतम् * ।
वामहस्तकनिष्ठायाः स्वस्य रक्तेन सेचयेत् ।
सप्ताहं पूजयेदेवं शस्तः स्यात् सर्वकर्मसु ॥
"ओं अङ्कोलाय ओं रः ओं क्रीं क्रीं क्रीं स्वाहा" ।
मन्त्रेणानेन पूजायां शतमष्टोत्तरं जपेत् ।
शुद्धात्मा साधकस्तेन सर्वसिद्धिकरं भवेत् ॥ ५ ॥
छायाशुष्कं मृतं तच्च सञ्चूर्ण्य लेपयेत् कटिम् ।
सवस्त्रमपि तं लोका नग्नमालोकयन्ति हि ॥ ६ ॥
तच्चूर्णं तालपत्रन्तु लेपितं सर्पसम्भवम् ।
नागवल्लीदलं लिप्तं भूमौ क्षिप्तं समुत्पतेत् ॥ ७ ॥
तच्चूर्णं कौमुदं कन्दं नागवल्लीदलान्वितम् ।
लिम्पेद्भाण्डं पेषयित्वा तद्भाण्डे न विशेज्जलम् ॥ ८ ॥
मयूरन्तु शिलातालं भोजयित्वाऽहसप्तकम् ।
तद्विष्ठालिप्तहस्तश्चादृश्यं शक्रोऽपि नेक्षते ॥ ९ ॥
सप्ताहं तिलतैलेन भावयेदातपे खरे ।

* अत्र धूपदीपाक्षतैः गन्धैः सह नैवेद्यम् इत्यन्वयार्थः ।

अङ्कोलवीजचूर्णन्तु शोष्यं पेष्यं पुनः पुनः॥
तत् तैलं ग्राहयेच्चैव तैलकारस्य यन्त्रतः।
अथवा कांस्यपात्रे हि तेन कल्केन लेपयेत्॥
उत्थाप्य स्थापयेद् घर्मे सम्मुखन्तु परस्परम्।
तयोरधः कांस्यपात्रे पतितं तैलमाहरेत्।
इदमेवाङ्कुलीतैलं * सर्वयोगेषु योजयेत्॥ १०॥
लिप्तमाङ्कोलतैलेन मुण्डितं तत्क्षणाच्छिरः।
पूर्ववत् पूर्य्यते केशैः सद्य एव न संशयः॥ ११॥
तत् तैललिप्तमाम्राण्डं शोषितं निखनेत् क्षणात्।
सफलो जायते वृक्षस्तत्क्षणान्नात्र संशयः॥ १२॥
पद्मिनीवीजचूर्णन्तु भाव्यमङ्कोलतैलतः।
न्यस्तं जले महाश्चर्य्यं तत्क्षणात् कमलोद्भवः॥ १३॥
वीजं नीलोत्पलोद्भूतं सिक्तमङ्कोलतैलतः।
न्यस्तं जले महाश्चर्य्यं तत्क्षणात् पुष्पसम्भवः॥ १४॥
यानि कानि च वीजानि जलजस्थलजानि च।
अङ्कुलीतैललिप्तानि क्षणात्तान्युद्भवन्ति वै॥ १५॥
यत्किञ्चिद्धातुमूलस्य पत्रपुष्पफलादिकम्।
अङ्कुलीतैललिप्तं तदनुरूपं भविष्यति॥ १६॥
छत्राक्षमङ्कुलीतैलं त्वक् पत्रं शिशिरं जलम्।
तालकं,सर्पनिर्मोकं शिखिपित्तेन संयुतम्॥
रवौ कन्यकया पिष्टं छायाशुष्कं वटी कृता।
तया कुमुदनालस्य स्पर्शात् सर्पाकृतिर्भवेत्॥ १७॥
वटिकास्पर्शमात्रेण मृत्तिका लोहवद्भवेत्।
ताम्रभाण्डानि सर्वाणि तया लिप्तानि हेमवत्।

---

* अङ्कोलतैलस्यैव तान्त्रिकाणाम् अङ्कुलीतैलाङ्कुलीतैलेति संज्ञाद्वयम्।

दृश्यन्ते तप्ततोयेन चालितानि सुधाभ्रवत् ॥ १८ ॥
दृश्यन्ते रक्तगुञ्जाश्च श्वेतास्तल्लेपतो ध्रुवम् ।
अच्छपत्रं तया स्पृष्टं दृश्यते कांस्यभाजनम् ॥
स्नुहीपत्रे तया लिप्ते शुष्कवद्दृश्यते जलम् ।
तया लिप्ते नृकर्णे तु दृश्यते छिन्नशीर्षवत् ॥ १९ ॥
रवीन्दुग्रहणं भाति तया लिप्ते तु दर्पणे ।
अङ्गुली च तया लिप्ता द्विधा संदृश्यते ध्रुवम् ॥ २० ॥
भाण्डपाकस्थलाद्भस्म कुम्भकारस्थलाद्धरेत् ।
सार्द्धं गुटिकया भस्म मुष्टिबन्धं भुवि क्षिपेत् ।
समुद्रो दृश्यते लोकैः सत्यं चित्रं शिवोदितम् ॥ २१ ॥

इति श्रीसिद्धनागार्जुनविरचिते कक्षपुटे कौतुकं नाम द्वादशः पटलः ।

इन्द्रजालविद्यासाधनम् ।

आश्चर्यगुटिका ।

स्नुक्क्षीरं कानकं वीजं चूर्णं रक्तं भवेत् ततः ।
वस्त्रेण वेष्टिताधारा क्षुरस्येव तु रंहसा ।
छिनत्ति केशसङ्घातं सवस्त्रा चातिकौतुकम् ॥ १ ॥
गुञ्जाफलैः शुक्तपिष्टैर्लेपयेत् काष्ठपादुकाम् ।
विना बन्धं नरो गच्छेत् क्रोशमेकं न संशयः ॥ २ ॥
लघुदारुमयं पीठं गुञ्जापिष्टेन लेपयेत् ।
शुष्के चास्मिञ्जले क्षिप्ते ह्युपविष्टो न मज्जति ॥३॥
गुञ्जावीजं त्वचोन्मुक्तं चूर्णं भाव्यं नृमूत्रके ।
सप्तवारं ततः कांस्ये लिप्तमङ्गोल्लवद्भवेत् ।
तैलमादाय तल्लिप्ते * पूर्ववत् पादुकागतिः ॥ ४ ॥

---

* पादुकाफलके तल्लिप्ते सतीत्यन्वयः ।

एरण्डस्य च वीजानि निम्बतैलं तथैव च।
वर्त्तिं सर्जरसोपेतां तैललिप्तां जले क्षिपेत्।
ज्वलिता दीपवत् तिष्ठेद् यावद्वर्त्तिर्न संशयः॥ ५॥
शिलातालकसिन्दूर-रोचनाञ्जनहिङ्गुलम्।
कूर्मभुक्तमिदं पश्चात् तद्विष्ठां लेपयेत् करे।
नटा नृत्यान्निवर्त्तन्ते दर्शनान्मुष्टिवन्धनात्॥ ६॥
तच्च कूर्मन्तु सप्ताहात् तालकं भोजयेत् शुभम्।
तन्मलैर्लेपयेत् पाणिं मुष्टिबन्धं प्रदर्शयेत्।
निवर्त्तन्ते नटाः सर्वे सभ्याः पश्यन्ति कौतुकम्॥ ७॥
उलूकस्य कपालेन घृतेनाहृतकज्जलम्।
तेन नेत्रेऽञ्जिते चित्रं रात्रौ पठति पुस्तकम्॥ ८॥
उलूकहृदयं पित्तं काकपित्तञ्च शोणितम्।
एतद्दत्त्येञ्जिते रात्रौ विचरेद्दिवसे यथा॥ ९॥
रजनीचिरजीवानां विषरक्ताक्षिचूर्णकम्। *
अञ्जिताक्षो नरस्तेन कृष्णरात्रौ तु पश्यति॥ १०॥
शिखिपारावतभवा खञ्जरीटपुरीषजा।
गुटिकास्पर्शमात्रेण तालयन्त्रं भिनत्त्यलम्॥ ११॥
भल्लूकव्याघ्रमहिषचासगृध्रविलोचनैः।
स्रोतोऽञ्जनेनाञ्जिताक्षो दिवावत् निशि पश्यति।

"ओँ नमो भगवते रुद्राय ज्योतिषाय शिवाय पतये दातव्यस्य ते वीजं मे देहि स्वाहा"।

अनेन सिद्धमन्त्रेण हि सर्वाण्यञ्जनानि च।
शिवायै दापयेद्युक्तः सर्वसिद्धिः करस्थिता॥ १२॥
पाठामूलं गले बद्धा चौरभाण्डस्थतद्विधिः।

* अत्र चिरजीवविषशब्दौ कृकलासवसाबोधकौ यथाक्रमम्।

जायते तत्क्षणादेव सत्यमेतन्न संशयः ॥
गन्धकैरेव धूपेन पुष्पाणामन्यवर्णता ॥ १३ ॥
कृष्णं श्वानं मृतं रक्षेद् यावत् क्रिमिकुलाकुलम् ।
श्वेतस्योपोषितस्यैव कुक्कुटस्य तु तान् क्रिमीन् ॥
यथेष्टं भक्षणे दद्याद्विष्ठां तस्य समाहरेत् ।
तदन्नं क्रिमिवल्लोकैर्भक्ष्यमाणं विलोक्यते ।
पलायन्ते च तं दृष्ट्वा मूर्च्छन्ति च पतन्ति च ॥१४॥
कटुतुम्ब्यस्थतैलेन पारावतभवं मलम् ।
मूलञ्च पेषितं तेन गर्दभस्यास्थि चैव हि ॥
ललाटे तिलकं तेन कृत्वाऽसौ दृश्यते जनैः ।
दशास्यो नात्र सन्देहो यथा लङ्केश्वरो नृपः ॥ १५ ॥
शिग्रुबीजोत्थितं तैलं पारावतपुरीषकम् ।
वराहस्य वसायुक्तं शिखिमूलं समं समम् ।
ललाटे तिलकं तेन यः करोति स वै जनः ।
पञ्चास्यो दृश्यते लोकैर्यथा साक्षात् सदाशिवः ॥ १६ ॥
सद्योहतस्य वीरस्य ग्राह्यं चौरस्य वा शिरः ।
तद्वक्त्रे कृष्णधुस्तूरबीजं वाप्यं समृत्तिकम् ॥
रात्रौ कृष्णचतुर्दश्यामाषाढ़े भैरवं यजेत् ।
नानाविधोपहारेण पुष्पधूपाक्षतादिभिः ॥
शिरः खनेत् कृष्णभूमौ भुक्तोच्छिष्टेन सेचयेत् ।
दीपं रात्रौ सदा दद्यात् सूत्रवर्त्त्याज्यसंयुतम् ॥
सफलन्तु भवेद् यावत्तावद्रक्षेच्च पूजयेत् ।
ग्राह्यं कृष्णचतुर्दश्यां बलिं दद्याच्च कुक्कुटम् ॥
पञ्चाङ्गं पेषयेत् तस्य वटिकां कारयेद्दृढ़ाम् ।
ललाटे तिलकं कुर्य्यात् स नरो दृश्यते जनैः ।
तादृशस्तु सहस्राक्षरूपो नैवात्र संशयः ॥ १७ ॥

रात्रौ कृष्णचतुर्दश्यां मयूरास्ये विनिक्षिपेत्।
भृङ्गीबीजं मृदं कृष्णां कृष्णभूमौ निधापयेत्॥
तज्जातभृङ्गी संग्राह्या ह्यर्चयेत् रक्तपुष्पकैः।
तत्पुष्पकर्णः पुरुषो मयूरो दृश्यते जनैः॥ १८॥
तद्‌योगि कृष्णमार्जारमुखे चैरण्डबीजकम्।
तज्जातैरण्डबीजानामेकं वक्त्रे निधापयेत्।
तं प्रपश्यन्ति मार्जारं मनुष्या नात्र संशयः॥ १९॥
शृगालश्वानमेषाजवदने वापयेत् पृथक्।
मयूरास्ये यथा भृङ्गी जाता सिद्धिश्च तादृशी॥ २०॥
मृता या श्वपची नारी तस्या योनौ तु खादिरम्।
कीलकं निक्षिपेत् पश्चाद्दग्ध्वा भस्म समुद्धरेत्।
तेनैव तिलकं कृत्वा श्वपचीरूपधृग्भवेत्॥ २१॥
रक्तगुञ्जाफलं वाप्य नृकपाले च सेचयेत्।
जातं फलं क्षिपेद्वक्त्रे स्त्रीरूपो दृश्यते नरः॥ २२॥
विषं गुञ्जोत्थितं तैलं सर्पपित्तञ्च पेषयेत्।
सकुष्ठं तिलकं यस्य तं पश्यन्ति मयूरवत्॥ २३॥
विषगुञ्जोत्थतैलेन पाणिलेपेन कुञ्जरः।
भल्लूकः पादलेपेन जिह्वालेपेन चन्द्रमाः।
गणेशः कुक्षिलेपेन ग्रीष्म सर्वाङ्गलेपतः॥ २४॥
रात्रावङ्कोलतैलेन लिप्ताङ्गो दृश्यते नरैः।
दीर्घदंष्ट्रोर्द्ध्वरोमा च रूपं रौद्रं वहन्नरः॥ २५॥
नवभाण्डे विनिक्षिप्य छिन्ननासान्तु मूषिकाम्।
सनासं कृकलासञ्च पृथग्भाण्डे विनिक्षिपेत्।
उपवासत्रये जाते तयोर्दद्यात्तु भोजनम्।
मलं तयोः पृथक् ग्राह्यं तेन नासां प्रलेपयेत्।
छिन्ननासः प्रदृश्येत क्षीरलेपान्निवर्त्तते॥ २६॥

अश्वस्य तु मृतं वालं गृहीत्वा तस्य चोदरे।
हरिद्रां खण्डशः कृत्वा चिपेद् यावत् प्रपूर्य्यते॥
तं रात्रौ निखनेद्भूमौ मन्त्रेणानेन पूजयेत्।
तत्पश्चाङ्गं समुद्धृत्य रजनीं शोष्य पेष्य * च॥
मन्त्रस्तु।—"श्रीं अरुः श्रीं रः"।
अनेन मन्त्रराजेन सिद्धात्मा संयतेन्द्रियः।
स बालकादियोगान्तं कर्म कुर्य्यात् समाहितः॥
श्वेतदूर्वाऽऽरनालैश्च हरिद्रां तां प्रलेपयेत्।
तल्लिप्तदेहः पुरुषः पञ्चधा दृश्यते नरैः॥ २७॥
तां निशां सर्षपं श्वेतं पिष्ट्वा चाङ्कोलतैलतः।
तल्लिप्ताङ्गं नरं दृष्ट्वा चित्रं पश्यन्ति सप्तधा।
गोमूत्रेण पुनः स्नानादेक एव प्रदृश्यते॥ २८॥
अलक्तं तां निशां पिष्ट्वा देहसन्धिं प्रलेपयेत्।
भिन्नं संदृश्यते सोऽपि पूर्वस्नानान्निवर्त्तते॥ २९॥
हरिद्राऽङ्कोलतैलाभ्यां लिप्ताङ्गो दृश्यते नरः।
राक्षसोऽपि महारौद्रो ह्यस्य स्नानान्निवर्त्तते॥ ३०॥
नरादिसर्वजीवानां ग्राह्यं सद्योहतं शिरः।
यत्र कृष्णचतुर्दश्यां शणवीजान्वितं वपेत्॥
भङ्गीधुस्तूरवातारि-गुञ्जानां चैकसंयुतम्।
निखनेत् कृष्णभूम्यन्तर्बलिपूजासमन्वितम्॥
सेचयेत् फलपर्य्यन्तं ततः वीजानि चाहरेत्।
तत्तद्बीजे गते वक्त्रे तत्तद्रूपो भवत्यलम्॥
इत्येवं कौतुकं लोके नानारूपस्य दर्शनम्।
मुक्ते वीजे भवेत् स्वस्थो नात्र कार्य्या विचारणा॥३१॥

* शोष्य पेष्येति इयमार्षं पदं शोषयित्वा पिष्ट्वा स्थाने बोध्यम्।

कृकलासस्य रक्तेन ह्यर्द्धलिप्तन्तु दर्पणम्।
संस्थापयेन्निरेर्मूर्ध्नि ग्रहणं दृश्यते नरैः ॥ ३२ ॥
भौमवारे मृतायास्तु तच्चिताङ्गारमाहरेत्।
मुष्टिद्वयेन तद्बद्ध्वा निमज्य जलमध्यतः ॥
ऊर्द्ध्वं दक्षिणबाहुः स्यात् यथा तोयैर्न सिच्यते।
तच्छुष्कं चापरं सिक्तं पृथग्गृह्णेत् समग्रतः ॥
शुष्काङ्गारकृता रेखा चौरभाण्डस्य पूर्वतः।
चित्रं शुष्यति यत् क्षिप्रमार्द्राङ्गारेण तत् पुनः।
अग्रतो रेखया पूर्णं भवत्येवातिकौतुकम् ॥ ३३ ॥
चौरस्य नासिकादन्तचूर्णं पाणौ प्रलेपयेत्।
हस्तस्पर्शात् स्फुटत्येव नारिकेलो हि निश्चितम् ॥३४॥
भल्लूकास्थिभवैस्तैलैः सर्वान् सन्धीन् प्रलेपयेत्।
सङ्घातं नारिकेलस्य धारयेत् यस्तु कौतुकी ॥
स्फुटन्ति पीड़नादेव नारिकेलाः सकौतुकम्।
तेनैवाङ्कोलतैलेन स्फुटन्त्येव न संशयः ॥ ३५ ॥
कृष्णसर्पो रवौ ग्राह्यस्तद्वक्त्रे कृष्णमृत्तिकाम्।
क्षिप्त्वाऽथ वापयेत् तत्र कृष्णधुस्तूरबीजकम् ॥
तथा मत्स्यमुखे मृच्च तद्बीजञ्च प्रवापयेत्।
पृथक् पृथक् क्षिपेद्भूमौ तयोः शाखां समाहरेत् ॥
सर्पशाखा मत्स्यशाखास्पर्शात् सर्पो भवेद् ध्रुवम्।
मत्स्यशाखा सर्पशाखास्पर्शान्मत्स्या भवन्ति हि ॥ ३६ ॥
क्षिप्त्वा तच्चूर्णकं क्षेत्रे धौतवस्त्रं विलोलयेत्।
प्रातः प्रयत्नतो नित्यं दिनानामेकविंशतिम् ॥
ततस्तद्वस्त्रखण्डन्तु जलैः सिक्त्वा निपीड़येत्।
मृत्तिकायां ततो धान्यं वापयेत्तत् प्ररोहति ॥
तद्वस्त्राच्छादितं शीघ्रं सर्वधान्यं सकौतुकम्।

निक्षिपेत् सर्वधान्यानि सार्द्रगर्दभचर्मणि॥
सिञ्चेत् कुक्कुटरक्तेन त्रिसप्ताहन्तु नित्यशः।
जाताङ्कुराणि संरक्षेन्निवार्य्य जायते क्षणात्।
तद्धान्यं फलपर्य्यन्तं लोके भवति कौतुकम्॥ ३७॥
प्लक्षाश्वत्थवटानाञ्च क्षीरमौडुम्बरं तथा।
काकोडुम्बरिकाक्षीरं लौहचूर्णञ्च गन्धकम्॥
इष्टिका वै सर्जरसं तिलतैलञ्च सिक्थकम्।
क्रमोत्तरं तच्च मर्द्दं कुर्य्यात्तेन कुठारकम्॥
क्षुरिकेन्दुफलं कुन्तं वज्रं नाराचमेव च।
कुठारेणास्य वृक्षादि स्फोटयेच्छेदयेदपि॥
भेदयेत् कुन्तखड्गाभ्यां यत्किञ्चित् खेटकादिकम् *।
भिद्यते नात्र सन्देहः सिक्थकाग्रेण कौतुकम्॥ ३८॥
हरितालं शिलाचूर्णमङ्कोलीतैलभावितम्।
तल्लिप्तवस्त्रं शिरसि स्थितं पश्यति वह्निवत्॥ ३९॥
सिन्दूरं गन्धकं तालं समं पिष्ट्वा मनःशिलाम्।
तल्लिप्तवस्त्रच्छन्नाङ्गो रात्रौ संदृश्यतेऽग्निवत्॥ ४०॥
खद्योतभूलताचूर्णैः † ललाटे तिलके कृते।
रात्रौ संदृश्यते ज्योतिस्तस्मिन् स्थाने तु कौतुकम्॥४१
त्र्यूषणं चर्वयेदादौ तत्कल्के नरमूत्रकम्।
एकीकृत्य विलिम्पेच्च ‡ वर्त्तिं तत्रैव धारयेत्।
ज्वलन्ती न दहत्येव केशमात्रं न संशयः॥ ४२॥
वदने कृष्णसर्पस्य यववीजानि वापयेत्।
फलिते तानि वीजानि समादाय सुरक्षयेत्॥

* खेटकशब्दः फलकवाचकः "ढाल" इति प्रसिद्धः।

† भूलतया किञ्चुलकः ग्राह्यः।

‡ अत्र विलिम्पेच्च इति पदात्परं शीर्षे इति शेषः।

क्षिपेत् सर्पकरण्डे तु तदैव नास्त्यसौ फणी।
मुक्तोऽसौ दृश्यते सर्प इति चित्रं महाऽद्भुतम्॥
पाषाणभेदमूले तु चर्विते सति भक्षयेत्।
पाषाणवदराण्डाभांश्चणकांश्चातिकौतुकम्॥ ४३॥
मुण्डीरीफलपृष्टे तु छिद्रं कृत्वा तु पारदम्।
निक्षिपेत् तिलमात्रन्तु वर्त्या तं बन्धयेत् ततः।
ज्वलन्तीं निक्षिपेत् तेन रुन्ध्यात्तु चित्रमुत्पतेत्॥ ४४॥
अस्पृष्टपुरुषायास्तु नार्य्याः प्रथमजं रजः।
वस्त्रेण ग्राहयित्वा तु ततो गच्छेन्नदीतटम्॥
मत्स्यग्रासी यदा पक्षी मत्स्यमादातुमुद्यतः।
तस्यपक्षिणं समत्स्यन्तु गृहीत्वा चूर्णयेत् पृथक्॥
तच्चूर्णं करसंस्पृष्टं जले क्षिप्तं समन्ततः।
मत्स्यो दृष्ट्वा समायाति करमध्ये तु कौतुकम्॥ ४५॥
ऋतौ स्त्रीयोनिमध्यस्थं सौवीरं दिनसप्तकम्।
तं हुत्वा पावके चित्रमार्द्रमेव प्रदृश्यते॥ ४६॥
मातुलुङ्गस्य वीजानि पुष्ये सौवीरमञ्जनम्।
एकीकृत्यैव जुहुयाद्वालीकाष्ठान्वितेऽनले।
संदृश्यते रुद्रगणो लम्बमाने सिते पुरे॥ ४७॥
मुनिपुष्परसैः पुष्ये घृष्ट्वा स्रोतोञ्जनं ततः।
अञ्जिताक्षो नरः पश्येन्मध्याह्ने तारकागणम्॥ ४८॥
मातुलुङ्गस्य वीजोत्थं तैलं ताम्रस्य भाजने।
स्थापयेदातपे पश्येन्मध्याह्ने सरथं रविम्॥ ४९॥
विल्वपत्ररसैः सिद्धं गुञ्जामूलं जनान्तिके।
अञ्जिताक्षो नरः पश्येत् पिशाचानतिकौतुकम्॥ ५०॥
अङ्गारं शिखिपित्तेन पिष्ट्वा चाग्रदले भवेत्।
पावकं तन्मुखे धृत्वा वह्नेर्ज्वाला सुदृश्यते॥ ५१॥

धुस्तूरतैलसंयुक्ता विषचूर्णेन लोड़िता ।
वर्त्तिः सा ज्वालिता लोकैः पुष्पवद्दृश्यते ध्रुवम् ॥ ५२ ॥
विहङ्गपुच्छे तु यदा निबध्नाति हि वर्त्तिकाम् ।
उल्कामिव प्रपश्यन्ति सञ्चरन्तीं नभःस्थले ॥ ५३ ॥
भल्लातकोद्भवं तैलं मृतमत्स्येषु लेपयेत् ।
ते जीवन्ति जले क्षिप्ताः सद्यः सद्योहता इव ॥ ५४ ॥
मण्डूकवसया दीपमरण्ये ज्वालयेन्निशि ।
चतुर्दिक्षु च तन्मध्ये सागरो दृश्यते जनैः ॥ ५५ ॥
श्वेतखर्जूरमूलन्तु भूलता श्वेतमभ्रकम् ।
पेषयेच्छिखिपित्तेन मुष्या बद्ध्वा तु तन्निशि ।
गृहोपरि विनिक्षिप्ते दृश्यते ज्वलदग्निवत् ॥ ५६ ॥
धात्रिकावीजपिष्टेन लिप्तं कृत्वा प्रयत्नतः ।
बहुकालप्रदीपस्तु दीपो ज्वलति कौतुकम् ॥ ५७ ॥
श्मशानादग्निमादाय चतुरङ्गारसम्मितम् ।
गोनसावसया लिम्पेत् चतस्रः शर्कराः ततः ॥
छागीदुग्धे विनिक्षिप्य काष्ठमध्ये विनिक्षिपेत् ।
आदित्यरश्मिसम्पर्काज्ज्वलत्येव न संशयः ।
तत्काष्ठं कौतुकं लोके जायते शिवभाषितम् ॥ ५८ ॥
उन्मत्तस्य तु काष्ठानि कोद्रवस्य तृणानि च ।
सन्दह्य बन्धयेद्वस्त्रे दीपं प्रज्वाल्य कज्जलम् ।
अञ्जयेत् तेन नेत्रञ्च दिवा पश्यति तारकान् ॥ ५९ ॥
रक्तार्जुनस्य मूलेन तिलके जलघर्षिते ।
कृते त्वयुतहस्तोऽसौ दृश्यते राक्षसाकृतिः ॥ ६० ॥
कृकलासस्य संगृह्य पुच्छं दक्षिणपार्श्वतः ।
त्रिलोहवेष्टितं वक्त्रे धृतं चानन्तरूपधृक् ।
"ओं सङ्कोचाय स्वाहा ।" अनेन मन्त्रेण अष्टोत्तरसहस्रजप्ते सिद्धिः ॥ ६

सिन्दूरवर्णभूनागवर्त्तिदीपस्य तेजसा * ।
यद्वस्तु दृश्यते तत्र तत्तच्च स्वर्णवद्भवेत् ॥ ६२ ॥
कार्पासबीजं सर्पस्य वक्त्रे क्षिप्ता खनेद् भुवि ।
तज्जातवर्त्तिकादीपः सर्पतैलेन दीपितः ।
गृहे पश्यन्ति यद्रात्रौ तत्तत् सर्पोपमं भवेत् ॥ ६३ ॥
एरण्डतैलजं दीपं शमीपुष्पाहिकञ्चुकम् ।
कार्पासजा भवेद्वर्त्तिश्चित्रं पश्यति पूर्ववत् ॥ ६४ ॥
श्वेतार्कसम्भवां वर्त्तिं सर्पतैलयुतां निशि ।
प्रज्वाल्य सर्पवत् सर्वं गृहे पश्यति पूर्ववत् ॥ ६५ ॥
हस्तर्क्षे सिन्धुवारस्य मूलमादाय यत्नतः ।
स्पर्शने बन्धुविच्छेदं कुरुते शीघ्रमद्भुतम् ॥ ६६ ॥
मांसं रक्तोत्पलं तुल्यं कृकलासस्य योजयेत् ।
तन्मलैर्गुटिकास्पर्शात् तालयन्त्रं भिनत्त्यलम् ॥ ६७ ॥
तन्मांसं शोणितं ग्राह्यं तन्मन्त्रेणाभिमन्त्रितम् ।
भूदारवटपुष्पैश्च वेष्टयित्वा स्थितं करे ।
स्पृष्टमात्रे महाऽऽश्चर्य्यं तालयन्त्रं भिनत्त्यलम् ॥ ६८ ॥
तन्मांसं वटपत्रेण वेष्टितं हस्तमध्यगम् ।
ब्रह्माण्डेऽपि स्थितः पक्षी दृश्यते पतितो ध्रुवम् ॥ ६९ ॥
तन्मांसं राजवृक्षस्य पुष्पञ्च हस्तमध्यगम् ।
वृक्षारूढश्चाम्रगतं चित्रं पश्यति मानवः ॥ ७० ॥
शिरीषपुष्पैस्तन्मांसं वेष्टितं हस्तधारितम् ।
स्पृष्टमात्रेण नारीणां रणं यात्यतिकौतुकम् ॥ ७१ ॥
कच्छपस्य शिरोग्राह्यं लज्जालुरिन्द्रगोपिका ।
काकजङ्घाभवं बीजं तथा शतपदीक्रमिः ।

* अत तेजः पदेन कज्जलं, तेन कज्जलाञ्जितचक्षुषा इत्यन्वयार्थबोधः।

पञ्चाभिर्वटिका कार्य्याऽनामिकामध्यगा शुभा।
तद्दर्शनात् स्तनं याति स्पृष्टे वाऽथ महाऽद्भुतम्॥ ७२॥
कनिष्ठानामिकामध्ये दर्शादायाति तत् पुनः।
तया गुटिकया लेपाल्लिङ्गसङ्कोचनं भवेत्॥
निर्लिङ्गो दृश्यते मर्त्यः क्षालितेन पुनर्भवेत्।
मातृवाहस्तनं याति मुक्तिः स्वास्थ्यं प्रजायते॥ ७३॥
कृकलासभवं चूर्णं कूर्माहितैलपाचितम्।
तल्लिप्तस्तन उद्गच्छेत् तत्क्षणाद्वारयोषितः॥ ७४॥
अङ्कोलोत्थेन तैलेन लिप्तहस्तेन मर्दयेत्।
निर्गुण्डीवीजकं भूमौ क्षिप्तं भवति वृश्चिकम्॥
इत्येवं सर्वयोगानां मन्त्रराजं शिवोदितम्।
पूर्वमेवायुतं जप्त्वा ततः सिध्यति कौतुकम्॥

"ओं नमो भगवते रुद्राय उड्डामरेश्वराय बहुरूपा नानारूपधराय सह सह स स नृत्य नानाकौतुकेन्द्रजालदर्शना हूं फट् ठः ठः स्वाहा"।

अनेन गिरिशोक्तेन सन्मन्त्रेणाभिमन्त्रणात्।
जितेन्द्रियः सदाचारः योगी सिद्धिं लभेद्ध्रुवम्॥ ७५॥

इति श्रीसिद्धनागार्जुनविरचिते कचपुटे इन्द्रजालविद्यासाधनं नाम त्रयोदशः पटलः।

अथ यक्षिणीसाधनम्।

सर्वासां यक्षिणीनान्तु ध्यानं कुर्य्यात् समाहितः।
भगिनीमातृपुत्रीस्त्रीरूपतुल्या यथेप्सिता॥
लक्षमेकं जपेन्मन्त्रं वटवृक्षतले शुचिः।
बन्धूककुसुमैः पश्चान्मध्वाज्यक्षीरमिश्रितैः॥

दशांऽशं योनिकुण्डे तु हुत्वा * देवी प्रसीदति।
विचित्रां साधकस्यैव प्रयच्छति समीहितान्।
"ओं विचित्रे! चित्ररूपेण सिद्धिं कुरु कुरु स्वाहा" ॥ १ ॥
त्रिपथस्थो जपेन्मन्त्रं लक्षमेकं दशांऽशतः।
घृताक्तैर्गुग्गुलैर्होमैर्विचित्रा सिद्धिदा भवेत् ॥
"ऐं क्लीं महानन्दे भीषणे क्लीं हुं स्वाहा" ॥ २ ॥
गत्वा यक्षगृहं मन्त्री नग्नो भूत्वा जपेन्मनुम्।
दिनैकविंशतिं कुर्य्यात् पूजां कृत्वा ततो निशि ॥
आवर्त्तयेत्ततो मन्त्रमेकचित्तेन साधकः।
निशार्द्धे वाञ्छितं द्रव्यं देव्यागम्य प्रयच्छति ॥
"ओं क्लीं नखकेशो कनकवति! स्वाहा" ॥ ३ ॥
लक्षत्रयं जपेन्मन्त्रं दशांऽशं गुग्गुलुं हुनेत्।
लाक्षा चोत्पलके वाऽथ ध्यात्वा सर्वाङ्गलोचनाम्।
पट्टे पटे वा संलेख्या होमान्ते चिन्तितप्रदा ॥
"ओं कुवलये हिलि हिलि तु तु तु सिद्धिसिद्धेश्वरि! क्लीं
स्वाहा" ॥ ४ ॥
जपेल्लक्षद्वयं मन्त्री श्मशाने निर्भयो मनुम्।
दशांऽशं जुहुयात् साज्यं हुत्वा † तुष्यति विभ्रमा।
पञ्चाशन्मानुषाणाञ्च दत्ते सा भोजनं सदा ॥
"ओं क्लीं विभ्रमरूपे विभ्रमे कुरु कुरु एह्येहि भगवति!
स्वाहा" ॥ ५ ॥
शाकयूषपयःशक्तुभक्षः श्वेतोर्णकासने।
देवतां पूजयेन्नित्यं जपेल्लक्षं त्रयोदशम् ॥
पायसं होमयेत् पश्चात् सहस्रैकेण सिध्यति।

* हुत्वा इति पदेन हुत्वा वर्त्तमानस्येति अन्वयार्थं योजना।

† अत्रापि पूर्ववदन्वययोजना।

नित्यं लोकसहस्रस्य भोजनं सा प्रयच्छति ।
लक्षायुर्दिव्यवर्षाणि दत्ते सा शङ्करोदिता ॥
"ओं क्लीं जलपाणी पिज्वल पिज्वल हुं लुं स्वाहा" ॥६॥
लक्षमुत्पलशाकोत्थं हुत्वा मन्त्रमिमं जपेत् ।
लक्षैकादशमावर्त्त्य हुत्वा मध्ये शशिग्रहे ॥
अथवा मालतीपुष्पैर्हुत्वा भानुसहस्रकम् ।
भानुमुक्तो * भवेद् यावत् पूर्णान्तो सिध्यति ध्रुवम् ।
सहस्रन्तु जपाद्यन्ते सहस्राणान्तु भोजनम् ॥
"ओं भूते सुलोचने ! लुं" ॥ ७ ॥
शङ्खलिप्ते पटे देवीं गौरवर्णां धृतोत्पलाम् ।
सर्वालङ्कारिणीं दिव्यां समालिख्यार्चयेत् पुनः ॥
जातीपुष्पैः सोपचारैः सहस्रैकं ततो जपेत् ।
त्रिसन्ध्यं सप्तरात्रन्तु ततो रात्रौ शुचिर्जपेत् ॥
अर्द्धरात्रे गते देवी समागत्य वरप्रदा ।
पञ्चविंशतिदीनारान् प्रत्यहं सा प्रयच्छति ॥
"ओं क्लीं रतिप्रिये ! स्वाहा" ।
दिनैकविंशतिं यावदुदयास्तमयं जपेत् ।
नित्यं सायं स्वमाहारपिण्डं हर्म्योपरि क्षिपेत् ॥
त्रिसप्ताहे तु सा तुष्टा शय्यां गत्वा पिशाचिका ।
पञ्चविंशतिदीनारान् ददाति प्रतिवासरम् ।
कर्णे कथयति क्षिप्रं यद् यत् पृच्छत्यसौ क्रमात् ॥
"ओं क्लीं चः चः कम्बलके गृह्ण पिण्डं पिशाचिके ! स्वाहा" ॥८॥
गृहे वाऽरण्य एकान्ते लक्षमेकं जपेन्मनुम् ।
पुष्पधूपादिभिः पूजां नित्यं कुर्य्यात् प्रयत्नतः ॥

* अत्र भानुशब्दः स्वर्भानुवाचकः, अन्यत् स्पष्टम् ।

पञ्चामृतैर्दशांऽशेन हुते देवी प्रसीदति।
दीनाराणां सहस्रैकं प्रत्यहं तोषिता सती॥*

"ओं गुलु गुलु चन्द्रामृतमयि अव जातिलं हुलु हुलु चन्द्रगिरि! स्वाहा"॥ १०॥

एकलिङ्गे † महादेवं त्रिसन्ध्यं पूजयेत् सदा।
धूपं दत्त्वा जपेन्मन्त्री ब्रूयात् सा "त्वं किमिच्छसि?"॥
"देवि! दारिद्र्यदग्धोऽस्मि तन्मे नाशकरी भव"।
ततो ददाति सा तुष्टा वित्तायुश्चिरजीवितम्॥

"ओं ह्रीं आगच्छ सुरसुन्दरि! स्वाहा"॥ ११॥

कुङ्कुमेन समालिख्य भूर्जपत्रे सुलक्षणाम्।
प्रतिपत्तिथिमारभ्य पूजां कृत्वा जपेत्ततः॥
त्रिसन्ध्यं त्रिसहस्रन्तु मासान्ते पूजयेन्निशि।
संजपन्नर्द्धरात्रे तु समागत्य प्रयच्छति।
दीनाराणां सहस्रैकं प्रत्यहं परितोषिता॥

"ओं ह्रीं अनुरागिणि मैथुनप्रिये! स्वाहा"॥ १२॥

नदीतीरे शुभे देशे चन्दनेन सुमण्डलम्।
विधाय पूजयेद्देवीं ततो मन्त्रायुतं जपेत्॥
त्रिसप्ताहं जपेदेवं प्रसन्ना वितरेत् ‡ तदा।
दीनाराणां सहस्रैकं व्ययं कुर्य्याद्दिने दिने।
विना व्ययेन सा क्रुद्धा न ददाति कदाचन॥

"ओं ह्रीं सर्वकामदे मनोहरे! स्वाहा"॥ १३॥

मन्त्रायुतं जपेन्मन्त्री प्रातः सूर्य्योदये सति।
मासमेकं जपेदेवं पूजां कुर्य्याद्दिने दिने॥

---

* अत्र ददाति साधकाय इति शेषः।

† एकलिङ्गे इति मन्दिरस्य विशेषणं, तेनैकलिङ्गमन्दिरे इत्यर्थः।

‡ अत्र देवी वरं वितरेत् एवं सन्दर्भार्थः।

शङ्खसंलिप्तपट्टे तु शुभ्रपुष्पैः सपायसैः।
दशांऽशं होमयेत् साज्यैरिन्धनैः करवीरजैः।
ददाति शङ्खिनी तुष्टा नित्यं रूप्यकपञ्चकम्॥

"ओं ह्रीं शङ्खचारिणि शङ्खाभरणे! ह्रां ह्रीं क्लीं ऐं श्र
स्वाहा"॥ १४॥

सहस्राष्टमिमं मन्त्रं जपेत् सप्तदिनावधि।
प्रत्यहं मणिभद्राख्यं प्रयच्छत्येकरूप्यकम्॥

मन्त्रस्तु।—"ओं नमो मणिभद्राय नमः पूर्णाय नमो महा
यक्षसेनाऽधिपतये मोट मोट धारय स्वाहा"॥ १५॥

चतुर्लक्षमिमं मन्त्रं जपेत्त्यागा प्रसीदति।
ददाति चिन्तितानर्थांस्तस्य भोगाय मन्त्रिणः॥

"ओं अहोत्यागि! मम त्यागार्थं देहि मे वित्तं वीरसेवित
स्वाहा"॥ १६॥

रात्रौ रात्रौ जपेन्मन्त्रं सागरस्य तटे शुचिः।
लक्षजापे कृते सिद्धो दत्ते सागरचेटकः।
रत्नत्रयं तदामूल्यं तेन मन्त्री सुखी भवेत्॥

"ओं नमो भगवन् रुद्र देहि रत्नानि जलराशे! नमोऽस्तु ते
स्वाहा"॥ १७॥

एकान्ते च शुचौ देशे त्रिसन्ध्यं त्रिसहस्रकम्।
मासमेकं जपेन्मन्त्री ततः पूजां समारभेत्॥
पुष्पधूपादिनैवेद्यैः प्रदीपैर्घृतपूरितैः।
रात्रावभ्यर्चयेत् सम्यक् सुस्थिरः सुमनाः सुधीः॥
अर्द्धरात्रे गते देवी समागत्य प्रयच्छति।
रसं रसायनं दिव्यं वस्त्रालङ्कारभूषणम्॥

"ओं ह्रीं आगच्छ स्वामीश्वरि! स्वाहा"॥ १८॥

त्रिपथस्थो वटाधःस्थो रात्रौ मन्त्रं जपेत् सदा।

लक्षत्रयं ततः सिद्धा स्याद्देवी वटयक्षिणी ॥
वस्त्रालङ्करणं दिव्यं सिद्धं रसरसायनम्।
दिव्याञ्जनञ्च सा तुष्टा साधकाय प्रयच्छति ॥
"श्रीं क्लीं श्रीं वटवासिनि यक्षकुलप्रसूते वटयक्षिणि! एह्येहि स्वाहा" ॥ १८ ॥

वटवृक्षं समारुह्य लक्षमेकं जपेन्मनुम्।
ततः सप्ताभिमन्त्रेण काञ्जिकैः क्षालयेन्मुखम् ॥
यामद्वयं जपेद्रात्रौ वरं यच्छति यक्षिणी।
रसं रसायनं दिव्यं क्षुद्रकर्माण्यनेकधा।
सिद्धानि सर्वकार्य्याणि नान्यथा शङ्करोदितम् ॥
"श्रीं क्लीं नमश्चन्द्रद्रवे कर्णाकर्णकारणे! स्वाहा"। "श्रीं नमो भगवते रुद्राय चन्द्रयोगिनि! स्वाहा"। मन्त्रद्वयस्यैका सिद्धिः ॥ २० ॥

चिञ्चावृक्षतले मन्त्रं लक्षमावर्त्तयेच्छुचिः।
विशाला वितरेत् तुष्टा रसं दिव्यं रसायनम् ॥
"श्रीं क्लीं विशाले! द्रां द्रूं क्लीं एह्येहि स्वाहा" ॥ २१ ॥

नरास्थिनिर्मितां मालां गले पाणौ च कर्णयोः।
धारयेज्जपमालाञ्च तादृशीन्तु श्मशानतः ॥
लक्षमेकं जपेन्मन्त्रं साधयेन्निर्भयः सुधीः।
ततो महाभया सिद्धा ददात्येव रसायनम् ॥
तेन भक्षितमात्रेण पर्वतानपि चालयेत्।
वलीपलितनिर्मुक्तश्चिरजीवी भवेन्नरः ॥
"श्रीं क्लीं महाभये! हुं फट् स्वाहा" ॥ २२ ॥

शुक्लपक्षे जपेत्तावद् यावत् दृश्येत चन्द्रिका।
दत्ते पीत्वा यदमरोऽमृतं तच्च भवेन्नरः ॥
"श्रीं क्लीं चन्द्रिके! हंसः स्वाहा" ॥ २३ ॥

शक्रचापोदये लक्षं निर्गुण्डीतलमध्यगः ।
जपेन्मन्त्रं ततस्तुष्टा देवी पातालसिद्धिदा ॥
"ऐं क्लीं ऐन्द्रि माहेन्द्रि ! कुलु कुलु चुलु चुलु हं
स्वाहा" ॥ २४ ॥

हृदि ध्यात्वा जपेद्रात्रौ हंसबद्धं सचेतसम् ।
योगं ददाति सा तुष्टा जरामृत्युविनाशनम् ॥
"ओं हंसः सर्व्वलोचनानि बन्धय बन्धय देवी आज्ञापय
स्वाहा" ॥ २५ ॥

स्वीयमूर्ध्नि करं वामं दत्त्वा लक्षं जपेन्मनुम् ।
वाक्सिद्धिं मन्त्रिणो लिङ्गे चेटकस्तु प्रयच्छति ॥
"ओं नमो लिङ्गोद्भव रुद्र ! देहि मे वाचं सिद्धिं विना
पर्व्वतगते द्रां द्रीं द्रूं द्रैं द्रौं द्रः" ॥ २६ ॥

जपेन्मासत्रयं रक्त-कम्बले ! सुप्रसीदति ।
मृतकोत्थापनं कुर्य्यात् प्रतिमाचालनं तथा ॥
"ओं रक्तकम्बले ! महादेवि ! द्रुतममुकामुकं उत्थाप
उत्थापय प्रतिमां चालय चालय पर्व्वतं कम्पय कम्पय लीलय
चिल चिलि हुं हुं" ॥ २७ ॥

अष्टोत्तरशतं जप्त्वा यत्किञ्चित् स्वात्मभोजनम् ।
ततोऽनुवासरं दत्ते नित्यं सान्निध्यकारकम् ॥
अतीतानागतं कर्म स्वास्थ्यास्वास्थ्यं ब्रवीति सा ।
प्रतिमापर्वतान् सर्वान् चालयत्येव तत्क्षणात् ॥
"ओं करङ्कमुखे विद्युज्जिह्वे ! ओं हुं चेटके ! जः
स्वाहा" ॥ २८ ॥

पूर्वमेवायुतं जप्त्वा हुत्वा होमं दशांऽशतः ।
घृताक्तैः रजनीकुष्ठैः पूर्णान्ते च पुनर्जपेत् ॥
लिम्पन् गात्रं चन्दनेन रात्रौ मन्त्रं समुच्चरेत् ।

यावन्निद्रावशं याति स्वप्ने वदति सा तदा।
वाञ्छितं यच्छुभं किञ्चित् स्यात् सिद्धं वा न सिध्यति॥
"ओं क्रीं सः नमः श्मशानवासिनि चण्डवेगिनि! स्वाहा"।
मन्त्रद्वये एकमेव साधनम्॥ २८॥

करञ्जवृक्षमारुह्य जपेद्दशसहस्रकम्।
तत्पञ्चाङ्गेन कल्केन आपादं संविलेपयेत्।
जपान्ते पूर्ववत् स्वप्ने कथयेत् सा शुभाशुभम्॥
"ओं नमो रुद्राय ओं नमो भगवते श्मशानवासियोगिने स्वाहा"। "ओं नमश्चन्द्रस्राविणि कर्णाकर्णकारिणि! स्वाहा"।
उभयोः पूर्ब्बवत् सिद्धिः॥ ३०॥

पूर्वमेवायुतं जप्त्वा कुष्ठकल्काभिमन्त्रितम्।
सप्तवारप्रलेपेन स्वप्ने वक्ति शुभाशुभम्।
त्रैलोक्ये यादृशी वार्त्ता तादृशीं कथयत्यलम्॥
"ओं क्रीं आगच्छ चामुण्डे! स्वाहा"॥ ३१॥
रोचनाकुङ्कुमच्चौरैः पद्ममष्टदलं लिखेत्।
नीरसे सूर्य्यपत्रे तु मायाबीजं दले दले।
लिखित्वा धारयेन्मूर्ध्नि चेमं मन्त्रं ततो जपेत्।
पूर्वमेव तु सप्ताहं एवं कुर्य्यात् प्रयत्नतः।
अतीतानागतं सर्वं स्वप्ने वदति देवता॥
"ओं क्रीं चिनि पिशाचिनि स्वाहा"॥ ३२॥
अलाबुमूलिका पुष्ये तथा सर्पाक्षिमूलिका।
संग्राह्या मन्त्रिता यत्नाद्रक्तसूत्रेण वेष्टयेत्।
मन्त्रेण मूर्ध्नि बद्धा तु वदत्येव शुभाशुभम्॥
"ओं नमो भगवते रुद्राय कर्णपिशाचिनि! स्वाहा"॥३३॥

इति श्रीसिद्धनागार्जुनविरचिते कच्चपुटे दक्षिणीसाधनं नाम चतुर्दशः पटलः।

अथ अञ्जनम्।

अञ्जनानान्तु सर्वेषां मन्त्रं साध्यमघोरकम्।
विनाऽघोरेण विघ्नानि नाशयन्ति पदे पदे॥
दक्षिणामूर्त्तिमासाद्य जपेदष्टसहस्रकम्।
ततः सर्वविधानानि सुखसाध्यानि कारयेत्॥
ओं विद्याधरं विरूपाक्षं बहुरूप महेश्वरम्।
जपाम्यहं महादेवं सर्वसिद्धिप्रदायकम्॥

"रुद्राय नमो बहुरूपाय नाशय विच्छरूपाय नमो विश्वाय विश्वरूपाय नमस्तत्पुरुषाय नमो यक्षिरूपाय नमः एकयक्षाय नमः एकरोमाय नमः एकमणये नमो वरदाय नम स्त्र्यक्षाय नमो रुद्राय स्वाहा"॥

जितेन्द्रियः सोपवासः महेश्वरमजं विभुम्।
अर्च्चन् सिद्धमिमं मन्त्रं जपेत् सिद्धिमवाप्नुयात्॥ १॥
कज्जलानां निपाताय ग्राह्यो यत्नेन पावकः।
दीक्षितस्य गृहात् श्रेष्ठो यतीनाञ्च विशेषतः।
रजकस्य गृहाद्वापि तक्षकस्य गृहाच्च वा॥

"ओं ज्वलितद्युतिदेहाय स्वाहा"। अयमग्निग्रहणमन्त्रः। "ओं नमो भगवते वासुदेवाय श्रीपर्वते कुलपर्वते वसुवते स्वाहा"। अनेन मन्त्रेणाग्निं रचयेत्। "ओं वर्त्तिं बन्ध दिशं बन्ध पातालं बन्ध मण्डलं बन्ध बन्ध स्वाहा"। अनेन वर्त्तिमभिमन्त्रयेत्। "ओं नमो भगवते सिद्धिसावराय ज्वल ज्वल पत पत पातय पातय बन्ध बन्ध संहन संहन दर्शय दर्शय निधिं नमः" अनेन दीपं प्रज्वालयेत्। "ओं दुं सर्वसिद्धिभ्यो नमः। विच्छे स्वाहा"। अनेन कज्जलं ग्राह्यम्। "ओं कालि कालि! रक्ष रक्ष मदञ्जनं नमो विच्छे स्वाहा"। अनेन यत्किञ्चिदञ्जनद्रव्यमभिमन्त्रयेत्॥ २॥

हेम्नः शलाकया चादौ चक्षुषोरञ्जनं स्मृतम् ।
तया शलाकया पश्चादञ्जनद्रव्यमञ्जयेत् ॥
अञ्जयित्वाऽञ्जनं पश्चात् सप्त वाऽश्वत्थपत्रकम् ।
बन्धयेत् प्रतिनेत्रन्तु ह्यच्छिद्रं तदधोमुखम् ॥
तस्योपरि सितं वस्त्रं पट्टजं वाऽथ बन्धयेत् ।
नाञ्जयादधिकहीनाङ्गं चाट्टष्टिं वाऽग्निदग्धकम् ॥
सम्पूर्णाङ्गं शुचिस्नातं द्विदिनं नक्तभोजिनम् ।
क्षीरशाल्यन्नभोक्तारं द्विदिनान्ते ततो जपेत् ।
अञ्जितस्य शिखाबन्धं कर्त्तव्यं मन्त्र उच्यते ॥
"ओं नमो भगवते रुद्राय ओं माहे हुलु हुलु विहुलु विहुलु
[स्व]ाहा यक्ष यक्ष पूजिते यक्षकुमार्य्यः सुलोचने ! स्वाहा" ॥ ३ ॥
दक्षिणामूर्त्तिमाश्रित्य * ह्युदयास्तमयं जपेत् ।
पूर्वमेव समाख्याता शिखाबन्धे शिवोदिता ।
अयं सर्वाञ्जनानां वै विधिर्ज्ञेयः शुभावहः ॥ ४ ॥
रोचनं कुङ्कुमं शङ्खं बालपुष्पी तु चन्दनम् ।
राजावर्त्तं † कुमारीञ्च सौवीराञ्जनपारदम् ॥
कज्जलं काञ्चनीञ्चैव सितपद्मस्य केशरम् ।
यावकं सघृतं क्षीरं समभागं सुपेषयेत् ॥
श्मशानचेलमादाय पूर्वपिष्टेन लेपयेत् ।
तद्वर्त्तिं घृतसंयुक्तां प्रज्वाल्य कज्जलं हरेत् ।
सर्वाञ्जनमिदं ख्यातं पातालनिधिदर्शनम् ॥ ५ ॥
शरत्काले तु संग्राह्या भूलता रक्तवर्णका ।
सिन्दूरपूरितां कृत्वा रवितूलेन वेष्टयेत् ॥

---

* अत्र दक्षिणामूर्त्तिपदेन दक्षिणकालिका बोद्धव्या ।

† अत्र राजावर्त्तपदेन उपरत्नविशेषार्थबोधः ।

अतिक्रणतिलात्तैलं ग्राहयेद्रचयेत् सुधीः।
तैलवर्त्याः प्रयोगेण कज्जलं चोत्तरायणे।
ग्राहयित्वाऽञ्जयेच्चक्षुर्निधिं पश्यति पूर्ववत् ॥ ६ ॥
सप्तधा पद्मसूत्राणि भावयेद्दिक्षुजे रसैः।
सर्वाञ्जनमिदं दिव्यं शम्भुदेवेन भाषितम् ॥
दीपकज्जलयोः पात्रं कर्त्तव्यं नरमुण्डकम्।
सर्वेषां कज्जलानान्तु शस्तं स्याच्छिवभाषितम् ॥७॥
स्रोतोऽञ्जनमुलूकस्य ग्राहयेदाशु पित्तकम्।
शुभे भाण्डे विनिक्षिप्य यावत्सप्तदिनावधि।
अनेनाञ्जितनेत्रस्तु निर्विघ्नं वीक्षते निधिम् ॥ ८ ॥
अतिकृष्णस्य काकस्य जिह्वाहृन्मांसमाहरेत्।
वेष्टयेद्रवितूलेन वर्त्तिं तेनैव कारयेत्।
अजाघृतेन दीपन्तु प्रज्वाल्यादाय कज्जलम्।
अञ्जिताक्षो नरस्तेन निधिं पश्यति पूर्ववत् ॥ ९ ॥
स्रोतोऽञ्जनमुलूकाक्ष-जिह्वारक्तान्वितं क्षिपेत् *।
सप्ताहान्ते समुद्धृत्य अञ्जनाद्वीक्षते निधिम् ॥१०॥
अश्लेषायान्तु कृष्णाहेरतिधूमेन कञ्चुकम्।
दग्ध्वा स्रोतोऽञ्जनोन्मिश्रमञ्जयेन्निधिदर्शकम् ॥११॥
नकुलस्य च भेकस्य लोचनानि समाहरेत्।
स्रोतोऽञ्जनसमायुक्तं मेषतैलेन पेषयेत्।
अञ्जिताक्षो नरस्तेन निधिं पश्यति पूर्ववत् ॥१२॥
उलूकचक्षुरादाय कुङ्कुमं रोचनं शशी।
समांसं मधुना पिष्टं ख्यातं सर्वाञ्जनं परम् ॥१३॥
पारदं मधु कर्पूरं मधुकस्य च मूलिकाम्।

* क्षिपेदित्यनेन भाण्डे निक्षिप्य भूगर्त्ते निधापयेत् इति तात्पर्य्यसरणिः।

समं पिष्ट्वा पिबेत् सिद्धं दिव्यं सर्वाञ्जनं परम् ॥१४॥
पुष्यार्के श्वेतगुञ्जाया विधिना मूलमाहरेत्।
उलूकाक्षेण मधुना सर्वाञ्जनमिदं परम् ॥ १५ ॥
स्रोतोऽञ्जनं सखद्योतं मूलकाण्डे विनिक्षिपेत्।
सप्ताहान्ते समुद्धृत्य पातालमधुनाऽञ्जयेत्।
दिवा नक्षत्रवित्तानि करस्थानि विपश्यति ॥१६॥
हरितालं वचां लोध्रं रेणुकां चाञ्जनं तथा।
कृष्णपक्षे चतुर्दश्यां चूर्णीकृत्य विनिक्षिपेत् ॥
सम्पुटे ताम्रजे तच्च अघोरेणाभिमन्त्रयेत्।
अञ्जिताक्षो निधिं पश्येन्नरो नानाविधं भुवि ॥ १७ ॥
रक्तागस्त्यस्य तैलेन भूधात्रीमूलपेषितम्।
कर्पूरेण युतं चाज्यं सिद्धं सर्वाञ्जनं परम् ॥ १८ ॥
कुङ्कुमं श्वेतगुञ्जा च काञ्चनस्यैव पल्लवम्।
सुश्वेतञ्च जवापुष्पं सूर्य्यावर्त्तसमं मधु।
सर्वाञ्जनमिदं ख्यातं पातालनिधिदर्शनम् ॥ १९ ॥
रक्तेन कृकलासस्य भावयित्वा मनःशिलाम्।
तेनैवाञ्जितनेत्रस्तु निधिं पश्यति भूमिगम् ॥ २० ॥
पारदं काकमाच्युत्थं फलं कर्पूरकं मधु।
सूर्य्यावर्त्तसमायुक्तं सिद्धं सर्वाञ्जनं परम् ॥ २१ ॥
जया मांसी हंसपदी कर्पूरञ्च मनःशिला।
सूतं दारुनिशा चैव समभागानि पेषयेत्।
दिव्याञ्जनमिदं ख्यातं सर्वभूतवशङ्करम् ॥ २२ ॥
सद्योहतमनुष्यस्य पित्तमादाय पूजयेत्।
रोचनयैव शशिना धूमपाकेन शोषयेत्।
अष्टाहान्ते जलैर्घृष्टमञ्जनं निधिदर्शनम् ॥ २३ ॥
उलूकचक्षुषो रक्ते भावयेत् पट्टसूत्रकम्।

तद्वर्त्याङ्कोलतैलेन प्रदीपोद्धृतकज्जलम्।
सर्वाञ्जनमिदं साध्यं पातालनिधिदर्शनम्॥ २४॥
श्वेतगुञ्जारसे सूत्रं दिनमेकन्तु भावयेत्।
ततो वाराहजं चूर्णं सूत्रमध्ये निवेशयेत्॥
दीपमङ्कोलतैलेन तद्वर्त्युद्धृतकज्जलम्।
सिद्धं सर्वाञ्जनं लोके स्वञ्जनं निधिदर्शकम्॥ २५॥
कृष्णाजपित्तञ्च मयूरपित्तमशोकमूलं स्थितमुत्तरस्याम्
शशाङ्कगोरोचनमाक्षिकञ्च सर्वाञ्जनं नाम शिवोपदिष्टम्
सर्वाञ्जनानि ख्यातानि प्रसिद्धानि शिवोक्तितः॥ २६॥
अगस्त्यवृक्षजां कुर्यात् पादुकाऽञ्जनदर्शिकाम्।
पादुकाऽञ्जनयोगेन सिद्धयोगा भवन्ति वै॥
"ओं नमो भगवते रुद्राय उड्डामरेश्वराय शिल [illegible]
धमनिनालि वेतालि! स्वाहा"।
अनेन मन्त्रराजेन पादुकामभिमन्त्रयेत्॥ २७॥

अथ कुमाराञ्जनम्।

पुष्यनक्षत्रयोगेन पिण्डीतगरमूलिकाम्।
षड़ङ्गुलमितां कुर्याच्छलाकां रचयेत् ततः॥
स्नापयेच्च शिलापृष्ठे कुमारं वा कुमारिकाम्।
तच्छिला स्नानतोयेन रोचनं हेमगैरिकम्॥
निघृष्टमञ्जयेन्नेत्रं मन्त्रमुक्तञ्च पूर्ववत्।
शलाकया रचितया तयैवाञ्जयान्निधिं लभेत्॥ १॥
तिलपर्ण्युद्भवं मूलं हस्तार्के विधिनोद्धृतम्।
पाताले * मधुना युक्तं जलघृष्टं तदञ्जयेत्।
निधिं पश्यत्यसौ सत्यमर्थिने सन्निधौ सति॥ २॥

* अत्र पाताले इति स्थाने पातालयन्त्रे पदम् अन्वये शाब्दबोधावधारकम्

पुष्यार्केऽगस्त्यवृक्षस्य मूलमुद्धृत्य वारिणा।
पाताले मधुना पिष्टं संयुतं निधिदर्शकम् *॥ ३॥
पिण्डीतगरजं मूलमुदीचीगतमुद्धरेत्।
चन्द्रसूर्य्योपरागे तु पातालमधुसंयुतम्।
पेषयेच्चाञ्जयेन्नेत्रे सम्यक् पश्यति भूनिधिम्॥ ४॥

अथ पादाञ्जनम्।

तुलसीमूलिकां पुष्ये शनिवारे समुद्धरेत्।
निष्पिष्य काञ्जिकेनाथ मधुना युतमञ्जयेत्॥
पादजाते कुमारं वा कन्यकां वा ततो निधिः।
दृश्यते नात्र सन्देहः पातालान्तर्गतस्तथा॥ १॥
पाश्चात्यं पिप्पलीमूलं पुष्यार्के विधिनोद्धृतम्।
पातालमधुना युक्तं पादजाताञ्जनं भवेत्॥ २॥
तिलपर्ण्युद्भवं मूलं कृष्णपक्षे रवेर्दिने।
चतुर्द्दश्यां समादाय जलेन सह घर्षयेत्।
पातालमधुना युक्तं पादजाताञ्जनं भवेत्॥ ३॥
मधुपुष्पं वचा क्षौद्रं रक्तागस्त्यश्च चन्दनम्।
गुञ्जा च तिलपर्णी च पादजाताञ्जनं भवेत्॥ ४॥
सुश्वेतकरवीरस्य पुष्यार्के मूलमुद्धरेत्।
पातालमधुना युक्तं पादजाताञ्जनं भवेत्॥ ५॥

अथ लेपाञ्जनम्।

गोक्षीरेण तु सम्पिष्य तिलकोद्रवराजिकाः।
कणावीजञ्च सम्पिष्य निशायाञ्च निधिस्थलम्।
भ्रष्टो लेपो भवेद् यत्र प्रातस्तत्र निधिं दिशेत्॥ १॥
अर्ज्जुनस्य कदम्बस्य वकस्य खदिरस्य च।

---

* व दूरान्वयित्वमिति पाताले पिष्टं मधुना संयुतमेवमन्वययोजना कर्त्तव्या।

ब्रह्मवृक्षस्य पत्राणि काकोल्या चैव पेषयेत्॥
निशायां लेपयेद्भूमौ कल्कं मन्त्रेण मन्त्रयेत्।
प्रातर्लेपो न यत्रास्ति तत्रैव निधिमादिशेत्॥ २॥
उमादिमातृसंयुक्तं किरातं तत्र पूजयेत्।
तत्र होमः प्रकर्त्तव्यो निशायां घृतगुग्गुलैः।
प्रभाते तद्विवर्णञ्च निधिस्तत्र सुनिश्चितम्॥

"ओं नमो भगवते रुद्राय कल्कलेपाञ्जनं दर्शय द
ठः ठः स्वाहा"।

कल्कलेपाञ्जनञ्चेदमनेनैवाभिमन्त्रयेत्॥ ३॥

अथ मायाञ्जनम्।

प्रवेशे नगरस्यान्तर्लक्षमेकं जपेन्मनुम्।
पठन् सूत्रैर्घृतोपेतैः कृते होमे दशांशतः।
प्रयच्छत्यञ्जनं हंसी येन पश्यति भूनिधिम्॥
"ओं नमो हंसि हंसजाते! क्लीं स्वाहा"॥ १॥
मधुकस्य तले मन्त्रं चतुर्दशदिनं जपेत्।
नक्तभोजी चतुर्यामं तुष्टा यच्छति मेखला।
अञ्जनं विघ्ननिर्मुक्तं तेन पश्यति भूनिधिम्॥
"ओं नमो मदनमेखले! ठः ठः क्लीं स्वाहा"॥ २॥
एकलिङ्गं समभ्यर्च्य षडङ्गेनाभिभावितः।
पूर्व्वसन्ध्यां समारभ्य कृष्णपक्षादितो जपेत्॥
सहस्राष्टमिदं नित्यं मासान्ते पूजयेत् पुनः।
मद्रक्तां * देवतां लिङ्गे रात्रौ मन्त्रं पुनर्जपेत्॥
अर्द्धरात्रे गते देवी दत्ते दिव्याञ्जनं शुभम्।
वस्त्रालङ्करणं दिव्यं षण्मासाच्चैव सिद्धिदा॥

* मद्रक्ताम् इत्यनेन साधकः स्वानुकूलां तां चिन्तयेदिति भावार्थः।

"ओं चर्क चर्क शाल्मलस्वर्णरेखे! स्वाहा"। इति मन्त्रः।
ओं क्रां हृदयाय नमः। ओं क्रीं शिरसे स्वाहा। ओं क्रूं शिखायै। ओं क्रैं कवचाय। ओं क्रौं नेत्राभ्याम्। ओं क्रः अस्त्राय"। इति षडङ्गानि ॥ ३ ॥

अर्द्धरात्रे समुत्थाय सहस्रैकं जपेन्मनुम्।
मासमेकं ततो देवी निधिं दर्शयति ध्रुवम् ॥
"ओं क्रीं प्रमोदायै स्वाहा" ॥ ४ ॥

दिनत्रयं निराहारः सति सोमग्रहे जपेत्।
यावन्मुक्तिस्ततो देवी यच्छत्यञ्जनमुत्तमम् ॥
"ओं क्रीं यक्षिणि भोमिनि रतिप्रिये! स्वाहा" ॥ ५ ॥

एकलिङ्गगृहस्थाने चन्दनेन सुमण्डलम्।
कृत्वा हस्तप्रमाणेन पूजयेदत्र पद्मिनीम् ॥
धूपं सगुग्गुलं कृत्वा जपेन्मन्त्रं सहस्रकम्।
मासमेकं ततः पूजां कृत्वा रात्रौ पुनर्जपेत्।
अर्द्धरात्रे गते देवी दत्ते दिव्याञ्जनं शुभम् ॥
"ओं क्रीं पद्मिनि! स्वाहा" ॥ ६ ॥

वटवृक्षतले कुर्याच्चन्दनेन सुमण्डलम्।
यक्षिणीं * पूजयेत् तत्र नैवेद्यमुपदर्शयेत् ॥
शशमांसासवैः पश्चान्मन्त्रमावर्त्तयेत् सुधीः।
दिने दिने सहस्रैकं यावन्मासं प्रपूजयेत्।
ततो देवी समागत्य दत्ते दिव्याञ्जनं परम् ॥
"ओं क्रीं आगच्छ कनकावति! स्वाहा" ॥ ७ ॥

शृगालस्याक्षिकर्णेन ह्यञ्जयेल्लोचनद्वयम्।
भूतं पश्यत्यसौ तस्मात् सम्प्राप्नोति महानिधिम् ॥ ८ ॥

---

* अत्र छन्दोऽनुरोधात् कनकावतीम् इति स्थाने यक्षिणीमिति पाठः ज्ञेयः।

देवदालीरसैश्चक्षुरञ्जयित्वापि तत्फलम्।

"ओं गणपतये नमः। ओं चामुण्डायै नमः। ओं भ
दर्शय दर्शय स्वाहा" ॥ ८ ॥

उक्तयोगद्वयस्यास्य मन्त्रः स्यादयमेव हि।

इति श्रीसिद्धनागार्जुनविरचिते कक्षपुटे सर्व्वाञ्जनादिनिधिदर्शनं नाम पञ्चदशः पटलः।

अथ अज्ञातनिधानस्य ग्रहणम्।

ब्रह्मचारिसहस्रेण शिलामूलशतेन च।
रुद्राणाञ्च सहस्रेण शिखाबन्धो विधीयते॥

"ओं रक्ष रक्ष विघ्ने स्वाहा" ॥ १ ॥

कुर्य्यात्सर्व्वसहायानां शिखाबन्धमनेन वै।
शावरं धारयेद्रूपं मन्त्री सर्वार्थसिद्धये॥
गुणिनी या मृता नारी तत्केशैरुपवीतकम्।
कृत्वा तु धारयेत्तस्या भस्मना धूनयेत्तनुम्॥
नरमुण्डधरो नग्नः शिखिपिच्छैः सुभूषितैः।
इत्येवं रूपधृग्वीरः पूजां कुर्य्यान्निधिस्थले॥
चतुरस्रं चतुर्द्वारं तन्मध्येऽष्टदलाम्बुजम्।
कृत्वैतन्मण्डलं मन्त्री कुङ्कुमागुरुचन्दनम्।
तन्मध्ये स्थापयेत् कुम्भं जलपूर्णं शिवान्वितम्॥

"ओं सोमाय विश्वाधिपतये आगच्छ, आगच्छ बलिं गृह
नमो विश्वे स्वाहा"। अनेनाष्टदलकमले ब्राह्म्याद्यष्टकं पूजयेत्। "
नमो ब्राह्मै आगच्छ आगच्छ बलिं गृहाण"। एवं सर्वमा
तन्नामयुतेन मन्त्रेण पूजां कुर्य्यात्। "ओं शक्राय आगच्छ आगच्छ ब
गृहाण"। एवं सर्वे द्वारपालाः पूज्याः।

नन्दिनञ्च श्रियं पूर्वद्वारदेशे प्रपूजयेत्।
कीर्त्तिञ्चैव महाकालं दक्षिणे पश्चिमे पुनः॥
सगणेशं कुमारञ्च भृङ्गिदण्डिनमुत्तरे।
इत्येवं पूजनं कृत्वा स्वल्पाहारः प्रलिम्पयेत्।
बलिं प्रदर्शयेन्मन्त्री सहायांश्चाभिषेचयेत्॥

"ओं बलि सुबलि तृप्यन्तु सिद्धिमादिशन्तु ओं नमो विश्वे स्वाहा"। इति बलिमन्त्रः।

मण्डलं दर्शयेन्मन्त्री सहायाय समर्चितम्।
शिवकुम्भाम्भसा सर्वान्मन्त्रेणैवाभिषेचयेत्॥

"ओं नमो भगवते आर्भटे पिङ्गलोदराय पापं नाशय नाशय दुराचारं हन हन अभिषिक्तानां रक्ष रक्ष अभिषेकं पदम् उपधारय उपधारय कुरु कुरु समरभीषणे नमो विश्वे वौषट्"। इति अभिषेकमन्त्रः॥ २॥

निधेः खननकाले तु जपंस्तिष्ठेदघोरकम्।
ध्यायेच्च शावरं रूपं सर्वभूतभयापहम्॥
मयूरपक्षसंयुक्तं गुञ्जाजालेन भूषितम्।
दन्तुरोग्रमतिश्यामं रक्तोत्पलनिभेक्षणम्।
किरातमीश्वरं ध्यात्वा सर्वभूतफलप्रदम्।

"ओं क्लां क्लीं क्लूं अघोर तर तर प्रस्फुर प्रस्फुर प्रकट प्रकट धनेशाय कह कह सम सम जात जात दह दह पातय पातय ओं क्लीं क्लौं क्लूं अघोराय फट्"।

इमञ्चाघोरमन्त्रं हि पूर्वमेवायुतं जपेत्।
औषधीशेन होमस्तु घृतैः सिद्धो भवेदिति॥
खन्यमाने निधौ सर्पा निःसरन्ति भयानकाः।
औषधेन विना तेभ्यो भयं स्यान्मन्त्रिणामपि।
तस्मादौषधयोगेन पादलेपेन तान् जयेत्॥ ३॥

अर्कस्य करवीरस्य पनसस्य च मूलिकाम् ।
पिष्ट्वा पादप्रलेपात्तु दूरे गच्छन्ति पन्नगाः ॥ ४ ॥
मल्लिका गिरिकर्णी च श्वेतार्कः कण्टकारिका ।
वचा च मूलिकाश्चैषां पिष्ट्वा पादं प्रलेपयेत् ॥
सर्पा यक्षगणाः क्रूरा ये चान्ये विघ्नकारिणः ।
पलायन्ते निधिं त्यक्त्वा यथा युद्धेषु कातराः ॥ ५ ॥
वह्निः कोषातकी वज्री श्वेतार्कः गिरिकर्णिका ।
वचा पाठा च निर्गुण्डी कटुतुम्बराश्च * मूलकम् ॥
निम्बकेशरबीजानि गोमूत्रैः पेषयेत् शनैः ।
अनेन पादलेपेन विघ्ना यान्ति दिशो दश ॥
एतन्नाराचयोगेन याति पातालकं, धनम् ।
गृह्लाति नात्र सन्देहः स्वयमुक्तं कपर्दिना ॥ ६ ॥
कुष्माण्डैरण्डधुस्तूर-बीजानि पनसस्य च ।
तालदाड़िममूलानि गोमूत्रैः पेषयेत् समम् ॥
अनेन पादलेपेन सर्पा यक्षाः पिशाचिकाः ।
पलायन्ते न सन्देहो निधीन् संग्राहयेत् ध्रुवम् ॥ ७॥
समन्त्रकीलकैरष्टं निधिंश्चैतैश्च कीलयेत् ।
पलाशप्लक्षलोध्रोत्थ-कदम्बनिम्बजैः सुधीः ।
शम्युडुम्बरकाश्वत्थ-कीलकैः पञ्चसंयुतैः ॥
"ओं पुनन्तु मां देवगणाः पुनन्तु गणकाधिपाः ।
पुनन्तु विश्वे देवाश्च जातवेदाः पुनीहि माम्" ॥

इति कीलकमन्त्रः । "ओं सर्वभूताधिपतये नमः" । अनेन मधुमांसाभ्या
भूतबलिं दद्यात् । "ओं क्रीं फट्" । अनेन मन्त्रेण निधिस्थाने पुष्पं दद्यात्

* अत्र अन्ते षष्ठी विभक्तियोगो वर्त्तते इति पूर्वोक्तौषधादौ तथैवान्वयः ; ते
वह्न्यादीनां मूलकानि कटुतुम्बराश्च मूलकम् इति शुद्धार्थबोधः ।

"ओं नमो भगवति केतुमालिनि गरुड़े शुभे ओं क्रीं कपालिनि उद्धारय गृहाण निधिं स्वाहा"। अनेन केतुमालिनिमन्त्रेण निधिमुद्धरेत् ॥ ८ ॥

चत्वारो निधयस्तत्र शम्भुदेवेन कीर्त्तिताः।
कच्छपो मकरः शङ्खः पद्म इत्यभिधानतः॥
कच्छपो मकरश्चैतौ स्थिरचित्तौ स्वभावतः।
सुखसाध्यौ यथा पूर्वं विधानेन समाहरेत्॥
शब्देन तु मनुष्याणां शङ्खपद्मौ रसातलम्।
गच्छन्तौ न तु दृश्येते तत्र मन्त्रद्वयं स्मरेत्।
शैवञ्च वैष्णवञ्चैव ततः सिद्धो भवेद् ध्रुवम्॥

"ओं नमो भगवते रुद्राय निधिमुत्तिष्ठ माचलं स्वाहा"। ओं नमो भगवते वासुदेवाय धर धर बन्ध श्रीपर्वतकुलपर्वते सुनिधिं साधयेत्" ॥ ९ ॥

मृत्काष्ठलौहभाण्डेषु स्थितं द्रव्यन्तु मृत्तिकाम्।
शैवालं वा समाश्रित्य तिष्ठेत् तच्च विशोधयेत्॥
वालुकैर्लवणं पिष्ट्वा तस्मिन् द्रव्ये विनिक्षिपेत्।
यावल्लवणसंतुल्यं पाचयेन्मृदुवह्निना॥
स्वर्णञ्च सर्वरत्नानि निर्मलानि भवन्ति वै।
अर्जुनस्य विभीतस्य चित्रकस्य च पल्लवान्॥
पिष्ट्वा तु लवणं तुल्यमारनालेन लोड़येत्।
तल्लिप्तद्रविणं ह्यग्नौ चार्पयेन्मलशान्तये॥ १० ॥

इति श्रीसिद्धनागार्जुनविरचिते कच्चपुटे निधिवशीकरणं नाम षोड़शः पटलः।

अथ अदृश्यकरणम्।

लक्षमेकं जपेन्मन्त्रं राजद्वारे शुचिः स्थितः।
क्षीरेण मालतीपुष्पैर्हुते सिध्यति यक्षिणी।
ददाति गुटिकां सा तु मुखस्थाऽदृश्यकारिणी॥
"ऐं मदने मदनविड़म्बने! आत्मसङ्गं देहि मे देहि श्रीं
स्वाहा"॥ १॥
चतुर्लक्षं जपेन्मन्त्रं श्मशाने नियतः शुचिः।
नग्नोव्रतं ततस्तुष्टा पटं यच्छति यक्षिणी॥
तेनावृतो नरोऽदृश्यो विचरेद्वसुधातले।
निधिं पश्यति गृह्णाति न विघ्नैः परिभूयते॥
"ओं ह्रीं श्मशानवासिनी स्वाहा"॥ २॥
निशायाञ्च निधिं ध्यात्वा जपन् वामेन पाणिना।
अदृश्यकारिणीं विद्यां लक्षजापे * प्रयच्छति॥
"ओं नमो विश्वाचर महेश्वर! मम पर्य्यटतः"॥ ३॥
अतिबल्युपहारेण कुर्य्यादर्चनमुत्तमम्।
ततो दीपाङ्कोलीतैलैर्वर्त्तिः स्यादर्कतन्तुजैः॥
प्रज्वाल्य नृकपाले तु तत्पात्रे घृष्टकज्जलम्।
अञ्जयेन्नेत्रयुगलं देवैरपि न दृश्यते॥ ४॥
अर्कशाल्मलिकार्पास-पट्टसूत्राब्जतन्तुभिः।
पञ्चभिर्वर्त्तिकाभिश्च नृकपालेषु पञ्चसु॥
नरतैलेन दीपेषु कज्जलं नीरजैर्दलैः।
ग्राहयेत् पञ्चभिर्यत्नात् पूर्ववच्च शिवालये॥
पञ्चस्थानेषु युञ्जीत एकीकुर्य्याच्च तत्पुनः।
मन्त्रयित्वाऽञ्जयेन्नेत्रे देवैरपि न दृश्यते॥

* तस्या अदृश्यकारिण्या एव लक्षसंख्यजपसाधनयेत्यर्थः।

"ओं क्रीं फट् कालि कालि मांसशोणितभोजने रक्तकृष्ण-मुखे देवि! मा मे पश्यति मनुष्येति हुं फट् स्वाहा"। अयं मन्त्रः अयुतजप्तः सिद्धो भवति।

अदृश्यकारिणो योगाः मन्त्रश्चाष्टोत्तरं शतम्।
अनेनैव प्रयोगेण ततः सिद्धाः भवन्ति हि ॥ ५ ॥
अङ्कोलतैलसंसिक्ता वचा सप्तदिनावधि।
त्रिलोहवेष्टितां धातु-गुटिकां कारयेच्छुभाम्।
अदृश्यकारिणी ख्याता मुखस्था नात्र संशयः ॥ ६ ॥
तत्तैले * सर्षपं श्वेतं त्रिलोहेन च वेष्टयेत्।
गुटिका मुखमध्यस्था ख्याताऽदृश्यत्वकारिणी ॥ ७ ॥
काकोलूकस्य पक्षाश्च आत्मकेशास्तथैव च।
अन्तर्धूमगतं दग्धं सूक्ष्मचूर्णन्तु कारयेत्॥
अङ्कोलतैलगुटिकां कृत्वा शिरसि धारयेत्।
अदृश्यो जायते क्षिप्रं देवैरपि न दृश्यते ॥ ८ ॥
तालकं कृष्णमहिषी-क्षीरमङ्कोलतैलकम्।
तल्लिप्ताङ्गो नरोऽदृश्यो जायते शङ्करोदितम् ॥ ९ ॥
अङ्कोलतैलसंसिक्तं मलं पारावतोद्भवम्।
ललाटे तिलकं तेन कृत्वाऽदृश्यो भवेन्नरः॥

"ओं कक्षवो लालामूलं हुने सौरे जाने क्रीं क्रीं सिद्धे स्वाहा"। उक्तयोगानामयमेव मन्त्रः ॥ १० ॥

श्वेतापराजितामूलं ग्राह्यं चन्द्रग्रहे सति।
वालाक्षीद्रेण संयुक्तां गुटिकां मूर्ध्नि कारयेत्।
वक्त्रे हस्ते च सा ग्राह्या देवैरपि न दृश्यते ॥ ११ ॥
पुत्रजीवोत्थितं तैलं वर्त्तिं कृत्वाऽब्जतन्तुजाम्।
गोरोचनामधुभ्याञ्च वीरमुण्डे प्रलेपयेत्॥

* अत्र तत्तैले इति अङ्कोलतैले सम्यक् सेचयित्वा इत्यर्थबोधः।

दीपं प्रज्वाल्य चैकस्मिन्नपरे ग्राह्य * कज्जलम् ।
तदञ्जनाञ्जितो मर्त्यो विश्वेनापि न दृश्यते ॥ १२ ॥
जरायुं श्वेतमार्जार्य्याः कृष्णाया वाऽथ चूर्णयेत् ।
त्रिलौहवेष्टितं कुर्य्यान्मुखस्थाऽदृश्यकारिणी † ॥ १३ ॥
भोजयेत् कृष्णकाकन्तु महिषीनवनीतकम् ।
तद्विष्ठा रवितूलेन नृकपालेषु पूर्ववत् ।
श्मशाने कज्जलं ग्राह्यं तद्वत् फलमनुत्तमम् ॥ १४ ॥
पारावतस्य कुक्षिस्थो पक्षः स्रोतोऽञ्जनं हितम् ।
कृष्णमार्जाररक्तेन सिक्तमञ्जनादृश्यकृत् ॥ १५ ॥
कृष्णमार्जाररक्तेन भावितैः रक्ततन्तुभिः ।
वर्त्तिस्तत्कपिलाज्येन नृकपाले च पूर्ववत् ।
ग्राहयेत् कज्जलं दिव्यमदृश्यकरणोदितम् ॥ १६ ॥
दारदो देवदारुश्च चितामांसं नरस्य च ।
स्रोतोऽञ्जनयुतं कुर्य्यादञ्जनेऽदृश्यकारकम् ॥ १७ ॥
उलूकस्य शृगालस्य शूकरस्याक्षिनासिकाम् ।
नीलाञ्जनयुतां पिष्ट्वा रुद्ध्वा श्रावपुटे दहेत् ।
तेनाञ्जितो नरोऽदृश्यो जायते नात्र संशयः ॥ १८ ॥
खञ्जरीटं सजीवन्तु गृहीत्वा फाल्गुने क्षिपेत् ।
पञ्जरे रक्षयेत् तावद् यावद्भाद्रपदं लभेत् ।
तदा स पञ्जरेऽदृश्यो जायते नात्र संशयः ॥ १९ ॥
खञ्जरीटशिखा ग्राह्या हस्तस्थाऽदृश्यकारिणी ।
त्रिलौहवेष्टितां रक्षेद्धारयेन्मूर्ध्नि सर्वदा ॥ २० ॥
दश हेम द्विषट् ताम्रं रौप्यं षोड़शभागिकम् ।
एषा संख्या त्रिलौहस्य ज्ञातव्या सर्वकर्मणि ।

* अत्र ग्राह्येत्यार्षम्पदं, गृहीत्वास्थाने बोध्यम् ।

† एषा गुटिका इति शेषः ।

क्रमेण वेष्टयेद् यत्नाद् गुटिकानामयं विधिः ॥

"ओं नमो भगवते उड्डामरेश्वराय, नमो रुद्राय विलि विलि व्याघ्रचर्मपरिधान कमल कतुल चण्ड प्रचण्ड ! किलि किलि स्वाहा"। उक्तयोगानामयं मन्त्रः ॥ २१ ॥

अजमोदस्य मूलन्तु तुरगीगर्भशय्यया ।
सह तालकसम्पिष्टं तिलकेऽदृश्यकारकम् ॥ २२ ॥
रात्रौ कृष्णचतुर्दश्यां लाङ्गलीमूलमुद्धरेत् ।
श्वेतच्छागलिकागर्भ-शय्यया नरतैलकम् ।
एकीकृत्याञ्जयेन्नेत्रे ह्यदृश्यः खेचरो भवेत् ॥

"ओं अः सखे अः सकर्णे अरिदुर्बल अर्द्धकोश दाटा कराले ढक्कारावे फिक्कारिणि हुं हुं चण्डालिनि ! स्वाहा"। उक्तयोगद्वये अयमेव मन्त्रः ॥ २३ ॥

अमावस्याऽथवा पूर्णा पञ्चमी वा त्रयोदशी ।
श्वेतपुष्पैर्गन्धधूपैर्बलिदीपोपहारकैः ।
रात्रौ * पूज्या ततो ग्राह्या देवदानी सुमन्त्रिता ॥

"ओं अमृतगणपरिवेष्टित रुद्रगणाय ओं नमः स्वाहा"। अयं मन्त्रः। "ओं नमो भगवते रुद्राय फट्" अनेन ग्राह्या † ।

तद्रसैः पारदं मद्यं दिनमेकं ततोऽञ्जयेत् ।
अदृश्यो जायते सत्यं स्वयं प्रोक्तं कपर्दिना ॥ २४ ॥
तद्रसं देवदान्युत्थं केतकीस्तन्यसंयुतम् ‡ ।
अञ्जयेन्नेत्रयुगलम् अन्तर्द्धानकरं परम् ॥ २५ ॥
रात्रौ कृष्णचतुर्दश्यां चतुर्भिः सह साधकैः ।
एकान्ते च श्मशाने वा खड्गहस्तैर्महाबलैः ॥

---

* अत्र रात्रौ इत्यनेन पूर्वोक्तामावस्यादितिथिष्वन्वयः ज्ञेयः ।

† अत्र ग्राह्या इति पदात्परं देवदानीमूलांऽशेनेति शेषः समाकलनीयः ।

‡ अत्र स्तन्यशब्दः पुष्परसवाचकः ।

अर्चयेत् कृष्णमार्जारं गन्धपुष्पाक्षतादिभिः।
अजं कृष्णं बलिं दद्यात् तस्य मेदः समाहरेत्॥
उपोषिताय तस्मै हि मेदो देयन्तु भक्षणे।
तृप्यन्तं तं तु मार्जारं गृहीत्वा पश्चिमे पदे॥
चालनाद्रामयेद्भाण्डे * जलपूर्णे समर्चिते।
तद्वान्तं पाचयेदग्नौ दीपं तेनैव दापयेत्॥
वर्त्तिञ्च शुभ्रतन्तूत्थां ज्वालयेन्नृकपालके।
तत्पात्रे कज्जलं ग्राह्यं रात्रौ देवीं प्रपूजयेत्॥
परस्पराश्लिष्टकराश्चत्वारः खड्गपाणयः।
दीपमावृत्य रक्षेयुः पञ्चमस्तु जपेत् सदा॥
महाकालीयमन्त्रेण पूर्वयोग उदाहृतः।
तत्रत्यं कज्जलं यत्नात् पञ्चभिर्ग्राहयेत् समम्।
अदृश्यकारकं राज्य-प्रदो योग उदाहृतः॥ २६॥
शुनकस्यातिकृष्णस्य गले सूत्रं विबन्धयेत्।
"ओं नमः अकान्ति नृकटयतु कुटकटिमेन"।
अनेन मन्त्रराजेन कृष्णश्वानस्य दाक्षिणम्।
अधोदंष्ट्रामूलमांसं ग्राह्यं पञ्चोपचारकैः॥
पूजयित्वा विशुद्धात्मा तं सयत्नं समाहरेत्।
त्रिलौहवेष्टितं कृत्वा वक्त्रस्थोऽदृश्यकारकः॥ २७॥
मयूरवानरास्थीनि पाचयेन्माहिषैर्घृतैः।
पिष्ट्वा तदञ्जयेन्नेत्रे ह्यदृश्यो जायते नरः॥ २८॥
उपवासत्रयं कृत्वा ततः पुष्ये निवापयेत्।
नृकपाले यवान् कृष्णान् कृष्णमृत्पूरिते निशि॥
निशायां सेचयेन्नित्यं सुपक्वमाहरेन्निशि।
तैर्बीजैस्तु कृता माला शिरःस्थाऽदृश्यकारिणी॥ २९॥

* अत्र चालनादित्यनेन परिभ्रामणादिर्व्यर्थोऽवसेयः।

शरेण निहते मर्त्ये दग्धे तल्लोहमाहरेत्।
नीलोलूकस्य काकस्य ग्राह्ये एतस्य * लोचने।
तल्लोहेनाञ्जयेच्चक्षुरदृश्यो भवति ध्रुवम्॥ ३०॥
भजेदृतुमतीं कन्यां श्मशाने मैथुनेन तु।
तच्छुक्रशोणितं ग्राह्यं शिलाऽऽरक्तविमिश्रितम्।
ललाटे तिलकं तेन कृत्वाऽदृश्यो भवेन्नरः॥ ३१॥
सम्प्राप्ते त्वष्टमे मासे यदि गर्भं पतेत् स्त्रियः।
तस्य नेत्रे च कर्णौ च जिह्वाहृन्मांसनासिकाम्॥
गुदमेढ्रमुपादाय सन्ध्यायां तत् प्रपेषयेत्।
सूर्य्यचन्द्रग्रहे चैवं गुटिकामभिमन्त्रयेत्॥
महाकालीयमन्त्रेण यावन्मोक्षो भवेद् ग्रहः।
गुटिकां धारयेद्धस्ते ह्यदृश्यो जायते नरः॥ ३२॥
नृकपाले तु या लग्ना सीसकोद्भवमृत्तिका †।
चाण्डालीस्तन्यसंमिश्रा हस्तस्थाऽदृश्यकारिणी॥ ३३॥
वापयेत्तुलसीबीजं कर्म्मकारस्य मस्तके।
रात्रौ कृष्णचतुर्दश्यां जलेन परिषेचयेत्॥
तुलसीकाष्ठपृष्ठे वा दृश्यते सा न केनचित्।
तदर्थं वापिता वाह्ये तुलसी जायते सदा॥
तदा काकोद्भवा ग्राह्या बलिं दत्त्वा तु कुक्कुटम्।
सुपक्वं सप्तधान्यञ्च वटपत्रे बलिं क्षिपेत्।
समूलां तुलसीमञ्जर्यादृश्यो ‡ जायते नरः॥ ३४॥
कृष्णाषाढ़चतुर्दश्यां कृष्णधुस्तूरबीजकम्।
वापयेन्नरमुण्डे तु नासारन्ध्रे समांसके॥

* अत्रैतच्चेतनेन अञ्जनस्यार्थं इत्यर्थबोधोऽवगन्तव्यः।

† अत्र सीसकोद्भवमृत्तिकया कृष्णमृत्तिका ग्राह्या।

‡ अत्र तुलसीमञ्जर्यादित्यनेन तत्तुलसीकृताञ्जनेन चक्षुषी अञ्जयेदित्यर्थः।

निखनेत् कृष्णभूम्यन्तः सोच्छिष्टैः सेचयेत् सदा ।
संक्रान्तिदर्शपूर्णासु दीपं दद्याद् घृतेन च ॥
रक्तसूत्रोद्भवा वर्त्तिर्यावत्तस्य फलोदयः ।
कृष्णाष्टम्यां फलं ग्राह्यं बलिं दद्यात्तु कुक्कुटम् ।
तद्वीजैर्गुटिका कार्य्या मुखस्थाऽदृश्यकारिणी ॥ ३५ ॥
कृष्णमृत्पूरिते चैत्रे वाप्या गुञ्जा नृमुण्डके ।
रात्रौ कृष्णचतुर्दश्यामतिबल्युपहारकैः ॥
नित्यं कुर्य्याद्बलिं पूजां जलैः सिञ्चेत् सदा निशि ।
यावत् फलति सा गुञ्जा ततः कृष्णमजं बलिम् ॥
कृत्वा योगीश्वरांश्चैव भोजयेद्बलिपूर्वकम् ।
तस्य चाष्टोत्तरशतं ग्राह्यं गुञ्जाफलं क्रमात् ॥
सूच्या च प्रोतयेत् सूत्रैः सा मालाऽदृश्यकारिणी ।
धारयेन्मूर्ध्नि कर्णे वा, स दृष्टो न हि दृश्यते ॥ ३६ ॥
सुकृष्णमहिषीक्षीरैः पाचयेत् कृष्णजीरकम् ।
तद्भक्षणाददृश्यः स्याद् यावद् जीर्णं न संशयः ॥ ३७ ॥
हृदयं कृकलासस्य ग्राहयेद्विधिपूर्वकम् ।
गोरोचनासमं पिष्ट्वा तालपत्रेण वेष्टयेत् ।
समं वा गुटिका सा तु मुखस्थाऽदृश्यकारिणी ॥
"ओं इड़ापिङ्गलाय स्वाहा" ॥ ३८ ॥
कटुतुम्बी देवदाली पटोली चेन्द्रवारुणी ।
तिक्ताकोषातकी तासां शुष्कबीजानि चूर्णयेत् ॥
अपामार्गकाकतुण्डयोः कषायेण विलोड़येत् ।
आलिप्य कांस्यपात्रन्तु धारयेदातपे खरे ॥
तं तप्तं स्वच्छवस्त्रेण पीड़येत् तैलमाहरेत् ।
तेन तैलेन संघृष्टं देवदारु च चन्दनम् ।
तेन वै तिलकं कुर्य्याल्ललाटेऽदृश्यकारकम् ॥ ३९ ॥

अपामार्गकषायेण पूर्वतैलं समाहरेत् ।
विषमुष्ट्युत्थबीजानां चूर्णमाम्रातचूर्णकम् ॥
दशांशं चित्रकं मूलं पिंष्याल्लाङ्गलिवारिभिः ।
एवं विधात् क्रियायोगात् पूर्वतैलं समाहरेत् ॥
विषमुष्ट्युत्थबीजानि सर्वयोगेषु योजयेत् ।
अङ्कोलतैलनिर्दग्धं रजनीकुङ्कुमं निशि ॥
रोचनासहदेव्योश्च समभागानि पेषयेत् ।
विषमुष्ट्युत्थतैलेन तिलकोऽदृश्यकारकः ॥ ४० ॥
कार्पासबीजचूर्णानि दिनमेकं विभावयेत् ।
समूलोत्तरवारुण्याः कषायेण प्रयत्नतः ।
पूर्ववद् ग्राहयेत्तैलं सर्वयोगेषु योजयेत् ॥
आम्रातबीजचूर्णानि दशांऽशं चित्रमूलकम् ।
नारिकेलाम्बुना पिष्ट्वा वर्त्तिं कृत्वा प्रयत्नतः ।
ज्वलितां धारयेद्धस्ते सोऽप्यदृश्यो भवेन्नरः ॥ ४१ ॥
पुत्रजीवोत्थबीजानां तैलमाम्रातवद्भवेत् ।
दृश्यन्ते चाञ्जिताः सर्वे गोमूत्रैः क्षालनात् पुनः ॥ ४२ ॥

इति श्रीसिद्धनागार्जुनविरचिते कक्षपुटे अदृश्यकरणं
नाम सप्तदशः पटलः ।

अथ पादुकासाधनम् ।

अथ चाङ्कोलतैलेन पेषयेत् श्वेतसर्षपान् ।
तल्लिप्तहस्तपादस्तु योजनानां शतं व्रजेत् ॥ १ ॥
अङ्कोलतैलसम्पिष्ट-श्वेतसर्षपलेपिताम् ।
पादुकामुष्ट्रचर्मोत्थां समारुह्य शतं * व्रजेत् ॥ २ ॥

* अत्र शतमित्यनेन शतयोजनं ज्ञेयम् ।

काकजङ्घा सिता ग्राह्या गृध्रस्य च वसा तथा।
अश्वगन्धासमायुक्तामुष्ट्रीक्षीरेण पेषयेत्।
अनेन लिप्तपादस्तु योजनानां शतं व्रजेत्॥

"ओं नमो भगवते रुद्राय भूतवेतालत्रासनाय शङ्खच
गदाधराय हन हन महते चन्द्रयुताय हुं फट् स्वाहा"।

अनेन साधकः पाद-लेपनत्रयपूर्वकम्।
धीरोऽभिमन्त्रयेन्मन्त्रं ततः सिद्धिः सुनिश्चिता॥ ३॥
श्वानमार्जारनकुल-पित्तं ग्राह्यं समं समम्।
योजनानां शतं गत्वा काकमांसं रसाञ्जनम्।
पिष्ट्वा पादप्रलेपेन पुनरावर्त्तते क्षणात्॥

"ओं नमो भगवते रुद्राय मांसे संमले काले गलेखो
प्रवर सर सर स्वाहा"॥ ४॥

इन्द्रगोपञ्च सिन्दूरं हरिचन्दनवेतसम्।
अजामांसं तथा रास्नामवीक्षीरेण भावयेत्॥
पिष्ट्वा पादप्रलेपेन स गच्छेद् योजनायुतम्।
सुभगः स तु नारीणां ब्रह्मतुल्यो भवेन्नरः॥

"ओं नमो भगवते रुद्राय, नमो ब्रह्मणे, नमः सूर्य्याय, न
श्चन्द्राय, नमो शङ्खचक्रगदाधराय हिलि हिलि स्वाहा"॥ ५

सुरभी * काञ्चनीमूलमजमारी च चन्द्रकम्।
दारदं पारदञ्चैव उष्ट्रीक्षीरेण पेषयेत्॥
अनेन पादलेपेन नानारूपधरो भवेत्।
योजनानां सहस्रैकं गत्वा प्रतिनिवर्त्तते।
कामयेत् स्त्रीसहस्राणि रुद्रतुल्यो भवेन्नरः।

"ओं नमो भगवते रुद्राय, नमो दण्डिकपालाय मि

* अत्र सुरभीपदेन नवमल्लिकापुष्पाणि ग्राह्यानि।

फट कटस्य यानप्रियाय बद्धे श्रीशूलिने भगवते त्रिनेत्राय चल
हन स्वाहा" ॥ ६ ॥

सारिकाया वसानेत्रमन्त्राणि रुधिरं तथा।
काकपित्तं तथा नेत्रं हरिचन्दनवेतसम्॥
शुनोमज्जां वसां तुल्यमुष्ट्रोक्षीरेण भावयेत्।
पादलेपः प्रकर्त्तव्यो नमस्कृत्य शिवं ततः॥
योजनं लक्षमेकन्तु निमिषार्द्धेन गच्छति।
गगनाशेषचारी च क्रीड़त्येव यथा शिवः॥
स्त्रीकोटिशतसंघातं कामयेन्निमिषान्तरे।
ब्रह्मतुल्यो भवेत् सोऽपि लीयते परमे शिवे॥

"श्रीं नमश्चन्द्रमणे चन्द्रशिखरे, नमो भगवते तिष्ठ, नमो भग-
ति, नमः शिखरे, नमः शूलिने, नमः पादप्रचारिणे वेगिने, हं
फट् स्वाहा" ॥ ७ ॥

प्रतीचीदिग्गतं मूलं देवदान्याः समाहरेत्।
तत् पिष्टाऽङ्कोलतैलेन पादलेपाच्छतं व्रजेत्॥ ८ ॥
काकतुण्डाश्च मूलानि तिलतैलेन पाचयेत्।
पादान्तजानुपर्य्यन्तं लिप्ता दूराध्वगो भवेत्॥

"श्रीं क्रीं नमश्चण्डिकायै गगनं गमय गमय चालय चालय
गवाहिनि! क्रीं स्वाहा"। उक्तयोगद्वयस्यायं मन्त्रः॥ ९ ॥

काकस्य हृदयं नेत्रं जिह्वाञ्चैव मनःशिलाम्।
गैरिकञ्चैव सिन्दूरमजमारी च मालती॥
समां रुद्रजटाञ्चैव विदार्य्या सह पेषयेत्।
तल्लिप्तपादः सहसा सहस्रयोजनं व्रजेत्।
वलीपलितनिर्मुक्तो यावदाभूतसंप्लवम्॥

"श्रीं नमो भगवते रुद्राय हरितगदाधराय त्रासय त्रासय
चालय चालय स्वाहा" ॥ १० ॥

निर्गुण्डीमूलमादाय मलं पारावतोद्भवम्।
पलाशबीजसंयुक्तं रक्तपाठाफलानि च॥
हृदयञ्च उलूकस्य पेषयेच्छीतवारिणा।
अनेन पादलेपेन योजनानां शतं व्रजेत्॥ ११॥
उलूकस्य तु पादानि दग्धानि चूर्णितानि च।
अङ्कोलतैलपिष्टानि पादलेपेन योजयेत्।
योजनानां शतं गत्वा पुनरागच्छति ध्रुवम्॥
"ओं ह्रीं क्लीं ह्रूं प्लुं हुं फट नमः"।
सिद्धिप्रदो भवेन्मन्त्रः प्रोक्तयोगद्वये ह्ययम्॥ १२॥
विधिना कृकलासस्य पुच्छमादाय दक्षिणम्।
त्रिलौहवेष्टितं वक्त्रे धार्य्यमिच्छागतिर्भवेत्॥
"ओं सङ्कोचाय स्वाहा"॥ १३॥

अथ गुटिकासाधनम्।

साधकश्चिल्लालयं गत्वा नित्यं तस्मै निवेदयेत् देवत बुद्ध्यातिभक्त्या भक्षणार्थं किञ्चित् किञ्चिदाममांसं निक्षिपेत् यावत् प्रसूता भवति ततः पारदं रसं सार्द्धनिष्कत्रयं कस्मि श्चिन्नालिकाद्वये निक्षिपेत्। तस्याध ऊर्द्धच्छिद्रं सिक्थकेन रुद्ध चिल्लालयं गत्वा अण्डद्वयस्योपरि नालिकाद्वयं निधाय लौह शलाकया नालिकामध्यमार्गेण तदण्डं लघुहस्तेन वेधयित्व शलाकामुद्धरेत्। तेनैव मार्गेण अण्डमध्ये यथाऽसौ गच्छति तथायत्नं कुर्य्यात्। ततश्छिद्रं चिल्लविष्ठया लिम्पेत् ततस्त वृक्षाधो नित्यमतिबल्युपहारेण पूजां कुर्य्यात्। यावत् स्वय मेवाण्डानि स्फोटयन्ति तावन्नित्यमुपरि गत्वा वीक्षयेत् स्फुटिते सति गुटिकाद्वयं ग्राह्यम्। ततो वृक्षादुत्तीर्य्य यो गिल्ला मनुष्यस्तस्मै एका देया। अपरां स्वयं मुखे धारयेत्।

योजनद्वादशं गत्वा पुनरेव निवर्त्तते।

इति सिद्धयोगः। "ओं ह्रीं ह्रूं फट् छिन्नचक्रेश्वरि परात्परेश्वरि! पादुकासाधनं देहि मे देहि स्वाहा"। अनेन मन्त्रेण ...पं पूजाञ्च कुर्य्यात्॥ १४॥

लक्षत्रयं जपेन्मन्त्री ध्यात्वा तां रक्तवर्णिकाम्।
कदम्बवनमध्ये तु मदघूर्णितलोचनाम्॥
कुण्डलैर्मणिभिर्दिव्यैर्वस्त्रालङ्कारभूषिताम्।
साम्प्रतं कलसं वामे दक्षिणे मणिहारकम्॥
दधतीं चिन्तयेद्दीप्तां रक्तपद्मोपरि स्थिताम्।
प्रहसन्तीं चित्रलेखां प्रसन्नां नवयौवनाम्॥
ईदृशीं पूजयेन्नित्यं जपान्ते होमयेत् ततः।
शर्करा छागमांसन्तु गोक्षीरं घृतसंयुतम्॥
दशांऽशेन ततस्तुष्टा खेचरत्वं प्रयच्छति।
विमानं खेचरत्वञ्च ददात्यमृतभोजनम्॥
आयुर्लक्षायुतञ्चैव हारकेयूरमण्डलम्।
नानालोकगतश्चैव यस्मान्मन्त्री सुखी भवेत्॥

"ओं ह्रीं चित्रलेखे! आगच्छ आगच्छ तुतु तुतु ह्रीं स्वाहा"॥ १५॥

इति श्रीसिद्धनागार्जुनविरचिते कक्षपुटे पादुकासाधनं नाम अष्टादशः पटलः।

अथ मृतसञ्जीवनीविद्या।

मृतसञ्जीवनीं विद्यां प्रवक्ष्यामि समासतः।
लिङ्गमङ्कोलवृक्षाधः स्थापयित्वा प्रपूजयेत्॥
नवं घटञ्च तत्रैव पूजयेल्लिङ्गसन्निधौ।

वृत्तं लिङ्गं घटञ्चैव सूत्रेणैकेन वेष्टयेत् ॥
चतुर्भिः साधकैः सार्द्धं प्रतियामं क्रमेण तु ।
एवं दिवानिशं कुर्य्यादघोरेण समर्च्चनम् ॥
पुष्पादिफलपाकान्तं साधनं कारयेत् सुधीः ।
फलानि पक्कान्यादायपूर्वोक्तं पूरयेद् घटम् ॥
तद्घटं पूजयेद्धीमानर्घ्यपुष्पाक्षतादिभिः ।
तुषवर्जीनि वै कृत्वा वीजानि वापयेन्मुखे ॥
तन्मुखे टङ्कणं चूर्णं किञ्चित् किञ्चित् प्रपूजयेत् ।
विस्तीर्णमुखभाण्डान्तः कुम्भकारगणोद्भृताम् ॥
मृत्तिकां लिम्पयंस्तत्र तानि वीजानि लेपयेत् ।
कुण्डल्याकारयोगेन यत्नादूर्द्धमुखानि च ॥
तच्छुष्कं ताम्रपात्रोत्थं भाण्डं दद्यादधोमुखम् ।
आतपे धारयेत्तैलं ग्राहयेत्तच्च रक्षयेत् ॥
माषार्द्धञ्चैव तत्तैलं माषार्द्धं तिलतैलकम् ।
तस्य देयं मृतस्यैतत् सम्यक् तस्याऽसितेन * तु ॥
तत्क्षणाज्जीवयेत् सत्यं गतं वाऽपि यमालयम् ।
रोगादिसर्पादिमृताः पुनर्जीवन्ति निश्चयम् ॥ १ ॥
पुंशुक्रं पारदं तुल्यं तेन तैलेन मर्दयेत् ।
गात्रे देयं मृतस्यैव कालदष्टस्य वा क्षणात् ।
जीव आयाति नो चित्रं महादेवेन भाषितम् ॥ २ ॥
पुष्यभास्करयोगेन गुडूचीमूलमाहरेत् ।
कर्षमुष्णोदकैः पीतमपमृत्युहरं परम् ॥
"ओं अघोरेभ्योऽथ घोरेभ्यो रुद्ररूपेभ्यः" ।
उक्तयोगद्वयस्यार्य्यैरयम्मन्त्रः प्रकीर्त्तितः ॥ ३ ॥

---

* असितेन—निक्षिप्तेन, सेवितेन इति यावत् ।

अथ कालवञ्चनम् ।

गोचनैः कुङ्कुमैर्लाक्षानामिकारक्तसंयुतैः ।
द्वादशारं लिखेत् पद्मं तद्बहिश्चैव तत् समम् ॥
षोड़शारं ततो बाह्ये मूलं वीजं ततो लिखेत् ।
प्रथमस्य दले वर्षं मासांश्चैव वहिर्दले ॥
षोड़शाराकर्णिकायां साध्यनाम दिनानि च ।
पूजयेच्चक्रवर्त्मन्तु सयत्नं तन्निरीक्षयेत् ॥
यद्दले वाक्षरं लुप्तं तद्दिने म्रियते ध्रुवम् ।
वर्षमासदिनस्यैतत् तस्य नाम्नः परस्य वा ॥
यदा वर्णं न लुप्तं स्यात् तदा मृत्युर्न विद्यते ।
वर्षद्वादशपर्य्यन्तं कालं ज्ञेयं शिवोदितम् ॥

"ओं धत्त कालपुरुषोत्तम सङ्गा विश्वमूर्त्ते कालक्षयं अन्त-ाल्लं प्रदर्शय प्रधानकालं दर्शय स्वाहा"। अमुं मन्त्रं नित्य-ष्टोत्तरसहस्रं जप्तव्यं पञ्चोपचारैः सप्तदिनपर्य्यन्तमनेनैव प्रपू-येत् । प्रत्ययो भवति ॥ १ ॥

मार्गशीर्षे तु कृष्णायां पञ्चम्यां नीरजं शुभम् ।
भूर्ज्जपत्रं समानीय लाक्षाकुङ्कुमरोचनाः ॥
स्वकीयाऽनामिकारक्तैर्लिखेद्विद्यां शिवोदिताम् ।
क्रमपूजां विधायादौ पश्चाद्विद्यां समर्चयेत् ॥
शरावपुटमध्यस्थां जातीपुष्पैः सुवेष्टिताम् ।
शुभपीठे विधृत्वाऽथ तां विद्यां पूजयेन्निशि ॥
प्रातः कृत्वाऽर्च्चनं भूयः ध्यात्वा पूज्या कुमारिका ।
साधकस्त्वेकचित्तेन पश्चाद्विद्यां विलोकयेत् ॥
वर्णाधिक्ये भवेद्राज्यं मात्राधिक्ये च सम्पदः ।
समत्वे सुखमारोग्यं हानिर्बिन्दुविलोपनात् ।
मात्राहीने भवेद्व्याधिर्मरणं बिन्दुनाशने ॥

"ओं क्रीं क्रीं म्लें महापतये रक्ष रक्ष मृतामृतोद्भवे! म्लें क्रीं विच्चे स्वाहा" ॥ २ ॥

मृत्युलक्षणज्ञानम्।

उत्तराभिमुखस्थो यो यदि गच्छति दक्षिणाम्।
दिङ्मूढ़ः स तदा ज्ञेयः सप्तमासान्न जीवति * ॥ ३ ॥
शुद्धनिर्मलमादित्यविवरं यदि पश्यति।
तद्वर्षान्ते क्षयं याति नान्यथा भैरवोदितम् ॥ ४ ॥
सितं कृष्णं हरिद्राभं समूलं भानुमण्डलम्।
यः पश्यति सदाऽसौ वै वर्षादूर्द्ध्वं न जीवति ॥ ५ ॥
रविबिम्बे जले दृष्टे सम्पूर्णे न मृतिः क्वचित्।
खण्डे दिक्षु क्रमान्मृत्युस्तथैकद्वित्रिमासतः।
मध्यच्छिद्रे दशाहेन तज्जले धूमसङ्कुले ॥ ६ ॥
अरुन्धतीं ध्रुवं सोमं छायायां वा महापथम्।
यो न पश्यति निस्तेजो वर्षान्ते म्रियते ध्रुवम् ॥ ७ ॥
सच्छिद्रो दृश्यते चन्द्रस्तद्वद्वा दर्पणे रविः।
दृश्यते निस्पृहो वाऽपि येनाऽसौ म्रियतेऽब्दतः ॥ ८ ॥
सूर्य्ये वहति सम्पूर्णे यस्य सोमो न दृश्यते।
वर्षान्ते जायते मृत्युः कालज्ञानं शिवोदितम् ॥ ९ ॥
यस्य वा स्नानमात्रेण हृदयं यदि शुष्यति।
पश्येद्धूमञ्च सर्वत्र सप्तमासान्तजीवनम् ॥ १० ॥
अग्रतः पृष्ठतो वाऽपि यस्य स्यात् खण्डितं पदम्।
कर्दमे पांशुपुञ्जे वा सप्तमासान्तजीवनम् † ॥ ११ ॥
कृष्णरक्तानि वस्त्राणि रक्तमाल्यानुलेपनम्।

* सप्तमासात् परं न जीवतीत्यर्थः।

† श्लोकद्वयेऽव तस्येति शेषः योजनीयः।

स्वप्ने यो लभतेऽकस्मात् षण्मासान्ते न जीवति ॥ १२ ॥
भक्तिः शीलं स्मृतिस्त्यागो बुद्धिश्चञ्चलता तथा ।
यस्यैतानि निवर्त्तन्ते षण्मासान्तं न जीवति ॥ १३ ॥
राक्षसैर्भूतवेतालैः श्वानशूकरगर्दभैः ।
गृध्रैः काकैरुलूकैश्च महिषैर्वा क्रमेलकैः ।
स्वप्ने वेष्टितमात्मानं पश्येदब्दान्न जीवति ॥ १४ ॥
आसोरस्कां * यदा पश्येदात्मच्छायामथापि वा ।
सुक्षणास्तारकाः पश्येत् षण्मासान्ते न जीवति ॥ १५ ॥
निशि चापं दिवा चोल्काममित्रे रात्रिदर्शनम् ।
यः पश्येन्म्रियते सोऽपि षण्मासाच्छङ्करोदितम् ॥ १६ ॥
स्वप्ने देहं स्वकं स्थूलं तैलाक्तं वाऽथ पश्यति ।
भातः क्रुद्धोऽथवा नित्यं मासादूर्द्धं न जीवति ॥ १७ ॥
शङ्खावर्त्ते भ्रुवोर्मध्ये गुल्फयोर्मर्मसन्धिषु ।
स्पन्दनं यस्य नैवास्ति मासादूर्द्धं न जीवति ॥ १८ ॥
चक्षुषी स्रवतो नित्यं न शृणोत्यपि निश्चितम् ।
दीपगन्धं न जानाति पक्षादूर्द्धं न जीवति ॥ १९ ॥
ओष्ठयोर्धूसरत्वञ्च शुष्कं वा तालुदेशकम् ।
स्कन्धो भग्नत्वमायान्तो षण्मासान्ते न जीवति ॥ २० ॥
भुञ्जतो यस्य वा नित्यं यूका वा मक्षिकादयः ।
त्यजन्ते वाऽथ वैरस्यं षण्मासान्ते न जीवति ॥ २१ ॥
कालज्ञानमिदं ज्ञात्वा तस्य कुर्वीत बन्धनम् ।
मन्त्राभ्यासं समारभ्य मन्त्रे तन्त्रे शिवोदितम् ॥
वर्णाः षोडशकादय ब्रह्मशरीरे व्याप्य तिष्ठति ।
विष्णुरुद्रशरीरेऽपि एवमावर्त्तयेत् क्रमात् ॥

* छायादर्शने उरःप्रदेशमेव तां पश्येत् न सशिरस्कामित्यर्थः ।

ब्रह्मकाले नाभिपद्मे विष्णुकाले हृदम्बुजे ।
कण्ठाब्जे रुद्रकाले तु ध्यात्वा कालस्य वञ्चनम् ॥
कालसङ्कर्षणीं विद्यां ज्योतीरूपां जपेत्ततः ।
कालो विमुखतां याति लक्षजापे कृते सति ॥

"ओं क्लीं प्रं च्रौं ठौं ठां क्रौं सम्मोहिनिचण्डे ! कालसङ्कर्ष
नमः" । एवं जपेत् ।

पश्चिमाम्नायसक्तस्य प्रोक्तं कालस्य वञ्चनम् ।
नाभितो ब्रह्मरन्ध्रान्तां सर्पाभां ज्योतिरूपिणीम् ।
प्रोल्लसन्तीं जपेन्नित्यं मायां कालस्य वञ्चनम् ॥

"ह्रीं" इति माया ।

स्वकीयं ग्रसते योऽसौ चित्तं कालकुलाकुलम् ॥
ग्रासान्ते न स्मरेत् किञ्चित् कालस्तस्य करोति किम्॥

इति श्रीसिद्धनागार्जुनविरचिते कक्षपुटे कालवञ्चनं नाम
ऊनविंशतितमः पटलः ।

अथ कौतुककलापाः ।

अत्याहारमनाहारं प्रवदामि समासतः ।
योऽस्ति निःशेषलोकस्य जायते कौतुकं महत् ॥ १ ॥
ब्रध्नकेनाक्षवृक्षस्य पीठं कृत्वाऽऽसने स्थितः ।
योऽसौ भुङ्क्ते घृतैः सार्द्धं भोजनं भीमसेनवत् ॥ २ ॥
सन्ध्यायामक्षवृक्षस्य कर्त्तव्यमभिमन्त्रणम् ।
प्रातः पुष्पाणि संगृह्य मालां शिरसि धारयेत् ॥

"ओं नमः सर्व्वाधिपतये ग्रस ग्रस शोषय भैरवी आज्ञा
पयति स्वाहा" । उक्तयोगानामयं मन्त्रः ॥ ३ ॥

अधरं कृकलासस्य शिखास्थाने निबन्धयेत्।
वायुपुत्त्र इवाश्चर्य्यं स तु भुङ्क्तेऽन्नपर्वतम्॥
"ओं नाड़ीवेगेन उर्वशी स्वाहा" ॥ ४ ॥
अण्डानि कृकलासस्य मज्जां कारञ्जबीजजाम्।
पिष्ट्वा तु गुटिकां कृत्वा त्रिलौहेन तु वेष्टयेत्।
तद्वक्त्रे धारयेद् योऽसौ क्षुत् पिपासा न बाधते *॥
"ओं वासं शरीरम् अमृतमाकर्षय [स्वा]हा" ॥ ५ ॥
पद्मबीजमहाशालीन् छागीदुग्धेन पाचयेत्।
साज्यं तत्पायसं भुक्तं द्वादशाहं क्षुधापहम्॥ ६ ॥
उडुम्बरफलं पक्वमङ्कुलीतैलपाचितम्।
भुक्त्वा मासं क्षुधां हन्ति पिपासां नात्र संशयः॥ ७ ॥
उडुम्बरं शालिबीजं शैरीषबीजसंयुतम्।
पक्वं भुक्त्वा समाऽश्नेन साज्यं मासं क्षुधापहम्॥ ८ ॥
चक्रमर्दस्य मूलन्तु दूर्वाङ्कुरकशेरुकम्।
नीलोत्पलोत्थमूलानि क्षीरेणापि च कोद्रवैः।
पचेत् तत् पयसा साज्यं भुक्त्वा मासं क्षुधापहम्॥ ९ ॥
अपामार्गस्य बीजानि सघृतानि प्रपाचयेत्।
पायसं चाविकैः क्षीरैर्भुङ्क्ते मासं क्षुधापहम्॥ १० ॥
दुग्धसिद्धं फलं धात्र्या दिनैकं पेषयेत् ततः।
सिताज्यसहितं पाच्यं मोदकं भक्षयेत् ततः।
दशरात्रं क्षुधां हन्ति पिपासां नात्र संशयः॥ ११ ॥
उडुम्बरगर्भबीजं बीजपूरशिरीषजैः।
चूर्णयित्वा घृतैर्भुक्तं मासार्द्धं तत् क्षुधापहम्॥

* अत तमिति शेषोऽवगन्तव्यः, तथा च तं क्षुत् न बाधते पिपासाऽपि न बाधते इत्यर्थः।

"ओं नमो भगवते रुद्राय अमृतार्णवमध्यसंस्थिताय मम शरीरे अमृतं कुरु कुरु सह स्वाहा"। उक्तयोगानामयं मन्त्रः ॥१२॥

भागाः षोड़श चाज्यस्य सहदेव्यास्त्रयस्तथा।
त्रयोदशशिलाभागाः पुत्रजीवो द्विभागिका॥
हस्तापेटारिका सप्त-भागा गौराश्चतुर्दश।
एकादश तु दन्त्यास्तु बन्ध्याकर्कोटिकाऽष्टकाः॥
दशभागा रुद्रजटा विष्णुक्रान्ता तदर्द्धिका।
श्वेतार्कस्य चतुर्भागाः लज्जा च नवभागिका॥
षड्भागा लक्षणा ज्ञेया द्विषट्का मेषशृङ्गिका।
चाण्डालीभाग एकः स्यात् त्रिभागा चेन्द्रवारुणी॥
एतत् षोड़शकं योगं सर्वसिद्धिकरं नृणाम्।
प्रतियोगं चतुष्कोष्ठे चतुस्त्रिंशत्तु भागिकाः॥
ग्राहयेदुक्तयोगेन यथा यत्र तथोचिताः।
एतेषां परिभाषा तु ज्ञाप्तहेतोर्निगद्यते॥
भूर्जपत्रे पटे वाऽथ चतुरस्रं समालिखेत्।
रोचनाकुङ्कुमाभ्यान्तु कुर्य्यात् षोड़शकोष्ठकम्॥
ह्रां ह्रीं ह्रूं ह्रः चतुर्दिक्षु एकैकं बीजमालिखेत्।
मालाष्टकं लिखेद्दिक्षु मम रक्षतु संयुगे॥
मन्त्रेण हुं फड़न्तेन सवाद्येन तु तत्क्रमात्।
रुद्ध्वा पाशाङ्कुशाभ्यान्तु रेखाग्रे वज्रमालिखेत्॥
षोड़शानान्तु कोष्ठानां मध्ये त्वेकैकमौषधम्।
स्थापयेत् पूजयेद्दोमांश्चण्डमन्त्रेण भक्तितः॥
ऐशान्यादिक्रमेणैव कुण्डलाकारतो भवेत्।
स्थापनं पूजनञ्चैव सर्वकामार्थसि[illegible]ये॥

"ओं क्रीं रक्तचामुण्डे! तुरु तुरु सर्वसिद्धिं कुरु कुरु स्वाहा भवान्यै नमः"।

पूर्वमेवायुतं जप्त्वा सर्वसिद्धिकरो भवेत्।
कलागुणस्वरैर्द्वाभ्यामङ्गलेपे जगद्वशम्॥
तैलेन वापि चान्येन कज्जली राजपूर्विका।
तिथीन्दुसूर्य्यर्त्तुभिरङ्गलेपे जगद्वशम्॥
षोड़शाद्यास्तु धूपेन नवद्विवर्त्तनेन च।
चतुर्द्वा चाञ्जने योज्यं पश्चाच्च स्नानकर्मणि॥
पक्षं कलादिरन्ध्रान्तमेतत् सर्ववशङ्करम्।
स्नाने वाणादिपक्षान्तं सर्वलोकवशङ्करम्॥
स्वरैर्नवजलायोगात्तिलकं सर्ववश्यकृत्।
मन्वर्कस्वरपक्षैः सा योनिलेपे पतिर्वशः॥
दिग्वाणतिथिवेदैश्च गुटिका च वशङ्करी।
धारयेन्मस्तके भाले भोजने वाऽथ पाचयेत्॥
गुणदिग्वसुकामैः स्यादङ्गलेपो भयङ्करः।
वसुपक्षस्वरै रुद्रैर्न्यस्तं योनौ प्रसूतिकृत्॥
दिगष्टसप्तनवभिः पाणौ लेपे कृते सति।
योद्धा विजयमाप्नोति यथा दुर्य्योधने ध्रुवम्॥
मनुस्वरत्रिभिर्वेदैः कृत्वा तु गुटिकां करे।
बाहौ शिरसि कर्णे च धृत्वा चौरै[illegible]र्न बाध्यते॥
स्वरसूर्य्येन्दुवसुभिश्चूर्णं कृत्वा जले क्षिपेत्।
तत् पीत्वा परसैन्यन्तु दर्पहीनं प्रजायते॥
रुद्रेन्दुषट्कलायुक्तं जले न्यस्तञ्च पूर्ववत्।
तिलकं बाहुमूलेन धारयेद्वाथ मूर्द्धनि॥
वीरसेनाः पलायन्ते नात्र कार्य्या विचारणा।
कालाग्न्यद्युर्ग[illegible]र्द्वा[illegible]ैः पिष्ट्वा पादं प्रलेपयेत्॥
यथेष्टं जलमध्ये तु गच्छतो वा दृढा स्थले।
चन्द्रार्द्धसप्तभवने पादलेपाच्च पूर्व[illegible]त्॥

वेददिङ्मनिकामैश्च नाक्रामेत् वक्रगैर्विषम्।
स्मरार्कस्य गुणैर्युक्तं तिलकं शत्रुजिद्भवेत्॥
बाणर्त्तुभिश्च रुद्रार्कः तिलकं चाङ्गलेपनम्।
कृत्वा सर्पैर्गजैः क्रूरैर्व्याघ्रैर्दुष्टैर्न बाध्यते॥
सप्तषड्नवकर्चौ तु पुष्यार्के मूलसंयुतः।
दत्तं धूपं नरस्त्रीणां सर्वलोकवशङ्करम्॥
युगेन्दुमुनितिथ्यङ्कैः पेषयित्वा रवेर्दिने।
पुष्यार्के लेपयेत् स्वाङ्गं सर्वत्र विजयी भवेत्॥
स्पर्शमात्रे न सन्देहः शत्रुवादे जयङ्करः।
नगदिग्भिर्गुणैः षड्भिः युक्तं पञ्चमलैः सह॥
दशांऽशधूपलेपोऽयं धनधान्यकरो गृहे।
कलारुद्रेन्दुऋतुभिर्लेपनाद्धारणादपि॥
युद्धे वारणविख्यातं तथा लोकवशङ्करम्।
कलाषड्नवरुद्रेन्दु गव्याज्यैर्माहिषैर्घृतैः॥
भूताहे कज्जलं कृत्वा ह्यञ्जनं चातिमोहकृत्।
दृष्टिस्तम्भश्च कुरुते नराणां नात्र संशयः॥
नागेन्दुदिनदिङ्नागगुरुपुष्ये दिने कृतम्।
तैलेनागुरुधूपेन सर्ववश्यकरं परम्॥
स्मरार्कद्विगुणैर्युक्तं योगादौ योग उत्तमः।
कृत्वा तत्तिलकं भाले सर्ववश्यकरं परम्॥
तिलकं नात्र सन्देहो नानावादे जयो भवेत्।
दिग्बाणतिथिवेदैश्च पूर्णिमायां गुरोर्दिने॥
मूले पञ्चयुतं क्षिप्त्वा वापीकूपतड़ागके।
पिबन्ति तज्जलं ये तु ते च वश्या भवन्ति वै॥
नवषड्भिः पिबेद् यैश्च दर्शसोमदिने कृते।
देयं पञ्च मलार्पितं भोजने सर्ववश्यकृत्॥

दिनेन्दुसूर्य्यर्त्तुभिर्गुरुपुष्ये तु मेलितम् ।
हस्तार्के वाऽथ पूर्णायां धूपो वश्यकरो नृणाम् ॥
कलासप्तदिनवर्कैर्धुस्तूररसपेषितैः ।
स्वदेहलेपनं कुर्य्यात् रतौ रामा वशा भवेत् ॥
पञ्चगव्येन सह तैर्मनुसप्तयुगैर्ग्रहैः ।
कुमुदैः कमलैर्धूपो ज्वरभूतविषापहः ॥
मनुरुद्रयुगैर्बाणैर्भानुपत्रद्रवस्रुतैः ।
विषं चतुर्विधं हन्ति तस्य पानप्रधूपतः ॥
कर्णाश्चत्वारकाश्चैव एकवर्णागवां पयः ।
पिष्ट्वा पिबेदृतौ बन्ध्या सम्यक् पुत्त्रं प्रसूयते ॥
वसुरुद्रस्वरैर्द्वाभ्यां पूर्ववल्लभते सुतम् ।
द्विगुणैश्च स्वरैश्चूर्णं मूर्ध्नोच्चाटकृदीरितम् ॥
रुद्राष्टस्वरपक्षैस्तु शिवामध्वाज्यसंयुतैः ।
आलिप्ताङ्गो विवादे तु जयमाप्नोति नान्यथा ॥
तिथिपक्षयुतैः कामैर्दिनैर्दिनचतुष्टयम् ।
नरतैलेन तद्वर्त्तिर्दिवा पश्यति भूनिधिम् ॥
नवषड्नागरुद्रैश्च मुण्डितो निधिमग्रतः ।
शिलागुणस्वरैर्धन्यां हरिद्राघृतपानतः ॥
विषं नानाविधं हन्ति कालदष्टोऽपि जीवति ।
दिक्कलागुणबाणैश्च चूर्णं भक्ष्ये प्रदापयेत् ॥
सर्वेषां पशुजीवानां नानावश्यकरं परम् ।
कलाकामगुणैर्द्वाभ्यां कृत्वा रक्षां विधारयेत् ॥
मुच्यते बन्धनाच्छीघ्रं कृतदोषः क्षयं लभेत् ।
कलागुणयुगै रुद्रैः शतधा चाज्यपीड़ितैः ॥
कर्षमात्रं सदा खाने दद्यान्न पलितं व्रजेत् ।
वज्रकायो भवेद्वर्षाज्जीवेद्ब्रह्मदिनत्रयम् ॥

दिनेन्दुसूर्य्यर्क्षतुभिर्गुरुपुष्ये तु मेलितम्।
हस्तार्के वाऽथ पूर्णायां धूपो वश्यकरो नृणाम्॥
कलासप्तद्विनवकैर्धुस्तूररसपेषितैः।
स्वदेहलेपनं कुर्य्यात् रतौ रामा वशा भवेत्॥
पञ्चगव्येन सह तैर्मनुसप्तयुगैर्ग्रहैः।
कुमुदैः कमलैर्धूपो ज्वरभूतविषापहः॥
मनुरुद्रयुगैर्बाणैर्भानुपत्रद्रवस्तुतैः।
विषं चतुर्विधं हन्ति तस्य पानप्रधूपतः॥
कर्णाश्चत्वारकाश्चैव एकवर्णागवां पयः।
पिष्ट्वा पिबेट्टतौ वन्ध्या सम्यक् पुत्त्रं प्रसूयते॥
वसुरुद्रस्मरैर्द्वाभ्यां पूर्ववल्लभते सुतम्।
द्विगुणैश्च स्मरैश्चूर्णं मूर्ध्नोच्चाटकृदीरितम्॥
रुद्राष्टस्मरपत्रैस्तु शिवामध्वाज्यसंयुतैः।
आलिप्ताङ्गो विवादे तु जयमाप्नोति नान्यथा॥
तिथिपत्त्रयुतैः कामैर्दिनैर्दिनचतुष्टयम्।
नरतैलेन तद्वर्त्तिर्दिवा पश्यति भूनिधिम्॥
नवषड्नागरुद्रैश्च मुण्डितो निधिमग्रतः।
शिलागुणस्मरैर्धन्यां हरिद्राष्टतपानतः॥
विषं नानाविधं हन्ति कालदष्टोऽपि जीवति।
दिक्कलागुणबाणैश्च चूर्णं भक्ष्ये प्रदापयेत्॥
सर्वेषां पशुजीवानां नानावश्यकरं परम्।
कलाकामगुणैर्द्वाभ्यां कृत्वा रक्षां विधारयेत्॥
मुच्यते बन्धनाच्छीघ्रं कृतदोषः क्षयं लभेत्।
कलागुणयुगै रुद्रैः शतधा चाज्यपीड़ितैः॥
कर्षमात्रं सदा खाने दद्यान्न पलितं व्रजेत्।
वज्रकायो भवेद्वर्षाज्जीवेद्ब्रह्मदिनत्रयम्॥

कलापषण्मुनिवाख्यालैः चाङ्कुलीतैलकेन च ।
हस्तौ लिप्त्वा भजेल्लक्ष्मीं पादयोर्बीजधारणम् ॥
शतयोजनगामी च भवत्येव न संशयः ।
रुद्रेन्दुमनुनागाश्च नवनीतयुतेन च ॥
रविपत्रे[illegible] लेपेन नेत्रयोरञ्जनेन च ।
[illegible] कलारुद्रगुण[illegible] रामा यथा रम्भा गुणान्विता ॥
क[illegible] स्मारं [illegible]पोऽयं मधुमिश्रितः ।
अपस्म[illegible]हन्त्याशु यक्ष्माणञ्च महोत्कटम् ॥
गुणैः कामैः सुरैरुद्रैरङ्कुलीतैलपेषितैः ।
लौहेन वेष्टितैर्वक्त्रे धारितं पुष्यभास्करे ॥
अदृश्यो जायते सत्यं देवैरपि न दृश्यते ।
दिग्वेदमुनिकामैश्च ह्यङ्कुलीतैलपेषितैः ॥
पुष्यभास्करयोगेण त्रिलौहेन च वेष्टयेत् ।
मूर्ध्नि स्थैः खेचरत्वं स्यात् योजनानां शतावधि ॥

इति श्रीसिद्धनागार्जुनविरचिते कक्षपुटे सर्वसंख्यासाधनं नाम विंशः पटलः ।

समाप्तोऽयं ग्रन्थः ।